BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 51.

(बृहत्) वैयाकरणभूषणं

सर्वतन्त्रस्वतन्त्रश्रीमत्कौण्डभट्टविरचितम् ॥

(BRIHAT) VAIYÂKARAṆA BHÛSHAṆA,

A Treatise on Sanskrit Grammar,

BY PAṆDIT KAUṆDA BHAṬṬA.

EDITED BY

PAṆDIT RÁMA KRISHṆA ŚÁSTRÍ,

Alias TÁTYÁ ŚÁSTRÍ PATAVARDHAṆA,

PROFESSOR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

FASCICULUS 1.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

——:o:——

PRINTED AT THE RAJ RAJESHWARI PRESS & THE TARA PRINTING WORKS,
BENARES.

1899.

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

Nos. 51, 52, 53 & 54.

(बृहत्) वैयाकरणभूषणं

पदार्थदीपिका च सहितम्

सर्वतन्त्रस्वतन्त्रश्रीमत्कौण्डभट्टविरचितम् ॥

(BRIHAT) VAIYÂKARANA BHÛSHANA,

A Treatise on Sanskrit Grammar,

BY PANDIT KAUNDA BHATTA:

ALSO PADÂRTHA DÎPIKÂ BY THE SAME AUTHOR.

EDITED BY

PANDIT RÂMA KRISHNA ŚÂSTRÍ,

Alias TÂTYÂ ŚÂSTRÍ PATAVARDHANA,

PROFESSOR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

—:o:—

PRINTED AT THE RAJ RAJESHWARI PRESS & THE TARA PRINTING WORKS,

BENARES.

1900.

REGISTERED ACCORDING TO ACT XXV. OF 1867.

॥ श्रीः ॥

भूमिका।

अथैतेषु दिवसेषु सत्स्वपि परमप्राचीनेषु भाष्यकैयटाद्याकरग्रन्थेष्ववार्चीनेषु शब्देन्दुशेखरशब्दरत्नमनोरमादिषु विविधवादग्रन्थेष्वतिविस्तृतेष्वखिलवैयाकरणसिद्धान्तप्रतिपादकेषु तज्जिज्ञासूनां पुरुषायुषेणाप्यशेषतस्तज्ज्ञानासम्भवादनायासतस्तत्प्रतिपत्तये स्वापितृव्येण श्रीभट्टोजिदीक्षितेन विनिर्मितकारिकाया व्याख्यानमिषेण वैयाकरणभूषणं नाम निबन्धं निबबन्ध श्रीकोण्डभट्टाभिधमहासुधीः।

स चायं निबन्धो वैयाकरणप्राचीनमतसिद्धान्तानामुपपादकतया तार्किकमीमांसकादिबहुतरदुस्तर्काणां निरासकतया च विद्वज्जनानां महोपकारमापादयन्नपि केवलं पुस्तकालाभेन पठनपाठनादिव्यवहारागोचरीभूतो ऽभूत्सांप्रतिकानामध्येतॄणामध्यापकानां च। ते चाद्यावधि केवलमल्पधियां सुबोधायैतद्ग्रन्थकृता निर्मितं वैयाकरणभूषणसारनामकमेतत्पुस्तकस्थितालपविषयविभूषितमेव व्यवहारविषयीभूतं व्यतन्वन्। तदेवं विद्यावतामनल्पमपकारमपाकुर्वता हरिदासेति यथार्थनामश्रेष्ठिसद्वितीयेन व्रजभूषणदासनाम्ना श्रेष्ठिवरेण वाराणसेयसंस्कृतसेरिजाख्यस्वीयपुस्तकावल्यामेतत्प्रचिकाशयिषुणा वारंवारं प्रोक्तचरपुस्तकमुद्रणाय समभ्यर्थितो ऽहं शेषोपाख्यप्राचीनतरवैयाकरणमन्दिरान्महामहोपाध्यायभारद्वाजदामोदरशास्त्रिमित्रवरमन्दिराच्चानीतैतत्पुस्तकद्वयसहायेन परमपरिश्रमेण चैतत्संशोध्यामुद्रयम्।

परितुष्यन्तु च तदेनदतिप्राचीनवैयाकरणासिद्धान्तमतानिधानालभ्यलाभेन पठनपाठनादिप्रचारगोचरीकुर्वन्तो ऽपिशुना मामकीनं सीसकाक्षरयोजनजनिञ्चाशुद्धिगणमगणयन्तो ऽगण्यगुणगणमण्डिताः सर्वे पण्डिताः । प्रसीदतु चानेनादिप्रवर्तको व्याकरणादिविविधविद्याया भगवान् श्रीविश्वनाथो ऽस्मानिति मुहुर्मुहुरभ्यर्थयते ।

मार्गे वादि ६ रवौ
सं० १९५६

काशीस्थराजकीयसंस्कृतपाठशालाध्यापकः पटवर्धनोपनामको

रामकृष्णशास्त्री ।

॥ श्रीः ॥

भूमिका।

सन्त्यनेके तर्कशास्त्रेषु चिन्तामणिगादाधरीमाथुरीजागदीशी-सिद्धान्तमुक्तावलीप्रभृतय उत्तमाधिकारिणां तर्कसंग्रहप्रभृतयो मन्दाधिकारिणामुपकाराय बहुतरास्तत्तत्तार्किकैर्निर्मिता निबन्धास्तथापि मध्यमाधिकारिकल्पानामल्पधियामध्येतॄणां सुबोधाय विविधमतान्तरीयविषयविभूषितस्तर्कशास्त्रीयबहुविधपदार्थोपपादको न कोप्यद्यावधि कैश्चिन्निर्मितो निबन्ध इत्यालोच्य तथाविधविद्यार्थिनामुपयोगाय श्रीकोण्डभट्टाविदुषा तर्कदीपिका नाम सुप्रबन्धो निबन्धो ऽयं निरमायि। अयं च निबन्धकारो महामहोपाध्यायभट्टोजिदीक्षितभ्रातुष्पुत्र इति "भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये" इत्येतत्कृतवैयाकरणभूषणस्थलेखतो ऽवगत्या सुव्यक्त एव प्रसिद्धतरतत्कालनिर्णयेनैतत्कालनिर्णयोपि। एतत्पुस्तकमतीवालभ्यं केवलं कांशीस्थराजकीयसंस्कृतपाठशालास्थपुस्तकागारात्पुरातनमेकमन्ते कीटादिभक्षितकतिपयाक्षरकमशुद्धमासाद्य श्रेष्ठिवरहरिदासमहोदयार्यानिवार्यप्रार्थनया परमपरिश्रमेण च परिशोध्य निस्सार्य च सुबहूनि स्खलितानि संयोज्य च सुविचारेण तत्रतत्रोपयुक्तान्यक्षराणि वाराणसेयसंस्कृतसेरिजाख्यपुस्तकावल्यां विद्यारसिकाना-

मुपकारायैककर्तृकत्वाद्वैयाकरणभूषणेन सहैव चैकस्मिन् पुटके संमुद्रये । संप्रार्थये च सर्वान्तःप्रेरकं परमेश्वरं विश्वनाथं सदा पठनपाठनादिप्रचारेण मामकीनं संशोधनादिकं मुद्रणायासं विद्वज्जनः सफलयतादिति ।

माघ वदि १३ सोमे
सं० १९५६

काशीस्थराजकीयसंस्कृत-
पाठशालाध्यापकः पट-
वर्धनोपनामको

रामकृष्णशास्त्री ।



॥ श्रीः ॥

॥ वैयाकरणभूषणम् ॥

श्रीलक्ष्मीरमणं नौमि गौरीरमणरूपिणम् ।
स्फोटरूपं यतः सर्वं जगदेतद्विवर्त्तते ॥ १ ॥
अशेषफलदातारं भवाब्धितरणे तरिम् ।
शेषाशेषार्थलाभार्थं प्रार्थये शेषभूषणम् ॥ २ ॥
वाग्देवी यस्य जिह्वाग्रे नरीनर्त्ति सदा मुदा ।
भट्टोजिदीक्षितमहं पितृव्यं नौमि सिद्धये ॥ ३ ॥
पाणिन्यादिमुनीन्प्रणम्य पितरं रङ्गोजिभट्टाभिधम्
द्वैतध्वान्तनिवारणादिफलिकां पुम्भाववाग्देवताम् ॥
दुर्ण्दि गौतमजैमिनीयवचनव्याख्यातृभिर्दूषितान्
सिद्धान्तानुपपत्तिभिः प्रकटयं तेषां वचो दूषयेय ॥ ४ ॥
नत्वा गणेशपादाब्जं गुरूनथ सरस्वतीम् ।
श्रीकोण्डभट्टः कुर्वेहं वैयाकरणभूषणम् ॥ ५ ॥

प्रारिप्सितप्रतिबन्धकव्यूहोपशमनाय विरचितं श्रीपतञ्जलिस्मरणरूपं मङ्गलं शिष्यशिक्षार्थं निबध्नन् चिकीर्षितं प्रतिजानीते ॥

फणिभाषितभाष्याब्धेः शब्दकौस्तुभ उद्धृतः ।
तत्र निर्णीत एवार्थः संक्षेपेणेह कथ्यते ॥ १ ॥

देवतान्तर त्यक्त्वा फाणिन एव स्मरणं तु तस्य प्रकृतशास्त्रनिर्मात्रभ्यर्हितत्वेनेष्टतमत्वादित्याहुः । उद्धृत इत्यत्रास्माभि-

रिति शेषः । भाष्याब्धेः शब्दकौस्तुभ उद्धृत इत्युपादानं च तत्रत्यकथनस्याधुनिककल्पितत्वेन पाणिनीयानामश्रद्धेयत्वव्युदासाय । तस्याश्रद्धेयत्वे च तन्मूलकत्वादेतस्याप्यश्रद्धेयत्वं स्यादिति भावः । तत्र निर्णीत इत्याद्युपादानं चेतोप्यधिकजिज्ञासुभिरस्मत्कृताच्छब्दकौस्तुभादवधेयमिति ध्वनयितुम् ॥

अत्रभवद्भिर्भाष्यकारादिभिः सप्रमाणमुपपादितान् श्रीभर्तृहरिगुरुचरणप्रभृतिभिरतितरां विशदीकृतानपि वैयाकरणाभिमतपदार्थान् विकल्पग्रस्तचित्तत्वान्न सम्यगधिगन्तुमीशते दूषयन्ति चातस्तानेव निपुणतरमुपपादयन्नाह ॥

फलव्यापारयोर्धातुराश्रये तु तिङः स्मृताः ।
फले प्रधानं व्यापारस्तिङर्थस्तु विशेषणम् ॥ २ ॥

तत्रापि प्रायशो वाक्यस्य सुप्तिङन्तसमुदायत्वात् सुबन्तानां च प्रायः क्रियाविशेषणत्वाद्धातोश्च क्रियावाचकत्वेन पुरस्फूर्तिकत्वादिच्छावशाद्वा प्रथमतो धात्वर्थनिरूपणमिति बोध्यम् । धातुः स्मृत इत्यन्वयः । वाचकत्वेनेति शेषः । फलं विक्लित्त्यादि तत्तद्रूपेण वाच्यम् । तद्वाचकतापि तत्तद्रूपेण । फलविशिष्टव्यापारे एकशक्तौ चैकदेशत्वात्फलस्य तत्र पदार्थान्तरान्वयो न स्यादित्यादि वक्ष्यते । फलव्यापारयोः साध्यसाधनभावस्तु संसर्गः । अतो जनकत्वांशे शक्तिं विनापि फलजनकत्वं व्यापारे सुलभम् । एकपदोपस्थाप्ययोरपि कृतीष्टसाधनत्वयोः कृतिवर्त्तमानत्वयोर्वा यथा परेषामन्वयस्तथास्माकमपीति न कश्चिद्दोषः । अथ कोयं व्यापारः । न तावत्फलप्रयोजकक्रिया । आत्माश्रयात् । क्रियात्वस्यैव तत्त्वात् । दण्डादिव्यापारस्यापि धात्वर्थत्वापत्तेश्च । न चे-

ष्टापत्तिः । धातूपात्तव्यापाराश्रयत्वेन दण्डादेः कर्तृत्वापत्तेः । तथा च दण्डेन देवदत्तः पचतीत्यादौ प्रथमापत्तेः । न चेयमनभिहिते करणे एव तृतीयेति वाच्यम् । दण्डादेः कर्तृत्वे करणत्वस्यैवासम्भवात् । आकडारादेकासंज्ञेति नियमनात् । अन्यथा दण्डेन दण्डः करोतीत्यपि स्यात् । न च "त्मानमात्मना वेत्सि सृजस्यात्मानमात्मना । आत्मानमात्मना हंसी"-त्यादिवदिष्टापत्तिः । औपाधिकभेदमादायैवात्र कर्तृत्वकर्मत्वाद्युपपादनस्य कर्मवत्कर्मणातुल्यक्रिय इति सूत्रे भाष्ये कृतत्वात् । न चागत्या निरवकाशा करणसंज्ञा कर्तृसंज्ञां बाधिष्यतइति वाच्यम् । गतेर्वक्ष्यमाणत्वात् । नापि यदनन्तरमव्यवधानेन फलोत्पादः सा क्रिया । यथौदनं पचतीत्यत्र विक्लेदनम् । अधिश्रयणादीनां तज्जनकतया क्रियात्वमौपचारिकम् । उक्तं च । अनन्तरं फलं यस्याः कल्पते तां क्रियां विदुः । प्रधानभूतां तादर्थ्यादन्यासां तु तदाख्ययेति वाच्यम् । सम्भवति मुख्यत्वे गौणताया अन्याय्यत्वात्, काष्ठादिक्रियाया अव्यवहितपूर्ववर्त्तित्वेनोक्तदोषाच्च । आरब्धेपि पाके क्रियाया भावित्वात्पक्ष्यतीति प्रयोगापत्तेश्च । अथ पचतीत्यनुगतव्यवहारादस्ति पचित्वं जातिः सैव क्रिया । न च क्रियायाः साध्यत्वं न स्यात् । नास्त्येव । किं तु तदाश्रयाणामेव साध्यत्वम् । उक्तं च । जातिमन्ये क्रियामाहुरनेकव्यक्तिवर्त्तिनीम् । असाध्या व्यक्तिरूपेण सा साध्येवोपलक्ष्यतइति चेन्न । दण्डादिव्यापारस्यापि फलानुकूलत्वेनोक्तदोषात् । तत्र जातिर्नास्तीति चे, तार्हि दण्डः पचतीत्यपि न स्यात् । एतेन चरमव्यापारवर्तिनी जातिः क्रियेति निरस्तम् । तस्मात् तद्वार्तिरूपमेव क्रियात्वमिति चेन्न । भावनाभिधः साध्यत्वेना-

भिधीयमानो व्यापारविशेषः क्रिया । उक्तं च वाक्यपदीये । यावत्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयते । आश्रितक्रमरूपत्वात्सा क्रियेत्यभिधीयते इति । वक्ष्यति ग्रन्थकारोपि । व्यापारो भावना सैवोत्पादना सैव च क्रियेति । न च साध्यत्वेनाभिधाने मानाभावः । पचति पाकः करोति कृतिरित्यादौ धात्वर्थावगमाविशेषेपि क्रियान्तराकाङ्क्षानाकाङ्क्षयोर्दर्शनस्यैव मानत्वात् । तथा च क्रियान्तराकाङ्क्षानुत्थापकतावच्छेदकं रूपं साध्यत्वन्तदेवासत्त्वभूतत्वम्भावनायाः प्रत्ययार्थतावादेपि पचति पाकभावनेत्यादौ तथादर्शननास्यास्तथात्वावश्यकत्वात् । अत एव वक्ष्यति 'साध्यत्वेन क्रियातत्रे'त्यादि । व्युत्पादयिष्यते चैतदुपरिष्टात् । स च व्यापार आत्मनिष्ठः प्रयत्नः शरीरादीनां च फूत्कारादिः, तद्वत्येव पचतीति व्यवहारात् । अथैवमपि सर्वैतत्साधारणधर्मस्याभावाच्छक्यतावच्छेदकाभावे कथं स शक्यः । न च तत्त्वमेवावच्छेदकम् । नानार्थत्वापत्तेः नानाशक्त्यापत्तेश्च । ननु शक्यतावच्छेदकतयैवानुगतस्य तस्य सिद्धिः । यथा कारणतावच्छेदकत्वादिना, अत एव जलशब्दशक्यतावच्छेदकतया जलत्वसिद्धिरिति लीलावत्युपाये उक्तम् । द्रव्यानुगतबुद्ध्या द्रव्यत्वस्य गुणपदशक्यतावच्छेदकतया गुणत्वस्य च सिद्धिरित्यपरे । तच्च जातिरुपाधिर्वेत्यन्यदेतदिति चेन्न । येन रूपेण बोधस्तस्यैव शक्यतावच्छेदकत्वात् । कल्प्यमानधर्मपुरस्कारेण च न शाब्दबोधः । न च कारणतावच्छेदकत्वादिनापि जातिर्न सिध्येत् । येन रूपेण कारणताबोधस्तस्यैव कारणतावच्छेदकत्वौचित्यादिति वाच्यम् । कल्प्यमानलघुरूपेण कारणत्वे सम्भवति गुरुरूपेण तदस्वीकारेण तत्र क्षत्यभावात् । अत्र च सिद्धरूपेण बोधस्या-

नुभवसिद्धत्वात्तथाकार्यकारणभावावश्यकत्वे कल्प्यमानधर्मेणापि कार्यकारणभावान्तरकल्पने गौरवमिति न तत्कल्पनं युक्तम् । अन्यथा सैन्धवादिपदवाच्यतावच्छेदकत्वेनाप्यश्वादिवृत्तिधर्मान्तरकल्पनापत्तेः । अश्वत्वादिनैव प्रतीतेस्तत्कल्पना न युज्यतइति चेत्, समैवात्रापि फूत्कारत्वयत्नत्वादिनैव प्रतीतिरिति दिक् । इदं च तार्किकरीतिमनुरुध्य । वस्तुतः कारणतावच्छेदकत्वादिनापि न जातिसिद्धिरिति व्यापारो भावनेति कारिकायां वक्ष्यते इति कथमेतदिति चेन्न । तत्तद्रूपेणैव तस्य शक्यत्वात् । अत एव पचतीत्यादौ फूत्कारत्वाधःसन्तापनत्वयत्नत्वादिभिर्बोधः सर्वसिद्धः सङ्गच्छते । न च नानार्थता । बुद्धिस्थत्वादेः शक्यतावच्छेदकानां तदादाविवानुगमकस्य सत्वात् । उक्तं च हरिणा । गुणभूतैरवयवैः समूहः क्रमजन्मनाम् । बुद्ध्या प्रकल्पिताऽभेदः क्रियेति व्यपदिश्यते, इति । क्रमजन्मनामेषां व्यापाराणां समूह एकत्वबुद्ध्या संकलनात्मिकया प्रकल्पितो ऽभेदो यस्य स च समूहः स्वभावतो गुणभूतैरवयवैर्युक्त इत्यर्थः । एवं च सर्वेषां कारकाणां व्यापारा वाच्याः । यो यदा यस्य बुद्धिस्थस्तदा सोभिधीयते तदैव तदाश्रयः कर्त्ता । अत एव काष्ठं पचति स्थाली पचतीति सङ्गच्छते । एवं च काष्ठेन पचतीत्यपि नानुपपन्नम् । तदा तद्व्यापारस्य धात्वर्थत्वाविवक्षणात् । एतेन काष्ठक्रियाया वाच्यत्वे तृतीया न स्यात् । अवाच्यत्वे प्रथमा न स्यादित्यादिकमपास्तामिति न कश्चिद्दोष इति ध्येयम् । एतस्य धातुवाच्यत्वे मानं तु वक्ष्यते । अयं प्रत्ययवाच्य एवेति मीमांसकाः । अयं न वाच्यः किं त्वेतद्विशेषः कृतिरिति नैयायिकाः । तत्रापि वक्ष्यते । आख्यातस्य न कर्त्ता वा-

च्यः । कृतिमतो व्यापारवतो वा कर्तृत्वेन तच्छक्तावनन्त-कृत्यादौ शक्यतावच्छेदकत्वे गौरवादिति नैयायिकाद्युक्तं दूषणमस्मन्मताज्ञानादिति ध्वनयन्नेव स्वमतमाह । आश्रये त्विति । आश्रये फलाश्रये व्यापाराश्रये च । फलव्यापारयोर्धातुलभ्यत्वादाश्रयमात्रमर्थः । अनन्यलभ्यस्य शब्दार्थत्वात् । तथा चाश्रयत्वेनैव शक्यतावच्छेदकमतो नोक्तदोषावकाश इति भावः । अत एव कृतिविशिष्टकर्तृवाचितृचः कृतिवाचककृधातुयोगे कर्त्तेत्यत्राश्रयपरत्वमिति नैयायिकाः । एवं कृत्प्रत्ययस्थले भावनांशस्याक्षेपलभ्यत्वादाश्रयमात्रमर्थ इति मीमांसका मन्यन्ते । अथाश्रय आख्यातार्थ इत्यत्र मानाभावः । तत्प्रतीतिश्चाक्षेपालक्षणया वोपपद्यते । प्रथमान्तपदेन तदुपस्थितिसत्वादेवदत्तः पाकानुकूलकृतिमान् एकदेवदत्ताश्रयको वर्त्तमानो व्यापार इति बोधोपपत्तावन्यलभ्यत्वेन शक्तिकल्पनाऽयोगाच्चेति चेत् । अत्र वदन्ति । कर्त्रादेरवाच्यत्वे युष्मदि समानाधिकरणे मध्यम इति पुरुषव्यवस्था न स्यात् । कर्त्तुरवाच्यत्वेन सामानाधिकरण्याभावात् । देवदत्तः पचतीत्यादौ कर्त्तरि तृतीया पच्यते तण्डुल इत्यादौ द्वितीया च स्यात् । कर्त्राद्यनभिधानेन तयोर्दुर्वारत्वात् । ननु तन्निष्ठसंख्याभिधानात्तदभिधानम्, एवं युष्मदस्तिङुपात्तसंख्यान्वयिवाचकत्वं सामानाधिकरण्यमपीति चेन्न । तिङ्वाच्यसंख्यायाः कृत्यान्वय इत्यनिश्चयात् । तथा च कर्तृप्रत्ययेपि संख्याया उभयत्रान्वये उभयोरप्यभिधेयत्वं स्यात् । न च कर्त्रैकत्वेनैव संख्याभिधीयतइति शङ्क्यम् । तथा शक्तेरबोधनात् । विशेषणतया कर्त्तुर्वाच्यत्वसिद्धेश्च शक्यतावच्छेदकेपि गौरवाभावेनि । किं च कृत्तद्धितसमासैः संख्यानभिधानात्तत्रैव क-

र्तुरनभिधाने देवदत्तः पाचकः इत्यादौ तृतीयाद्यापत्तेः । वस्तुतस्तिङ्स्थले कर्तुरवाच्यत्वे पचमान इत्यादौ कृत्यपि तन्न स्यात्। युक्तेस्तुल्यत्वात् । लकारस्य वाचकस्योभयत्रैकत्वात् । आदेशानां वाचकत्वे हरेव विष्णोव रामभित्यादौ सर्वे सर्वपदादेशा इति न्यायेन वाक्यपदस्फोटयोः सिद्ध्यापत्तेः, अपसिद्धान्ताच्च । न च कृति कर्तुरवाच्यत्वे इष्टापत्तिः । समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तिभङ्गापत्तेः । जञ्जभ्यमानाधिकरणोच्छेदप्रसङ्गाच्च । शानचा कर्तुरुक्तत्वाच्छक्त्या पुरुषार्थत्वमिति सिद्धान्तस्यैव सम्भवात् । तस्मादवश्यं कर्तृकर्मणोर्वाच्यत्वमुपेयमिति । अत्र नैयायिकाः, कर्तृसंख्याभिधानादेव तदभिधानं वाच्यम् । न च तदन्वयनियमे मानाभावः । भावनान्वयिन्येव तदन्वयात् । संख्याभावनयोः समानपदोपात्तत्वेनैकान्वयित्वस्योचितत्वात् । भावनायाश्चेतराविशेषणीभूतप्रथमान्तपदोपस्थाप्यएवान्वयः । तथैवाकाङ्क्षितत्वात् । एवं कृदादावपि कर्त्राद्यभिधानादेवाभिधानव्यवस्था, अन्यतरानभिधाने तृतीयेति सूत्रार्थः । तस्मान्नोक्तानुपपत्तिः । कृत्प्रत्ययस्थले च कर्तुरवाच्यत्वे अभिधानव्यवस्थानापत्तेः । न च कृत्यभिधानादभिधानम् । कर्मप्रत्ययस्थलेप्यापत्तेः मित्रापक्रीगतं पुरमिति लिङ्गविशेषेण सामानाधिकरण्यानापत्तेर्वा तत्र वाच्यतास्वीकारः समानाधिकरणस्यैव विशेषणस्य समानलिङ्गत्वात् । अन्यथा राज्ञः स्त्री इत्यादावपि प्रसङ्गात् । एवमाख्यातार्थस्य प्रथमान्तार्थे एवान्वयव्युत्पत्तेः । पक्ता तृप्यतीत्यत्र पाकानुकूला कृतिस्तृप्यतीति बोधः स्यात्तथा चानन्वयः । अतः कृति कर्त्तावश्यं वाच्यः । लकारस्यैकस्य वाचकत्वेपि शानजादौ कर्त्तरि लक्षणा न शक्तिः, येनानेकर्थता

स्यात् । तृजादेः परं शक्तिरिति न दोषः । आदेशानां वाचकत्वेपि न दोषः । हरेत्यादौ च प्रत्येकं पदानामवधृतशक्तिकानां तत्तदर्थोपस्थापनद्वारा वाक्यार्थबोधकत्वसम्भवान्न वाक्यस्फोटादिः । अत्र त्वनुपपत्त्या कर्तर्येव शक्तिरित्याहुः । भावनान्वयिनि संख्यान्वय इत्यसङ्गतम् । न पचतीत्यत्र भावनानन्वयिन्येव कर्त्तरि तदन्वयेन व्यभिचारात् । संख्यायाः प्रत्ययार्थत्वाद्भावनायाश्च धात्वर्थत्वस्य वक्ष्यमाणत्वात्समानपदोपात्तत्वस्याभावाच्च । विशेष्यतयाख्यातजन्यसंख्याबोधं प्रति तेनैव सम्बन्धेन भावनाप्रकारकबोधसामग्रीत्वेन हेतुत्वपर्यवसानेन गौरवाच्च । समानपदोपस्थितान्वयित्वमपेक्ष्य समानपदोपात्तत्वस्यैव लाघवेन संख्यान्वयनियामकत्वौचित्याच्च । भावनान्वयनियामकस्यैव तद्धेतोरिति न्यायेन संख्यान्वयनियामकत्वौचित्याच्च । भावनान्वयिनि संख्यान्वय इतिवत्संख्यान्वयिन्येव भावनान्वय इत्यस्यापि सुवचत्वाच्च । तस्मात् प्रथमान्तपदोपस्थाप्यएव संख्यान्वयः, प्रथमान्तपदोपस्थाप्यत्वमेव नियामकम् । किञ्चैवं सति विशेष्यतासम्बन्धेनाख्यातार्थसंख्याप्रकारकबोधं प्रति इतराविशेषणप्रथमान्तपदजन्योपस्थितिर्विषयतया कारणमिति लघुभूतः कार्यकारणभावः फलितः । ' नारायण इव नरो हन्ति ' ' चन्द्र इव मुखं दृश्यते' इत्यत्र नारायणे चन्द्रे च संख्यान्वयवारणायेतराविशेषणेति । चैत्रेण सुप्यतइत्यत्र चैत्रनिष्ठस्वाप इति बोधाद्विशेष्ये स्वापे तद्वारणाय प्रथमान्तेति । वस्तुतस्तु तवापि कुत्र कर्त्ता वाच्यः, कुत्र कर्मेत्यत्र नियामकाभावाच्छबादिकं द्योतकं वाच्यम्, तथा च ममापि कुत्र संख्यान्वय इत्यत्रापि तदेव द्योतकमिति न काप्यनुपपत्तिः । एवं कृदादिसाधारण्याय मुख्य-

भाक्तसाधारणकृत्यनभिधानात्कर्तुरनभिधानमिति व्यवस्था आश्रयणीया। कर्मप्रत्यये च फलमेवार्थः कृतेस्तृतीयया लाभात्। एवं च फलानभिधानमेव कर्मानभिधानम्। यद्यप्येवं कृत्प्रत्यये प्रागुक्तरीत्या ऽनभिधानव्यवस्था कर्तृवाच्यत्वसाधिका न भवति। तथापि देवदत्तः पाचक इत्यादिसामानाधिकरण्यानुपपत्त्याद्येव तत्साधकं द्रष्टव्यम्। शेषं प्राग्वदेवेति पुनस्तन्वीनाः॥

अत्रोच्यते॥ विशेष्यतासम्बन्धेनाख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्याश्रयोपस्थितेर्हेतुत्वं लाघवादिति कर्तृकर्मणोस्तिङ्वाच्यत्वमावश्यकम्। न तु त्वदुक्तरीत्या प्रथमान्तपदजन्यज्ञानं तथा। एतादृशाकांक्षायाः पदद्वयघटितत्वेन गुरुत्वात्। इतराविशेषणत्वघटितत्वेन सुतरां गौरवाच्च। न चाख्यातस्य भावनामात्रवाचकत्वग्रहवतस्तादृशबोधानुरोधेनोक्तकार्यकारणभावस्तवाप्यावश्यक इति वाच्यम्। एवं हि यत्नस्य धातुवाच्यत्वग्रहवतः पाकानुकूलव्यक्तिमानिति बोधानुरोधेन धात्वर्थप्रकारकशाब्दबोधे प्रथमान्तपदजन्योपस्थितिर्हेतुरित्यस्यावश्यकत्वेन रथो गच्छति जानाति करोतीत्यादौ धात्वर्थस्य साक्षाद्रथादौ भानसंभवेनाख्यातस्याश्रयत्वलक्षणाभ्युपगमानापत्तेः। रथेन ग्रामो गम्यते इत्यादौ धात्वर्थफलस्यैव साक्षात्कर्मणि भानसंभवात्कर्माख्यातानां फलवाचकत्वाभ्युपगमवैयर्थ्यापत्तेश्च। विवेचयिष्यते चैतदुपरिष्टात्। न च तत्तद्व्यक्त्युत्पत्तिग्रहशालिपुरुषशाब्दबोधानुरोधेनोदाहृतकार्यकारणभावद्वयमप्यावश्यकं पक्षं तु आख्यातस्य कर्त्तरि शक्तावनन्तवृत्त्यादाववच्छेदकत्वापत्तावतिगौरवं परमतिरिच्यतइति वाच्यम्। भावनाश्रयत्वस्यैवाखण्डशक्तिरूपस्यावच्छेदकतायाः प्रागुक्तत्वे

नैतद्गौरवस्य स्वयासनामात्रकल्पितत्वादिति । अपि चैवं कृता-
मपि कर्तृवाचकत्वं न स्यात् । गौरवस्य साम्यात् । अथ चैत्रो
गन्तेत्यत्राभेदान्वयादवश्यं कर्त्ता वाच्यस्तत्राभ्युपगन्तव्यः । न
च चैत्रो गच्छतीतिवद्गन्तेस्तत्राप्याश्रयतया कृतेश्चैत्रान्वयाद्धे-
त्वसिद्धिः । समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः ।
भेदान्वयबोधे एकपदोत्तरविभक्तिविरुद्धविभक्तिमत्पदजन्योप-
स्थितेर्हेतुत्वाच्च । चैत्रो गन्तेतिवच्चैत्रे गन्तेत्यापत्तेश्चेति चेत्,
अत्रोच्यते । षष्ठी न राज्ञः सूतस्य धनं पचतितरां चैत्रः पच-
तिकल्पं मैत्र इत्यादावभेदबोधाद्भेदेन बोधदर्शनाच्चोक्तकार्यका-
रणभावद्वयस्यापि व्यभिचारः । न चात्रायोग्यत्वान्नान्वयः ।
कृत्यपि तथा सुवचत्वात् । एवं पचतिकल्पं मैत्र इत्यादावपि नामा-
र्थत्वेप्याश्रयाश्रयिभावेनान्वयः संभवत्येव । न चात्राख्यातस्य
कर्तरि लक्षणा । एवं हि पक्का गच्छतीतिवत्पचतिकल्पं गच्छ-
तीत्यापत्तेः । किं चात्रैव नामाख्यातार्थयोरभेदान्वयस्य क्लप्त-
त्वात्तदनुरोधाच्चैत्रः पचतीत्यत्राभेदानुभवाच्चाख्यातस्य कर्तृवाच-
कत्वापत्तौ सिद्धं नः समीहितम् । न च कल्पबादेरेव कर्तरि ल-
क्षणा, तथासत्याचार्यकल्पावाचार्यकल्पा इतिवद् द्विवचनादेरपि
कर्तृत्वादिविवक्षायामापत्तेः । न च सुब्विरुद्धतिङन्तोपस्थाप्यत्वे-
न कृतेर्भेदेनैवान्वय इति वाच्यम् । स्तोकं पचतीत्यादौ स्तोक-
पाकयोरभेदबोधानापत्तेः । तस्माद्भेदेन नामार्थप्रकारकबोधे सार्थ-
कसुब्निपातजन्यैवोपस्थितिर्हेतुरिति हेतुहेतुमद्भावादाख्यातार्थे-
नाभेदबोधो दुर्वार इति वक्ष्यामः । यत्तु चैत्रे गन्तेति स्यादिति ।
तन्न । चैत्रे गच्छतीत्यस्याप्यापत्तेः । यदि चाख्यातार्थस्य प्र-
थमान्तोपस्थाप्यएवान्वयस्तदात्रापि कृदर्थप्रकारकशाब्दबोधं
प्रति समानाधिकरणपदजन्योपस्थितिर्विषयतया हेतुरिति कार्य-

कारणभावोस्तु । कार्यकारणभावान्तरकल्पनागौरवं चाख्यातार्थभावनान्वयाय प्रथमान्तपदजन्योपस्थितिहेतुत्वकल्पने ऽपि तुल्यम् । कृदर्थवदभेदबोधे वक्ष्यमाणसिद्धकार्यकारणभावेन निर्वाहोपपत्तेरिति दिक् । पक्त्रेत्यादौ तृजर्थकृतेर्न नामार्थत्वमपि, तृजन्तस्यैव नामत्वात् । पाकाद्यनुकूला कृतिरेव हि नामार्थः न तु शुद्धा । तथा च नामार्थस्य विशेष्ये विशेषणमितिन्यायेनैव चैत्रादावन्वय इत्यपि कश्चित् । अथैवमपि मित्रापक्त्रीति लिङ्गेन सामानाधिकरण्यात्तत्र कर्त्ता वाच्य इति चेन्न । तस्य साधुत्वार्थमप्युपपत्तेर्वस्त्वव्यवस्थापकत्वात् । एतादृशानां विशेष्यनिघ्नत्वस्य सर्वसिद्धत्वात् । अन्यथा शुक्लादिपदानां द्रव्येपि शक्त्यापत्तेः । रूपमात्रे शक्तौ शक्यतावच्छेदकलाघवस्य नीलं रूपमित्यादौ केवलरूपे प्रयोगस्य च पक्ता जातः पाठको जात इत्यादौ कृतां केवलकृतौ शक्तिसाधकेनाविशेषात् । अत एव सामानाधिकरण्यं नैकविभक्तिनिर्देश्यत्वमर्थसाधकम् । प्रयोगस्य वस्त्वव्यवस्थापकत्वादिति द्वित्वप्रत्यक्षविचारे गुणोपायेप्युक्तम् । किं चैवं समानाधिकरणस्य विशेषणस्य विशेष्यसमानलिङ्गत्वनियमवत्तादृशस्यैव विशेषणस्य विशेष्यसमानवचनत्वनियमादाख्यातस्यापि कर्तृकर्मवाचकता दुर्वारा । अन्यथा देवदत्ताः पचतीत्यादेरप्यापत्तेः । न च चैत्रो मैत्रश्च गच्छतः सुन्दरावित्यादौ व्यभिचारान्नायं नियमः । क्षुदुपहन्तुं शक्यं शैत्यं हि यत्सा प्रकृतिर्जलस्येत्यादौ तस्यापि तुल्यत्वात् । भोक्ता तृप्यतीत्यादौ च कृतः कृतिमात्रवाचकत्वेपि नानुपपत्तिः । न पचति चैत्र इत्यत्र प्रतियोगितासम्बन्धेन नञर्थेन सामानाधिकरण्यसम्बन्धेन कृदर्थकृतेरप्याख्यातार्थकृत्यन्वयसम्भवात् । न चाधारतया तिङर्थकृतिबोधे प्रथमान्त-

दजन्योपस्थितेर्हेतुत्वं सुवचम् । न पचति चैत्र इत्यादाव्यनन्वयापत्तेः । अस्तु वा तत्र कृतः कर्त्तरि लक्षणा । अतो नानुपपत्तिः । न च केवलकृतौ प्रयोगात्तत्र शक्तिनिर्णये सत्यव तद्वति लक्षणा युज्यतइति वाच्यम् । पक्ता जात इत्यादौ परेषां पचतीत्येवोक्ते केवलकृतिबोधवत्केवलं पक्तेत्येवोक्ते च केवलकृतौ प्रयोगात् । अन्यथा ऽऽख्यातस्यापि कर्तृवाचकतापत्तेः । वस्तुतस्तु पश्य मृगो धावति, पश्य नृत्यति भवति, पचति भवतीत्यादौ धात्वनादिभावनाया दर्शनादौ विशेषणतया ऽन्वयबोधानुरोधादुक्तुरपि तथैव तात्पर्याद्भाष्यकारैरपि तथैवाभ्युपगमेनैतादृशेष्वेकवाक्यतापतिपादनाच्च नाख्यातार्थभावनाप्रकारकबोधं प्रति प्रथमान्तपदजन्योपस्थितेः कारणत्वं व्यभिचारात् । चैत्रः पचतीत्यत्र नैयायिकानां तथान्वयबोधस्तु तादृशव्युत्पत्त्यनुरोधात् । अत एव मीमांसकादयश्चैत्रनिष्ठा भावनेति भावनाविशेष्यकमेव बोधमाहुः । तस्मान्न तथा कार्यकारणभावमूलिका कृतां कर्त्तरि शक्तिर्युक्ता, किं तु चैत्रः पाचक इत्यभेदान्वयानुरोधात्स घाख्यातेपि सम इति स्यादेव तत्रापि कर्त्रादिवाचकत्वमिति विभावयामः ॥

के चित्तु कर्तुरवाच्यत्वे पचतीत्यत्र पाककर्तुर्मानस एकत्वसंशयः स्यात् । ननु कर्त्तुरनुपस्थितौ धर्मिज्ञानाधभावात्कथं संशयः । लक्षणया तदुपस्थितौ चैकत्वविशिष्टे लक्षणाभ्युपगमान्न संशय इति चेन्न । मनसा तदुपस्थितिसम्भवात् । न चोपस्थितत्वात्संख्यान्वयोपि स्यादिति कथं संशय इति वाच्यम् । शब्दोपस्थितस्यैव नैयायिकैः शाब्दे ऽन्वयाङ्गीकारात् । न च लक्षणयोपस्थितेः संख्यान्वयस्य सुवचत्वान्न संशय इति वाच्यम् । न्यायनये सर्वत्र लक्षणायां बीजाभावात् । प्रथमान्तपदादनु-

पस्थितेस्तदन्वयासम्भवाच्चेति वदन्ति । अधिकं वक्ष्यमाणरीत्यावधेयमिति दिक् ॥

मीमांसकास्त्वनभिहितइत्यस्याबोधिते इत्यर्थः । बोधश्च शक्त्या आक्षेपाद्वा । स चाख्याते आक्षेपात् । कृति तु शक्त्या । अत एव कर्त्रधिकरणे भट्टैरुक्तम् । "यादृशस्तु गुणभूतः कर्त्तात्रावगम्यते न तादृशेन विना भावनोपपद्यत इति अर्थापत्त्यानुमानेन वा शक्ताऽनुगमयितु" मित्यादिना । ननु कृति आक्षेपात् आख्याते शक्त्येति वैपरीत्यं किं न स्यात् इति चेन्न । प्रधानीभूतया भावनया कर्त्तुराक्षेपस्य युक्तत्वात् । भावनाया आक्षेपलभ्यत्वे च प्राधान्यानुपपत्तेः । एवं कृत्यपि प्राधान्यात् कर्त्तुर्वाच्यत्वमावश्यकमिति युक्तस्तेनाक्षेपः । उक्तं च । यदि कर्त्रा धात्वर्थेन वा भावनावगम्येत ततः पाचकपाठकादिपदेष्विव तिरोहितस्वरूपा ऽवगम्येत । प्राधान्यात्तु शब्दार्थत्वाध्यवसानमिति । पदादनुपस्थितस्य कर्त्तुः कथं शाब्दबोधविषयत्वमिति चेत् । अत्र नामार्थनिर्णये वक्ष्यते । तस्मान्नाख्यातस्थले कर्तृकर्मणी वाच्ये । अभिधानव्यवस्थायाः प्रकारान्तरेणोपपत्तेरिति वदन्ति ॥

अत्रोच्यते । यथाकथञ्चिद्भावनाक्षेपमात्रेण प्रत्यायितत्वमभिधानव्यवस्थायां नोपपादकम् । कर्मप्रत्ययेपि भावनाया विना आश्रयमनुपपत्तेः । कर्त्तुराक्षेपात्कर्त्रभिधाने तृतीयानापत्तेः । आख्याते शक्त्या कृत्याक्षेपादिति वैपरीत्यस्य दुर्वारत्वाच्च । यत्तु तथा सति प्राधान्येन भानं न स्यादिति । तन्न । आक्षेपलभ्यस्यापि प्राधान्येन भाने बाधकाभावात् । अन्यथा प्राधान्यानुरोधाद्व्यक्तेर्वाच्यत्वस्वीकारापत्तावाकृत्याधिकरणं दत्तजलाञ्जलि स्यादिति । ननु कर्त्रा स्वस्वरूपानिरूपकत्वेन भावनाया आक्षेपाद् गुणत्वम् । जात्या तु लोके परिच्छेद्यतयावगतं द्रव्यं

तथैवाक्षिप्यतइति न गुणत्वमिति चेन्न । एतादृशविशेषस्याप्रयोजकत्वेन गुणत्वादावनियामकत्वात् । भवद्रीत्या व्यक्तेरिव कर्तुः परिच्छेद्यत्वादाक्षिप्तस्यापि व्यक्तिवद्विशेष्यत्वापत्तेश्च । किं च देवदत्तादिः शक्तिविशेषरूपो वा कर्त्ता न भावनानिरूप्यः । घटत्ववदखण्डत्वात् । कर्तृत्वं तद्घटितमिति चेत् । घटत्वमपि घटघटितमेवेति विशेषोपपादनन्दन्द्रण्यम् । अथ घट इत्यनापि नास्त्येव घटादौर्विशेष्यत्वप्रतीतिः किं तु घटत्वादेरिति चेत् । सत्यम् । एवं हि व्यक्तौ पदार्थान्तरान्वयो न स्यात् । विशेष्यतयानुपस्थितत्वेनाकांक्षाविरहात् । किं च न भवत्प्रतीत्येव वस्तुसिध्यसिद्धी किं तु सकलसाधारणया । तादृशी च न व्यापारेपि, नैयायिकैः कर्तृविशेष्यकबोधाभ्युपगमात् । एवं घटपदादिस्थलेपि । तस्माद्विशेष्यत्वादिबोधो भवतामेव तादृशव्युत्पत्तिवशाज्जायमानो न वस्तुव्यवस्थापक इति स्फुटतरं भावार्थाधिकरणदूषणे वक्ष्यते । अथ भावनया कर्तुराक्षेपो युक्तः न तु कर्त्रा भावनायाः कर्मप्रत्ययस्थले भावनाप्रत्ययानुपपत्तेरिति चेन्नैवम् । कर्तृकर्मोभाभ्यामाक्षेपसम्भवात् । न चोभयोराक्षेपकत्वकल्पने गौरवं, तवाप्युभयोराक्षेप्यत्वकल्पने गौरवात् । कर्मकर्तृकृत्सु तदाक्षेपाय त्वयाप्येवं स्वीकर्त्तव्यत्वाच्चेति । यत्तु कर्त्तरिकृदिति व्याकरणस्य कृत्प्रत्ययस्थले कर्त्तरि शक्तिपरिच्छेदकस्य सत्वात्कर्तृवाच्यत्वावश्यकत्वात्तेन कृत्प्रत्ययस्थले भावनाक्षेपो युक्तः । तिङ्स्थले च तदभावान्न कर्तुर्वाच्यत्वमायातीति । तदापाततः । तिङ्स्थलेपि लः कर्मणीति सूत्रस्य कर्त्तरि शक्तिपरिच्छेदकस्य सत्त्वात् । कर्त्तरिकृदिति कर्तृग्रहणस्यैवात्रानुवृत्तेः । अनन्यलभ्यत्वादेश्चोभयत्रापि तुल्यत्वात् । अथ लः कर्म्मणिचभावेचाकर्मकेभ्यः, तिप्तस्झि, ध्वेकयोर्द्विव-

च नैकवचने इत्येतेषामेकवाक्यतया विधानेन कर्तुरेकत्वेभिधेये लकारैकवचनं तिबादि प्रयोक्तव्यमित्यर्थपर्यवसानात्कर्तुर्वाच्यत्वं न सूत्रादायाति, किं तु तत्संख्याया एवेति चेन्मैवम् । द्विवचनादिसंज्ञा ह्यादेशनिष्ठा, ततश्च तद्विधिना द्व्येकयोरित्यस्यैकवाक्यता । न च तत्र कर्त्तरीत्यस्ति यद् द्वित्वादिविशेषणतया कर्तृ चिद्योज्येत । ननु लविधितिबादिविध्योरप्येकवाक्यतास्तीति चेत्, तर्हि इयं वाक्यैकवाक्यता न तु पदैकवाक्यता । आदेशविधेर्लविधिलभ्यलकारानुवादेन प्रवृत्तेः । लविधौ कर्तृग्रहणम् । स च द्विवचनादिसंज्ञाविनिर्मुक्त एवेति । तस्माद्वाक्यनिष्पत्त्यनन्तरं तेनैकवाक्यता । लः कर्मणीति वाक्यं चार्थं विना ऽनिष्पन्नं यमर्थमादाय निष्पद्यते स एव वाच्य इति कर्तुर्वाच्यत्वं दुष्परिहरमिति वदन्ति । स्फुटमन्यन्मनोरमायाम् । वस्तुतस्तु लः कर्मणीत्यस्य द्व्येकयोरित्यनेनैकवाक्यत्वे लकारः सङ्ख्यावाचको निरर्थको वा स्यात् । न चैवं युक्तम् । एवं हि तिबादिवच्छानचोपि कर्तृसङ्ख्या वाच्या स्यान्न स्याच्च कर्त्ता, तिबादिवच्छानजादीनामपि लादेशत्वात् । अथ कर्त्तरिकृदित्यत एव तत्र कर्त्ता वाच्य इति चेन्न । तेन शय्यमाने आस्यमाने चायं गत इत्यादौ भावे क्रियमाण इति कर्मणि शानचो दौर्लभ्यापत्तेः । विधायकाभावात् । अथ कर्तैव वाच्यः, कर्मभावादौ च शानचो लक्षणेति चेन्न । कर्त्तरीति व्याकरणस्यार्थनियामकस्यातिक्रमेण स्वेच्छामात्रेण लक्षणायामसाधुतापत्तेर्वक्ष्यमाणत्वात् । न च लटः शतृशानचावित्यस्यात्मनेपदविधायकैः सममेकवाक्यतया भावकर्मणोरित्यनेनेष्टसिद्धिः । सकर्मकेभ्योप्येवं सति भावे शानजापत्तेः । अस्माकं पुनर्भावे चाकर्मकेभ्य इत्युक्तत्वान्न दोषः । किं चैकवाक्यतया कर्मणि

वरूपार्थलाभेन निराकाङ्क्षतया कर्त्तरिकृदित्यस्याविषयतया कर्त्तरि स न स्यात् । तथात्वे वा घञादिरपि कर्त्तरि स्यात् । अपि च भावकर्मणोरित्यस्य भावकर्मणो यो लकारस्तस्यात्मनेपदमेवादेश इत्यर्थो न त्वया वक्तुं शक्यः । लकारस्यानर्थकत्वात् । यदात्मनेपदं तद्भावकर्मणोरेवेत्यपि न । कर्त्तरि आत्मनेपदाभावापत्तेः । भावकर्मणोरर्थयोरात्मनेपदं स्यादित्यर्थे चोक्तसूत्रादेव तङादेः कर्मवाचकता शेषात्कर्त्तरिपरस्मैपदमित्यस्माच्च कर्तृवाचकता तिङादेः स्यात् । सकर्मकेभ्योपि भावे शानजापत्तिश्चेति दिक् । तस्मादापातत एवैकवाक्यतया भावकर्मार्थलाभ इति । तस्मात्कर्तृकर्मशानचो योगेनानूद्य विधीयमानं कर्त्तृकर्मसंस्कारकमिति जञ्जभ्यमानाधिकरणे स्थितमसम्भवदुक्तिकतामापद्येत इति ध्येयम् । यदपि भट्टैरुक्तम् । कर्तृविशिष्टसंख्याभिधानात्कर्त्तुरभिधानम् । न च विशेषणतया कर्त्तुरप्यभिधेयत्वं स्यादिति वाच्यम् । विशिष्टग्रहणं नेष्टमगृहीतविशेषणम् । अभिधानाभिधाने तु न केन चिदिहाश्रिते । तथा च भावनया प्रत्यापितस्य कर्त्तुर्विशेषणत्वसम्भवान्न दोषः । न च भावनाक्षेप्यत्वस्याविशेषात्पचतीत्यत्र कर्त्तैव पच्यते इत्यत्र कर्मैव सङ्ख्यायां विशेषणमिति नियमो न स्यादिति शङ्क्यम् । यतो यस्यापि कारकं वाच्यं तस्याप्येतत्प्रसज्यते । न चोभयाश्रयं दोषमेकश्चोद्यो विचारयन्निति । ननु शब्दोपस्थितस्यैव शाब्दबोधे भानाङ्गीकाराद्भावनयाक्षिप्तस्यैव कर्तुः कथं शाब्दबोधविषयत्वामिति चेन्न । तद्वाचकशब्दस्यैव भावनयाक्षेपात् । अर्थाक्षेपकस्यैव शब्दाक्षेपकत्वात् । अनुपपत्तेस्तुल्यत्वाम् । तथा च तद्वाचकशब्दादेव कर्त्तृकर्मणोर्बोधः । तदुक्तम् । सर्वाख्यातेषु कर्त्रादेरिष्टा नैवाभिधेयता । या तु तेभ्यः प्रतीतिः सा संयो-

गान्तरतो भवेदिति ॥ लक्षणैव वा आक्षेपशब्दार्थः । सा चाश्रयत्वादिना । अत एव नामजात्यादिभिः प्रश्नोत्तरभावः कर्तृकर्मणोः सङ्गच्छते । तस्मान्नाभिधानव्यवस्थानुपपत्तेः कर्तुर्वाच्यत्वमिति । कृदादौ चाभिधानयुक्तिरेव तत्साधिका । अतोन्यलभ्यत्वसम्भवेप्यगत्या तद्वाच्यत्वस्वीकार इति न प्रागुक्ता प्रतिबन्दिरपि । कर्तृतत्सङ्ख्यान्यतरानाभिधाने वाच्यत्वे तृतीयेत्याश्रीयतइति । अत्रेदं प्रतिभाति । देवदत्तः पचति पच्यते तण्डुल इत्यादिसामानाधिकरण्यादाख्यातस्य कर्तृकर्मवाचकत्वम् । न चेदमसिद्धम् । अन्यस्मिन्पचति देवदत्तः पचतीत्यप्रयोगेण तस्यानुभवसिद्धस्य विना हेतुं कर्तृवाच्यत्वभीत्यैवापलापायोगात् । त्वं पचसीत्यादौ युष्मच्छब्दसामानाधिकरण्यस्यानुभवमनुसरता सूत्रकृतानूद्य तदनुसारेण पुरुषव्यवस्थाया युष्मद्युपपदेसमानाधिकरणेस्थानिन्यपिमध्यम इत्यादिना कृतत्वाच । अन्यथा नीलो घटः, देवदत्तः पक्ता, ऐन्द्रं दधि, चित्रगुर्देवदत्तः, पिङ्गाक्षी गौः, स्तोकं पचति, ज्योतिष्टोमेन यजेते, त्यादावपि तदपलापापत्तौ बहुव्याकुली स्यात् । न च पदार्थानामभेदबोधे समानाविभक्तिमत्पदोपस्थाप्यत्वं तन्त्रं, तच्चात्र नास्तीति कारणबाधान्न सामानाधिकरण्यामीति वाच्यम् । राज्ञः सुतस्य धनमित्यादावतिप्रसक्तत्वेन राजपुरुषः धान्येन धनी स्तोकं पचति ज्योतिष्टोमेन यजेतेत्यादावप्रसक्तेश्चास्यतन्त्रत्वात् । अथ विरुद्धार्थकविभक्तिराहित्यं तन्त्रम् । सुप्तिङोश्च न विरोधः । एवं च विशेष्यतासंबंधेनाभेदसंबंधकतन्नामार्थप्रकारकशाब्दबोधं प्रति तन्नामोत्तरसार्थकविभक्त्युपस्थित्यकालिकतन्नामसमभिव्याहृतपदजन्योपस्थितिः कारणमिति कार्यकारणभावः फलितः । स्तोकमित्यादौ द्वितीया त्वभेदार्था साधुत्वमात्रार्था वा । यद्वा विरुद्धरूपेणानुपस्थितिस्तत्र तन्नामि-

ति चेत्तर्हि, देवदत्तः पचतीत्यत्राप्यभेदबोधो दुर्वार इति सिद्धं नः समीहितम् । आख्यातस्य शक्तिकल्पना च कृता कर्तृशक्त्या तुल्या, परं त्वाख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितिः कारणमिति नैयायिकोक्तकार्यकारणभावान्तरस्य भावनाविशेष्यककर्तृविशेषणकबोधाय मीमांसकीयस्य च तस्याकल्पनाल्लाघवमस्माकमतिरिच्यते । एतेन भिन्नाभ्यां धर्माभ्यामेकधर्मिबोधकत्वलक्षणं सामानाधिकरण्यमसिद्धम् । सम्भवदभ्यादृशन्तु न वार्यतइति मन्दप्रतारणमपास्तम् । अथास्तु सामानाधिकरण्यं किं तु भावनाक्षिप्तकर्त्रा भविष्यतीत्यसकृद्वार्त्तिकएवोद्घोषितमितिचेन्न । आक्षेपो हि यद्याख्यातार्थभावनयानुमानं तर्हि, धूमोयं ज्वलतीत्यादाविव तदसम्भव एव । मैत्रादिपदयोगे तदसम्भवाच्च । लक्षणा चेत्तर्हि, पिङ्गाक्ष्यादियौगिकेष्वपि द्रव्यवाचित्वं न स्यात् । मूलयुक्तेः सामानाधिकरण्यस्योक्तरीत्यैवोपपत्तेः । द्रव्यवाचकत्वसाधकान्तरस्य चाभावात् । प्रत्युत सम्बन्धादिगुणवाचित्वे एव साधकमुपलभ्यते । तथाहि । घटपदात् घटत्वप्रकारकघटविशेष्यकबोधवद्दण्डी इत्यादौ दण्डसम्बन्धवानिति प्रतीतिः सर्वसिद्धा । तत्राकृत्यधिकरणन्यायेन निष्कृष्टघटत्ववत्सम्बन्धमात्रं वाच्यं स्यात् । किं च तदस्यास्त्यस्मिन्निति मतुप् सास्यदेवतेत्यादावस्येत्यर्थे मतुवादिविधानम् । अस्त्येत्यत्र प्रत्ययार्थत्वात् संसर्गः प्रधानमिति तत्रैव तेषां विधिः स्यात् । तथा च मतुवर्थे विहितबहुव्रीहेरपि स एव वाच्यः स्यात् । उक्तं चारुणाधिकरणवार्त्तिके "बहुव्रीहिः समासोयं मतुवर्थे विधीयते । अस्यात्रेति च सम्बन्धे मत्वर्थीयः प्रवर्तते" इति । युक्तं चैतत् । अत एव देवदत्तस्य गोमत्त्वामित्यत्र त्वप्रत्ययस्य संसर्गबोधकत्वं सङ्गच्छते । घटत्वमित्या-

दौ पदार्थीभूतघटत्वबोधकत्ववत् । न च प्रकृतिजन्यबोधप्रकारस्त्वप्रत्ययार्थः संसर्गस्तु विशेष्यः तथा च कथं त्वार्थ इति वाच्यम् । आकृत्यधिकरणन्यायेन घटत्वस्यैव वाच्यत्वात्तत्रैवोपपत्तेः । आक्षेपितव्यक्तौ तस्य प्रकारकत्वं चात्रापि समं । उक्तं च । यदि मतुपा सम्बन्धोभिहितस्ततः प्रकृतिप्रत्ययौ सहार्थं ब्रूते इति गोमत्प्रातिपदिकादुत्पन्नो भावप्रत्ययः सम्बन्धमभिधातुमर्हति नान्यथेत्यादिना । प्रतीयते च सर्वत्र सम्बन्धः पाचकत्वं पाठकत्वमौपगवत्वमित्यादिष्विति । किं च एकहायन्यादिशब्दविग्रहेप्येकं हायनमस्याः, चित्रा गावो यस्य, विश्वे देवा देवता अस्ये, त्यादौ प्रत्ययार्थसम्बन्धप्राधान्येन विवरणदर्शनात्तस्यैव वृत्तिवाच्यत्वमवसीयते । उक्तं च । यस्मिन्नन्यपदार्थे च बहुव्रीहिर्विधीयते । तत्रापि प्रत्ययार्थत्वात्सम्बन्धस्य प्रधानतेति । न च गोमानित्यादौ सम्बन्धिप्रतीतिर्न स्यादिति शङ्क्यम् । उभयाश्रितेन सम्बन्धेनाक्षेपात्तदुपपत्तेः । तव कर्तृत्वस्सम्बन्धवच्चेति । यत्तु मतुबादेर्न सम्बन्धसामान्यं वाच्यम् । पर्यायतापत्तेः । न विशेषः । स हि सम्बन्धिरूप एव । सोपि नानाभिहितः शक्नोति तं व्यावर्त्तयितुमतः सोप्यभिधातव्यः । तथा च गोरूपस्यैकस्य सम्बन्धिनः प्रातिपदिकादुक्तत्वेपि सम्बन्धस्योभयनिरूप्यत्वात्सोप्यभिधातव्यः सम्बन्धश्चेति शक्तिद्वयकल्पनापत्तिरित्यतिगौरवम् । आवश्यकसम्बन्धिनैवाक्षेपात्तद्बोधोपपत्तावन्यलभ्यत्वं च । उक्तं च, सर्वत्र यौगिकैः शब्दैर्द्रव्यमेवाभिधायते । नहि सम्बन्धवाच्यत्वं सम्भवत्यतिगौरवात् ॥ किं च । सम्बन्धिनैव सम्बन्धः प्रत्येतुं यदि शक्यते । पुनस्तस्याभिधाशक्तिं कः श्रुतेः परिकल्पयेदिति । किं च । विभक्तिवाच्यरूपेण सम्बन्धो नावगम्यते । रूपान्तरेण वक्तव्य

इति नास्ति च लक्षणम्॥ षष्ठ्यादिभिर्ह्यसत्त्वभूतः सम्बन्धोभिधीयते न तथा मत्वर्थीयेन, सत्त्वभूतसम्बन्धवाच्यत्वे च न प्रमाणम् । तस्मादनुशासनत्यागावश्यकत्वे त्वर्थाक्षिप्त एव स इति । यत्तु भावप्रत्ययः सम्बन्धं न वदेदिति । तन्न । यदा स्वसमवेतोत्र वाच्यो नास्ति गुणो ऽपरः। तदा गत्यन्तराभावात्सम्बधो वाच्य आश्रितः॥ गोमत्पदे हि गावो मतुबर्थे विशेषणम् । तासां पुरुषावृत्तित्वान्न त्वप्रत्ययेन ग्रहणम् ॥ तस्य समवेतगुणाभिधायकत्वात् । तथा चागत्यार्थप्राप्तसम्बन्धाभिधायकस्त्वप्रत्यय इत्याश्रीयते । यदप्येकं हायनमस्या इति विग्रहे सम्बन्धप्राधान्यदर्शनात्तस्य समासार्थतेति । तत्रोच्यते । अभिधेयो बहुव्रीहेर्यद्यप्यस्येति कथ्यते । तथापि प्रथमान्तेन तुल्योसौ सम्प्रतीयते ॥ तथाचार्थदर्शनानुसारेण चित्राणां गवामयमित्येव विग्रहो द्रष्टव्य इति स्थितं वार्त्तिके । तच्चिन्त्यम् । द्रव्यमपि न सामान्यतोभिधेयम् । पर्यायतापत्तेस्तुल्यत्वात् । न विशेषतः । स हि संसर्गः, प्रातिपदिकार्थो वा । आद्ये अप्रतीतस्यानभिहितस्य विशेषकत्वासम्भवाद्वाच्यत्वापत्तिः । द्वितीयपक्षः संसर्गवादिनोपि तुल्यः । संसर्गोपि गवां व्यावर्त्तकतया विशेषणत्वसम्भवात् । तथा च गोविशिष्ट इतिवद्गोसम्बन्ध इति बोधः संभवत्येव । उभयनिरूप्यः सम्बन्ध उभयबोधं विना कथं बुध्यतामिति चेन्न । सम्बन्धप्रत्यक्षे हि यावत्सम्बन्धिप्रत्यक्षं कारणम् । ननु शाब्दे, गोसम्बन्ध इति वाक्याद्बोधानापत्तेः । तर्हि गोसम्बन्ध इतिवाक्यवदाश्रयाक्षेपनियमो न स्यात् इति चेन्न । षष्ठ्यर्थे विहितमतुबादेर्ह्यसत्त्वभूत एव सम्बन्धोभिधेयः । अत एव सम्बन्धानामनेकत्वे तुल्यलिङ्गत्वेपि च दण्डीत्येकवचनम् । दण्डी दण्डि दाण्डिनीत्यादिलिङ्गभेद-

प्रयोगश्चोपपद्यते सम्बन्धिनां तथाविधत्वे एव तादृशप्रयोगाणां दर्शनात् । एवं च सम्बन्धे लिङ्गसङ्ख्यान्वयासम्भवादन्यथानुपपन्नलिङ्गसङ्ख्यादिभिरेवाक्षेपः सम्बन्धिन आख्यातसङ्ख्ययेव कर्त्रादेः । यद्वा भावनाशब्दोपात्तभावनायाः कर्त्रनाक्षेपकत्वेप्याख्यातोपात्ताया असत्त्वभूतत्वेन तदाक्षेपकत्ववत्सम्बन्धपदोपात्तसम्बन्धस्य सम्बन्ध्यनाक्षेपकत्वेपि मतुबुपात्तस्य सम्बन्धस्यापि तत्स्यात् । अत एव विभक्तिवाच्यरूपेणेति प्रागुक्तमपास्तम् । तथाअनवगत्यसिद्धेः । किं च लिङ्गसङ्ख्यानन्वयित्वमसत्त्वभूतत्वं षष्ठ्यादावर्थसिद्धम् । प्रत्ययार्थलिङ्गसङ्ख्यादेः प्रत्ययार्थएवान्वयसम्भवात् । सुपां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेश्च । एवं च नासत्त्वभूतत्वं षष्ठ्या वाच्यामिति विभक्तिवाच्यरूपेणेति रिक्तं वचः । तस्मात्सम्बन्धवाच्यत्वे दोषाभावादनुशासनाद्यनुरोधेन तस्य वाच्यत्वासिद्धेः । सम्बन्धेनैव सम्बन्धी प्रत्येतुं यदि शक्यते । पुनस्तस्याभिधाशक्ति कः श्रुतेः परिकल्पयेदिति गाथा मयापि सुपठा । यत्तु भावप्रत्ययस्य समवेतगुणग्राहकत्वनियम इत्यादि । तन्न । घटादिपदेपि घटत्वस्यैवाकृत्यधिकरणन्यायेन वाच्यत्वस्वीकारेण तदनुरोधेन भावप्रत्ययस्य प्रकृत्यर्थवाचकत्वस्वीकारस्यैव लाघवादुचितत्वात्सम्बन्धस्य प्रकृत्यर्थतानङ्गीकारे त्वार्थत्वानापत्तेरपरिहारात् । प्रकृत्यर्थसमवेतवाचकत्वस्वीकारेतिगौरवापत्तेः । उक्तन्यायेन घटत्वत्वस्यैव घटपदोत्तरत्वार्थतापत्तेश्च । ननु प्रकृत्यर्थमात्रवाचकत्वे वैयर्थ्यापत्तिः प्रकृत्यैवार्थोपस्थितिसिद्धेरिति चेन्न । प्रकृत्याभिधानेपि घटत्वादेराक्षिप्तद्रव्ये विशेषणत्वेनैव तत उपस्थितत्वेन प्राधान्येन बोधार्थं पुनरुच्यतइत्युपपत्तेः, प्रकृतिप्रत्ययौ सहार्थमिति न्यायेन त्वार्थत्वे विशेष्य-

त्वस्या न्यायसिद्धत्वात् । किं चैवं घटादिपदे द्रव्यत्वादेर्दण्डी-त्यादौ पुरुषगतरूपादेश्च तदुत्तरत्वाद्यर्थतापत्तिः द्रव्यत्वादिकं घटपदजन्यप्रतीतौ न प्रकार इति चे, दाक्षेपपक्षे संसर्गोपि न प्रकार इति तुल्यम् । वक्ष्यते चैतदुपरिष्टात् । चित्राणां गवा-मयामिति विग्रह इत्यादिकं च स्फुटतरं समासशक्तौ निराकरि-ष्यते । तस्मादुक्तयुक्तिभिः संसर्ग एव वाच्यो मतुवादेः स्या-दिति तदर्थविहितबहुव्रीहेरपि तन्मात्रवाचकत्वे अरुणाधिकर-णं दत्तजलाञ्जलि स्यात् पूर्वपक्षस्यैवासम्भवादिति समा-सशक्तौ वक्ष्यामः । प्रस्थितं च गुणाधिकरणेन । तद्धितस्य द्रव्यानभिधायकत्वे वाजिनामिक्षयोर्वाक्यविनियोज्यत्वसाम्या-त् । न च तद्धितार्थसम्बन्धाक्षिप्तद्रव्यविधिरेव श्रौतः वाजिनं च न तथेति वाच्यम् । एवं ह्याख्याते कर्तुराक्षेपावश्यकत्वेन नानृतमिति निषेधस्यापि श्रुत्या पुरुषार्थत्वसम्भवेन कर्तुरवाच्य-त्वसाधनायासवैयर्थ्यापत्तेः सिद्धान्तसिद्ध्यसम्भवेन कर्त्रधिकर-णोच्छेदप्रसङ्गाच्च । यत्तु प्राधान्येन प्रतीयमानत्वमेव शब्द-वाच्यत्वे बीजम् । तच्चाख्यातेषु भावनाया यौगिकेषु द्रव्याणा-मेवास्ति न तु कर्तृसम्बन्धादेः । घटारुणादिपदेषु च जाति-गुणयोरपि तदस्त्येव । सत्त्वप्रधानानि नामानीति निरुक्तस्मृते-रुणाधिकरणएव तृतीयार्थसङ्ख्यादेर्गुणेन्वयप्रतिपादनेन तुल्य-तया जातिगुणयोः सङ्ख्यान्वायित्वरूपसत्त्वभूतत्वात्प्राधान्य-सिद्धेः तृतीयान्तपदेषु जातावेव लिङ्गसङ्ख्यान्वयाभ्युपगमात् । तथा च तादृशेष्वेव प्राधान्यसाम्ये आकृत्यधिकरणं शक्यावशे-षनियामकमावश्यकमेवेति न तद्धानिरपीति । तन्तुच्छम् । तृती-यान्ते यौगिकार्थसम्बन्धस्यापि सत्त्वभूतताया गुणतुल्यतया दुर्वारत्वात् प्राधान्यादाकृत्यधिकरणन्यायेन वाच्यतापत्तेरिति ।

तस्माद्वैश्वदेव्यामिक्षा पिङ्गाक्षी गौः दण्डी देवदत्त इति सामानाधिकरण्यस्य विनैवानुपपत्तिप्रतिसन्धानं शब्दादेव प्रतीतेस्तदनुसारेण द्रव्यवाचित्वमास्थेयम् । तच्च सममाख्यातेपीति कर्तृकर्मवाचकत्वमवर्जनीयमेवेति । अत एव चित्रा गावो यस्येति सम्बन्धप्राधान्यदर्शनेपि चित्रगुर्देवदत्त इति समासे सामानाधिकरण्यानुरोधात् द्रव्यवाचित्वं विग्रहसमासयोरेतदंशे वैलक्षण्यं चाश्रीयतइति वक्ष्यते । अथैवं नीलो घट इति सामानाधिकरण्यानुरोधात् घटादिपदानामपि द्रव्यवाचकत्वे आकृत्यधिकरणविरोधः । मैवम् । घटादिपदे हि घटत्वस्य वृत्त्याविषयत्वे शाब्दे भानायोगात् घटत्वांशे वृत्तिकल्पनावश्यकत्वेनागृहीतविशेषणन्यायेन जातिमात्रवाचित्वसिद्धौ द्रव्यमाक्षिप्यतइति युक्तम् । प्रकृते च प्रकृत्यर्थतावच्छेदकस्यैव प्रकृतिशक्त्योपस्थितत्वात्तदुपलक्षणीकृत्य शक्तौ दोषाभावाद् द्रव्यवाचित्वमास्थीयते । उक्तं च, आनन्त्येपि हि भावानामेकं कृत्वोपलक्षणम् । शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यतीति ॥ यदि च घटादिपदेप्युपलक्षणत्वमभ्युपेयते तदा केवलव्यक्तिवाच्यत्वमपि सुसङ्गतमेवेति वक्ष्यते । एवं च केवलव्यक्तिवाच्यत्वपक्षमाश्रित्य सामानाधिकरण्यं नानुपपन्नामिति सिद्धान्तरीत्यापि द्रष्टव्यम् । वस्तुतो गोमानित्यत्र गोसम्बन्धीति बोधात्सम्बन्धी वाच्यः । वाच्यतावच्छेदकः संसर्गः, सम्बन्धत्वं परम्परयोपलक्षणं तदादौ बुद्धिविशेषवत् । न च तच्छाब्दे विषयो येन घटत्वप्रतिबन्दी स्यात् सम्बन्धप्रकारकबोधस्यैवानुभवसिद्धत्वात् । अत एव दण्डित्वमित्यादौ त्वप्रत्ययस्य सम्बन्धबोधकत्वं सङ्गच्छतइति । न च कर्तृकर्मादिवाचकशब्दानां शक्तिवाचकत्वाद्देवदत्तादिपदैः सामानाधिकरण्यासम्भव एवेत्यसिद्धो हेतुरिति वाच्यम् । शक्ति-

मत्कारकमिति पक्षाश्रयणेन शक्तिमतामेव कर्त्रादिपदवाच्यत्वात् । अत एव देवदत्तः कर्त्ता कारकः कर्म इति सामानाधिकरण्यं संगच्छते । उक्तं च साक्षान्मूत्रकृतैव युष्मदस्मदादिशब्दसामानाधिकरण्यमुद्दाङ्कितं सूत्रादिषु । तथोक्तं च भाष्ये । सुपां कर्मादयोप्यर्थाः सङ्ख्या चैव तथा तिङामिति अत एवाश्रये त्विति मूलमपि न लःकर्मणीति सूत्रविरुद्धम् । अन्यथा कर्त्तरिकृदित्यनुशासनाच्छानजादेः शक्तिमात्रवाचकत्वे सामानाधिकरण्यापलापापत्तेश्च । नित्याः षड् व्यक्तयोन्येषामिति वाक्यपदीये ऽन्यमतत्वेनैव शक्तिपक्षोत्थापनात्तत्पक्षस्य सिद्धान्तासम्मतत्वाच्च । धातुनोक्तक्रिये नित्यमित्यादिवक्ष्यमाणवाक्यपदीयादिभिर्भावनाश्रयत्वस्य कर्तृत्वेन फलाश्रयत्वस्य कर्मत्वेन प्रतीतेः स्वातन्त्र्येण शक्तिप्रत्ययस्यैवासिद्धेश्च । न चैवमाश्रयेत्विति मूलं सूत्रविरुद्धं स्यात् । सूत्रे कर्तृत्वकर्मत्वाभ्यां वाच्यत्वावगमात् । न च भावनांशस्य धातुलभ्यत्वादाश्रय इत्येव सूत्रस्य भावार्थ इति वाच्यम् । अन्यवाच्यस्यापि तथात्वस्य स्वयैवोपपादनात् । अवाच्यत्वेपि वाच्यतावच्छेदकत्वस्याकारणत्वेपि कारणतावच्छेदकत्ववदलक्ष्यत्वेपि लक्ष्यतावच्छेदकत्ववत् सुलभत्वाच्चेति शङ्क्यम् । भावनाया वाच्यतावच्छेदकत्वेनानन्तपदार्थेषु शक्यतावच्छेदकत्वापत्तौ गौरवात् । आश्रयत्वस्य चाखण्डशक्तिरूपत्वात् । तस्माद्देवदत्तः पचति पच्यते तण्डुल इति सामानाधिकरण्यात्कर्तृकर्मणी वाच्ये एवेति सिद्धम् । अपि च पचतीत्यत्र व्यापारस्येव कर्तुरपि प्रतीतिः सर्वानुभवसिद्धा । अत एव पचतीत्येव श्रुते कः कीदृशः किंजातीय इति प्रश्नश्चैत्रो घनश्यामो ब्राह्मण इत्युत्तरं च सङ्गच्छते । तथा च प्रतीतेः पाकानुकूलकृतिमान् पचतीति पाचक इति विवरणाच्च शक्तिपरि-

च्छेदात् कर्तृकर्मणी वाच्ये एव । अन्यथा भावनापि वाच्या न स्यात् । कर्तृकर्मणोर्भावनयैवाक्षेपसम्भवेनान्यलभ्यत्वान्न तयोर्वाच्यत्वमिति चेन्न । कर्तृकर्मभ्यां कृदादाविव भावनाया एवाक्षेपसम्भवादस्तु तयोरेव वाच्यत्वं, मास्तु च भावनाया इत्यस्याप्यापत्तेः । विवेचितं चैतदधस्तात् । एतेन कर्तृकर्मणोर्विवरणं तात्पर्यार्थविवरणम् । बोधविवरणयोर्व्युत्पत्त्यनुसारित्वेनार्थनिर्णायकत्वं वा पाकामित्यशब्दार्थकर्मत्वविवरणवदुपपद्यतएवैतदपीति वा इतरेतरद्वन्द्वे साहित्यविवरणवद्वा नार्थनिर्णायकतेत्यादिकमपास्तम् । एवं च तुल्ययुक्त्या कर्तृकर्मणोर्वाच्यत्वमावश्यकमेवेति दिगिति विभावयामः । लःकर्मणीत्यस्य कालसंख्याभावनापुरस्कारेण प्रवृत्तौ विध्यादौ कृदादौ तद्वाच्यत्वापत्तेर्भावनाया धातुलभ्यत्वाच्चेत्यतः कर्त्रादिपुरस्कारेण प्रवृत्तौ तदादेशत्वाच्छानजादिवत्तिङस्तदर्थकत्वं दुर्वारमित्यपि वदन्ति । भावतिङां धात्वर्थानुवादकमात्रत्वान्न तदर्थोत्र वर्णितः ॥ अथैवं लडादिभिस्तत्र वर्त्तमानत्वं न बोध्येतेति चेन्न । तस्य धात्वर्थव्यापारविशेषणतया तिङो द्योतकत्वात् । वाचकत्वपक्षेप्यगत्यानुभवानुरोधेन विधायकवचनेन च तथास्वीकारात् । अथैवं कथं तत्र संख्याप्रत्ययोपीति चेन्न । तस्या उत्सर्गलभ्यत्वात् । तथाहि । भावलकारे हि संख्यान्वयिकर्तृकर्मणोरप्रतीतेस्तत्रत्या संख्या ऽनन्वितैव । न च भावनायामेव तदन्वयोस्त्विति शङ्क्यम् । तस्या लिङ्गसंख्यान्वयायोग्यत्वेनैव धातुनोपस्थापनात् । एतदेवासत्त्वभूतत्वम् । न च भावतिङर्थसंख्याभावनयोर्धात्वर्थएवान्वय इति कुसुमाञ्जलावुक्तं युक्तम् । धात्वर्थबहुत्वे मैत्रेण स्थीयते सुप्यते इत्याद्यनापत्तेः बहुवचनापत्तेश्च । बहुषुबहुवचनमित्यनुशासनस्यावर्जनीयत्वात् । अन्यथै-

कवचनमपि न स्यात् । तथा च संख्यानन्वये साधुत्वमात्राय प्रत्ययाभिधाने प्राप्ते प्रथमोपस्थितत्वादेकवचनमेव कल्प्यते अव्ययानामसंख्यत्वेन तदनुरोधेन भाष्ये तथैव व्यवस्थितेः । अथ वा द्विबहोर्द्विवचनबहुवचने इत्येव सूत्रं कर्त्तव्यं द्वित्वविवक्षायां बहुत्वविवक्षायां च द्विवचनबहुवचने भवत इत्यर्थः । यत्र च न तयोर्विवक्षा तत्र साधुत्वार्थमेकवचनं भवति न त्वेकत्वादिविवक्षापेक्षा । एवं च प्रकृतेष्येकत्वादिविवक्षाविरहेपि साधुत्वार्थमेकवचनमुपपद्यते इति न कश्चिद्दोषः । उष्ट्रासिका आस्यन्ते हतशायिकाः शय्यन्ते इत्यत्र भावे बहुवचनश्रवणं कथमिति चे, तत्सत्यम् । भाष्यकारवचनादत्रैव बहुवचनं साध्विति हि प्रामाणिकाः ॥ तिङ इति । आदेशिनोर्थेनार्थवत्त्वमादायेदं बोधकत्वं शक्तिरित्यभिप्रायेण वा । निरूपितस्थले विशेषणविशेष्यभावं व्युत्पादयति । फले इत्यादि । फले, विक्लित्त्यादौ । प्रधानं विशेष्यः । विक्लित्तिर्व्यापारे विशेषणमित्यर्थः । तिङर्थाः कर्तृकर्मसंख्याकालाः । तत्रापि कर्तृकर्मणी व्यापारफलयोर्विशेषणे संख्या तु अनयोः । कालस्तु व्यापारे एव तथैवानुभवात् । कर्तृकर्मणोः समानपदोपात्तत्वेनान्तरङ्गत्वेनान्वये तु पचतीत्यादौ तयोरेव वर्तमानत्वप्रत्ययः स्यात्, न च तथा कस्य चिदनुभव इति वदन्ति । वस्तुतो वर्त्तमानेलडित्यत्राधिकाराद्धातोरित्येव लभ्यते तत्र धातोर्वर्तमानत्वं न तदानीं विवक्षितमिति तदर्थस्य वाच्यम्, तदर्थोपि प्राधान्याद्व्यापार एव गृह्यते इति न कर्तृकर्मफलेषु तदन्वयः । जानातीत्यत्रापि ज्ञानस्यैव फलानुकूलव्यापारत्वेन तत्रैव तदन्वयः । कर्तृकर्मणोरन्वये चातीतक्रिये कर्त्तरि पचतीत्यापत्तेः । अपाक्षीदित्यनापत्तेश्च । इतोपि व्यापारवर्तमानतादशायां विक्लित्त्यादिरूपफलस्य भावित्वात्पक्ष्यतीति

प्रयोगापत्तेः पचतीत्यनापत्तेश्च न फलेऽप्यन्वयः । एतेन धात्वर्थे एव वर्त्तमानत्वान्वयो न तु व्यापारे आमवातजडीकृतकलेवरस्योत्थानानुकूलयत्नसत्त्वेनोत्तिष्ठतीतिप्रयोगापत्तेरिति सिद्धान्तलेशोक्तमपास्तम् । धात्वर्थफलान्वये बाधकाभावात् । यदि च फलव्यापारयोर्धात्वर्थत्वं स्वीकृत्य व्यापारे तदन्वयोभ्युपेयते तदास्मन्मतमेव सिद्धम् । एवमपि चिरविनष्टेपि घटे नाशस्य विद्यमानत्वेन नश्यतीति प्रयोगापत्तिरित्युपक्रान्तासिद्ध्यापत्तेश्च । व्यापारस्याविद्यमानत्वेन तथा प्रयोगासम्भवात् । पचतीत्यादौ पाकानुकूलकृतौ वर्तमानत्वान्वयानुभवविरोधाच्च । आमवातजडीययत्नश्च नोत्थानप्रयोजकः किं तु तदुद्देश्यक इति नातिप्रसङ्गः । अत एव तत्रोत्थानाय यतते नोत्तिष्ठतीत्येव प्रयोगः । न चोत्थानं करोतीति प्रयोगः । मतान्तरेऽपि यागपाकोद्देश्यककुण्डमण्डपतण्डुलक्रयणादियत्नव्यापारावादाय यागाद्यर्थं यततइतिवत्पाकयागादि करोतीति वा यजति पचतीति वा प्रयोगवारणायाधःसन्तापनयत्नसाधारण्याय च प्रयोजकताविशेषस्यैव सम्बन्धस्याभ्युपेयत्वात् । अतिप्रसक्तव्यापारादिव्यावृत्तमाख्यातशक्यतावच्छेदकमेव वदिष्याम इति चेत्तर्हि तदेवामवातीययत्नव्यावृत्तमास्त्विति दिक् । एवं गच्छत्यादेरप्युत्तरदेशसंयोगानुकूलः क्रियारूपो व्यापार एव धात्वर्थ इति तत्रैव वर्तमानत्वान्वयः । एवं त्यजादेरप्यवधेयम् । इत्थं च पचति पच्यतइत्यत्रैकाश्रयकः पाकानुकूलो वर्तमानो व्यापार इति बोधः । एकाश्रयिका या विक्लित्तिस्तदनुकूला साम्प्रतिकी भावनेति च । अत्र कर्मणः फलद्वारा व्यापारेन्वयः, कर्मवाचकतण्डुलादिपदसमभिव्याहारस्थले चाख्यातोपस्थापितकर्मणस्तण्डुलादिभिः सममभेदान्वयः । एवं कर्तृप्रत्ययस्थले

कर्त्तर्यपि बोध्यम् । तथा च तण्डुलं पचति चैत्र इत्यत्रैकतण्डुलाश्रयिका या विक्लित्तिस्तदनुकूलैकचैत्राभिन्नाश्रयिका वर्त्तमाना भावना । तण्डुलः पच्यते चैत्रेणेत्यत्र चैकचैत्राश्रयिका एकतण्डुलाभिन्नाश्रयिका या विक्लित्तिस्तदनुकूला साम्प्रतिकी भावनेति बोधः । नश्यतीत्यत्रापि व्यापारएव तदन्वयः, स च प्रतियोगितासहितनाशसामग्री, अतस्तस्यां सत्यां नश्यति अतीतायां नष्ट इत्याद्युपपद्यते । जायते इत्यादिषड्भावविकारेषु नाशस्यापि गणितत्वादुत्पत्तिवत्सोपि चरमक्षणसम्बन्ध एव, तद्दशायां नश्यति तदत्यये नष्ट इत्यप्यत एव सङ्गच्छतइत्यप्यदीक्षिताः । नश्यति नक्ष्यति नष्ट इत्यादिप्रत्ययेन यथायथं वर्त्तमाना भविष्यत्यतीता चोत्पत्तिः प्रतियोगित्वं च लक्ष्यते । तथा च तादृशोत्पत्तिमन्नाशप्रतियोगीति बोधः । अत एव नाशस्य नित्यत्वात्सर्वदा नश्यति श्वो नश्यति पटादौ परश्वो नंक्ष्यति प्रपूर्वदिने नष्ट परेद्युर्नष्ट इत्यापत्तिर्नैरस्तेति नैयायिकनव्याः । आकाशोस्तीत्यादौ चैकाकाशाभिन्नाश्रयकः स्वस्वरूपधारणानुकूलो वर्तमानो व्यापार इत्यादि स्वयमूह्यम् । नन्वत्र फलं न भावनायां विशेषणं विशेष्यतासम्बन्धेन प्रकृत्यर्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुतायां अन्यत्र क्लृप्तत्वात् । भावनायाश्च प्रत्ययार्थत्वाभावादिति चेत्, मैवम् । धातुभिन्नप्रकृत्यर्थप्रकारकबोधे एव तस्या हेतुत्वात् । फलव्यापारयोर्भिन्नशक्तिवादिभिर्नैयायिकनव्यादिभिरप्येवमेवाभ्युपेयत्वात् । तथापि धात्वर्थप्राधान्ये किं मानमिति चेत् । भावप्रधानमाख्यातमिति निरुक्तवचनमेव ॥ वस्तुतो बोधे व्युत्पत्तिग्रहः कारणं तथा च व्युत्पत्त्यनुसारेणैव बोधः । एवं चाख्यातार्थकालकर्तृधात्वर्थफलप्रकारकशाब्दबोधे धातुजन्यभावनोपस्थितिर्विषयत-

या हेतुरिति कार्यकारणभावरूपाकांक्षा वाक्येति न कश्चिद्दोषः ॥ ननु भावना फलांशविशेष्यास्तु प्रथमान्तार्थविशेषणं तु कुतो न स्यात् भावनाप्रकारकशाब्दबोधं प्रति प्रथमान्तपदजन्योपस्थितेर्हेतुरिति कार्यकारणभावस्य सुवचत्वात् । न च भावप्रधानमाख्यातमिति वचनविरोधः । आख्यातार्थभावनाया धात्वर्थे प्राधान्यमात्रस्य तदर्थत्वात् । अन्यथा सत्वप्रधानानि नामानीति शेषवचनविरोधात् । एवं च पचतीत्यत्र पाकानुकूलकृतिमान् देवदत्त इति शाब्दबोध इति नैयायिकाभ्युपगतमेव कथं नाभ्युपेयतइति चेत् । मैवम् । एवं ह्याख्यातार्थकर्त्तुरनन्वयापत्तेः । आख्यातप्रथमान्तार्थयोरभेदाभ्युपगमेपि पक्ता गच्छतीतिवत्पचतिकल्पं गच्छतीत्यापत्तेः । ईषदसमाप्तपाककर्त्ता गच्छतीत्यन्वयसम्भवात् । सिद्धान्ते च क्रिययोः परस्परानन्वयाऽतिप्रसङ्गः । किं च पचतिकल्पं पचतःकल्पं पचन्तिकल्पमित्यपि न स्यात् । सुबर्थसङ्ख्यायाः प्रकृत्यर्थे प्रधाने कर्त्तर्य्येवान्वयात् । द्वित्वबहुत्वाभ्यां द्विवचनाद्यापत्तेः । आचार्य्यकल्पा वाचार्य्यकल्पा इतिवत् । सिद्धान्ते च भावनायाः सङ्ख्यान्वययोग्यत्वात्सङ्ख्याया अप्राप्तावौत्सर्गिकमेकवचनमेवोपपद्यते । अपि च नृत्यक्रियां पश्येत्यभिप्रायेण पश्य नृत्यतीति प्रयुज्यमानं वाक्यमपि न सिद्धयेत् । किं च मुख्यतः प्रथमान्तार्थस्य विशेष्यत्वाभ्युपगमे पश्य मृगो धावतीति भाष्याद्यभ्युपेतमेकवाक्यं न स्यात् । प्रथमान्तार्थमृगस्य धावनक्रियाविशेष्यत्वाभ्युपगमे तस्यैव दृशिक्रियायामन्वये कर्म्मत्वाद् द्वितीयापत्तेः । न च सत्यां द्वितीयायामप्रथमासमानाधिकरणत्वाच्छता दुर्वार इति वाच्यम् । एवमपि द्वितीयाया दुर्वारत्वात् । एवं चैतादृशवाक्याभाव एव स्यात् । किं चापाक्षीद्देवदत्तो ऽन्वेहीत्यत्र

शत्रादेः प्रसङ्गाभावादेवदत्तमिति द्वितीया दुर्वारैव । न चात्र प्राक् तामिति कर्म्माध्याहर्त्तव्यम् । उत्कटभावनक्रियाविशेषस्यैव दर्शनकर्मतयान्वयस्य प्रतिपिपादयिषितत्वात् कर्माध्याहारे तदसम्भवापत्तेः, तं पश्येति वाक्यभेदापत्तेश्च । एकवाक्यत्वे भाष्यकारादिभिः साधुत्वकथनात् । तस्माक्रियाया एव कर्मत्वेनान्वयः तद्वाचकश्च धातुर्न प्रातिपदिकमतो न द्वितीया, तथा च धात्वर्थभावनाप्रकारकशाब्दबोधं प्रति कृज्जन्योपस्थितिवद्धातुजन्यभावनोपस्थितिरपि कारणं कल्प्यते । अत एव पक्त्वा व्रजतीत्यादौ पाकक्रिया व्रजनक्रियायां सामानाधिकरण्योत्तरकालादिसम्बन्धेन विशेषणमतस्तच्छाभे क्त्वादेर्भावे विधानं सङ्गच्छतइति वक्ष्यते इति दिक् ॥ २ ॥

तत्राश्रयस्य क फले ऽन्वयः क च व्यापारइत्युपोद्घातसङ्गत्या निरूपयति ॥

फलव्यापारयोस्तत्र फले तङ्यक्चिणादयः ।
व्यापारे शपश्नमाद्यास्तु द्योतयन्त्याश्रयान्वयम् ३

तङादयः फले आश्रयान्वयं द्योतयन्ति शबादयस्तु व्यापारे । अथ शबादयो न द्योतकाः किं तु वाचका एव लकारविधानस्य तत्तदर्थपुरस्कारेणैव कर्त्तरिशबिति शपोपि तत्तदर्थपुरस्कारेणैव विधानात् । तस्माच्छबेव वाचकः लकारस्तु द्योतक इति वैपरीत्यं किं न स्यादिति । यत्त्वाशीर्लिङि लिटि चादादिषु जुहोत्यादिषु च शबाद्यभावात्तत्प्रतीतिर्न स्यादतो लकार एव वाचको युक्त इति । तन्न । तिङभावे ऽपि शबादिसन्निधानमात्रादशाम्यकारि गच्छेत्यादौ तत्प्रतीतेस्तवाप्युक्तदोषतादवस्थ्यादिति चेन्न । नैवम् । अत्र लुप्तं स्मृतं बोधक-

मिति परमते शिष्यमाणं लुप्यमानार्थाभिधायीत्यस्मन्मते च समाधानस्य सुकरत्वात् । यद्वा कर्त्तरिशबित्यत्र सार्वधातुकइत्यनुवर्त्त्य कर्त्रर्थे सार्वधातुके परे धातोः शप् स्यात् इत्यर्थः, तथा च सार्वधातुकस्य कर्त्रर्थत्वावश्यकत्वे शबादीनां द्योतकत्वमात्रं कल्प्यते लाघवादिति । एवं यगादावप्यूह्यम् । तङ् परस्मैपदिभ्य एवोत्पन्न उपसर्गादिप्रयुक्तो न चेत् । अत एव एधते निविशते इत्यादिव्यावृत्तिः । आदिना चिण्वदिट्, यथा कारिष्यते घट इत्यादौ । कृषिरञ्जोः प्राचांश्यन्निति श्यन्परस्मैपदे च द्योतके । तथा कर्मस्थभावकेषु रक्ष्यति घटः स्वयमेवेत्यादौ । लिडादावप्येवंरीत्या प्रकरणाद्येव द्योतकमिति । एतेनाख्यातस्य कर्तृकर्म्मभावेषु शक्तौ पचतीत्यादौ सर्वत्रैव भावनावत्कर्तृकर्मभावानां प्रत्ययापत्तिः शक्तिसत्त्वादिति निरस्तम् । यगादेस्तात्पर्यग्राहकत्त्वकथनादिति ध्येयम् ॥

नन्वेवं "पच्यते ओदनः स्वयमेवे"त्यादौ "क्रमादमुं नारद इत्यबोधि स" इत्यादौ व्यभिचारः कर्म्माविवक्षायां कर्त्तरि लकारे सति कर्मवत्कर्मणातुल्यक्रिय इत्यनेन यगात्मनेपदचिण्चिण्वदिटामतिदेशेन यगादिसत्वेप्याश्रयस्य फलेनन्वयात् । अबोधीत्यत्रापि बुध्यतेः कर्त्तरि लुङ् दीपजनेत्यादिना चिण् चिणो लुगिति तस्य लुक् इत्यभ्युपगमेपि फलेनन्वयादित्याशङ्क्याह ॥

उत्सर्गोयं कर्मकर्त्तृविषयादौ विपर्य्ययात् ।
तस्माद्यथोचितं ज्ञेयं द्योतकत्वं यथागमम् ॥ ४ ॥

कर्मकर्तृविषयादौ क्रियते घटः स्वयमेवेत्यादौ पच्यते ओदनः स्वयमेवेत्यादौ क्रमादित्याद्यादिपदग्राह्यम् । शाब्दबोधस्तु पूर्वोक्तसामान्यविशेषज्ञानहेतुकैकनारदाभिन्नविषयकं यज्ज्ञानं

तदनुकूला एककृष्णाभिन्नाश्रयिका कर्तृता भावनेति । पच्यते ओदनः स्वयमेवेत्यत्र चैकौदनाभिन्नाश्रयिका पाकानुकूला भावनेति बोधः । इत्थमन्यत्राप्यूह्यम् । यथोचितमिति । अननुगतमेव तत्तद्वचनानुसारेणेत्यर्थः । वस्तुतः सकर्मकधातुसमभिव्याहृतभावसाधारणविधिविधेययत्किञ्चित्त्वेन कर्मद्योतकतेति बोध्यम् ॥ ४ ॥

अथ सूचीकटाहन्यायेन सोपपत्तिकं वाक्यार्थमुपवर्ण्य फलव्यापारयोरिति प्रतिज्ञातं धातोर्व्यापारवाचकत्वं व्यवस्थापयति ॥

व्यापारो भावना सैवोत्पादना सैव च क्रिया ।
कृञो ऽकर्मकतापत्तेर्न हि यत्नोर्थ इष्यते ॥ ५ ॥

पचति पाकमुत्पादयति पाकानुकूला भावनेत्यादिभावनावाचकपदैर्विवरणात्सा वाच्यैवेति भावः । व्यापारपदं फूत्कारादीनामयत्नानामपि वाच्यतां बोधयितुम् । अत्र नैयायिकाः । व्यापारो वाच्य इत्युक्तम् । व्यापारत्वस्योपाधित्वेन शक्यतावच्छेदके गौरवात् । फूत्कारत्वादेरपि गुरुत्वादननुगतत्वाच्च नावच्छेदकत्वम् । किं तु कृतित्वस्यैव जातिरूपतया लाघवेन शक्यतावच्छेदकत्वौचित्यात्कृतिरेव वाच्या वक्तव्या । किं च । करोतेर्यत्नार्थकत्वं तावदावश्यकम् । यत्नजन्यत्वाजन्यत्वप्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारात् । तदुक्तमाचार्यैः । कृताकृतविभागेन कर्तृरूपव्यवस्थया । यत्न एव कृतिः पूर्वा परस्मिन्सैव भावनेति ॥ कृतित्वस्यैव लाघवेन शक्यतावच्छेदकत्वौचित्याच्च । व्यापारस्य कृत्यर्थत्वे च कारकमात्रं कर्तृपदार्थः स्यात् । करोत्यर्थभूताश्रयस्यैव कर्तृपदार्थत्वात् । इत्थं च

यत्नार्थककरोतिना विवरणात् किं करोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च यत्न एवार्थः । अत एव पचतीत्यत्र यत्नानुभवः सर्वासिद्धः सङ्गच्छते । नन्वेवं कथं रथो गच्छतीत्यादि प्रयोगः । तत्र यत्नस्य बाधादिति चेन्न । अनुकूलव्यापारे लक्षणया प्रयोगात् । विद्यते इत्याद्यनुरोधादाश्रयत्वे एव वा लक्षणा । तथा च गमनाश्रयबोध एव तत्र । अत एवान्यदीयगमनानुकूलनोदनादिमति न गच्छतीति प्रयोग इति । तस्माद्व्यापारो वाच्य इति मतं न सम्यगित्याहुः । अत्र वदन्ति । लक्ष्यतावच्छेदकत्वस्येव शक्यतावच्छेदकत्वस्यापि गुरुणि स्वीकारे बाधकाभावः । तयोर्वैषम्ये बीजाभावात् । अथ कारणतावच्छेदकत्वप्रतियोगितावच्छेदकत्ववच्छक्यतावच्छेदकत्वं स्वरूपसम्बन्धविशेषः स च सम्भवति लघौ गुरौ न कल्प्यते । अत एव लघुर्धर्म एव कारणतावच्छेदकः कल्प्यते । शक्यतावच्छेदकत्वं च स्वरूपसम्बन्धविशेषो न लक्ष्यतावच्छेदकत्वमिति चेन्न । स्वरूपसम्बन्धो यदि तत्तत्स्वरूपं तदा गुरुधर्मस्वरूपाणामपि सत्त्वात्किमनुपपन्नम् । अथातिरिक्त, स्तदापि तद्वल्लक्ष्यतावच्छेदकत्वमपि स्वरूपसम्बन्धविशेष इति कथं गुरुधर्मेषु तत्स्वीकारः । वृत्तिज्ञानकार्यतावच्छेदकत्वस्योभयत्रापि तुल्यत्वात् । किंच, गुरुधर्मेष्ववच्छेदकत्वास्वीकर्त्रा तदभावः स्वीकार्यः, तद्वरमवच्छेदकत्वस्वीकार एव । भावकल्पनायां लाघवात् । अन्यत्र क्लृप्ताभावस्य सम्बन्धमात्रं कल्प्यते लाघवादिति चेत् । अन्यत्र कल्प्यमानावच्छेदकत्वस्यैव सम्बन्धः स्वीक्रियतां लाघवात् । वस्तुतस्तादृशस्वरूपसम्बधस्यातिरिक्तस्य स्वीकारे प्रमाणं सुधीभिश्चिन्तनीयम् । अत एवावच्छेदकत्वमन्यूनानतिरिक्तवृत्तित्वमिति वदन्ति । तदपि गुरुधर्मे निर्बाधम् ।

एवं नानार्थस्थले लघुधर्मावच्छिन्ने एव शक्तिरपरत्र निरूढा लक्षणा इत्यप्यपास्तम् । एवं प्रतियोगितावच्छेदकत्वमपि स्वरूपसम्बन्धविशेष इत्यपि निरस्तम् । गौरवप्रतिसन्धानदशायामपि कम्बुग्रीवादिमान्नास्तीति प्रतीतेर्गुरुधर्मोऽप्यवच्छेदक इत्यन्ये । तच्चिन्त्यम् । कम्बुग्रीवादिमान्नास्तीत्यादाववच्छेदकस्वस्य संसर्गतया प्रवेशात् । तदवगाहिज्ञानस्य चाप्रतिबध्यत्वात् । किं चैवं धर्मितावच्छेदकशालिज्ञानं प्रतिबध्यम् । प्रकृते च धर्मितावच्छेदकानवगाहनान्न दोष इति । किं च कम्बुग्रीवादिमत्त्वस्य प्रतियोगितावच्छेदकतया भानमप्यसिद्धम् । किं तु प्रमेयो घटो नास्तीत्यादौ प्रमेयत्वादिवत्प्रतियोगिविशेषणत्वेन भानमात्रम् । न चैवं कम्बुग्रीवादिमत्प्रतियोगिकाभाववत्ताबोधस्यैव पर्यवसानाद्यत्किञ्चिद्घटवत्यपि तथा प्रयोगापत्तिः । कम्बुग्रीवादिमत्त्वसमव्याप्यधर्मावच्छिन्नप्रतियोगितात्वसम्बन्धेन कम्बुग्रीवादिमत्प्रतियोगिकाभावस्यैवावगाहनात् । अत एव न यत्किञ्चित्कम्बुग्रीवादिमति कम्बुग्रीवादिमान्नास्तीति शब्दः प्रमाणम् । प्रमाणं च घटसामान्यशून्ये इति रामकृष्णभट्टाचार्याः । एवं कारणतावच्छेदकत्वं स्वरूपसम्बन्धविशेष इत्यपि निष्प्रमाण, मतो न तदवच्छेदकत्वेनापि जातिसिद्धिः । तस्मान्नोक्तलाघवानुरोधात् कृतित्वमेव वाच्यतावच्छेदकमिति युक्तम् । वक्ष्यते चान्यदुपरिष्टात् । नन्वस्तु तर्हि धातोः केवलव्यापारवाचकता फलं कर्मप्रत्ययार्थः । संयोगरूपफलभाने गमधातोर्विभागभाने त्यजधातोः समभिव्याहारस्य नियामकत्वाच्च न ग्रामं गच्छति त्यजतीत्यनयोर्विभागसंयोगबोधनदोषप्रसङ्ग इति नैयायिकप्राचां मतमपि । यद्यपि त्यजिगमिश्यन्दीनां पर्यायतापत्तिः । एकस्या एव क्रियायाः संयोग-

विभागजनकत्वात् । तथा च गमनं त्याग इत्यनयोरविशेषापत्तिः । एवं गच्छतीत्यजतीत्यनयोरपि । न्यायतीत्या फलस्य भानाभ्युपगमेन विशेषोपपादने तु घटादिपदे घटत्वस्यापि तथैव भानोपपत्तेरवाच्यतापत्तावाकृत्याधिकरणोच्छेदापत्तिः । तस्माच्च पच्यते तण्डुलः स्वयमेवेत्यादिकं कर्मस्थभावकानामेव कर्मकर्त्तरि यगादिविधानात् । न चाग्निसंयोगरूपव्यापारस्य धात्वर्थस्य कर्मनिष्ठत्वान्नानुपपत्तिरिति वाच्यम् । तथा सति पच्यते ऽग्निः स्वयमेवेत्यस्याप्यापत्तेः । न च कर्मवत्कर्मणातुल्यक्रिय इत्यनेन धात्वर्थजन्यफलाश्रयाणामेव कर्मवद्भावविधानात्तण्डुलानां ताद्दशविक्लित्तिमत्त्वाद्भवति तथा प्रयोगोग्नेस्तु तदाश्रयत्वाभावान्नातिप्रसङ्ग इति वाच्यम् । एवं हि प्रावरणार्थं पटमुत्पादयति चैत्रे प्रावरणाय पटे यततइतिवद्यतते पटः स्वयमेवेत्यस्याप्यापत्तेः यत्नजन्योत्पत्तेः पटे सत्त्वात् । अन्यथा क्रियते पटः स्वयमेवेत्यपि न स्यात् । सकर्मकत्वाभावादत्रातिदेशो न प्रवर्त्तत इति चेत्तदेव तु भवन्मते दुर्वचम् । स्वार्थव्यापारजन्यफलकत्वं फलजनकव्यापारवाचकत्वं वात्रापि कर्त्रादिवदक्षतं स्पन्द्यादिसाधारणं चेत्यादि वक्ष्यते । कुतो वातिदेशाप्रवृत्तिः स्वकर्मविरहेण कर्मणातुल्यक्रियत्वाभावादिति चेन्न । कर्मत्वस्यापि त्वन्मते दुर्वचत्वात् । धात्वर्थजन्यफलशालित्वस्य गमेः पूर्वस्मिन्देशे त्यजेरुत्तरस्मि, त्स्पन्देः पूर्वपरयोर्त्यादेर्विषये चातिप्रसक्तत्वात् । यत्तु स्वार्थान्वितप्रत्ययार्थफलव्यधिकरणव्यापारवाचकत्वमेव सकर्मकत्वं कर्मत्वमपि धात्वन्वितप्रत्ययबोध्यफलवत्त्वमेव । प्रत्ययजन्यसंयोगबोधे गम्यादेर्विभागबोधे त्यज्यादेः समभिव्याहारस्य हेतुत्वाच्च नोक्तदोष इति । तन्न । एवं ह्यन्वयव्यतिरेकाभ्यां गम्यादेरेव संयोगादिफले शक्तिसि-

द्धेः । अन्यथा सुपामेव घटादौ शक्तिः घटादिबोधे तत्तत्प्रकृतिसमभिव्याहारस्य हेतुत्वान्नातिप्रसङ्ग इत्यस्यापि दुर्वारत्वापत्तेः स्पन्दस्त्यागो गमनमित्यादेरविशेषापत्तेरुक्तत्वाच्चेत्यादिभिर्दूषितप्रायं तथाप्युक्तोपपत्त्यैव कृञादेरपि फलवाचकत्वं साधयन्केवलवाचकत्वं सर्वनैयायिकाभ्युगतं निरस्यति। कृञ इति । सविषयमात्रार्थोपलक्षणमिदम् । यत्नः यत्नमात्रं, किन्तूत्पत्त्यादि फलमपीत्यर्थः । अयं भावः, यती प्रयत्नइतिवत् यत्नार्थकतायां कृञोकर्मकता स्यात् । अन्यथा वायुर्विकुरुते सैन्धवा विकुर्वते इत्यादिप्रयोगदर्शनाद्यथाश्रुते ऽसङ्गतिः । अत एव "धातोरर्थान्तरे वृत्तेर्धात्वर्थेनोपसंग्रहादि" त्याद्यर्थविशेषान्तर्भावेणाकर्मकत्वसकर्मकत्वविवरणं साधु सङ्गच्छतइति । नन्वेवं व्यापारार्थकत्वस्येव यत्नार्थकत्वस्याप्यप्रयोजकतया नेदमकर्मकतायां प्रयोजकं किं तु फलसमानाधिकरणव्यापारवाचित्वमेव । न चेह तदस्तीति नातिप्रसङ्ग इति चेन्न । एवं हि यतेरप्यकर्मकत्वानापत्तेः । यत्किञ्चिदुत्पत्तिजनकयत्नवाचकत्वस्योत्पत्त्यादिफलावाचकत्वस्य चोभयोरप्याविशेषात् । स्वार्थफलसमानाधिकरणव्यापारवाचकत्वरूपाकर्मकत्वस्यास्माभिरभ्युपगमेपि केवलव्यापारवाचकत्वरूपस्य तस्य भवद्भिरभ्युपगमात् । यद्वा । अकर्मकतापत्तेः । सकर्मकतानापत्तेरित्यर्थः । तथाहि । अस्मद्रीत्या स्वार्थफलव्यधिकरणव्यापारवाचित्वं भवद्रीत्या फलविशिष्टव्यापारवाचकत्वं हि सकर्मकत्वम् । अन्यथा स्पन्देरपि तदापत्तेः । तच्च कृञादेर्न स्यात् । त्वन्मते द्विष्यादेर्द्वेषज्ञानेच्छाकृतिमात्रवाचकत्वात् । अत एव पटं जानाति इच्छति कुरुते चैत्रो मैत्रेण ज्ञायते इष्यते क्रियते वा घट इत्यत्र कर्मप्रत्ययेन यथायथं विषयित्वं विषयत्वं चोच्यते

फलाभावेन धात्वर्थतावच्छेदकफलाश्रयत्वरूपकर्मत्वासम्भवा-
दिति निरूपितमाख्यातवादशिरोमणौ । एवं च फलमात्रार्थ-
कत्वात्सकर्मकत्वाभावे कर्मणि लकाराद्यनापत्तिः । यत्तु जाना-
त्यादौ सकर्मकत्वव्यवहारो भाक्त इति । तन्न । व्यवहारस्य
भाक्तत्वेपि कर्मणि प्रत्ययासम्भवात् । फलावच्छिन्नव्यापारवाचके-
भ्य एव कर्मप्रत्यय इति तत्रैवोक्तेः । न च वैयाकरणानां यत्र स-
कर्मकत्वव्यवहारस्तेभ्य एव कर्मप्रत्यय इति नियम इति वाच्यम् ।
भाष्यकारादिव्यवहारस्य विशिष्य सर्वत्राभावात् । अस्मद्व्यवहा-
रस्यातिप्रसक्तत्वात् । तच्च सविषयार्थकानां विषयतयान्वयव-
तामेव सकर्मकत्वं यत्यादिधातूपस्थापितयत्ने न विषयत्वेनान्वयः
किं तूद्देश्यत्वेन अत एवाभुञ्जानेपि भोजनाय यततइति प्रयोग
इति । तन्न । एवं हि कर्मणि प्रत्ययोत्पत्तावनुगतनियामकाभाव-
प्रसङ्गात् । विष्णुं यजते विष्णुर्यष्टव्य इत्यादौ चतुर्थ्यर्थविहितद्वि-
तीयादेरुद्देश्यत्वेनैवान्वयबोधकत्वाद्यजधातोरप्यकर्मकत्वापत्तेश्च ।
उद्देश्यताख्यविषयतया विष्णुयोगविषय एवेति चेद्भोजनमपि
यत्यर्थस्य तथैवेति स्यादेव यजिवद्यत्यादेः सकर्मकत्वात्कर्मणि
प्रत्ययः येन च सविषयार्थकेषु विषयितयान्वयबोधकद्वितीयार्थे
जाततृतीयया तस्यैव बोधनात्पश्चाद्द्रव्यस्य तथान्वयसत्वा-
त्स्यादेव सकर्मकत्वमिति वाच्यम् । एवमपि विष्णोर्धात्वर्थक-
र्मत्वाभावेन तस्मिन् द्वितीयातव्यलकाराणामभावापत्तेः । अ-
न्यथा भोजनाय क्रियतओदन इत्यत्र भोजनं, मोक्षाय हरं भजे
इत्यत्र मोक्षमित्यापत्तेर्दुर्वारत्वात् । न चैवमपि कर्मसम्प्रदानयोः
करणकर्मत्वे वाच्ये इति संज्ञाविधानसामर्थ्यादसत्यपि कर्मत्वे
द्वितीयादिकं स्यादिति वाच्यम् । कर्मसंज्ञाविधानान्यथानुपप-
त्त्या कर्मप्रत्ययसिद्धावपि धातोस्तदर्थे सकर्मकत्वाभावेन तस्मि-

न्सकर्मकत्वसम्बद्धकर्मलकारसिद्ध्यनापत्तौ इज्यते विष्णुरित्याद्यभावापत्तेः। न च कालभावाध्वगन्तव्यानामकर्मकधातुयोगे कर्मसंज्ञाविधानेपि धातोरकर्मकत्वाद्देवदत्तेनास्यते मास इत्यादिकं तवापि न स्यादिति वाच्यम्। कालादिकर्मणा सर्वे सकर्मकाः। तद्व्यतिरिक्तकर्माभावएवाकर्मकत्वमित्यग्रे व्युत्पादयिष्यमाणत्वात्। किं च पशुना रुद्रं यजते देवदत्ताय क्रुध्यति द्रुह्यति ईर्ष्यति असूयति इत्यादौ पशुदेवदत्तादेरिच्छाद्वेषादिविशेषविषयस्य तथान्वयवतः कर्मत्वात्तेन कर्मणा सकर्मकत्वमादाय तस्मिन् कर्त्तरि लकारादितीयाकृदाद्यापत्तिर्दुर्वारा। भवन्मते संज्ञायाः द्वितीयादावप्रयोजकत्वस्य सुबर्थनिर्णये वक्ष्यमाणत्वात्। अस्मन्मते कर्मसंज्ञैव तत्र प्रयोजिकेति तदभावान्नातिप्रसङ्ग इति व्युत्पादयिष्यामः। अपि चैवमपि देवदत्तस्य योभिलाषस्तद्विषय इत्यर्थके देवदत्ताय रोचते स्वदते वा मोदक इत्यत्र मोदकस्य कर्मत्वापत्तौ तस्मिन्कर्मणि लकारादितीयाकृदादिप्रसङ्गो दुर्वारः। अस्मद्रीत्या यौतवन्नायं दोष इति व्युत्पादयिष्यामः इति दिक्। न च त्वद्रीत्यापि सर्वेषामेव धातूनां यत्किञ्चित्फलव्यधिकरणव्यापारवाचित्वेन सकर्मकत्वापत्त्या स्वार्थफलव्यधिकरणव्यापारवाचित्वं तद्वाच्यमित्यननुगमापत्त्या ऽकर्मकभिन्नत्वं तद्वाच्यम्। तत्र च प्रयोगानुरोधाज्ज्ञानात्यादेभेदो न प्रवेशनीय इति न कश्चिद्दोष इति शंक्यम्। सकर्मकाणामप्यर्थान्तरे ऽकर्मकत्वेनासम्भवापत्तेः। अकर्मकत्वस्याप्येकस्याभावेन तुल्ययुक्त्या सकर्मकान्यत्वस्यापि तत्त्वे अन्योन्याश्रयणापत्त्या लः कर्मणीत्यादेर्बोधकत्वानापत्तेश्च। ननु तवापि स्वत्वाननुगमादननुगतमेव सकर्मकत्वादीति कथं लः कर्मणीत्यादेरतिप्रसक्तबोधकत्वमिति चेन्न। स्वपितृभ्यः पिता दद्यात्, ऋतौ स्वदारान्

मच्छेदित्यादौ स्वत्वापितृत्वदारत्वाननुगमेपि विशिष्य सर्वानतिप्रसक्तबोधकत्क्वदुपपत्तेरिति समासशक्तौ वक्ष्यामः । ननु फलावच्छिन्नव्यापारवाचित्वादेव धातूनां सकर्मकत्वमिति वद्द्भिरपि केवलव्यापारवाचकत्वमकर्मकत्वं सूचितमेवेति चेन्न । एवं हि केवलव्यापारवाचकज्ञाकृञादेरकर्मकता स्यान्न स्याच्च सकर्मकत्वमिति । ननु प्रत्ययार्थफलव्यधिकरणव्यापारवाचित्वमेव सकर्मकत्वमस्तु प्रत्ययार्थफलाश्रयत्वमेव च कर्मत्वमतो न कश्चिद्दोष इति चेन्न । घटं भावयति एधयतीत्यादिहेतुमण्णिजन्तसकर्मकेषु तत्कर्मणि चाव्याप्तेः । तत्र फलस्यान्वयव्यतिरेकाभ्यां धातुलभ्यत्वेनान्यलभ्यत्वान्मानाभावाद्गौरवाच्च प्रत्ययार्थत्वासम्भवादिति दिक् ॥ ५ ॥

कृञर्थप्रकाशनपुरःसरं केवलयत्नार्थकतायां दूषणान्तरमाह॥

किन्तूत्पादनमेवातः कर्मवत् स्याद्यगाद्यपि ।
कर्मकर्तर्यन्यथा तु न भवेत्तद् दृशेरिव ॥ ६ ॥

उत्पादनम् । उत्पत्तिरूपफलसहितम् । न तु केवलयत्नमात्रं व्यापारमात्रं वा । अत्र कृञोर्थ इत्यनुषज्यते । ननूत्पादयतीत्यस्योत्पत्तिं करोतीतिं विवरणमनन्वितं स्यात् । उत्पत्तेरुत्पत्त्यभावात् इति चेन्न । यत उत्पत्तिराद्यक्षणसम्बन्धः स च क्षणरूप इति तस्योत्पत्तेः सुलभत्वादुत्पादना सुलभैव । तवापि यतते यत्नं करोतीत्यादावनुपपत्तितादवस्थ्याच्च । नन्वेवं जानात्यादेः सकर्मकत्वाय ज्ञानफलाद्यनुकूलव्यापारवाचकत्वं वाच्यं तथा च चक्षुरादिकं जानातीति स्यात् । उत्पादनाया आत्मनीव चक्षुष्यपि सत्त्वादिति चेन्न । मनो जानातीति प्रयोगोपपत्तये जनकव्यापारे लक्षणाभ्युपगमे तवापि व्यापारव-

त्तया तथा प्रयोगस्य दुष्परिहरत्वादिति समाधिरुभयेषां तुल्य एव। स्थाली पचतीतिवदिष्टापत्तेश्च। ज्ञाधातोः फलं विषयगतावरणनिवृत्तिस्तदनुकूलोत्पादना ज्ञप्तिरेव। अतः सैव धात्वर्थः। तथा च चैत्रो जानातीत्यत्र चैत्राभिन्नाश्रयिका आवरणभङ्गानुकूला ज्ञानक्रियेति बोध इति पक्षे च न शङ्कापि। अतः। यतः कृञो यत्नमात्रमर्थो नेष्यते अत इत्यर्थः। कर्मवत्स्यादितिपदेन कर्मवत्कर्मणातुल्यक्रिय इति सूत्रं लक्ष्यते। अयं भावः। यत एतस्योत्पादनार्थकता अतः क्रियते ओदनः स्वयमेवेति यगादयोप्युपपद्यन्ते। अन्यथा यत्नस्य कर्तृनिष्ठत्वेन कर्मस्थभावकत्वाभावाद्यगादयो न स्युः। अन्यथा यत्यते घटः स्वयमेवेत्यपि स्यादिति। यद्वा। ननु जानातीच्छत्यादिवत्कारकार्थनिर्णये वक्ष्यमाणरीत्या विषयत्वादिफलवाचित्वेन सकर्मकत्वसम्भवात्कुञ उत्पत्तिवाचकत्वाभ्युपगमो मुधेत्याशङ्कां मनसि निधायाह। अत इति। यत उत्पत्तिरपि कृतोर्थ एवेत्यर्थः। अपिर्भिन्नक्रमः कर्मकर्त्तर्यपि यगादि स्यादित्यर्थः। अन्यथा। उत्पत्त्यवाचकत्वे। ज्ञायते दृश्यते इतिवत् कर्मणि तत्सम्भवेपि कर्मकर्त्तरि तन्न स्यादिति भावः। तदेवाह। दृशेरिति। इदं च ज्ञानादिवाचकोपलक्षणम्। तथा क्रियते घटः स्वयमेवेत्यपि न स्यात्। कर्तृस्थभावकत्वाविशेषादिति दिक्॥ ६॥

नन्वेवं कृञादेरिव जानात्यादेरपि विषयावच्छिन्नावरणभङ्गादिफलवाचकत्वमभ्युपगन्तव्यम्। अन्यथोक्तदोषापत्तेः, स्तथा च ज्ञायते घटः स्वयमेवेत्यपि स्यादेव, स्याच्च ग्रामो गम्यते स्वयमेवेत्यादिकम्। कर्मस्थभावकत्वाविशेषादित्याशङ्कां मनसि कृत्वाह॥

निर्वर्त्ये च विकार्ये च कर्मवद्भाव इष्यते ।
न तु प्राप्ये कर्मणीति सिद्धान्तो हि व्यवस्थितः ७

कर्म त्रिविधम् । निर्वर्त्यं विकार्यं प्राप्यं च । आद्यं घटं करोति, द्वितीयं सोम सुनोति व्रीहीनवहन्तीत्यादि । तृतीयं रूपं पश्यतीत्यादि । प्राप्यत्वं च क्रियाकृतविशेषानुपलभ्यमानत्वमिति वक्ष्यते । तच्च ज्ञाद्दृश्यादेर्गम्यादेश्चास्तीति नातिप्रसङ्ग इति भावः । नह्ययं ग्रामः केन चिद्गतो, घटोयं केन चित् ज्ञात इति ज्ञातुं शक्यम् । तस्मादावश्यकं फलवाचकत्वम् । अत एव क्व्यर्थैः पचिरिति भाष्यमपि फलव्यापारयोः शक्तिद्वयाभ्युपगम एव सङ्गच्छते । तण्डुलानोदनं पचतीत्यत्र तण्डुलानां विकार्यकर्मत्वमोदनस्य निर्वर्त्यकर्मत्वं चोपपादितम् । पचेर्विक्लित्त्युत्पत्तिद्व्यर्थत्वस्य भाष्यकारैरुक्तस्य धातोः फलावाचकत्वे ऽसम्भवात् । एकस्यैव व्यापारस्योभयफलत्वे हेतुत्वसम्भवे तद्व्यापारद्वयार्थवर्णनस्याप्यसम्भवात् । उपलक्षणं चैतत् कृञ्त्र इति धातुसामान्यस्य । उक्तवक्ष्यमाणयुक्तिभिः सर्वेषामेवोभयवाचकत्वात् । यत्तु कृञो यत्नत्वं न वाच्यतावच्छेदकम् । अकर्मकतापत्तेः यत्यादिवत् । तथा च यत्नत्वेन विवरणप्रश्नोत्तरभावयोरेवाभावान्न तेनैव रूपेण वाच्यतेति नैयायिकोक्तं युक्तमिति भाव इत्यादि व्याचक्षते । तन्न । यतो यद्यपि केवलयत्नमात्रवाच्यतावादे प्रागुक्तरीत्यायं दोषो युक्तस्तथापि कृञो यत्नत्वं वाच्यतावच्छेदकमित्यत्र न सकर्म्मकत्वानुपपत्तिर्नवा कर्मकर्त्तरि यगनुपपत्तिर्बाधिका । उत्पत्तिरूपफलवाचकत्वासिद्धचैव फलव्यधिकरणव्यापारवाचित्वरूपसकर्मकत्वासिद्धेः । तवाप्युत्पादनामात्रवाचकत्वासिद्धयापि न सकर्मकत्वासिद्धिः फलवाचकत्वसिद्धि

विना स्वार्थफलव्यधिकरणव्यापारवाचित्वस्यैव तत्त्वात् । यती प्रयत्नइत्यस्य फलं नार्थ इति नानुपपत्तिः । घटं करोतीत्यत्रापि निर्वर्त्यकर्मत्वान्न यगादेः कर्मकर्तर्यनुपपत्तिरिति । तस्मात्कृञो यत्नत्वमेव वाच्यतावच्छेदकमित्यत्र मानाभावः । लाघवस्य पूर्वमेव निरस्तत्वात् । न च कर्तृजन्यत्वाजन्यत्वप्रतिसन्धानात्पटाङ्कुरयोः कृताकृतव्यवहारानुपपत्तिरेव मानम् । बीजादिना अङ्कुरः कृत इति तत्रापि व्यवहारदर्शनात् । रथो गमनं करोतीति विवरणस्याचेतनेपि दर्शनाच्च । यत्तु व्यापारमात्रस्य कृत्यर्थत्वे कारकमात्रं कृर्तृपदार्थः स्यादिति । तत्तुच्छम् । स्वतन्त्रः कर्तेति सूत्रोक्तरीत्या धातूपात्तव्यापाराश्रयत्वरूपं स्वातन्त्र्यमेव कर्तृत्वमिति वक्ष्यमाणत्वेन शास्त्रे कर्तृपदार्थत्वस्य प्रायेण सर्वकारकाणामिष्टत्वात् । लौकिकप्रयोगे च कर्त्तेत्यत्र कृञो यत्ने निरूढलक्षणेति वदन्ति । तस्मात् कृञो विवरणानुरोधान्नाख्यातस्य यत्नमात्रवाचकत्वसिद्धिः किंच कृञो यत्नमात्रशक्तिग्रहवत एव तादृशविवरणप्रश्नो न तु व्यापारशक्तिग्रहवत इति न तौ कृतित्वेन वाच्यतायां प्रमाणम् । प्रयोज्यप्रयोजकवृद्धयोस्तादृशमनादिविवरणं कृञ एव च प्रश्नोत्तरभावं शृण्वतां बालानां कृतावेव शक्तिग्रहो भवतीत्यपि विना प्रमाणं शपथमात्रपर्यवसन्नमेवेति द्रष्टव्यम् । कथं तर्हि पचतीत्यत्र यत्नत्वप्रकारकः पाकानुकूलयत्नानुभव इति चेत् । अत्र प्राञ्चः । धातुत्वमेव जातिः शक्तावच्छेदिका । संज्ञाशब्दानां जातिवाचकत्वात् । व्यापारत्वं च वाच्यतावच्छेदकम् । क्वचिद्यत्नत्वप्रकारकबोधस्तु शक्तिभ्रमाल्लक्षणया वा । ननु तवाप्येतादृशस्थले लक्षणावश्यकत्वे किं विनिगमकं व्यापारत्वं वाच्यतावच्छेदकमित्यत्रेति चे,त्सत्यम् । व्यापारत्वस्याधिकसंग्राहकत्वेन तस्यैवावच्छेदकताया न्याय्यत्वा-

त् । अत एव कर्तृजन्यतावच्छेदकं लघ्वपि घटत्वादिकमपहाय कार्यत्वं कल्प्यते । किं चास्माकं यत्नस्यापि व्यापारविशेषत्वेन तल्लक्षणा सर्वथा श्रुत्यर्थत्यागाद्गुरं भवतां रथादिव्यापारे लक्षणा सर्वथा श्रुत्यर्थत्यागाज्जघन्या । अपि च दावाग्निर्वनं दहतीत्यादौ यत्नसम्बन्धग्रहं विनापि व्यापारबोधान्न भवद्रीत्या लक्षणा युज्यते । अगृहीताया वृत्तेरनुपयोगात् । अन्यथा अगृहीतशक्त्यादिभ्योपि बोधप्रसङ्गादिति वदन्ति । वस्तुतस्तु कृतित्वमपि शक्यतावच्छेदकं तेन रूपेणापि बोधात् । तथा फूत्कारत्वादिकमपि । अत एव तत्तद्रूपेणैव शक्तिरिति प्रागुक्तम् । वक्ष्यते च । एवं च व्यापारो भावनेति पूर्वोक्तमपि व्यापारोपि वाच्य इत्यभिप्रायकं न तु कृतित्वं नावच्छेदकमित्याभिप्रायकमिति भूमितव्यम् । तथापि च यथा न नानार्थत्वं तथोक्तं प्राक् । एवं च बोधस्य व्युत्पत्त्यनुसारित्वात्तथाव्युत्पन्नस्य कृतित्वरूपेणैव बोधो जायतइति न कश्चिद्दोष इति विभावनीयं सूरिभिः । तस्मात्फलव्यापारयोरिति प्रतिज्ञातफलवाचकत्वसाधनायैव कृञोकर्मकतापत्तेरिति ग्रन्थ इति विभावयामः । अथ वा व्यापारो भावनासैवेत्यादिना साधितमपि विवरणानुरोधेन व्यापारवाचकत्वं केवलफलवाचकतावादिनिरासेन समर्थयितुं तन्मतनिरासनायायं ग्रन्थः । तथाहि । लडादौ भावना वाच्यैव न, तत्प्रकारकशाब्दबोधस्य विवादग्रस्तत्वात् । यत्त्वाख्यातस्य यत्नो वाच्यः यत्नार्थककरोतिना विवरणात् व्यवहारादिवद्बाधकं विना विवरणादपि व्युत्पत्तेः किंकरोतीति यत्नप्रश्ने पचतीत्युत्तरस्य यत्नार्थकत्वं विनानुपपत्तेश्च । किं च फलमात्रस्य धात्वर्थत्वे तस्यैव नामार्थेन्वयः स्यात् । न चेष्टापत्तिः, धात्वर्थप्रातिपदिकार्थयोर्भेदेन साक्षादन्वयस्याव्युत्पन्नत्वात् । अन्यथा

तण्डुलः पचति चैत्र इत्यादावप्यन्वयो भवेदिति । तन्न । विवरणस्य पाकमित्यशब्दार्थकर्मत्वविवरणवदुपपत्तेः । तथाहि । चैत्रः पचतीत्यत्र स्वजनककृतिसम्बन्धेन पाकश्चैत्रे विशेषणम् । तथा च चैत्रः पाकं करोतीत्यत्र द्वितीयाख्यातयोरिव कृत्योपि संसर्ग एवार्थः । अन्यथा द्वितीयया आख्यातेन च कर्मत्वाश्रयत्वयोरपि विवरणात्तयोरपि वाच्यतापत्तेः । कृतित्वादिप्रकारकबोधस्तु मानस एवोत्तरकालिकः । प्रश्नोपि किं करोति इत्यत्र यदि किंशब्दस्य क्रियाविशेषणत्वमादाय कीदृशो यत्न इत्येवंरूपः । यदि वा कर्ममात्रविषयः । उभयथापि न तदुत्तरं यत्नस्याख्यातार्थत्वसाधकम् । पाकवाचकस्यैव धातोस्तद्विषयकयत्ने लक्षणया पाकविषयक इति बोधोपपत्तेः स्वातन्त्र्येण शक्तिसिद्ध्यसम्भवात् । एवंविधप्रश्नस्यासार्वत्रिकत्वात् कर्मप्रश्नश्च पाकमात्रबोधनेनोपपन्नः । अत एव पाकमित्यपि कादाचित्कमुत्तरं सङ्गच्छते । तण्डुलः पचतीत्यादौ तण्डुलप्रकारकपाकविशेष्यकबोधापत्तिरूपं बाधकं विशेष्यतासम्बन्धेनाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधे निपातसुबादिजोपस्थितेर्विषयतया हेतुत्वकल्पनेनैव नास्तीति कृतिसंसर्गकचैत्रादिविशेष्यकबोधे न दोषः । न च धात्वर्थप्रकारकबोधस्य कर्मादिरूपनामार्थे ऽभावाद्धात्वर्थप्रकारकबोधे तिङादिजन्योपस्थितेर्हेतुत्वं कल्पनीयं, तथा च न चैत्रे तदन्वय इति वाच्यम् । धात्वर्थप्रकारकबोधे प्रथमान्तजन्योपस्थितेरेव लाघवेन हेतुत्वात् । अन्यथा धात्वर्थप्रकारकबोधे तिबादिजन्योपस्थितिर्विषयतया हेतुः । आख्यातार्थभावनाप्रकारकबोधे प्रथमान्तपदजन्योपस्थितेर्हेतुरिति कार्यकारणभावद्वयमाख्यातस्य शक्तिश्च कल्प्येत्यतिगौरवं स्यात् । तस्मान्न कर्त्राख्यातस्य कृतिः कर्माख्यातस्य फलं वा-

ख्यम् । जानातीत्यादावाश्रयत्वं लक्ष्यमिति युक्तम् । न च पचतीत्यादावाख्यातस्य भावनावाचकत्वग्रहवतः पाकानुकूलकृतिमानिति बोधाद्धात्वर्थप्रकारकबोधे तिङाद्युपस्थितिर्हेतुः क्लृप्तेत्याख्यातार्थः कृतिरिति वाच्यम् । एवं ह्याख्यातार्थः कर्तेति ग्रहवत आख्यातार्थसंख्याप्रकारकबोधं प्रत्याख्यातजन्योपस्थितेर्हेतुत्वस्य क्लृप्तत्वेन कर्तृकर्मणोरप्याख्यातवाच्यताङ्गीकारापत्तेः । कर्तृकर्मणोः शक्तिकल्पनागौरवमिति चेत् । कृतिफलयोः शक्तिकल्पनागौरवं तवाप्यधिकमिति तुल्यमिति दिक् । यत्तु पार्थसारथिमिश्राः, भावनायाः सर्वत्रावाच्यत्वे वाजपेयाधिकरणमसङ्गतं स्यात् । तथाहि । वाजपेयेन स्वाराज्यकामो यजेत, उद्भिदा यजेत पशुकाम इत्यादिसर्वेषु वाक्येषु गुणविधिः कर्मनामधेयता वेति संशये यजेतेत्याख्यातं गुणफलाभ्यां तन्त्रेण सम्बन्धुं क्षमते नातो मत्वर्थलक्षणादि नामधेयत्वसाधकमतो गुणविधित्वमेव । तथाहि । यजेतेत्यत्र यागस्य भावनायां यदि कर्मत्वेन सम्बन्धस्तदा साध्यद्वयासमवायान्न फलं सम्बध्यते । यदि करणत्वेन तदा करणद्वयासमवायान्न गुणः सम्बध्येत । न चाख्यातेन कर्मत्वं करणत्वं चोच्यते । तद्वाचकपदाभावात् । तथा च यथा भावना कर्मत्वकरणत्वादिरूपभेदमन्तरेण साध्यादिभिः सम्बध्यते इदमनेनेत्थं कुर्यादिति तथा यागोपि करणत्वादिरूपमनादृत्यैव गुणफलाभ्यां सम्बध्यतइति न मत्वर्थलक्षणेति शङ्का । राद्धान्तस्तु, भावना हि क्रियारूपा करणत्वादिकमनादृत्य सम्बध्यतां यागस्त्वक्रियारूपः कथमिव कारकरूपैर्गुणादिभिः सम्बध्येत । तस्मादसौ भावनाद्वारेणैव गुणफलाभ्यां सम्बध्यतइति वक्तव्यं तथासति फलस्य साधनापेक्षत्वाद् गुणस्य साध्यापेक्षत्वात्तदवच्छिन्नभावनान्वयाय कर्मात्मना करणात्मना

वा यागः प्रतिपादनीय इत्याद्यर्थापत्तिः । एवं गुणत्वप्रधानत्वविधेयत्वानुवाद्यत्वापादानत्वोद्देश्यत्वकृतमपि वैरूप्यं वारयितुं तदापत्तिः । तस्मात् गुणविधिपक्षे मत्वर्थलक्षणा आद्यवृत्तिर्वा स्यात्तद्वरं वाजपेयं सुराद्रव्यमस्मिन्निति सुराद्रव्यविधानात्तत्मरूयन्यायेन नामधेयतेति स्थितम् । भवन्मते च काष्ठैः पचतीत्यादिषु भावनाभावाद्धात्वर्थनैव कारकाणां सम्बन्धात्क्रियारूपत्वं धात्वर्थस्याभ्युपेयम् । तथा च स्वरूपेणैव धात्वर्थः कारकसम्बन्धमर्हतीति विनैवाद्यवृत्त्या यज्यभिहितेनैव रूपेण साध्यसाधनाभ्यां सम्बध्यतइत्यधिकरणमिदमनुपपन्नं स्यात् । न चोद्देश्योपादानादिकृतमपि वैरूप्यं, गुणविशिष्टयागविधानात् । नापि मत्वर्थलक्षणा, कारकविभक्तयैव श्रुत्या क्रियारूपधात्वर्थसम्बन्धसिद्धेः । किं च धात्वर्थएव कारकाणामन्वये काष्ठैः पचतीतिवत्काष्ठैः पाक इत्यपि स्यात् । अपि च । लडादिभिरपि कर्मनामधेयानां करणार्थतया समभिव्याहारो दृश्यतेनुवादवाक्ये । वाजं वा एषोवरुरुत्सते यो वाजपेयेन यजते इति । यो राजसूयेन यजते योश्वमेधेन यजते इति च । इदं च धात्वर्थस्यैव करणाद्यन्वये न युज्यते । नहि स्वस्यैव स्वं प्रति करणत्वमिति यथा वैदिकवाक्यालोचनेनापूर्वं शब्दार्थ इत्यभ्युपेयस्तथैवाभ्युपगम्यतां भावनापि सर्वाख्यातवाच्यैवेति प्राहुः । अत्रेदमवधेयम् । भावनाया अवाच्यत्वमते फलमात्रमर्थ इति फलितम् । तत्रैव च करणादीनामन्वयः । तथा च काष्ठैः पचतीत्यादौ काष्ठजन्यः पाक इति बोधः । इदमेव च धात्वर्थस्य क्रियात्वं यत्कारकान्वयित्वम् । एवं च धात्वर्थनिरूपितं साध्यत्वं क्वापि विध्यतिरिक्तवाक्ये न बोध्यते । तण्डुलं पचतीत्यत्रापि वक्ष्यमाणरीत्या कर्मशक्तिर्द्वितीयार्थो न तु साध्यत्वमिति

न धात्वर्थसाध्यत्वं प्रतीयते । एवं च विधिवाक्यार्थे कार्ये विशेषणीभूतकृतौ यागस्य विषयितयान्वयात्तत्रान्वयितावच्छेदकतया करणत्वमौपादानिकप्रमाणादुपस्थितं शाब्दबोधे भासते वाजपेयादिगुणनिरूपितं साध्यत्वं चेति वैरूप्यं स्यादिति तत्परीहारायावृत्तिर्मत्वर्थलक्षणा वा स्यादेवेति समेव नामधेयत्वसाधकम् । यच्च काष्ठैः पाक इति स्यादिति । तत्रेष्टापत्तिरेवेति वक्ष्यामः । तवापि काष्ठैर्भावनेत्यापत्तिश्च । यदि चाख्यातोपात्तभावनायामेव तदन्वयस्तदा लडाद्यन्तोपात्तधात्वर्थे तदन्वय इति मयापि सुवचमेव । वाजपेयेन यजतइत्यादौ सामानाधिकरण्यानुपपत्तिस्तवापि तुल्या । विधिवाक्ये एवोत्सर्गप्राप्तं धात्वर्थस्य साध्यत्वं त्यज्यते नान्यत्रापि । यदि तदनुवादत्वादत्रापि धात्वर्थः करणं तर्हि ममापि प्रागुक्तरीत्या तथात्वमक्षतमिति दिक् । तस्मान्नाधिकरणानुपपत्तिर्भावनावाच्यत्वसाधिका नापि तस्या अवाच्यत्वे कारकान्वयानुपपत्तिः, फले एवैषामन्वयात् । नापि पचतीत्याख्यातार्थकालान्वयानुपपत्तिः । जानातीत्यादौ धात्वर्थएवान्वयात् । क्व चितु आक्षिप्तभावनायामन्वयः । पक्वानित्यादौ भावनावाच्यत्वविरहवादिभिर्भट्टपादैरपि तथाभ्युपगमादिति । एवं च भावनाया वाच्यत्वस्यैवाभावात् क्व कृतित्वेन व्यापारत्वेन वा वाच्यत्वे विवादः । कथं वा धात्वाख्यातार्थत्वविवाद इति केचिन्मन्वते । तान्निराचष्टे । कृञ इत्यादिना । अयं भावः । व्यापारावाच्यत्वमते फलमात्रमर्थ इति फलितं तथा च करोतीत्यादौ यत्नप्रतीतिः स एव धात्वर्थ इति वाच्यं, तथा च यत्नमात्रार्थकत्वाद्यतीप्रयत्नइत्यादिवत्प्रागुक्तरीत्या ऽकर्मकतापत्तिः । विना व्यापारान्तर्भावं तद्विभागासम्भवात् । किं चैवं कर्मस्थक्रियत्वाभावेन कर्मकर्त्तरि य-

गादिकंस्यादित्याद्युक्तरीत्योह्यम्। ननूत्पत्तिरेव कृत्योर्थोस्तु। तथा च कर्मस्थभावकत्वाद्यगादिकं स्यादेवेति चे,त्तथाप्युत्पद्यतइतिवदकर्मकतापत्तिरेव दुर्वारा उत्पन्त्यर्थभवतेर्भूयते घटः स्वयमेवेत्यस्येव क्रियते घटः स्वयमेवेत्यस्याप्यसम्भवापत्तेदुर्वारत्वाच्च। अस्तु वा कृत्यर्थः कृतिमात्रमुत्पत्तिमात्रं वा। तथापि धातूनां फलमात्रार्थकत्वे सकर्मकत्वाकर्मकत्वविभागोच्छेदापत्तिः। स्वार्थफलव्यधिकरणव्यापारवाचकत्वं स्वार्थव्यापारव्यधिकरणफलवाचकत्वं वा तत्त्वमित्यस्य त्वद्रीत्या असम्भवात्। न चैवमननुगमापत्त्यान्यतमत्वमेव तद्वाच्यं तथा च नोक्तदोष इति वाच्यम्। एकस्यैवार्थभेदेनाकर्मकत्वसकर्मत्वयोर्दर्शनेन कदा कः सकर्मक इत्यननुगतस्यैव लक्ष्यत्वेन लक्षणाननुगमस्येष्टत्वात्। अन्यतमत्वमिति पक्षे सर्वत्र वार्थे सकर्मकत्वापत्तिरिति। अथ वा, कर्मणा सहितत्वं सकर्मकत्वं तदभावापत्तेरित्यर्थः। अस्मिन्मते कर्मत्वस्य दुर्वचत्वात्। न च धात्वर्थाश्रयत्वं कर्मत्वं तथा सति तण्डुलं पचति घटं भावयतीत्यत्रेव घटो भवतीत्यत्रापि घटस्य कर्मत्वं दुर्वारमिति द्वितीया स्यात्। परसमवेतक्रियाजन्यधात्वर्थफलशालित्वस्यापि कुलालनिष्ठकृतिजन्योत्पत्त्याश्रयत्वेन सत्त्वात्। अथ संज्ञैव द्वितीयोत्पत्तौ प्रयोजिकेति घटो भवतीत्यत्र घटस्य कर्तृत्वेन तत्संज्ञया कर्मसंज्ञाया बाधान्न द्वितीयेति चेन्न। त्वन्मते घटस्य कर्तृत्वासम्भवात्। अनुगतकर्तृत्वस्य त्वन्मते दुर्वचत्वात्। कृत्याश्रयत्वं कारकचक्रप्रयोक्तृत्वं वा तत्त्वमिति चेत्तर्हि घटोस्तीत्यत्रापि तन्न स्यात्। धात्वर्थानुकूलव्यापाराश्रयत्वं च कारकमात्रेतिप्रसक्तम्। एतेन स्वार्थफलव्यधिकरणव्यापारवाचित्वं सकर्मकत्वं नार्थसाधकम्। यद्धातूच्चारणे कर्माकांक्षा नियता स सकर्मको ऽन्योकर्मक इत्येव लक्षणसम्भवात्। तस्य च केवलव्यापा-

रवाचित्वे केवलफलवाचित्वे चासम्भवादित्यपास्तम् । कर्मत्वस्य दुर्वचत्वेन तदाकांक्षावन्त्वरूपस्यापि तस्यासम्भवात् । न च द्वितीयान्तपदोपस्थाप्यत्वं तत्त्वम् । स्तोकं भवतीत्यपि दर्शनेनातिव्याप्तेः । न च कर्तृत्वकर्मत्वादिकमखण्डमेव । व्यासज्यवृत्तिकर्तृत्वदेवतात्वादेः शास्त्रे ऽदर्शनादिति वाच्यम् । तस्य धात्वर्थफलाश्रयत्वव्यापकतया तत्सत्त्वेन सत्त्वात् । न च सकर्मकधात्वर्थाश्रयत्वं कर्मत्वम् । अन्योन्याश्रयेण सकर्मकत्वादेर्दुर्ग्रहत्वापत्तेः । निरसिष्यते चोक्तसकर्मकत्वं फलव्यापारयोरेकनिष्ठतायामित्यत्र । किं चैवं फलमात्रस्य धात्वर्थत्वे ग्रामो गमनवानिति प्रतीत्यापत्तिः, पाकानुकूलव्यापारारम्भेपि फलानुत्पाददशायां पाको भवतीत्यनापत्तिः, ग्रामचैत्रयोर्मिथःसंयोग इतिवन्मिथो गमनमित्यापत्तिर्व्यापारविगमे फलसत्त्वे पाको विद्यते इत्यापत्तिः, पाकोभूदित्यनापत्तिश्चेति दिक् । मण्डनमिश्रमतानुयायिनस्तु फलमेव धात्वर्थः । व्यापारः प्रत्ययार्थः । प्रत्ययार्थव्यापारव्यधिकरणफलवाचकत्वं सकर्मकत्वम् । प्रत्ययार्थव्यापारसमानाधिकरणफलवाचित्वं चाकर्मकत्वम् । कर्मत्वमपि प्रत्ययार्थव्यापारव्यधिकरणधात्वर्थाश्रयत्वमेव । घटं भावयतीत्यादौ णिच्प्रत्ययार्थव्यापारव्यधिकरणोत्पत्त्याश्रयत्वसत्वात् । न चाण्यन्ते ऽप्यन्तर्भावितण्यर्थे शम्भुर्घटं भवतीत्यादौ प्रत्ययार्थसमानाधिकरणव्यापारार्थकत्वादकर्मकत्वलक्षणातिव्याप्तिरिति शङ्क्यम् । भ्वादोर्णिजर्थावाचकतया लक्षणावश्यकत्वे प्रत्ययस्यैव णिजर्थलक्षणाभ्युपगमेन सर्वनिर्वाहात् । एवं प्रत्ययार्थव्यापाराश्रयत्वमेव कर्तृत्वं यथा मैत्रः पचतीत्यादौ मैत्रादेः, देवदत्तेन चैत्रः पाचयतीत्यादौ णिजर्थाख्यातार्थयोराश्रयत्वादुभयोः कर्तृता । अत एव शत्रूनगमयत्स्वर्गमित्यादौ शत्रूणां कर्तृ-

त्वात्कर्मसंज्ञा । कर्तुरेव कर्मसंज्ञाविधानात् । एवमाख्यातानां स्वार्थव्यापारान्वितकालबोधकत्वमेव । जानातीत्यादावपि ज्ञानाश्रयत्वरूपे तज्जनकमनःसंयोगरूपे वा व्यापारएव तदन्वयो न तु धात्वर्थे । एवं चैकस्यैव धातोः फलव्यापारोभयवाचकत्वे नानार्थतादोषोपि परास्तः । भावे विहितघञादीनामपि व्यापारवाचकत्वस्वीकारादेव न ग्रामो गमनवानित्याद्यापत्तिरपि । अत एव घञर्थभावनान्वयादोदनस्य पाक इत्यत्र कर्तृकर्मणोः कृतीति विहिता कर्माणि षष्ठी सङ्गच्छते एवं कर्तृकर्मकृतामपि कारकभावनोभयवाचकत्वादोदनस्य पक्तेत्याद्यपि नानुपपन्नम् । न चैवं कृतां नानार्थतापत्तौ गौरवापत्तिः धातुभ्यः कृतामल्पतया त्वद्रीत्या बहूनां धातूनां तत्कल्पनातो लाघवाक्षतेः । नन्वेवं कृजानात्यादेरकर्मकतापत्तिः धात्वर्थयत्नज्ञानादिव्यधिकरणव्यापारस्य देवदत्तादौ बाधादिति चेन्न । फलतावच्छेदकविषयतासम्बन्धेन यत्नाद्यनधिकरणवृत्तित्वरूपस्य व्यधिकरणत्वस्य तदाश्रयत्वरूपे व्यापारे सत्त्वात् । यथाश्रुते सकर्मकाणामपि कालिकादिसम्बन्धेन फलसमानाधिकरणव्यापारवाचित्वादकर्मकाणां च सम्बन्धान्तरेण फलव्यधिकरणव्यापारवाचित्वसत्त्वेनालप्रकतापत्तेरित्याहुः । तन्न । क्रियते घटः स्वयमेवेत्यनापत्तेः । ज्ञायते घटः स्वयमेवेत्यापत्तेर्वा । विषयतया यत्नस्येव ज्ञानेच्छयोरपि तत्र सत्त्वात् । घटनिष्ठोत्पत्तेरपि कुलालज्ञानेच्छाकृतिजन्यत्वस्याविशिष्टत्वात् । किं च पचति पक्ष्यति पक्वानित्यादौ फूत्कारादीनां प्रतीतयेनेकप्रत्ययानां तत्र शक्तिर्वाच्येति शक्ततावच्छेदकानन्त्यादनेकशक्तिकल्पनागौरवापत्तिः । अस्माकं पचधातोरैक्याच्छक्तयैक्येन लाघवम् । किं च फूत्कारादेः प्रत्ययार्थ-

त्वे गच्छतीत्यादावपि तत्प्रतीत्यापत्तेस्तद्बोधे पचधातुसमभिव्याहारः कारणं वाच्य इति पचेरेव शक्तिर्युक्ता । अन्यथा पूर्वापरीभूतं भावमाख्यातमाचष्टे यथा पचति व्रजतीत्युपक्रमप्रभृत्यपवर्गपर्यन्तमिति निरुक्तविरोधश्च । अत्राख्यातशब्दस्य धातुपरतायां वक्ष्यमाणत्वात् । अपि चास्त्यादौ सत्ताद्येव व्यापारः । अवच्छेदकतारूपा व्याप्तिः फलम् । अत एव मासं भवतीत्यादौ मासादेः कर्मतेति वक्ष्यते । तथा चात्र भवाद्भिः प्रत्ययानां सत्तादौ पृथक् शक्तिः कल्प्या धातूनां च सा त्याज्येति महद्गौरवं स्यात् । ननु तवापि भवतीत्यादौ सत्तावद्व्याप्तेर्ज्ञानं कृतिरित्यादौ विषयत्वोत्पत्त्यादेश्च बोधापत्तिर्दुर्वारा फलेपि शक्तिसत्त्वादिति चेन्न । "एकदेशे समूहे वा व्यापाराणां पचादयः । स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिता" इति वाक्यपदीयोक्तरीत्या निरस्तत्वात् । गवादिपदानां गोवागिन्द्रियपृथिव्याद्यनेकार्थत्वेपि प्रसिद्धितदभावाभ्यां शीघ्रं वागाद्यबोधगोबोधयोरिवोपपत्तेश्च । अपि च गुरुः शिष्येण पाचयतीत्यत्र गुरुव्यापारस्य प्रयोजकव्यापारत्वेन णिजर्थत्वे स्थिते तस्याख्यातार्थप्रयोज्यव्यापारं प्रति प्रकृत्यर्थत्वादप्राधान्यापत्तिः । आख्यातार्थव्यापारानन्वयिनि सङ्ख्यान्वयासम्भवात्तदनभिधानेन गुरौ प्रथमानापत्तेः शिष्ये प्रथमापत्तेश्चेत्यादि स्पष्टं चैतद्विवेचयिष्यामः । अथ फलमात्रं न धात्वर्थः । किं तु व्यापारोपि तथा च धात्वर्थव्यापाराश्रयत्वमेव कर्तृत्वं तदर्थफलाश्रयत्वं च कर्मत्वम् । एवं च न सकर्मकत्वाकर्मकत्वविभागोच्छेदोपि । भावे विहितयञादीनां च धात्वर्थव्यापारानुवादकत्वान्न पाको भवति अभूदित्यनयोरनापत्तिः । स्वीकृतं च धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वम् । फलावच्छिन्नव्यापा-

रबोधकत्वादेव धातूनां सकर्मकत्वाकर्मकत्वविभाग इति वद-
द्भिर्नैयायिकैरपि तथेति चेत्तर्हि सिद्धमस्मन्मतम् । धातोर्व्यापा-
रशक्तावेव यत्नस्याप्यनुप्रवेशेन विक्लित्त्यनुकूलयत्नप्रत्ययसि-
द्धेराख्यातस्य स्वातन्त्र्येण यत्ने शक्तेर्मानाभावाद्गौरवाच्च सि-
द्ध्यसम्भवात् । नहि पचतीत्यादौ विक्लित्त्यनुकूलव्यापारा-
नुकूलयत्नवानिति प्रत्यय आनुभविकानां येन तदनुरोधेनाख्या-
तस्य पृथक्शक्तिः स्यात् । न चैवं यत्नत्वरूपेण बोधो न स्या-
त् । धात्वर्थव्यापारे फलस्यैवावच्छेदकत्वात् इति शङ्क्यम् ।
पचतीत्यादावधःसन्तापनफूत्कारादेर्विशिष्यबोधानुरोधेन वि-
शिष्यैव तद्वाच्यत्वकल्पनात् । फूत्कारत्वयत्नत्वादिभिः शक्तौ
धातोर्नानार्थतापत्तिरिति चेत् । किं कुर्मः, यत्नमात्रांशत्यागेऽप्यधः-
सन्तापनत्वफूत्कारत्वचुल्ल्युपरिधारणत्वरूपेण बोधानुरोधेनास्य
दुष्परिहार्यत्वात् । नैयायिकनवीनानामाख्यातस्य फलवाच-
कत्वेऽपि तदादिन्यायेन नानार्थत्वपरीहारवद्वा अस्याप्युपपत्तेः ।
एवं च करोतिरपि धात्वंशस्यैव विवरणम् । अत एव पक्ते-
त्यादावपि कृतिबोधाय पृथक् शक्तिर्न कल्प्येत्यतिलाघवं स्यात् ।
न च पचति पाकं करोतीति विवरणं न स्यात् । कृत्यनुकूलकृ-
त्यभावादिति शङ्क्यम् । तत्र पाकशब्दस्य विक्लित्तिमात्राभिप्रा-
यकत्वात् । अत एव फलानुत्पाददशायां पाको जातो नवेति
प्रश्ने भविष्यतीत्यपि प्रत्युत्तरं दृश्यते । व्यापारान्तर्भावेण प्रश्ने
जायतइत्यपि दृश्यते । अत एवोदनस्य पाक इति कर्मकार-
कान्वयः । अन्यथा भावनाया अनुक्तावनन्वयापत्तेः । कारका-
णां क्रियायामेवान्वयस्य वाजपेयाधिकरणसिद्धान्तमूलत्वात् ।
न चाक्षिप्तातिङर्थान्वय इति भ्रमितव्यम् । लादेशयोगे षष्ठ्या
असम्भवस्य वक्ष्यमाणत्वात् । यतते यत्नं करोतीतिवद्विवरणो-

पपत्तेश्च । न च फलजनकव्यापारस्यैव धात्वर्थत्वात् यत्नस्य चेष्टादिभिरन्यथासिद्धस्य कथं धात्वर्थतेति भ्रमितव्यम् । कुलालयत्नादेर्घटादिजनकत्वानापत्त्या व्यापारेणान्यथासिद्धत्वस्य सर्वशास्त्रेषु निराकृतत्वादिति । वक्ष्यते चान्यदुपरिष्टादित्यादि सर्वमभिप्रेत्याह ॥

तस्मात्करोतिर्धातोः स्याद्व्याख्यानं न त्वसौ तिङम् पक्ववान् कृतवान्पाकं किं कृतं पक्वमित्यपि ॥८॥

तस्मात् । आभिप्रायिकादुक्तहेतोः । धातोरित्यादि । अत्र मीमांसकाः । आख्यातवाच्यैव भावना । भावनार्थककरोतिना विवरणात् । यत्तूक्तं धातोरेवैतद्विवरणमिति । तन्न । विनिगमकाभावात् । अस्मन्मते व्यापारविशेष्यकबोधानुपपत्तिरेव मानम् । प्रकृतिप्रत्ययौ सहार्थं ब्रूतस्तयोः प्रत्ययार्थप्राधान्यस्यान्यत्र क्लृप्तत्वात् । तदागमे हि इष्यतइति न्यायेनाख्यातवाच्यत्वपरिच्छेदाच्च । तदुक्तम् । प्रत्ययार्थं सह ब्रूतः प्रकृतिप्रत्ययौ सदा । प्राधान्याद्भावना तेन प्रत्ययार्थोवधार्यते ॥ तथाक्रमवतोर्नित्यं प्रकृतिप्रत्ययांशयोः । प्रत्ययश्रुतिवेलायां भावनात्मावगम्यतइति ॥ न चायमुत्सर्गः प्रप्रकृते नादरणीयः । बाधकाभावेन त्यागायोगात् । तदुक्तम् । धात्वर्थस्य प्रधानत्वं न तावदिह जन्मनि । औत्सर्गिको न च न्यायो मत्पक्षे हि निवर्त्स्यतीति ॥ अथ भावनाया आख्यातवाच्यत्वे कृत्प्रत्ययस्थले तत्प्रतीतिर्न स्यात् । वाचकाभावादिति चेन्न । धात्वर्थकारकैर्गम्यमानत्वादेव तस्यास्तत्र प्रतीतेः । अत एवोक्तम् । धात्वर्थकारकैरेव गुणभूतोवगम्यते । भावनात्मा कृदन्तेषु तस्मान्नैवाभिधीयते ॥ यथैव भावनाप्रधानत्वादा-

ख्यातेषु तत्सम्बन्धादेव गुणभूतकारकप्रतीतिसिद्धेर्न कर्तृकर्मणोरभिधानम् । एवं कर्त्राद्यभिधानादेव तदनुपपत्त्या भावनायाः सिद्धेरनभिधानम् । करोतिसामानाधिकरण्यमपि गम्यमानापेक्षयैव, यथा पचतिशब्दस्य देवदत्तशब्देन, तथाभूतयैव च कारकसम्बन्धोप्युपपद्यतइति । न च पक्ववान् पक्तेत्यादौ कारकयोर्धातुकृदर्थयोररुणाधिकरणन्यायेन परस्परमन्वयास्वीकारात्प्रकृतिप्रत्ययार्थयोरन्वयस्यैवाभावे क्व प्राधान्यनियमः सहार्थं ब्रूतइति वचश्चेति शंक्यम् । "सम्बन्धमात्रयुक्तं च श्रुत्या धात्वर्थभावयो" रिति वार्तिकोक्तरीत्या सम्बन्धसामान्येनान्वयेन प्राथमिकबोधे च प्राधान्यस्योक्तत्वात्। तस्माद्धातुवाच्या भावनेति वैयाकरणमतं न साधीय इत्याहुस्तत्र बाधकमाह । न त्वित्यादिना। नासौ तिङां व्याख्यानं, पक्ववानित्यादावनन्वयापत्तेरित्यर्थः । अयं भावः । प्रकृतिप्रत्ययौ सहार्थं ब्रूत इत्यस्य हि विशेष्यतया प्रकृत्यर्थप्रकारकबोधं प्रति तदुत्तरप्रत्ययजन्योपस्थितिर्हेतुरिति कार्यकारणभावः फलितः । एवं च पक्ववानित्यत्र पाकः कर्मकारकं क्तवत्वर्थः कर्तृकारकं तयोश्च वक्ष्यमाणरीत्यान्वयासम्भवात्प्रकृतिप्रत्ययार्थयोरन्वयनियमस्यैवाभावे क्व प्राधान्यबोधक उक्तो नियमः । न च सम्बन्धसामान्येनान्वयः शङ्क्यः । योग्यताविरहात् । क्रियात्वमेव हि कारकान्वयितावच्छेदकमिति वक्ष्यते । तदेतदाविष्कर्तुं धात्वर्थक्तवत्वर्थयोः कर्मत्वकर्तृत्वे विवरणेन दर्शयति । कृतवान्पाकमिति । वस्तुतः प्रत्ययार्थः प्रधानमित्यत्र यः प्रधानं स प्रत्ययार्थ एव । यः प्रत्ययार्थः स प्रधानमेवेति वा न नियमः । अजा छागी पाचिकेत्यादौ व्यभिचारात् । नहि पाचिकेत्यादौ स्त्रीत्वविशेष्यको बोधः कस्य चित् । ननु जातिव्यक्त्योरभेदस्वीकारात्स्त्रीत्वविशेष्यक-

बोधे इष्टापत्तिरिति चेन्न । एवं ह्याकृत्यधिकरणोच्छेदापत्तिरित्येकं द्विकमित्यादौ वक्ष्यामः । वस्तुतो विशेष्यत्वादिबोधस्य तादृशव्युत्पत्त्यनुसारित्वेन न प्रत्ययार्थत्वादौ प्रमाणता । तथाहि । बोधो व्युत्पत्त्यनुसारी, न च बोधानुसारिणी व्युत्पत्तिः । तथा च तव तादृशव्युत्पत्तिसत्त्वात्तथैव बोधः । अत एव नैयायिकस्य प्रथमान्तविशेष्यक एव बोधः । अत एव लक्षणायां लक्ष्यतावच्छेदकं शक्यतावच्छेदकमेवेति स्वीकुर्वन्तो गङ्गायां घोषः, "जाता लता हि शैले जातु लतायां न जायते शैलः । सम्प्रति तद्विपरीतं कनकलतायां गिरिद्वयं जातमि" त्यादौ गङ्गात्वलतात्वशैलत्वादिना तीरादेर्बोधोत एव चमत्कारोपि । अन्यथा वैपरीत्यं च न स्यात् इत्याहुरालङ्कारिकाः ॥ नैयायिकादयस्तु " कचतस्त्रस्यति वदनं वदनात्कुचमण्डलं त्रसति । मध्याद्भिभेति नयनं नयनादधरः समुद्विजती" ति ॥ अत्र कचत्वादिना बोधो न त्रासकर इत्यतोन्यदेव तद्वाच्यम् । अत एव गङ्गापदात्तीरत्वादिनैव बोध इत्याहुः । तस्माद्व्युत्पत्तिग्रह एवात्र शरणं न नियमः । अत एव भगवान्पाणिनिराह । प्रधानप्रत्ययार्थवचनमर्थस्यान्यप्रमाणत्वादिति । अत्र तदशिष्यमित्यनुवर्त्य वचनमित्यत्र योज्यम् । तत्र हेतुरर्थस्येत्यादिः । अन्यप्रमाणत्वात्, लोकत एव व्युत्पत्त्यनुसारेण विशेषणविशेष्यभावेन बोधोपपत्तेरित्यर्थ इति । किं च । यदि नियामकापेक्षा, गृह्यतां तर्हि भावप्रधानमाख्यातं सत्त्वप्रधानानि नामानीति निरुक्तवचनम् । इदं हि नामाख्यातोपसर्गनिपातानां चतुर्णां पदानां मध्ये नामाख्यातयोर्लक्षणत्वेन प्रवृत्तम् । अत्राख्यायते सर्वप्रधानभूतो ऽर्थोनेनेति व्युत्पत्त्या धातुराख्यातपदेनोच्यते । नामादिप्रकृतीनामेवोद्देशात् । अग्रेपि तत्र नामान्याख्यातजानी-

ति शाकटायनो नैरुक्तसमयश्च न सर्वाणीति गार्ग्यो वैयाकरणानां चैके इत्युक्तत्वाच्च । नन्वाख्यातप्रत्ययजं नाम सम्भाव्यते किं तु धातुजम् । अत एवैतत्समानार्थकं वाक्यं सर्वं नाम धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोकामिति महाभाष्ये पठितम् । तथा च धातोर्भावप्रधानबोधजनकत्वं लक्षणम् । नमन्त्याख्यातशब्दे गुणभावेन, नमयन्ति वा स्वार्थं भावनां प्रतीति नामानि । तल्लक्षणं सत्त्वप्रधानानीति । एवं चाख्यातस्य भावप्रधानत्वोक्तेर्धात्वर्थो भावनेति निरुक्तविरुद्धम् । अन्यथा भावप्रधानो धातुरित्येव वावक्ष्यदिति निरस्तम् । तस्मान्न प्रत्ययार्थप्राधान्यनियम इति ध्येयम् । यच्च तदागमे हीत्यादि, तत्राह । किं कृतं पक्वमिति । कृत्वा विवरणं प्रतीतिश्च पक्ववान् पक्वमित्यादावपि इति तत्रापि भावना वाच्या स्यादिति भावः । नन्वस्तु तिङामिव कृतामपि भावना वाच्येत्यत आह । अपीति । तथा चोभयत्रापि प्रतीतेरुभयसाधारणो धातुरेव वाचकोस्त्विति भावः । भवद्रीत्या प्रत्ययार्थत्वात्प्राधान्यापत्तिश्चेति द्रष्टव्यम् । यदप्युक्तम् । पक्ववानित्यादौ धात्वर्थकारकैरेव तदाक्षेप इति । तदपि न । आख्यातस्थलेप्याक्षेपापत्त्या तत्रापि भावनाया वाच्यत्वं न स्यात् । आक्षेपलभ्यस्य प्राधान्याभावनियमस्य निरस्तत्वात् । वैपरीत्यापत्तेश्च । कृत्यपि भावनाया एव वाच्यतापत्तेः । अथ कृदुपस्थाप्ये लिङ्गसङ्ख्यान्वयित्वदर्शनात्कर्तुर्वाच्यत्वमावश्यकमिति चे, तार्हि कालान्वयाय भावनाया अपि तदावश्यकमेवेति तुल्यम् । किं च । एवं हि सङ्ख्यान्वयोपपत्तेराख्यातेपि कर्त्ता वाच्यः स्यात् । आक्षेपलभ्ये कर्त्तरि सङ्ख्यान्वयो न विरुद्ध इति चेत्तुल्यं प्रकृतेपीति दिक् ॥ ८ ॥

अपि च धातोर्भावनावाचकत्वसिद्धावेव कर्तृकर्मकरणादौ कृत्प्रत्ययास्संकुच्छन्ते नान्यथेत्यभिप्रेत्य तदेवोदाहरन्नाह ॥

किं कार्यं पचनीयं चेत्यादि दृष्टं हि कृत्स्वपि ।
किं च क्रियावाचकतां विना धातुत्वमेव न ॥९॥

अयं भावः । कार्यमित्यादौ ऋहलोर्ण्यदिति कर्मणि प्रत्ययः । पचनीयमित्यादौ चानीयर्प्रत्ययः कर्मणि, एवमादिना ज्योतिष्टोमयाजीत्यादौ करणेयज इति णिनिः, पक्वामित्यादौ क्तादिश्चोक्तः । एते च क्रियायोगं विना ऽसम्भावितास्तद्वाच्यतां बोधयन्ति । विना क्रियां कारकाणामसम्भवात् । नापि तेषां कारकत्वसम्भावनाप्यन्यथा क्रियान्वायित्वस्यैव तत्त्वात् । यत्त्वाक्षेपलब्धक्रियासम्बन्धात् कारकार्थकः प्रत्ययः कारकत्वं चेति । तदुक्तोत्तरम् । किं चैवं नखैर्भिन्नो नखभिन्नो, हरिणा त्रातो हरित्रात इत्यादौ कर्तृकरणेकृताबहुलामिति समासो न स्यात् । पुरुषो राज्ञो भार्या देवदत्तस्येत्यादिवदसामर्थ्यात् । अथाध्याहृतक्रियाद्वारा सामर्थ्यमस्त्येव । अन्यथा दध्योदनः गुडधाना इत्यादावप्यन्नेन व्यञ्जनं, भक्ष्येण मिश्रीकरणमित्यनेन समासो न स्यात् । अध्याहृतोपसेकामिश्रणाक्रियां विना ऽन्वयासम्भवादिति चेन्न । तत्र विध्यानर्थक्यादगत्या तथास्वीकारेपि हरिकृतं जगत्, रामबाणकृतो वधः इत्यादौ साक्षाद्धात्वर्थभावनान्वयेनोपपद्यमानस्याक्षेपेण परम्परासम्बन्धे प्रवृत्त्यसम्भवात् । न चैकस्यां क्रियायां कर्मादिभावेनान्वयित्वमेवात्र सामर्थ्यमिति वाच्यम् । असूर्यंपश्या इत्यादौ सर्वचर्मणः कृतः खखत्वाविति सूत्रे सर्वचर्मण इत्यंशेपि च तथात्वसत्त्वेनासमर्थसमासत्वानापत्तेः । इष्टापत्तौ, कृतः सर्वो मृत्तिकयेत्यर्थे कृतः

सर्वमृत्तिक इत्यापत्तेः । न चात्र समासविधायकाभावः । सहसुपेत्यस्यैव सत्त्वात् । अन्यथोक्तसूत्रेपि तव स न स्यात् इति दिक् । अस्मन्मते च धातूपात्तां भावनां प्रत्यन्वयादनुपपत्तिगन्धोपि नेति । अपिः प्रागुक्तदूषणसमुच्चयार्थः । अथ वा दोषान्तरमप्यर्थः । तथाहि । भावयति घटामितिवत्परमते भवति घटमित्यपि स्यात् । तुल्यार्थत्वात् । दृष्टान्ते हि कर्तुः कुम्भकारस्य व्यापारं णिजाचष्टे, दार्ष्टान्तिके त्वाख्यातप्रत्ययः । तथा च भावनाकर्मत्वात् घटस्य कर्मणि द्वितीया स्यादेव । नतु प्रयोजकव्यापारो णिजर्थः कर्तृव्यापारस्त्वाख्यातार्थ इति वैषम्यमिति घटो भवतीत्यत्र कर्तृव्यापारवत्त्वात् घटः कर्तैव । तथा च कर्तृसंज्ञया कर्मसंज्ञाया बाधान्न द्वितीया किं तु प्रथमैवेति चेन्न । त्वन्मते कारकचक्रप्रयोक्तुरेव कर्तृत्वेन घटस्यातथात्वात् । भावनायाः प्रत्ययार्थतावादिनामन्यादृशकर्तृत्वस्य दुर्वचत्वाच्च । यन्तु बाधलक्षणे क्रत्वर्थाभ्युच्चयाधिकरणे यस्यैवान्यापेक्षयाख्यातोपात्तव्यापारसमवायः स कर्तेत्युक्तत्वादचेतनघटादेरपि कर्तृत्वमिति । तन्न । करोतिः क्रियमाणेन न कश्चित्कर्मणा विना । भवत्यर्थस्य कर्त्ता च करोतेः कर्म जायते ॥ करोत्यर्थस्य यः कर्ता भवितुः स प्रयोजकः । भविता तमपेक्ष्याथ प्रयोज्यत्वं प्रपद्यते ॥ प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः । ण्यन्तादाव-प्रयुज्यन्ते तत्प्रयोजककर्तृषु ॥ इत्यारभ्य "तेन भूतिषु कर्तृत्वं प्रतिपन्नस्य वस्तुतः । प्रयोजकक्रियामाहुर्भावनां भावनाविद" इति भावार्थाधिकरणे भट्टपादैराख्यातार्थभावनानिरूपितत्वात् घटस्य तदाश्रयत्वाभावेन कर्तृत्वासम्भवात् । किं च क्व चित्प्रयोगे काष्ठादेः कर्तृत्वे क्व चिच्चाकर्तृत्वमिति व्यवस्थार्थं तस्मिन्प्रयोगे य आख्यात इत्यस्यावश्यकत्वे शत्रूनगमयत्स्वर्गमि-

त्यादौ स्वर्गकर्तृता प्रयोज्यकर्तुर्न स्यात् । आख्यातार्थव्यापारानाश्रयत्वात् । न चेष्टापत्तिः । तथा सति स्वर्गस्य कर्मत्वानापत्तेः । कर्तुरीप्सिततमत्वस्य कर्मत्वात् । न च प्रयोजककर्तृकर्मत्वमेव स्वर्गस्यास्तां,तथा सति णिजर्थकर्मत्वापत्तौ गमिकर्मतानापत्तेः । तथा च गत्यर्थकर्मणिद्वितीयाचतुर्थ्यौचेष्टायामनध्वनीति स्वर्गायेति चतुर्थ्यनापत्तेः, पाचयति देवदत्तो विष्णुमित्रेणेत्यत्र विष्णुमित्रस्य कर्तृत्वविरहेण तृतीयानापत्तेश्च । न चेयं करणतृतीयैवेति शङ्क्यम् । तथासति देवत्तस्याहेतुतापत्तौ णिजुत्पत्त्यसम्भवापत्तेः । तत्प्रयोजकोहेतुश्चेति कर्तृप्रयोजकस्यैव हेतुत्वात् । एवं शत्रूणामकर्तृत्वेप्यूह्यम् । ण्यन्ते कर्तुः कर्मण इति भाष्यविरोधापत्तेश्च । अकर्तुः कर्मण एव कर्तृपदव्यावर्त्यत्वात् । न च कर्तुः कर्मण इति भाष्यमसङ्गतमेव संज्ञान्तरानाविष्टे कर्तृपदसङ्केतेनात्रापि प्रयोज्यस्य गतिबुद्धीतिसूत्रेण कर्मसंज्ञाविधानेन कर्तृत्वासम्भवादिति वाच्यम् । शुद्धधात्वर्थव्यापारे कर्तृत्वेपि प्रयोजकव्यापारे कर्मत्वात् । क्रियाभेदेन तयोरविरोधात् । किं च देवदत्तः पाचक इत्यत्राख्याताभावादेवदत्तादेः कर्तृत्वं न स्यादित्याद्यूह्यम् । किं च । फलप्रकारकव्यापारविशेष्यकानुकूलत्वसंसर्गकशाब्दबोधे त्वया धात्वाख्यातयोर्धातुकृतोर्वा आनुपूर्वीहेतुरभ्युपेया । मया च धातोरेवानुपूर्वी तथा वाच्येति लाघवम् । न च तवापि यदाख्यातस्य व्यापारवाचकत्वभ्रमस्तदा तद्धेतुरभ्युपेयः । धातुशक्तिज्ञानस्यापि कारणत्वे कारणतारूपायां शक्तौ व्याकरणस्यैव निर्णायकत्वात् । अन्यथा षटपदस्यापि शक्तिभ्रमात्पटबोधकत्वेन पटशक्तत्वापत्तेरिति । साधुत्वनिर्णायकं व्याकरणमिति चेत् । शक्तत्वस्यैव साधुत्वस्य व्याकरणाधिकरणे

न्यायसुधायामभिधानात् । प्रत्ययस्यैवमप्यसाधुतापत्तेश्चेति ध्येयम् । धातुत्वमेव नेति । अयं भावः । धातुसंज्ञाविधायकं तावद्भूवादयोधातव इति सूत्रम् । तत्र च भूश्च वाश्चेति द्वन्द्वः । आदिशब्दयोर्व्यवस्थाप्रकारवाचिनोरेकशेषःततो भूवौ आदी येषामिति बहुव्रीहिः । तथा च भूप्रभृतयो वासदृशा धातव इत्यर्थः पर्यवसितः । सादृश्यं च क्रियावाचकत्वेन । अन्यथा वाशब्दानर्थक्यं स्यात् । इत्थं च क्रियावाचकत्वे सति गणपठितत्वं धातुत्वं पर्यवसितम् । अत्र क्रियावाचित्वमात्रोक्तौ वर्जनादिरूपक्रियावाचके हिरुक् नानेत्यादावतिव्याप्तिरिति गणपठितत्वमुक्तम् ॥ ९ ॥

ननु गणपठितत्वमेव धातुत्वमास्तां न तु क्रियावाचकत्वमपि । न च वाशब्दानर्थक्यं, भूवादीनां वाकारोयं मङ्गलार्थः प्रयुज्यते इति वार्त्तिककारैरेव तत्प्रयोजनस्योक्तत्वादित्यत आह ॥

सर्वनामाव्ययादीनां यावादीनां प्रसङ्गतः ।
र। नहि तत्पाठमात्रेण युक्तमित्याकरे स्फुटम् ॥ १०॥

विन गणपठितत्वमात्रोक्तौ सर्वनामा यो या तस्यापि धातुत्वं स्यात् क । तथा च याः पश्यसीत्यादावातोधातोरित्याकारलोपः स्यात् । इ त्थं चोक्तास्वरसादेव मङ्गलार्थत्वं परित्यज्य " भुवो वार्थं वदन्ति ति भ्वर्था भूवादयः स्मृता " इति पक्षान्तरं तैरेवोक्तमिति ध्येय म् । ननु लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणान्न सर्वनाम्नो ग्रहणं, तस्य लाक्षणिकत्वादत आह । वेति । अव्ययं यो वे त्रातिप्रसङ्गः । तथा च विकल्पार्थको वातीत्यादिप्रयोगः स्या दिति भावः । आदिना सु इत्यु-

पसर्गस्य माङ् मा इति स्वराद्योश्च संग्रहः । न च षत्व-पाठादुपसर्गव्यावृत्तिः । साधसंसिद्धाविति्यस्य मूर्धन्यादित्वाय षोपदेशलक्षणत्वं तत्त्वमित्यन्यत्र निर्णीतत्वात् । तथा च स-मीचीनवर्जनाद्यर्थे सत्रति मिमीते मातीत्यापत्तिः षुं प्रसवे माङ् माने मा माने इति धातूनां सत्त्वान्निर्णयासम्भवात् । न च वे-त्याद्यव्ययानां वा गतिगन्धनयोरित्यादिधातुभ्यः क्विबादिभिर्व्यु-त्पादनं शङ्क्यम् । गमनादिकर्त्तेत्याद्यर्थत्वापत्तेरर्थांतरत्वाना-पत्तेश्च । कृदन्तत्वात्सिद्धौ, निपातस्यानर्थकस्येति वार्त्तिकस्या-नुक्तिसम्भवापत्तेश्चेत्यादि ध्येयम् । न च गतिगन्धनाद्यर्थनि-र्देशो नियामक इति वाच्यम् । तस्याधुनिकभीमसेनादिभिर्नि-क्षिप्तत्वात् । भीमसेनादयो ह्यर्थं निर्दिदिशुः । पाणिनिस्तु भ्वेध इत्याद्यपाठीदिति भाष्यवार्त्तिकयोः स्पष्टम् । के चित्तु उद्दिष्टा-र्थविशिष्टस्य धातुत्वेलंक्रियते गुरुरित्यादावर्थान्तरे धातुत्वं न स्यात् । तदर्थस्यानुद्देशात् । निपातानां वाचकत्वात्सोर्थो नि-पातवाच्य इति चेन्न । उपसर्गाणां द्योतकत्वात्तत्रानुपपत्ति-तादवस्थ्यात् । वस्तुतो निपातानामपि द्योतकत्वमेवेति त-त्राप्यनुपपत्तिरेवेति वदन्ति । ननु प्रयोगानुसारतोर्थानां क-ल्पत्वे सर्वत्रोद्दिष्टोर्थो व्यर्थ इति चेन्न । क्रियावा-चित्वबोधार्थं तदुद्देशात् । तदुक्तम् । " क्रियावाचित्वमा-ख्यातुमेकैकोर्थः प्रदर्शितः । प्रयोगतोनुसर्त्तव्या अनेकार्था हि धातव " इति । कुर्दखुर्दगुर्दगुदक्रीडायामेवेत्येवकारोप्य-त्र मानम् । अन्यथा व्यर्थत्वापत्तेः । ननु क्रियावाचकत्वे सति मणपठितत्वस्यैव धातुत्वे सौत्राणां स्तम्भ्वादीनां लौकि-कानां च चुलुम्पादीनां धातुत्वं न स्यादिति चेन्न । स्तम्भ्वा-दिषूदित्करणेनैव ज्ञापकबलात्तत्सिद्धेः चुलुम्पादीनां च कास्य-

नेकाजितिं वार्तिकवचनात्तत्सिद्धेः । वस्तुतश्चुराद्यन्ते बहुलमेतन्निदर्शनमिति पठितगणसूत्रेण सर्वेषां संग्रहः । तत्र धातुवृत्तिकारादिभिरेतत्प्रदर्शनं दिक्प्रदर्शनमात्रं प्रयोगानुसारेणान्येपि ज्ञेया इति व्याख्यातत्वात् । तस्मात् क्रियावाचको धातुरिति सिद्धम् ॥ १० ॥

ननु क्रियावाचकत्वे सति गणपठितत्वं तत्त्वमस्तु । क्रिया च न व्यापारः किं तु धात्वर्थ इत्यत आह ॥

धात्वर्थत्वं क्रियात्वं चेद्धातुत्वं च क्रियार्थता ।
अन्योन्यसंश्रयः स्पष्टस्तस्मादस्तु यथाकरम् ११

धातुत्वग्रहे च धात्वर्थरूपक्रियात्वग्रहस्तद्ग्रहे च तद्वाचकत्वरूपधातुत्वग्रह इत्यन्योन्याश्रय इत्यर्थः । ननु धात्वर्थक्रियेत्यत्र प्रविष्टमन्यदेव धातुत्वं वाच्यं तथा च नान्योन्याश्रय इति चेन्न। मानाभावात् । तदपेक्षया यथाश्रुतस्यैव लघुत्वात् । तदेव धातुत्वमादाय लडाद्युपपत्तौ भूवादय इत्यस्य वैयर्थ्याच्चेत्याशयेनाह । तस्मादिति । व्यापारसन्तानः क्रिया तद्वाचको धातुरिति यथाकरमित्यर्थः । के चित्तु मीमांसको वैयाकरणं प्रति दोषमाह । धात्वर्थत्वमिति । धात्वर्थत्वं क्रियात्वं यदि ब्रूयास्तदान्योन्याश्रयः स्पष्ट इत्यर्थः । तस्मादिति । आख्यातार्थः क्रियेत्यध्याहारः । वैयाकरणः समाधत्ते । अस्त्विति । व्यापारसन्तानः क्रिया तद्वाचको धातुरित्यर्थः । तथा च नान्योन्याश्रय इति व्याचक्षते । वस्तुतस्तु न क्रियावाचकत्वे सति गणपाठितत्वं लडादिप्रयोजकम् । क्रियात्वस्यैकस्याभावेनाननुगमात् । किं तु संज्ञाविशेषः संज्ञाशब्दानां जातिवाचित्वपक्षे जातिविशेषो वा तन्नियामकः । सूत्रं च तत्परिचायकम् । तत्रोक्ताग्निपकारिकाभिः

परिचायकाव्याप्त्यतिव्याप्ती विचार्येते । तत्रापि क्रियाशब्दस्य साध्यत्वेनाभिधीयमानव्यापारे एव सांकेतिकशक्तेः स एव गृह्यते सूत्रे वाशब्दसूचनयेति, न सूत्रं धातोः क्रियार्थत्वसाधनायाभिहितम् । किं तूक्तयुक्तिभिः साधितस्यार्थस्य स्वोत्प्रेक्षितत्वनिरासस्यसूचनायेति तत्त्वम् । एतेन भव्याद्यन्यतमत्वमेवास्तु धातुत्वं न क्रियार्थत्वगर्भम् । अथ वा गणपठितत्वे सति सत्ताद्यर्थकत्वमेव भूधातोर्धातुत्वमास्ताम् । इत्थमन्यत्राप्यूह्यम् । अत एव तत्तदर्थव्यापारयोरुभयोर्धातुवाच्यत्वे धातोर्नानार्थत्वकल्पनादोषोपि परास्तः । अर्थस्य तत्तत्पुरस्कारेणोपादानाच्च नान्योन्याश्रयोपि । यद्वा सर्वफलान्यन्यतमत्वेन धृत्वा तद्वाचकत्वे सति गणपठितत्वमेव सूत्रार्थः कल्प्यतामित्यपास्तम् । किं चान्यतमत्वेन सर्वेषां धातूनां तेतेर्था धर्त्तव्याः । अन्यथार्थान्तरे धातुत्वं न स्यात् । तथा चाव्यये वा इत्यादावतिप्रसङ्गस्तस्याप्युक्तरीत्या गणपठितत्वाद्विकल्पार्थत्वाच्च । अन्यतममध्ये विकल्पस्यापि धृतत्वात् । कृपू सामर्थ्ये इत्यस्य विकल्पयतीति प्रयोगदर्शनाद्विकल्पार्थत्वादिति ॥ ११ ॥

नन्वेवं गणपठितत्वे सति क्रियावाचकत्वस्यैव धातुत्वे भवतीत्यादौ क्रियानुपलम्भाद् भ्वादीनां धातुत्वं न स्यादित्यत्राह ॥

अस्त्यादावपि धर्म्यंशे भाव्येस्त्येव हि भावना ।
अन्यत्राशेषभावात्तु सा तथा न प्रकाशते ॥१२॥

अस्त्यादौ, अस भुवीत्यादौ। धर्म्यंशे, धर्म्मभागे। भाव्ये, भाव्यताविवक्षायाम् । भावनास्त्येव । अयं भावः । अस्तिभवतीत्यादौ धर्म्यंशे भावनास्त्येव । भूधातोः स्थित्युत्पत्तिरूपद्वय-

र्थत्वात् । प्रमाणं च " धान्यानां भवने क्षेत्रे, तत्र जातः, तत्र भव" इति भेदेन निर्देश एव । रोहितो लोहितादासीद्बन्धुस्तस्य सुता ऽभवत् इति प्रयोगश्च । अत एव घटो भवति स्वस्वरूपं लभते इति सत्कार्यवादिनां विवरणमप्युपपद्यते । इत्थं च सर्वत्र भावना निराबाधैव । किं च । यद्यत्र क्रिया नास्ति कथं तर्हि भविष्यति अभूत्, भवति, अस्तीत्यादौ कालसम्बन्धः । कालस्य क्रियात्मकत्वात् । वर्त्तमाने लडित्यत्र वर्त्तमानक्रियावृत्तेरिति व्याख्यातत्वात् । उक्तं हि वाक्यपदीये । क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिकेति । कालानुपाति यद्रूपं बदस्तीति प्रतीयतइति च । तस्माद्यदि क्रियात्र नास्ति तर्हि लडादिकमपि न स्यादिति द्रष्टव्यम् । नन्वेवं भावनाया उभयतुल्यत्वात् घटं करोतीत्यत्रेव घटो भवति अस्तीत्यत्रापि प्रतीयेतेत्यत आह । अन्यत्रेत्यादि । अशेषभावात् । भावनाफलयोरेकनिष्ठत्वात् । सा, भावना । तथा, स्पष्टम् । भावनाफलयोरेकनिष्ठत्वाद्भावना स्पष्टं न प्रकाशतइत्यर्थः । अथ सर्वेषां धातूनां क्रियावाचकत्वे किं करोतीति प्रश्ने पचतीत्युत्तरस्येवास्तीत्युत्तरमपि स्यात् तुल्यत्वादिति चेत् । मैवम् । आसन्नविनाशं कं चिदुद्दिश्य किं करोतीति प्रश्ने अस्तीत्युत्तरस्य सर्वसम्मतत्वात् । इतरत्र तु सुस्थतया निश्चिते किं करोतीति प्रश्नः पाकादिविशेषगोचर एवेत्यवधारणादस्तीति नोत्तरमिति । अथैवमपि दिगास्ति भवति आत्मास्तीत्यादौ तेषामुत्पत्तेर्बाधिततया कथं भावना वाच्येति चेत् । अत्राहुः । पूर्वापरीभावापन्नानेकक्षणविशिष्टस्यात्मन उत्पत्तेरत्रापि सुलभत्वान्नातिप्रसङ्गः । यद्वा । स्वस्वरूपधारणमेवास्त्यादौ फलं पच्यते तण्डुलः स्वयमेवेत्यादाविव तदाश्रयतैव साध्यत्वेनाभिधीयें-

मानौ व्यापारः । तथा चात्मादिः स्वस्वरूपधारणं करोतीत्यर्थः । तदुक्तं निरुक्ते । अस्तीत्युत्पन्नस्यात्मधारणमुच्यतइति । नन्वेवमात्मानं धत्तइतिवदात्मानमस्तीत्यपि स्यादविशेषादिति चेत् । अत्र वक्ष्यामः । उक्तं च वाक्यपदीये । आत्मानमात्मना बिभ्रदस्तीति व्यपदिश्यतइति । वस्तुतः किञ्चेत्याद्युक्तयुक्त्यनुरोधेनात्राप्याकाशोस्ति आकाश आत्मा वा आसीदिति प्रयोगाद्भावनाया वाच्यत्वमावश्यकम् । किं चास्त्यादावस्तित्वमेव व्यापारः । अवच्छेदकतारूपा व्याप्तिः फलम् । सा च मासादावस्तीति मासमास्ते गोदोहमास्ते क्रोशमास्ते कुरून्त्स्वपितीत्यादौ मासादेर्धात्वर्थतावच्छेदकफलशालित्वं कर्मत्वं सङ्गच्छते । तथा च मासाद्यवच्छिन्ना स्थितिरित्यर्थः । अत एव द्वितीये भाष्ये "प्राकृतमेवेदं कालादि कर्म यथा घटं करोती"त्याद्युक्तम् । वाक्यपदीये च, कालभावाध्वदेशानामन्तर्भूतक्रियान्तरैः । सर्वैरकर्मकैर्योगे कर्मत्वमुपजायते इति ॥ प्रधानास्तित्वक्रियापेक्षया धात्वर्थत्वाद्व्याप्त्यादिकमन्तर्भूतं क्रियान्तरं येषां तेषां सर्वेषां योगे कालादीनां कर्मत्वं भवतीत्यर्थः । मासं पचतीत्यादिसंग्रहाय सर्वैरिति वार्त्तिके । अकर्मकैरिति कैमुतिकन्यायेन । मासमास्ते कटे इत्यत्र कटस्य न व्यापनकर्मत्वमिति न ततो द्वितीयेति हेलाराजः । अधिशीङ्स्थासामिति ज्ञापनात्कालभावाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणां, देशश्चेत्यस्य नियमार्थत्वाद्वा नातिप्रसङ्ग इति तत्त्वम् । न चास्यते मास इतिवत्पच्यते मास इत्यापत्तिः । अस्त्यादेः सकर्मकत्वात्पच्यादेरिव भावे लश्च न स्यादिति वाच्यम् । प्रधानकर्मण्याख्येये लादीनाहुर्द्विकर्मणामिति । न के चित्कालभावाध्वाभिरकर्मकास्तदेवं विज्ञास्यामः क्वचिद्येकर्मका इति च भाष्येणैव दत्तोत्तरत्वात् । उक्तं च वा-

क्यपदीये । आधारत्वमिव शास्त्रास्ते पुनर्द्रव्यकर्मसु । कालादयो भिन्नकक्ष्यं यान्ति कर्मत्वमुत्तरम् ॥ अतस्तैः कर्मभिर्धातुर्युक्तो द्रव्यैरकर्मकः । लस्य कर्मणि भावे च निमित्तत्वाय कल्पतइति ॥ तात्पर्यविरहाच्च केवलमस्तीत्यादौ न तद्बोधकत्वमिति ध्येयम् । गवादिपदानां वागाद्यनेकार्थत्वाविशेषेपि गौरस्ति गान्दद्यादित्यादौ प्रसिद्ध्यप्रसिद्धिभ्यामुत्सर्गतः शीघ्रं सास्नादिमद्व्यक्तिबोधवागाद्यबोधवत्पचति अस्तीत्यादौ विक्लित्तिसत्तादिबोधव्याप्त्यबोधयोरुपपत्तेश्च । वस्तुतो धातुसंज्ञाविध्यनुरोधाद्धातूनां क्रियावाचकत्वावश्यकत्वेपि फलवाचकत्वं नावश्यकम् । अतोस्त्यादौ सत्तादिरेव क्रिया । अत एव पश्यति भवः स्वयमेव, दर्शयते भव इत्यादौ निवृत्तप्रेषणेपि विषयतारूपफलस्यैव क्रियात्वं धात्वर्थत्वं चाभ्युपगतम् । पच्यते ओदनः स्वयमेवेत्यादौ विक्लित्तिमात्रं धात्वर्थोतस्तद्रूपक्रियाश्रयत्वादोदनस्य कर्तृतेति एकदेशे समूहे वा व्यापाराणां पचादयः । स्वभावतः प्रवर्तन्ते तुल्यरूपं समाश्रिता इति वाक्यपदीयव्याख्यायां हेलाराजीयेप्युक्तम् । नन्वेवं घटं भावयति तण्डुलं पचति भवं पश्यतीत्यादावपि धातूपात्तक्रियाश्रयत्वात् घटादेः कर्तृतापत्तौ द्वितीयानापत्तिः । कर्तृसंज्ञया कर्मसंज्ञाया बाधात् । न च निरवकाशत्वात्कर्मसंज्ञैव, देवदत्तः पचतीत्यादौ देवदत्ते सावकाशां कर्तृसंज्ञां बाधिष्यतइति वाच्यम् । एवं हि चैत्रो ग्रामं गच्छतीत्यादौ धातूपात्तफलाश्रये चैत्रेपि कर्मसंज्ञाद्वितीययोरापत्तेः । एवं पश्यति भव इत्यादावपीति । नापि प्रत्ययार्थान्याविशेषणत्वविशिष्टविषयतया धातुजन्यशाब्दबोधविषयत्वमेव क्रियात्वं निर्वाच्यं तच्च फलोपधानं तण्डुलं पचतीत्यादौ फले नास्तीति तस्मिन्प्रयोगे फलस्याक्रियात्वेपि कर्मकर्त्तरि तदस्त्येवेति तत्र तस्य क्रियात्वं

तदाश्रयत्वेनोदनभवादेः कर्तृत्वं चोपपद्यते । पाचयति शिष्येण गुरुः पाचक इत्यादौ प्रत्ययार्थविशेष्यकभावनाविशेषणकशाब्दबोधस्य धातुप्रत्ययाभ्यामुत्पत्तेरव्याप्तिवारणाय प्रत्ययार्थान्येतीति युक्तम् । एवमपि पश्य मृगो धावति पश्य नृत्यति पचति भवतीत्यादौ धात्वर्थविशेष्यकनृत्त्यादिभावनाविशेषणकशाब्दबोधाभ्युपगमादव्याप्त्यवारणादिति चेन्न । तद्धात्वर्थाविशेषणत्वविशिष्टविषयतया तद्धातुजन्यशाब्दबोधविषयताफलोपधानस्यैव तद्धात्वर्थभावनात्वात् । न चैवं घटम्भावयतीत्यादौ भवनस्य णिजन्तधात्वर्थविशेषणत्वेपि भ्वर्थाविशेषणत्वाद् भ्वर्थक्रियात्वमस्त्येवेति तदाश्रयत्वात्कर्तृत्वापत्तिः । इष्टापत्तेः । अत एव गतिबुद्धीति सूत्रेण कर्तुरेव कर्मसंज्ञा विधीयते । अत एव क्रियाभेदादुभयमप्यस्तीति ण्यन्ते कर्तुश्च कर्मण इति भाष्ये उभयथापि व्यवहारः कृतः । न चैवमपि क्रियात्वस्य धातुत्वगर्भतया तस्य क्रियावाचकत्वगर्भस्यान्योन्याश्रयादग्रहणप्रसङ्गः । क्रियात्वघटकधातुत्वस्य जात्यादिरूपत्वात् । भूवादिसूत्रं तु तत्परिचायकमिति प्रागेवोक्तम् । फलत्वमपि तद्धात्वर्थविशेषणत्वे सति तद्धात्वर्थत्वम् । अतः प्रयोज्यव्यापारस्याणिजन्तधात्वर्थाफलत्वेपि णिजन्तधात्वर्थफलत्वात्तदाश्रयस्य तत्र कर्मत्वमुपपद्यते । पश्य मृगो धावतीत्यत्र धावनक्रियाया दृशिफलत्वव्वारणाय प्रथमं तद्धात्विति तत्पदम् । दृशिफलत्वे च तदाश्रयत्वान्मृगस्य कर्मतापत्तौ द्वितीया दुर्वारा । न च तस्य धात्वर्थभावनाश्रयतया कर्तृत्वात्तत्संज्ञया बाधान्न कर्मसंज्ञाद्वितीये इति वाच्यम् । पक्त्वोदनो भुज्यते देवदत्तेनेत्यत्रेव प्रधानानुरोधेन कार्यप्रवृत्तेः । प्रधानदृश्यर्थक्रियानुरोधिकर्मसंज्ञाया दुर्वारत्वात् । किं च । स्वकारकविशिष्टा क्रिया दृशिकर्म । तथा च धावनकर्तृत्वानन्तरं द-

शिकर्मत्वसम्पत्तेर्यननाप्राप्तिन्यायरीत्या पश्चात्प्रवृत्तं कर्मत्वं कर्तृत्वबाधेनैव प्रवर्त्तेतेति न बाध्यत्वं युज्यते। अत एव घटं भावयतीत्यादौ प्रधानानुरोधात्कर्मत्वं सिद्ध्यत्येवेति गतिबुद्धिसूत्रं नियमार्थं तेन पाचयति गुरुः शिष्येणेत्यत्र न कर्मत्वमिति सर्वं संप्रतिपन्नम्। एवं च पच्यते ओदनः स्वयमेव घटो भवतीत्यादौ व्यापारआश्रयत्वादिकं प्रकल्प्य फलव्यापारोभयार्थत्वकल्पनं तत्रतत्रोक्तमनादेयम्। भावयतीत्यादौ भवनानुकूलप्रेरणाप्रतीतिवद्भवनाश्रयत्वानुकूलव्यापारवानिति प्रतीतेरनुभवविरोधाच्च कर्तृव्यापारानुकूलव्यापारस्यैव णिजर्थत्वात्। एवं च धात्वर्थः सर्वोपि प्रयोगविवक्षाभेदेन भावना भवतीति का पुनर्धात्वर्थातिरेकिणी भावनेति मीमांसकैरेतन्मतं शंकितं भावार्थाधिकरणे। तथा चैतन्मते केवलव्यापारवाचकत्वमकर्मकत्वं फलव्यापारोभयवाचकत्वं सकर्मकत्वं द्रष्टव्यम्। अत एव जीवत्यादेरकर्मकत्वं सूपपन्नम्। जीव प्राणधारणे, नृती गात्रविक्षेपे, स्रंसु ध्वंसु अधःपतने इत्याद्यनुशासनेनैतादृशानां प्राणादिविशिष्टधारकसंयोगगात्रविशिष्टविक्षेपादिक्रियामात्रवाचकत्वेनोभयवाचकत्वाभावात् विशिष्टस्यैव क्रियात्वात्। अत एवात्र न प्राणगात्रयोः कर्मत्वम्। दधत्यादेस्तु धारणक्रियासंयोगोभयवाचकत्वात्पात्रं धत्ते प्राणान् धत्ते इत्यादिसर्वप्रयोगाः सकर्मकत्वं चोपपन्नमेव। पत गतौ पत्लृ गताविल्येतयोश्च गम्लृ गताविवत्संयोगक्रियोभयशक्तत्वात्तद्वदेव सकर्मत्वम्। अत एवोर्ध्वं पतत्यधः पतति इतस्ततः पततीत्यादयो गच्छतिवत्प्रयोगाः। द्वितीयाश्रितातीतेति सूत्रे नरकपतित इति वृत्तिकारोदाहरणं चोपपद्यते। अस्तीत्युत्पन्नस्यात्मधारणमुच्यतइति निरुक्तकारोक्त्या अस्तेरप्यात्माविशिष्टधारणवाचकत्वे च जीवत्यादिवदेवा-

कर्मकत्वं द्रष्टव्यम् । आत्मविशिष्टधारणादिकमेव व्यापारः । तदेवादाय भूवादय इति लक्षणसङ्गतिः । अस्तु वा तदतिरिक्ततत्फलसमानाधिकरणव्यापारवाचकत्वमस्त्यादेः । न चैवं तत्प्रतीत्यापत्तिः । बाधानवतारदशायामिष्टत्वात् । तदवतारे तेनैव प्रतिबन्धान्न तथेति न काप्यनुपपत्तिरिति साम्प्रदायिकाः । स्वतन्त्रास्तु, अस्तु तत्र बाधनिश्चयस्तथापि प्रत्ययो नानुपपन्नः । अत्यन्तासत्यपि शब्दाद्बोधे बाधकाभावात् । तथा च भगवान् पतञ्जलिः।"शब्दज्ञानानुपाती वस्तुशून्यो विकल्प" इति। तदुक्तं विवरणे ऽध्यासलक्षणशेषे "नाप्यध्यस्तमसदेव तथात्वे प्रतिभासायोगादिति टीकाप्रतीकमादाय प्रत्यक्षप्रतिभासो न स्यादित्यर्थः । प्रतिभासमात्रनिराकरणे शून्यं न भासतइति वाक्यस्याबोधकत्वप्रसङ्गा" दिति । तथा खण्डनकारोप्याह । अत्यन्तासत्यपि ह्यर्थे ज्ञानं शब्दः करोति हि ॥ अत एव शशशृङ्गादिशब्दाद्बाधितो ऽपि संसर्गो भासतएवेत्यर्थः। प्रतीतिजनकत्वरूपार्थवत्वात्प्रातिपदिकत्वसिद्धेः समासग्रहणं नियमार्थमित्यत्र नानुपपत्तिः । इत्थं च क्रियावाचकत्वं तद्बोधकत्वमात्रम् । वक्ष्यते च बोधकत्वमेव शक्तिरपि । यत्तु वन्हिना सिञ्चेदित्यत्र बोधादर्शनादयोग्यताविनिश्चयः शाब्दबोधे प्रतिबन्धकः स च प्रकृते ऽस्त्येवेति न बोध इति नैयायिकमीमांसकादिभिः परिशीलितः पन्थाः । एकपदार्थसंसर्गे ऽपरपदार्थनिष्ठात्यन्ताभावप्रतियोगित्वाभावादिनानायोग्यताज्ञानं न शाब्दबोधसामान्ये स्वातन्त्र्येण कारणम् । न वा स्वातन्त्र्येण शाब्दबोधे एवैतादृशयोग्यताविरहरूपायोग्यत्वनिश्चयः प्रतिबन्धकः । किं त्वनुमित्यादिसाधारण्येनैव कल्प्तप्रतिबन्धकीभूतबाधज्ञानादेव न वन्हिनेत्यादौ बोधः । न चैवं शाब्दप्रमायां गुणत्वानुरोधेन योग्यताप्रमा कारणं कल्प्य-

म् । अतो यद्विशेषयोरिति न्यायेन शाब्दबोधसामान्यएव योग्यताज्ञानं कारणमिति वाच्यम् । संशयत्वादिवन्नीलघटत्वादिवच्चार्थसमाजासिद्धतया प्रमात्वस्य कार्यतानवच्छेदकत्वात् । एवं च प्रकृतेपि बाधज्ञानसत्त्वान्न बोधः । यत्तु घटो घट इत्यत्रापि बोधापत्त्या योग्यताज्ञानं कारणं तत्र बाधस्य प्रतिबन्धकत्वासंम्भवात् । घटत्वधर्मितावच्छेदकघटभेदज्ञानस्य प्रतिबध्यस्यानाहार्यस्याप्रसिद्धेरिति । तत्तुच्छम् । तादृशोपनीतभानस्यानाहार्यस्य तवापि दुर्वारत्वात्तादृशज्ञाने इच्छाविशेषस्यैव हेतुत्वात् । किं चैवं योग्यतायाः सर्वत्रैक्यासम्भवाद्विशिष्य हेतुहेतुमद्भावावश्यकत्वे प्रकृते तादृशशाब्दबोधाप्रसिद्ध्या हेतुत्वकल्पनाया असम्भवात् । अन्यत्र कल्पनायां मानाभावाच्चेति । किं चात्यन्तासतेन्द्रियसन्निकर्षाभावेन प्रत्यक्षासम्भवाद्व्याप्तिज्ञानासम्भवेनानुमित्याद्यभावात्तत्र शक्तिग्रहस्यैवासम्भवान्न बोध इत्यपरे वदन्ति । तच्चिन्त्यम् । बाधनिश्चयादेः सत्त्वेप्य- "स्य क्षोणिपतेः परार्धपरया लक्षीकृताः सङ्ख्यया प्रज्ञाचक्षुरवेक्ष्यमाणबधिरश्राव्याःकीलाकीर्तयः । गीयन्ते स्वरमष्टमं कलयता जातेन बन्ध्योदरान्मूकानां प्रकरेण कूर्मरमणीदुग्धोदधेरोधसी" इत्यादे "रेष बन्ध्यासुतो याति खपुष्पकृतशेखरः । मृगतृष्णाम्भसि स्नातः शशशृङ्गधनुर्द्धर,, इत्यादितश्च बोधदर्शनेनास्याप्रतिबन्धकत्वात् । न चात्र न शाब्दबोधः किं तु पदार्थोपस्थितिमात्रमिति शङ्क्यम् । अन्यत्रापि तथात्वापत्तेः । शब्दप्रामाण्योच्छेदप्रसङ्गात् । अन्यथा चमत्कारानापत्तेश्च । न च प्रवृत्तिं प्रति विशिष्टज्ञानस्य हेतुत्वानुरोधाच्छब्दाविशिष्टज्ञानसिद्धिः । दुःखद्वेषेच्छासुखादावपि तद्रीत्या तद्धेतुत्वेन मिथ्याभिशापगालिदानरूपकादिकाव्यजदुःखमुखाद्यनुरोधेन सत्यपि

बाधे तत्सिद्धेर्दुर्वारत्वात् । न चैवं वह्निना सिञ्चेदित्यत्र बोधे प्रवृत्तिरपि स्यादिति शङ्क्यम् । प्राक्तनबाधेनाप्रामाण्यशङ्काया एव जायमानज्ञाने जननात्तच्छून्यज्ञानस्य प्रवृत्तावुपयोगिनो सत्त्वेनासम्भवात् । एवं शक्तिग्रहोपि न शाब्दबोधविषयीभूतपदार्थमात्रे अपेक्षितः किं तु क्व चिच्छक्यतावच्छेदकावच्छिन्ने । स च प्रकृते घटोस्तीत्यादौ वृत्तएव शशशृङ्गादिपदे तु पदप्रकारकबोधएव । तत्र चेदं पदं क्व चिच्छक्तं साधुपदत्वादित्याकारो दशरथादिपदेष्विव तद्ग्रहो हेतुः स च शक्यानुपस्थितावपि भवतीति व्युत्पादयिष्याम इति न द्वितीयोपीत्याहुः ॥ १२ ॥

ननु भावनायाः फलनियतत्वात्फलवतः कर्मत्वाद्धातोस्तद्वाचकत्वे सर्वे सकर्मकाः स्युस्तत्राह ॥

फलव्यापारयोरेकनिष्ठतायामकर्मकः ।
धातुस्तयोर्धर्मिभेदे सकर्मक उदाहृतः ॥ १३ ॥

एकनिष्ठतायां, एकमात्रनिष्ठतायां, भिन्नाधिकरणावृत्तितायामिति यावत् । तेन गम्यादौ नातिव्याप्तिः । अकर्मको यथा भ्वादिः, धातुरित्यन्तेनान्वयः । तयोरित्यादि । यत्रानयोर्भिन्ननिष्ठतेत्यर्थः । यथा पच्यादिः । इत्थं चाकर्मके क्रियासत्त्वेपि तयोरेकनिष्ठत्वान्न सकर्मकत्वमिति भावः । अत्रेदमवधेयम् । एवं हि जीवतिनृत्यत्यादेः सकर्मकत्वापत्तिः । प्राणधारणगात्रविक्षेपादिरूपफलस्य व्यापारव्यधिकरणत्वसत्त्वात् । तस्मात्फलाश्रयावाचकत्वे सति तद्व्यधिकरणव्यापारवाचकत्वं सकर्मकत्वं वाच्यम् । अविवक्षितकर्मणामलक्ष्यत्वे चाविवक्षाविरहविशिष्टेत्यपि निवेशनीयम् । एवं चास्तेरात्मधारणरूपफलवाचकत्वे

निरुक्तकारोक्तेरप्यात्मांशस्य धात्वर्थत्वान्न सकर्मकत्वम् । दधातेस्तु धारणमात्रमर्थो न तु तदाश्रयोपीति सकर्मकत्वं सङ्गच्छते । एवं शंसु ध्वंसु अधः पतनइत्यादेरप्यधोदेशरूपफलाश्रयवाचकत्वादकर्मकत्वम् । पल्ल गताविंत्यादेर्गम्यादिवत्संयोगमात्रार्थत्वात्सकर्मकत्वान्नरकपतित इत्यादिद्वितीयासमासोपपत्तिः । तदुक्तं वाक्यपदीये । अन्तर्भावाच्च तेनासौ कर्मणा न सकर्मक इति ॥ तेन । आत्मानमात्मनेतिपूर्वार्धेनोक्तकर्मणा । असौ । अस्तिः सकर्म्मको न । अन्तर्भावात् । अस्त्यर्थेन क्रोडीकृतत्वादित्यर्थः । अथैवं जानातीच्छत्यादेः सकर्मकत्वं न स्यात् । धात्वर्थज्ञानजन्यफलस्य घटादावसत्त्वात् । आत्मानं जानातीत्यादौ फलव्यापारयोरेकनिष्ठत्वाच्चेति चेत् । सत्यम् । ज्ञानजन्यफलस्य घटादौ कारकार्थनिरूपणे वक्ष्यमाणत्वात् । आत्मानं जानातीत्यादौ चात्मभेदः कल्प्यते । एकः शरीरावच्छिन्नो ऽपरस्त्वन्तःकरणावच्छिन्नस्तत्रान्तःकरणावच्छिन्नः कर्ता चेच्छरीरावच्छिन्नः कर्म । तथा च फलव्यापारयोर्भिन्ननिष्ठत्वाक्षतेः सकर्मकत्वं नासिद्धम् । एव "मात्मानमात्मना हन्ति सृजत्यात्मानमात्मने" त्यत्रापि शरीरात्मभेदसत्त्वाल्लक्षणं द्रष्टव्यम् । उक्तं च कर्मवत्कर्मणेति सूत्रे भाष्ये । द्वावात्मानौ शरीरात्मा अन्तरात्मा च । शरीरात्मा तत्कर्म करोति येनान्तरात्मा सुखदुःखे अनुभवति । अन्तरात्मा तत्कर्म करोति येन शरीरात्मा सुखदुःखे अनुभवति इति । मीमांसकास्तूक्तातिप्रसङ्गभियैव प्रकारान्तरेणाकर्मकत्वसकर्मकत्वविभागं वदन्ति । तथा च भावार्थाधिकरणे भट्टपादैरुक्तम् । साक्षादव्यभिचारेण धात्वर्थो यत्र कर्मभाक् । सकर्मकः स धातुः स्यात्पारम्पर्ये त्वकर्मकः ॥ आसनशयनादौ हि आनन्तर्येण नियमेन कर्मविशेषो न निरूप्यतइत्यकर्मकत्वं

पचिगम्यादीनां तु विक्लित्यत्संयुज्यमानसाक्षात्सम्बन्धिकर्माभ्यभिचारात्सकर्मकत्वं न तु भावनाविशेषणत्वेन कश्चिद्विशेष इति । तच्चिन्त्यम् । भवतिघटमित्याद्यापत्तेः । न चात्र कर्म न निरूप्यतइत्यकर्मकत्वम् । कर्मनिरूपणस्यैवापाद्यत्वात् । अन्योन्याश्रयापाताच्च । कर्मनिरूपणे हि सकर्मकत्वम् सकर्मकत्वे च कर्मनिरूपणामिति । न च तवाप्येतादृशस्थले फलव्यापारयोर्भिन्ननिष्ठतैव किं न स्यादिति वाच्यम् । तथैव वस्तुनः स्वभावात् । निरूपणं तु प्रयोगः स चापादयितुं शक्य एवेति । नन्वत्र निरूपणमाकांक्षा तथा च यद्धातूच्चारणे कर्माकांक्षा नियता स सकर्मकः । यत्र नास्ति सोकर्मकः । एवं च कृञोपि यतेरिव यत्नमात्रार्थकत्वेपि नानुपपत्तिः । कर्मत्वादिपदोपस्थाप्यकर्मत्वस्य क्रियाकांक्षत्वाभावेपि द्वितीयोपस्थाप्यस्य तत्साकांक्षत्ववत्कृञुपस्थाप्यस्य यत्नस्य कर्माकांक्षत्वोपपत्तेः । एवं च सकर्मकत्वानुरोधेन कृञ उत्पत्तिवाचकत्वव्यवस्थापनमप्ययुक्तम् । अविवक्षितकर्मणां सकर्मकत्वस्य वारणीयत्वे चाविवक्षाभाववैशिष्ट्यमपि लक्षणे निवेश्यताम् । एवमेकस्यैवार्थभेदेनाकर्मकत्वसकर्मकत्वमपि नानुपपन्नम् । यदर्थे अविवक्षाविरहविशिष्टकर्माकांक्षाजनकत्वं यस्य स तत्रार्थे सकर्मक इत्यननुगतस्यैव त्वद्रीत्या लक्षणत्वसम्भवादिति चेन्न । गच्छतिपततीत्यादिषु कर्माकांक्षाविरहेणाव्याप्तेः । अत्रत्यकुत्रकिमित्याकांक्षायाः यतते भवतीत्यादिषु कुत्रकिमित्याकांक्षातुल्यत्वात् । द्वितीयाश्रितातीतपतितेति सूत्रे पतितशब्दस्य कर्मद्वितीयासमासविधानेन यतेः सकर्मकत्वनिर्णयात् । कृञ उत्पत्त्यर्थकतायाः प्रागेव निर्णीतत्वाच्चेति दिक्॥१३॥

ननु क्रियाया धातुवाच्यत्वे पाक इत्यादिघञन्तस्थले तत्प्रतीतिः स्यात् । वाचकस्य धातोराख्यातइवात्रापि तुल्यत्वा-

त्। न चेष्टापत्तिः । सत्त्वरूपाया एव प्रतीतेः । कृदभिहितो भावो द्रव्यवत्प्रकाशतइति भाष्यवचनविरोधापत्तेश्च । तस्मान्नासत्त्वरूपा क्रिया धातुवाच्येत्यत आह॥

आख्यातशब्दे भागाभ्यां साध्यसाधनवर्त्तिता ।
प्रकल्पिता यथा शास्त्रे स घञादिष्वपि क्रमः॥१४॥

आख्यातशब्दे, पश्य मृगो धावतीत्यादौ । मृगो धावति पश्येति साध्यसाधनरूपतेत्यनुपदमेव वाक्यपदीयेभिधानात् । भागाभ्यां, तिङन्ताभ्याम् । प्रकृतिप्रत्ययभागाभ्यामिति त्वपठ्याख्यानम् । पचतीत्यत्रापि भागद्वयसत्त्वेन सिद्धावस्थक्रियाप्रतीत्यापत्तेः । साध्यसाधनवर्त्तिता, यथाक्रमं पश्यभागेन साध्यवर्त्तिता । धावतिभागेन साधनवर्त्तिता यथा शास्त्रे प्रकल्पिता । अयमर्थः । पश्येत्यत्र क्रियायाः साध्यत्वं स्वस्मिन् कारकाणामन्वयः स्वस्य वा कारकत्वेनान्यान्वयित्वाभावः। धावतीत्यस्याः साधनत्वं तुकारकत्वेनान्यस्मिन्स्वस्यान्वयः । इत्थं च पचति भवतीत्यत्राप्येककर्तृका वर्त्तमाना या पचिक्रिया एकतत्कर्तृका वर्त्तमाना भवनक्रियेति बोधात्तत्राप्यूह्यम् ।एवं च पश्यमृगो धावतीत्यादौ एकमृगाभिन्नाश्रयिका या वर्तमाना धावनक्रिया तद्विषयकं यदिष्टसाधनीभूतं दर्शनं तदनुकूला भावनेति बोधः । अथाख्यातान्तवाच्यस्य भावस्यासत्त्वावस्थापन्नतेति सिद्धान्तः । तत्कथङ्कर्मीभूता आख्यातस्थलेर्थः । उक्तं हि वाक्यपदीये ॥ असत्त्वभूतो भावश्च तिङ्पदैराभिधीयते, इति चेत् । मैवम् । करणत्वादिनान्यानन्वयित्वं लिङ्गानन्वयित्वं वा तादिति भावात्। एतदन्याद्दशत्वं द्रव्यत्वमित्याहुः । तत्त्वं पुनरनुपदं वक्ष्यामः । पश्य मृगो धावतीत्यादौ वाक्यार्थभूतापि क्रिया क्रियान्तरं प्रति

कर्तृत्वकर्मत्वाभ्यां स्वाभाव्यादन्वेतीति हि निर्णीतं सरूपसूत्रे सार्वधातुकेयगिति सूत्रे च भाष्यादौ । घञादिषु । पाक इत्यादौ । अत्र भागाभ्याम् । प्रकृतिप्रत्ययभागाभ्याम् । तत्र प्रकृत्याः सत्त्वरूपाया एवोपस्थितिः । न चात्र मानाभावः । ओदनस्य पाक इत्यादिकर्तृकर्मप्रत्ययानां मानत्वात् । अन्यथा विना क्रियां कारकाणामनन्वयेन तद्वाचकप्रत्ययासम्भवात् । न चाध्याहृततिङन्तार्थक्रियायामेव कारकान्वयः कर्तृकर्मणोः कृतीति कृद्योगषष्ठ्यभावापत्तेः, नलोकाव्ययनिष्ठाखलर्थतृनामिति निषेधेनाध्याहृतक्रियान्वये षष्ठ्यसम्भवाच्च । ओदनपाक इत्यादिषष्ठीसमासानापत्तेश्च । कृद्योगा च षष्ठी समस्यतइति वाक्यविहितस्यापि षष्ठ्यसम्भवात्षष्ठ्यन्तस्य उत्तरपदार्थेनानन्वये भार्या राज्ञः पुत्रो देवदत्तस्येत्यादाविवासामर्थ्याच्चासम्भवात् । समर्थः पदविधिरिति परिभाषणात् । विधेर्वस्तुकृतिरित्यादौ सावकाशत्वेनानर्थक्यस्याप्यभावात् । न चौदनस्य पाक इत्यादिशेषषष्ठ्यैव भवेत् । समासोपि तयैवास्त्विति वाच्यम् । नलपाकः शुण्ठीपाक इत्यादिषु कर्तृत्वादिप्रकारकबोधानुभवानापत्तेः । आश्चर्यं गवां दोहो ऽगोपेनेत्यादेरसिद्ध्यापत्तेश्च । उभयप्राप्तौकर्मणीत्यस्य कर्तृकर्मणोः कृतीति प्राप्तनियमार्थत्वात् । अनन्तरस्येति न्यायात् । उभयपदलिङ्गाच्च । शेषषष्ठ्याः सर्वत्राविशेषात् । किं च । शेषषष्ठ्यैव निर्वाहाभ्युपगमे कर्तृकर्मणोः कृतीति विधिर्वैयर्थ्यं स्यात् । गतिकारकोपपदात्कृदित्यादिविहितस्वरलाभार्थं तदारम्भ इति चे, तर्ह्योदनस्य पाक इत्यादावपि स्वरार्थं कारकषष्ठ्यभ्युपगमो दुर्वारः । एवं रीत्या काष्ठैः पाक इत्यत्रापीष्टापत्तिरेव । एवं चोक्तपूर्वपक्षे इष्टापत्तिरिति भावः । अनया च रीत्या फलमप्यसत्त्वाव-

स्थापन्नमेवोच्यते धातुना । अन्यथा शोभनं पचति स्तोकं पचतीतिवच्छोभनं पाक इत्यनापत्तेः । धात्वर्थे साध्यत्वेनोपस्थिते सामानाधिकरण्येनान्वयएव नियमस्तत्र द्वितीया स्यान्नान्यथा । नन्वेवं द्वितीयां बाधित्वा कर्त्तृकर्मणोः कृतीति षष्ठी स्यादिति चे, न्नत्र कर्मणि द्वितीया किं तु विशेषणविभक्तिवदभेदार्था साधुत्वमात्रार्था वा । तत्र स्तोकं पचतीत्यादौ क्लृप्तत्वादन्यस्या ऽनभिधानाच्च द्वितीयैव कल्प्यते । अत एव स्तोकार्थो विना भावनां फलएवान्वेति । कारकत्वे तदसम्भवात् । भवतु वा कर्मत्वमर्थः । अस्तु च षष्ठी । अत एव यत्र करणतया धात्वर्थान्वयस्तत्र सामानाधिकरण्येनान्वये तृतीयैव ज्योतिष्टोमेन यजेतेत्यादौ । इयान्वरं भेदः । फलांशे साध्यत्वमसत्त्वं च लिङ्गानन्वयित्वमात्रम् । क्रियायां तु करणत्वादिनानन्वयित्वमपीति दिक् ॥ १४ ॥

एतदेव स्पष्टयति ॥

साध्यत्वेन क्रिया तत्र धातुरूपनिबन्धना ।
सिद्धभावस्तु यस्तस्याः स घञादिनिबन्धनः १५

तत्र, घञाद्यन्ते । अत्र प्रतीयतइति शेषः । बोधकमाह । धातुरूपेति । क्रियेति फलव्यापारोभयसाधारण्येन साध्यत्वान्वयाय साधारणशब्देन निर्देशः । तान्त्रिकैरनेनोभयोर्व्यवह्रियमाणत्वात् । सिद्धभावास्त्विति । न च घञादिभिर्व्यापारफलयोः सिद्धत्वेन बोधने मानाभावः । पाकपदात्तथाप्रतीतेरेव मानत्वात् । अन्यथा फलानुत्पाददशायां व्यापाराभिप्रायेण पाको भवति नष्टो वेत्यादिक्रियान्तराकांक्षानापत्तेः । स्तोकः पाक इत्यनापत्तेश्च । तस्माद्धात्वर्थफलान्वये स्तोकादिशब्देभ्यो द्वि-

तीया नपुंसकलिङ्गता च । धात्वर्थभावनायामन्वये ज्योतिष्टोमेन भक्तिपूर्वं यजेतेतिवत्प्रथमासम्भवेपि नपुंसकलिङ्गमात्रम् । सामान्ये नपुंसकमित्यस्य दुर्वारत्वात् । यत्रर्थान्वये तु प्रथमा पुल्लिङ्गता चेति तद्विभागाय शक्त्यन्तरमावश्यकमिति भावः । एतदभिप्रायेणैव कृदभिहितो भावो द्रव्यवत्प्रकाशतइति भाष्यम् । तथा च न भाष्यविरोध इति भावः । उक्तं च वाक्यपदीये, "क्रियायाः सिद्धतावस्था साध्यावस्था च कीर्त्तिता । सिद्धतां द्रव्यमिच्छान्ति तत्रैवेच्छन्ति घञ्विधि" मिति । एतेन सङ्ख्यावर्तमानत्वाद्यबोधकानां घञादीनां प्रयोगसाधुतामात्रमिति नैयायिकनवीनोक्तमपास्तम् । स्तोकः पाक इति सिद्धये तस्यापि शक्तिकल्पनावश्यकत्वात् । यच्च पाक इत्यादिघञन्तशक्त्योपस्थितेन्वये स्तोकः पाक इति । तन्न । समुदायशक्तावुभयोरानुपूर्व्याः शक्तावच्छेदकत्वापत्तौ गौरवात् । लाघवादनुशासनाच्चास्मदुक्तस्यैव युक्तत्वाच्चेति । ननु साध्यत्वं लिङ्गाद्यनन्वयित्वं तदन्वयित्वं सिद्धत्वम् । तत् त्वदुक्तरीत्यैकस्यां विरुद्धं कथं धातुघञ्स्थले भवेदिति चे, न ब्रूमस्तस्यां लिङ्गाद्यनन्वयम् । किं तु धातूपस्थाप्यायां तदन्वयो न घञाद्युपस्थाप्ये तु स इति । अत एव भावनाशब्दोपस्थाप्ये तदन्वयः सर्वासिद्धः । अत एव भट्टपादैरुक्तम् । "यादृशो भावनाख्याते धात्वर्थश्चापि यादृशः । नासौ तेनैव रूपेण कथ्यते ऽन्यैः पदैः क्वचि" दिति । वस्तुतस्तु साध्यत्वं च लिङ्गाद्यनन्वयित्वमत्र सम्मतं साध्यत्वेन क्रिया तत्रेत्यादौ तृतीयया तस्य प्रतीयमानत्वप्रदर्शनात् । "यावात्सिद्धमसिद्धं वा साध्यत्वेनाभिधीयत" इति वाक्यपदीये, "यादृशी भावने" ति भट्टकारिकायां वाच्यत्वेन प्रदर्शनाच्च । नहि लिङ्गानन्वयित्वं वाच्यं प्रतीयते वा किं तु तदन्वयहेत्वभावादार्थिक-

म् । यच्च भाष्ये क्रियया क्रिया समवायं न गच्छतीत्यादिना क्रियान्तरसाधनत्वेनानन्वयित्वं साध्यत्वमुक्तम् । साधनत्वेनेत्युपादानात्पक्त्वा गच्छतीत्यादौ सामानाधिकरण्योत्तरकालादिसम्बन्धेनान्वयेपि न क्षति रिति। तन्न। कृष्णं नमेच्चेत्सुखं यायादित्यादिहेतुहेतुमतोर्लिङि भुक्त्वा तृप्यति मानिनी, नत्वा मण्डयति स्तुत्वा मादयतीत्यादौ च भोजनादिजन्यतृप्तिबोधाच्च क्रिययोः साध्यसाधनभावेनान्वयादव्याप्तेः। पश्य मृगो धावति पचति भवतीत्यादौ कर्तृत्वकर्मत्वेनाप्यन्वयाच्च। असाधनस्य कारकत्वानुपपत्तेः । यन्तु घटो भवति घटं करोतीत्यादावसिद्धस्यापि कर्तृत्वकर्मत्वदर्शनादसतः साधनत्वस्य चासम्भवान्मुख्यं साधनत्वं करणादेरेव असिद्धस्य करणत्वाद्यदर्शनात् । कर्तृकर्मणोस्तु क चिन्मुख्यं क चिद् बुद्धिपरिकल्पितसिद्धत्वमादाय गौणं साधनत्वम् । तथा च भाष्ये कारकान्तर्गतमुख्यसाधनत्वपरिग्रहात्करणादिकारकत्वेनानन्वयित्वं विवक्षितमिति नोक्तदोषावकाशः । नहि परकीयपाकक्रियाचातुर्यं दृष्ट्वा मत्सरिणः पाकेन वैरं कृतं पाकाय कालो नीत इत्यादिप्रयोगवत्पचति वैरं कृतमित्यादि प्रयुञ्जतीति कैयटे ध्वनितम् । तदपि भाष्योक्तलिङ्गानन्वयित्वपक्षवदुक्तवाक्यपदीयाद्युक्तवाच्यत्वप्रतीयमानत्वयोः पथं नावतरति । एतेन भाष्ये अन्वय आकांक्षारूपो विवक्षितः । सोपि शब्दान्तरसमभिव्याहारभावप्रयुक्तः । तथा च शब्दान्तरसमभिव्याहाराभावे सत्यपि स्वसाध्यक्रियान्तराकांक्षोत्थापकज्ञानविषयत्वं सिद्धत्वम् । तादृशाकांक्षानुत्थापकज्ञानविषयत्वं साध्यत्वम् । भवति च पाक इत्यादिश्रवणे धात्वर्थघञर्थक्रिययोरभेदान्वये सत्यपि कर्त्तव्यो वा नाशनीयो वा तिष्ठति वा जायते वा नश्यति चेत्यादिपाकसाध्यक्रियान्त-

राकांक्षा न तु पचतीत्यादौ पचति भवतीत्यादौ च भवतिक्रियायाः कर्त्रपेक्षत्वाद्योग्यतावशादन्यतराकांक्षयैवान्वयबोधः । यः कृष्णं नमेदित्यादौ तु यच्छब्दचेच्छब्दादिसमभिव्याहारप्रयुक्तमेवाकांक्षोत्थानम् । अन्यथा कृष्णं नमेदित्यत्रापि स्यात् । एवं भुक्त्वेत्यत्रापि किमित्यादिक्रियान्तराकांक्षा धातुसम्बन्धार्थकक्त्वादियोगप्रयुक्ता न तु धातूपस्थापननिबन्धना । पचतीत्यत्राप्यापत्तेः । न चैवं घञादिसमभिव्याहारप्रयुक्ता धात्वर्थस्यैव पाक इत्यत्राप्याकांक्षा स्यादिति वाच्यम् । घञादेः स्वातन्त्र्येण भावनावाचकतायां व्यवस्थापितत्वेन स्वार्थान्वयाकांक्षयैवोपपत्तौ तथा कल्पने गौरवप्रसङ्गात् । क्त्वादीनां तु न तद्वाचकत्वे मानमस्तीति वक्ष्याम इत्यपास्तम् । अस्यापि लक्षणमात्रत्वेपि वाच्यत्वप्रतीयमानत्वयोरभावात् । किं च धातूपस्थाप्यभावनायाः करणत्वादिना नान्वयः क्रियान्तराकांक्षानुत्थापकता वा कुत इति विभाव्यताम् । धातूपस्थापननिबन्धन एवेति चेन्न । साध्यत्वेनाभिधानविलयापत्तेः । साध्यत्वेनोपस्थापननिमित्त इति चेत्तर्हि तथान्वयविरोधि स्वतन्त्रमेव किञ्चित् रूपं वक्तव्यम् । तदेव साध्यत्वं भाष्यादिग्रन्थाभिप्रेतमिति प्रतीमः । तच्चोत्पाद्यत्वमेव । तथा च पचति गच्छतीत्यादौ विक्लित्त्यनुकूलयत्नादिकमुत्पादयति, उत्तरसंयोगानुकूलक्रियामुत्पादयति इत्याद्युत्पाद्यत्वं प्रतीयते । एतदेव च कारकान्वयितावच्छेदकम् । अत एव पचतीत्येवोक्ते केन कस्मात् कस्मै कुत्र किमित्याद्याकांक्षा तत्समर्पककारकाणां तस्यामेवान्वयश्च सङ्गच्छते । उत्पत्तिमत्त्वेनोपस्थितस्यैव कारकाकांक्षत्वात् । तस्याः स्वयमुत्पाद्यतायागमेनासिद्धत्वादन्यक्रियासाधनत्वेनानन्वयश्च भाष्योक्तो युज्यते सिद्धस्यैव क्रियासाधनत्वात् । नन्वेवं पचति भवतीत्य-

पि न स्यादिति चेन्न । उत्पद्यमानस्यासिद्धस्यैव सर्वत्र भवने कर्तृत्वदर्शनेन तस्यात्रानुकूलत्वात् । अत एव पचति नश्यतीत्यादि न भवति । उक्तं च कैयटेन, "भवतिक्रियापेक्षमेव तस्याः कर्तृत्वं सर्वश्चार्थः स्वेन रूपेण भवतीति भवने कर्तृत्वमुपपन्नमेवे"ति । न चैवमप्यसिद्धस्य दर्शनकर्मत्वासम्भवात्पश्य मृगो धावतीत्यत्र वाक्यार्थक्रियायाः कर्मता न स्यादिति वाच्यम् । नहि क्रियासमूहो दर्शनकर्म । पिण्डीभूता न निदर्शयितुं शक्येति भाष्यविरोधात् । किं त्ववयवशः । ते तु यथासम्भवं सिद्धा एव कर्म भवन्ति । उक्तं च वाक्यपदीये । तत्र यं प्रति साध्यत्वमसिद्धा तं प्रति क्रिया । सिद्धा तु यस्मिन्साध्यत्वं न तमेव पुनः प्रति ॥ मृगो धावति पश्येति साध्यसाधनरूपतेति । समुदाये कारकान्वयोपयोग्यसिद्धत्वं, प्रत्येकं दर्शनोपयोगि सिद्धत्वमस्तीत्यर्थः । नन्वेवं यः कृष्णं नमेत्स सुखं यायात् भुक्त्वा तृप्यतीत्यादौ नमनभोजनादिक्रियायाः सुखप्राप्तितृप्तिक्रियासाधनत्वेनान्वयो न स्यादिति चेन्न । शाब्दं प्राधान्यमादाय विशेषणान्वयस्यौत्सर्गिकत्वेपि क्व चिदर्थेन जिगमिषतीत्यादावार्थिकप्राधान्यमादाय कारकान्वयवद्यच्छब्दोपस्थाप्योद्देश्यतावशादार्थिकं सिद्धत्वमादाय लिङर्थसाधनत्वान्वयसम्भवात् । एतद्बोधनायैव यच्छब्दादिप्रयोगनैयत्यं तं विना बोधाभावश्च सङ्गच्छते । भुक्त्वेत्यादावपि क्त्वादिद्योत्यधात्वन्तरसम्बन्धस्य पूर्वोत्तरकालादेश्चानुरोधादार्थिकसिद्धत्वमादायैव साधनत्वबोधः । असिद्धस्य पूर्ववृत्तित्वासम्भवात् । भोजनक्रियामुत्पाद्य तृप्यतीति बोधात्तात्पर्यमर्यादया तद्बोधसम्भवात् । क्त्वादौ क्रियान्तराकांक्षोत्थानमप्येतन्मूलकमेवेत्युक्तप्रायम् । तस्मादुत्पाद्यत्वमेव करणादिकारकत्वेनानन्वयितावच्छेदकं क्रियान्तराकां-

नानुत्थापकतावच्छेदकं च । तत्प्रतीतिश्चोदाहृतवाक्यपदीय-भट्टपादकारिकोदाहृतानुभवादङ्गीकार्या । तथा च क्रियान्तराकांक्षानुत्थापकतावच्छेदकरूपवत्त्वं वा कारकान्वयितावच्छेदकरूपवन्त्वं वा असत्त्वभूतत्वम् । क्रियान्तराकांक्षोत्थापकतावच्छेदकरूपवत्त्वं वा कारकानन्वयितावच्छेदकरूपवन्त्वं वा सत्त्वरूपत्वम् । एवं चासत्त्वभूता साध्यावस्थेत्यादयो व्यवहाराः प्रसिद्धार्था एव परन्तु धावतीत्यादौ सिद्धत्वं पश्येत्याद्यालोचनेन प्रागुक्तरीत्यैवेति सुधीभिरूह्यम् ॥ १५ ॥

नन्वस्तु धात्वर्थे एव कारकाणामन्वयो न तु भावनायामेवेति नियमस्तथा च न तदनुरोधेन भावनाया वाच्यत्वं घञादौ सिध्यतीत्याशङ्कां निरसितुमाह ॥

सम्बोधनान्तं कृत्वोर्थाः कारकं प्रथमो वतिः ।
धातुसम्बन्धाधिकारनिष्पन्नमसमस्तनञ् ॥१६॥

सम्बोधनान्तस्य क्रियायामन्वयः । तथा च समर्थसूत्रे वार्त्तिकम् । एकतिङ् वाक्यमिति । अत्र भाष्यम् । ब्रूहिब्रूहि देवदत्तेति । अत्र वाक्यत्वादामन्त्रितनिघातः सिध्यतीति कैयटः । समानवाक्ये निघातयुष्मदस्मदादेशा इत्यनेन समानवाक्ये एव तद्विधानात् । उक्तं च वाक्यपदीये । सम्बोधनपदं यच्च तत् क्रियाया विशेषणम् । व्रजानि देवदत्तेति निघातोत्र तथा सतीति ॥ के चित्तु न्यायसिद्धोयमर्थः । तथाहि । सम्बोधनविभक्तेरनुवाद्यविषयत्वादनुवाद्यस्य विधेयसाकांक्षत्वाद्विधेयस्य च क्रियारूपत्वात् क्रियान्वयोर्थायातः । हे देवदत्त त्वं सुन्दर इत्यादौ गुणोपि विधेय इति चेत्तथापि क्रियाकांक्षाशान्तये तदध्याहाराघटकत्वेन तदन्वयसम्भवादित्याहुः । इदं च वार्त्ति-

करीत्यपि । भाष्यकारानुयायिमस्तु पचति भवतीक्षस्व शय्यन्ते ह-तशायिकाः, पश्य मृगो धावती, त्यादावेकतिङ्भावात्कथमेकवाक्यता कथं वा तिङ्ङतिङ इति सूत्रे अतिङन्तात्परस्य पर्युदासः । तिङन्तात्परस्य तिङन्तस्य वाक्यान्तरप्रविष्टतया निघाताप्रवृत्तेः । उक्तं हि वाक्यपदीये । बहुष्वपि तिङन्तेषु साकांक्षेष्वेकवाक्यता । तिङन्तेभ्यो निघातस्य पर्युदासस्तथार्थवानिति ॥ तस्मादेकतिङ्विशेष्यकं वाक्यमिति वार्त्तिकमतमभ्युपेयम् । तत्रैकविशेष्यकं वाक्यमित्येवास्तु । तथा च यत्र न निघातस्तत्र तिङं विनाप्युपपत्तेर्न तदध्याहारो युक्तः । अत एव प्रकृतिसिद्धमिदं हि महात्मनामिति शुद्धसुबन्तम् । पचति भवतीति शुद्धतिङन्तम् । ज्योतिष्टोमेन स्वर्गकाम इति तदुभयसमुदायरूपमिति तत्त्रैविध्यं सङ्गच्छतइति हि वदन्ति । कृत्वोर्थाः । क्रियाभ्यावृत्तिगणने कृत्वसुच् इत्यनेन क्रियायोगएव तत्साधुत्वावगमात् । तथा सकृत्पचति द्विःपचतीत्यादि । अत एव द्वौ घटावित्यादिवद् द्विर्घट इत्यादिकं न भवति । कारकम् । कारके इत्यधिकृत्य तेषां प्रक्रान्तत्वात् । तत्र च करोतीति कारकमिति योगाश्रयणात्क्रियानन्वयिनो न कारकत्वम् । अत एव ब्राह्मणस्य पुत्रं कृष्णं पृच्छतीत्यत्र ब्राह्मणस्य न कारकत्वमिति स्पष्टमाकरे । यद्वा कारकशब्दः क्रियावचनः करोति कर्तृकर्मादिव्यपदेशानिति व्युत्पत्तेः । तथा चाग्रिमेष्वपादानादिसंज्ञाविधिषु क्रियार्थककारकशब्दानुवृत्त्या क्रियान्वायिनामेव संज्ञेति भाष्यादौ स्पष्टम् । प्रथमो वातिः । तेन तुल्यं क्रिया चेद्वतिरित्यनेन विहितः । तत्र यत्तुल्यं सा क्रिया चेदित्युक्तत्वात् । यथा देवदत्तवत्पठतीत्यादि । एवं च चैत्रवत्सुन्दर इत्यादौ भवतीत्याद्यध्याहार्यम् । अन्यथा सूत्रे क्रिया चेदित्यनर्थकमेव स्यात् । धा-

तुसम्बन्धाधिकारे । धातुसम्बन्धेप्रत्यया इत्यधिकृत्य तेषां विहितत्वात् । यथा भोक्तुं पचतीति । पातुं जलमित्यादौ चानेयमित्याद्यध्याहार्यमेवेत्युक्तप्रायम् । असमस्तनञ् । अयं भावः । न त्वं पचसि न युवां पचथः चैत्रो न पचति घटो न जायते इत्यादौ क्रियाया एव निषेधो नञा बोध्यते । अत एव विद्यमानेपि घटे तथा प्रयोगः । तथा च घटो नास्तीत्यादावप्यस्तित्वाभाव एव बोध्यते । तथा च प्रकारतासम्बन्धेन नञर्थविशेष्यकबोधे भावनोपस्थितिर्हेतुरिति कार्यकारणभावः । तथा च भूतले न घट इत्यत्राप्यस्तीत्यध्याहृतक्रियायामेवान्वयः । न तु भूतलाधेयत्वाभाववान्घट इति बोधः । कारकाणां क्रियातिरिक्तेऽन्वयाभावात् । अत एव अहं नास्मि घटो नास्तीत्यादौ पुरुषव्यवस्था घटा न सन्ति घटौ न स्त इत्यादौ वचननियमश्चोपपद्यते । युष्मदादेस्तिङ्सामानाधिकरण्यात् । घटाभाववोस्तीत्यन्वये च स न स्यात् । अत एव सुडनपुंसकस्येत्यत्र नपुंसकस्य नेत्यर्थे न हि नपुंसकेन सामर्थ्यं, केन तर्हि, भवतिना । इदं च परैरप्यङ्गीकर्त्तव्यं प्रसज्यपर्युदासयोर्भेदार्थमिति भाष्ये सङ्गच्छतइति । समासे त्वब्राह्मण इतिवद्भवति क्रियायोगं विनापि साधुत्वमतो ऽसमस्तेति । समासायोग्य इत्यर्थः । प्रसज्यप्रतिषेधे इति यावत् । एतेन यजतिषु ये यजामहं करोति नानुयाजेष्वित्यत्र प्रसज्यप्रतिषेधः पर्युदासो वेति संशये अनुपात्तशब्दसम्बन्धे समासापत्तिः । वावचनानर्थक्यं मन्यमानो वार्त्तिककारो नञ्समासादेर्नित्यतां विग्रहेण सह भिन्नार्थतां च मेने । सति हि वाक्यसमासयोरैकार्थ्ये समासनियमाद्वाक्यं निवर्त्तेतेति तदर्थं विभाषेति सूत्रं कार्यं स्यादेव । तस्मादनुयाजपदान्वये सामर्थ्याविघातात्समासापत्तिरिति न पर्युदास इति

प्राप्ते ब्रूमः । प्रतिषेधस्य प्राप्तिपूर्वकतानियमात्प्राप्तेश्च यजतिषु ये यजामहमिति शास्त्रादन्यतोऽसम्भवाच्छास्त्रीयविहितप्रतिषिद्धत्वाद्विकल्पापत्त्या पर्युदास एव । तत्र सामर्थ्यसत्त्वेऽपि विभाषाध्ययनान्न समासः । तच्चावश्यकं वाक्यसमासयोरैकार्थ्यात्समासनियमप्रयुक्तवाक्यनिवृत्तिवारणाय । यद्यपि समासे राजपदं विशेषणान्वयासहिष्णुवाक्ये तु सहिष्णु इत्यस्ति विशेषस्तथाप्यर्थावैलक्षण्यमेव । अन्यथा विभाषावचनात्प्राग्विहितेनोपकुम्भादिसमासेनापि वाक्यानिवृत्तिप्रसङ्गः। उपपदसमासेन च कुम्भकारादिना । न चैवमिष्टम् । तस्मादनर्थकं तदानर्थक्यवच इति बाधलक्षणे सिद्धान्ततत्त्वान्नासमस्तनञः क्रियान्वयनियमः । यद्यप्यत्र वावचनानर्थक्यं स्वभावसिद्धत्वादिति वदन्वार्त्तिककारो न समासनित्यतां मेने । एकार्थीभावसामर्थ्ये समासो व्यपेक्षायां च नेति भाष्यपर्यालोचनया तदर्थलाभात् । एतन्नियमार्थमेव समर्थसूत्रारम्भः । अन्यथा व्यर्थतायां भाष्यएव स्पष्टत्वात् । तस्मात्प्रकारान्तरेण विकल्पसिद्धेर्व्यर्थः सूत्रारम्भ इत्यभिप्रायः । एवमुपकुम्भादावबोधकत्वादेव वाक्यस्यासाधुत्वम् । तस्माद्धेतोः ब्रूमो ऽगमकत्वादिति न ब्रूमो ऽपशब्दः स्यादिति भाष्यकैयटाभ्यां तथा लाभात् । व्युत्पादयिष्यते चैतदुपरिष्टादितीदमसङ्गतम् । तथाप्यसमस्तनञः क्रियायामनन्वयः सिद्ध एवेति निरस्तम् । तस्माद्वायौ रूपं नास्तीत्यादिप्रसज्यप्रतिषेधस्थले रूपप्रतियोगिकाभावादिवर्णनं न युक्तम् । अपर्युदासस्थले क्रियान्वयनियमस्योक्तभाष्यादावश्यकत्वादिति भावो द्रष्टव्य इति दिक् ॥ १६ ॥

तथा यस्य च भावेन षष्ठी चेत्युदितं द्वयम् ।

साधुत्वमष्टकस्यास्य क्रिययैवावधार्यताम् ॥१७॥

यस्यचेत्येकदेशेन यस्यचभावेनभावलक्षणमिति सूत्रं लक्ष्यते । तत्र भावेनेत्युक्तत्वाद्भावस्य च क्रियात्मकत्वाक्रियायोगं विना न साधुत्वमित्यर्थः । यथा गोषु दुह्यमानासु गत इति । षष्ठी चेत्यत्रापि षष्ठीचानादरइति सूत्रं लक्ष्यते । अत्रापि चकारात्पूर्वसूत्रस्थं भावेनेत्यायातीत्यर्थः । यथा रुदति रुदतो वा प्राव्राजीदिति । साधुत्वमिति । एतत्स्वरूपं त्वसाधुरनुमानेनेत्यत्र वक्ष्यामः । क्रिययैवेत्येवकारो ऽयोगव्यवच्छेदार्थः । तथा चैतदष्टकस्य क्रियायोगएव साधुत्वं नान्यथेत्यर्थः । ननु क्रियाशब्दस्य धात्वर्थमात्रे प्रसिद्धेः फलयोगे भवतु साधुत्वलाभः न तु भावनान्वयनियमो लभ्यतइति न तदनुरोधेन पाक इत्यत्र भावनावाच्यत्वं सिध्यतीति चेन्न । भूवादिसूत्रादौ क्रियाशब्दस्य भावनायामेव प्रसिद्धेः साङ्केतिकी तस्याः शक्तिः फले तु क्रियते इति यौगिकः प्रयोगः । तथा च नावमिकाधिकरणन्यायेन भावनान्वयएव साधुत्वाख्यानं लभ्यते । रथन्तरं हि यद्योन्यां तदुत्तरयोर्गायतीति वचनाद्रथन्तरयोनेः परतो बृहद्योनेः पठितत्वात्तस्यां गेयमुतोत्तराग्रन्थे न त्वावां अन्य इत्यस्याः पठितत्वात्तस्यामिति संशये विशेषाभावादनियमं प्राप्योत्तराग्रन्थे संज्ञारूपेण प्रसिद्धिः संज्ञाशब्दश्चानपेक्षमप्यात्तिर्बलवानिति तत्रैव गेयमित्यूहलक्षणे निरूपितम् । किं च । फलांशोपि भावनायां विशेषणं कारकाण्यपि क्व चित्तथाभूतान्येवेति गुणानां च परार्थत्वादसम्बन्धः समत्वात्स्यादिति न्यायेन भावनामेव विशेष्यतयाङ्गीकुर्वते न गुणभूतं फलांशमिति न तत्रान्वयः । अपि च । कारकाणां नित्यपरतन्त्राणां विशेष्याकांक्षायां धात्वर्थफ-

लांशस्य तथान्वययोग्यतायामपि तस्यापि परतन्त्रस्य विशेष्याकांक्षापूरणसमर्थायां भावनायामेव विशेषातिदेशाध्यायाधिकरणन्यायेनान्वयः। नहि भिक्षुको भिक्षुकान्तरं याचितुमर्हति सत्यन्यस्मिन्नभिक्षुके इति न्याये ह्याकांक्षाशामकत्वकल्पनैव बीजम्। तत्तुल्यमत्रापि। एवं च विशेष्यतासम्बन्धेन कारकप्रकारकशाब्दबोधं प्रति धातुजन्यभावनोपस्थितिः कारणमिति कार्यकारणभावस्य कल्पितत्वाद्यत्रापि पक्ता पाचक इत्यादौ भावना गुणभूता तत्रापि कल्पितकार्यकारणभावानुरोधात्तस्यामेवान्वयः कल्प्यतइति न फलांशे तदन्वयः। फलांशोपस्थितिरेवास्तु कारणं काष्ठेनोदनस्य पक्तेत्यादौ कल्पितत्वादिति चेन्न। कारकीभूतधात्वर्थस्य भावनायामनन्वयापत्तेः। नहि स्वयमेव स्वकारकम्। विधिवाक्ये धात्वर्थफलांशस्य करणतयान्वयेन तत्र कारकान्वये बाजपेयाधिकरणभङ्गापत्त्या करणान्तरोपसंग्रहेण प्रयोगविधेरबोधकतापत्तेश्च। क्रियान्वयित्वं विना कारकत्वस्यैव दुर्वचत्वाच्च। फलान्वयित्वस्य तत्रैवाव्याप्तेरयोगादित्यादि कारकार्थनिर्णये वक्ष्यते। तस्मात् पाक इत्यादावोदनस्येत्यादिकारकान्वयाय भावनाया वाच्यत्वमावश्यकमिति सिद्धम्। के चित्तु भूतले घटः देवदत्तो घटं देवदत्तेनौदन इत्यादौ क्रियावाचकतत्तत्पदं विना शाब्दबोधस्याकांक्षानिवृत्तेश्चादर्शनान्न क्रियायोगं विना साधुत्वम्। न च क्रियारूपार्थाध्याहारेणापि शाब्दबोधाकांक्षानिवृत्त्योः सम्भवान्न तद्वाचकपदप्रयोगावश्यकत्वम्। पदजन्यपदार्थोपस्थितेरेव शाब्दबोधोपयोगित्वात्। पदानां सम्भूयान्वयबोधकत्वव्युत्पत्तेश्चेत्याहुः। एतन्मते पाकः सुन्दर इत्यादावप्याकांक्षासत्त्वाक्रियायोगं विना असाधुतापत्तेः। इष्टापत्तिर्भाष्यविरुद्धेति तद्दिशं स्पष्टम्। फलांशान्वयबलादेनोपपत्तौ भावनान्वयाकाङ्क्ष

इति तु चिन्त्यम् ॥ १७ ॥

यत्तु भूतले न घट इत्यत्र भूतलाधेयत्वाभाववान्घट इति बोधान्न क्रियाध्याहारापेक्षा । एवं पर्वतो वन्हिमान् भवितुमर्हति धूमात् महानसवदिति वेदान्तिकृतप्रयोगे प्रतिज्ञायां क्रियापदप्रयोगो वृथेति क्व चित्कें दूषितम् । तदनूद्य दूषयति ॥

यदि पक्षेपि वत्यर्थः कारकं च नञादिषु ।
अन्वेति त्यज्यतां तर्हि चतुर्थ्या स्पृहिकल्पना॥१८॥

आदिना सप्तम्यादेर्घटादावन्वयो गृह्यते । अत एव भूतले घट इत्यत्र भूतलाधेयो घट इति नैयायिका व्याकुर्वते । चतुर्थ्या स्पृहिकल्पना त्यज्यतामित्यन्वयः ॥ पुष्पेभ्य इति चतुर्थ्या श्रुतायां स्पृहयतीत्यध्याह्रियते । न पदान्तरमर्थमात्रं वेति त्यज्यतामित्यर्थः । विधायकानियमस्तु समान एवेति भावः ॥१८॥

एवं कर्त्तरि विहितानामित्यादीनां क्रिययैवान्वय इत्याह ॥

अविग्रहा गतादिस्था यथा ग्रामादिकर्मभिः ।
क्रिया सम्बध्यते तद्वत्कृतपूर्व्यादिषु स्थिता १९

न विविच्य ग्रहो ग्रहणं यस्याः सा तथा । गत इत्यादावविग्रहापि क्रिया ग्रामादिकर्मभिर्यथा सम्बध्यते तथा कृतपूर्व्यादिष्वपीत्यर्थः । ननु वृत्तेरेकार्थीभावरूपत्वाद्गत इत्यादौ पदार्थैकदेशे कृतौ कथं ग्रामाद्यन्वय इति चेन्न । देवदत्तस्य गुरुकुलमित्यादावन्वयाय समासे वक्ष्यमाणरीत्योपपत्तेः । के चित्तु कर्त्तृकरणेकृताबहुलं द्वितीयाश्रितातीतेत्यादिज्ञापकान्न दोष इत्याहुः । तन्न । एकदेशान्वयस्थले च शाब्दबोधोपयुक्ताकांक्षाविरहो बीजं शङ्कायाः । वचनषष्ठाच्च तदुद्धाराभावात् । कृतपूर्वी कटमित्य-

त्रैककटाभिन्नाश्रयिका योत्पत्तिस्तदनुकूलव्यापारत्वानिति बोधः। तस्मात्पाक इत्यादौ धात्वंशार्थमादाय कर्मकरणादिविभक्तिवत्कृतपूर्वी कटमित्यादावपि कर्त्राद्यर्थकाः प्रत्यया इति स्थितम् ॥ १९ ॥

अथ यदि घञादिप्रकृत्युपस्थाप्यक्रियामादाय प्रत्ययस्तुमुनादिस्तर्ह्येकः पाकः द्वौ त्रयश्चत्वारो वेत्यादौ द्वित्रिचतुर्भ्य इति सुच्, पञ्चेत्यत्र कृत्वसुच् स्यात्। तुमुनादितुल्यत्वादित्याशंक्य समाधिमाह ॥

कृत्वोर्थाः क्त्वातुमुन्वत्स्युरिति चेत्सन्ति हि क्व चित्।
अतिप्रसङ्गो नोद्भाव्योभिधानस्य समाश्रयात् ॥२०॥

क्त्वादयो यथा धात्वंशक्रियां निमित्तीकृत्य जायन्ते भोक्तुं पाकः भुक्त्वा गन्तेत्यादौ। तथा कृत्वोर्था अपीति चेदिष्टापत्तिः। द्विर्वचनमित्यादौ दृष्टत्वात्। सकृत्पाक इत्यादिकं चानभिधानादेव न भवतीत्याह। अतीत्यादि। अभिधानं तत्तत्प्रयोगाः। तथा च यत्र तादृशमर्थमभिधातुं कृत्वोर्थास्समर्थास्तत्र स्युरेव। यथा द्विर्वचनं द्विरण्विधिरित्यादौ। न चैवं प्रकृते, अतो नेत्यर्थः। के चित्तु क्रियाभ्यावृत्तिगणने कृत्वसुच् इत्यत्र क्रियाग्रहणं व्यर्थं तस्या एवाभ्यावृत्तिसम्भवात्। तथा च व्यर्थं सत्तदेव ज्ञापयति। यदिह सूत्रे साध्यस्वभावैव क्रियोपादीयतइति न दोषस्तार्हि द्विर्वचनमित्यपि न स्या, त्सत्यम्। द्विर्वचनेचीति ज्ञापकात्तत्सिद्धेरित्याहुः। तस्माद्धातुवाच्या भावनेति निर्दोषमिति दिक् ॥२०॥

वस्तुतो धातोर्भावनानभिधायकत्वे आख्यातस्य कर्त्तुरनभिधायकत्वे चासाधुत्वं स्यादित्याह। भेद्येतीति सम्प्रदायः। वस्तुतस्तु वक्ष्यमाणरीत्या धातोरिवाख्यातस्यापि भावनाबोध-

कत्वज्ञानाच्छाब्दबोधदर्शनादाख्यातस्यापि भावनायां शक्तिरित्याशङ्कायामाह ॥

भेद्यभेदकसम्बन्धोपाधिभेदानिबन्धनम् ।
साधुत्वं तदभावेपि बोधो नेह निवार्यते ॥ २१ ॥

भेद्यं विशेष्यम् । भेदकं विशेषणम् । तयोर्यः सम्बन्धस्तस्य यो भेदस्तन्निबन्धनं साधुत्वमित्यर्थः । अयं भावः । यस्मिन्विशेष्ये यादृशविशेषणान्विते यादृगानुपूर्व्या सूत्रवार्त्तिकभाष्यकाराद्यन्यतमेन साधुत्वमुक्तं स शब्दस्तत्र साधुरन्यत्रासाधुरेव । अत एव दन्त्यमध्यो ऽस्वशब्दो ऽश्वे साधुर्न किं तु दरिद्रे साधुः । एवं तालव्यमध्यो ऽश्वशब्दोश्वे साधुर्न दरिद्रे । एवमाख्यातस्य कर्त्तुरनभिधायकत्वे धातोश्च भावनानभिधायकत्वे ऽसाधुत्वमेव स्यात् । व्याकरणेन तथैव साधुत्वबोधनादिति । एवं चास्तु तिङस्तत्र शक्तिः सर्वे सर्वार्था इत्यस्यैव स्वीकारात् । परं तु तत्रार्थे ऽसाधुत्वं स्यादिति । नन्वेतदर्थस्य जैमिनिप्रभृतिभिराचार्यैः साभिनिवेशमुपपादितत्वात्कथं तद्वचसामसाधुतां ब्रूषे इति चेन्न । तेषामत्र तात्पर्याभावात् । व्याकरणस्य च कोशादिवच्छक्तिपरिच्छेदकत्वात् । तथा च पठन्ति । शक्तिग्रहं व्याकरणोपमानकोशाप्तवाक्याद्व्यवहारतश्च । वाक्यस्य शेषाद्विवृत्तेर्वदन्ति सान्निध्यतः सिद्धपदस्य वृद्धा इति ॥ तस्मादेतदर्थे व्याकरणं बलीय इति दर्शनान्तराणां पन्थाः । व्याकरणस्य तत्तदर्थपुरस्कारेण तेषान्तेषां पदानां साधुत्वबोधनार्थमेव प्रवृत्तिः । तदुक्तं वाक्यपदीये । साधुत्वज्ञानविषया सैषा व्याकरणस्मृतिः ॥ तथा च श्लोकमध्यस्थव्याकरणपदमर्थसिद्ध्यर्थकथनं, न तु कोशादिवच्छक्तिग्रहार्थमेवं प्रवृत्तिरस्येत्यादिकः

सैद्धान्तिकः पन्थाः । नन्वेवंविधः शब्दो यद्यसाधुस्तर्हीतो बोधो न स्यात् । शाब्दबोधे साधुत्वज्ञानस्य कारणत्वात्तदभावनिश्चयस्य प्रतिबन्धकत्वादिति चेन्न । वस्तुतोसाधुत्वेपि कारणीभूतसाधुत्वज्ञानसम्भवादित्याभिप्रेत्याह । बोध इति । बोधोस्तु नाम, असाधुत्वं तु स्यादेवेत्यर्थः । अत एव सिद्धे शब्दार्थसम्बन्धे इत्यत्र भाष्यकृतो वदन्ति, "समानायामर्थावगतौ साधुभिश्चासाधुभिश्च गम्यागम्योतिवान्नियमः क्रियत" इति । वस्तुतः साधुत्वज्ञानं न कारणं तदभावनिश्चयश्च न प्रतिबन्धक इत्यसाधुरनुमानेनेत्यत्र वक्ष्यामः । इदं पुनरिहावधेयम् । उक्तरीत्या कर्तुराख्यातार्थत्वे व्याकरणसिद्धान्तसङ्गतावपि दर्शपूर्णमासप्रकरणपठित "नानृतंवदेदि" तिनिषेधवाक्यस्य क्रत्वर्थत्वं न सिद्धचेत् । तथा च क्रतावपभाषणे क्रतुवैगुण्यनिवारणार्थं प्रायश्चित्तानुष्ठानादिसकलयाज्ञिकमीमांसकादीशिष्टाचारविरोधः । तथाहि । नानृतमित्यस्य प्रकरणाक्रत्वर्थत्वम् । आख्यातेन कर्तुरुक्तत्वाच्छ्रुत्या च पुरुषार्थत्वम् । तत्र "श्रुतिलिङ्गवाक्यप्रकारणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षादि" ति न्यायाच्छ्रुतेर्बलवत्त्वात्पुरुषार्थत्वमेव स्यात् । किं च सर्वत्रैव यो यदर्थं प्रवृत्तः सन् निवार्यते स तदर्थमेव प्रतिषिद्धो भवति । आख्यातस्य कर्त्रर्थत्वे च पदश्रुत्यानृतवदननिषेधः पुरुषार्थ एव स्यादिति नाख्यातार्थः कर्ता । न च कर्तुरवाच्यत्वे लःकर्मणीति सूत्राप्रामाण्यम् । यथा वृद्धिगुणशब्दौ लोकवेदयोरादैजदेङां वाचकत्वेनादृष्टावपि वैयाकरणैः स्वशास्त्रे परिभाषितौ । यथा वासन्नेव लकार उत्प्रेक्षितस्तथैव कर्तृकर्मादिवाचकत्वस्यापि सम्भवात् । यत्र तु न्यायानुगतिस्तत्र लोकवेदयोरपि न तदुक्तार्थपरिग्रहः । न चैतावता स्मृतेरप्रामा-

ण्यम् । अर्थवादवत्तात्पर्यविषये प्रामाण्यात् । एवं कृत्प्रत्ययस्थले "जज्ञभ्यमानोनुब्रूयान्मयि दक्षक्रतू" इत्यादौ वाक्यात्पुरुषार्थत्वसिद्धये कर्त्तुर्वाच्यत्वमावश्यकमिति नोक्ता प्रतिबन्दिरपीति मीमांसकानामुत्तरमवशिष्यते । अत्रेदं वक्तव्यम् । कर्त्तृवाच्यत्ववाच्यत्वाभ्यामुक्तसिद्धान्तसङ्गमस्तस्माच्च तत्सिद्धिरित्यन्योन्याश्रयादसङ्गतमेतत् । किं च । कर्तुराख्यातार्थत्वेपि श्रुतिप्रकरणाभ्यामस्तु क्रतुयुक्तपुरुषधर्मोयं प्रतिषेधः । न च प्रकारणाच्छ्रुतिः कल्प्या तया च विनियोगः कार्यस्तथा च प्रथमत एव श्रुत्या पुरुषार्थत्वनिर्णयेन क्रतावप्यन्वय आकांक्षाविरहादिति वाच्यम् । एवं हि जज्ञभ्यमानवाक्यस्य वाक्यप्रकारणाभ्यां पुरुषसंस्कारमुखेन क्रत्वर्थत्वसिद्धान्तः प्रस्थितः स्यात् । यत्तु पुरुषसंस्कारमुखेनानृतवदनस्य क्रत्वर्थत्वे पुरुषांशे ऽनुवादः स्वीकार्यः । ततश्चाविशेषादृत्विजामप्याध्वर्यवादिसमाख्यया प्राप्तानां निषेधः स्यादिति । तज्जज्ञभ्यमानवाक्येपि समानम् । तत्रेष्टापत्तौ, प्रकृतेपि तां को वारयिता । एवं च क्रतुयुक्तपुरुषधर्मतैव । अत एव यदर्था प्रवृत्तिस्तदर्थः प्रतिषेध इत्यपि सङ्गच्छते । वस्तुतः स्युपायमांसभक्षादि पुरुषार्थमपि श्रितः प्रतिषेधः क्रतोरङ्गमिष्टः प्रकरणाश्रयादित्यत्रोक्तनियमे व्यभिचारो भट्टपादैरेवोक्त इति ध्येयम् । वस्तुतः कर्तुर्वाच्यत्वेपि क्रियाया एव प्राधान्यात्कर्त्तुर्गुणभूतत्वाच्चानृतवदननिषेधभावनाया न पुरुषार्थत्वम् । एवं च भावनायाः कैमर्थ्याकाङ्क्षायां प्रकरणाद्भवतामिव शुद्धं क्रत्वर्थत्वमिति । कृत्प्रत्ययस्थले पुनः कर्तुर्विशेष्यत्वात्तत्संस्कारमुखेनैव क्रत्वर्थतेति सहृदयैराकलनीयमिदं । इदं पुनरिहावशिष्यते । नानृतं वदेदित्यनारभ्याधीतवचनस्य दर्शपूर्णमासप्रकरणपठितस्य नानृतं वदेदित्यस्यापि च

विनिगमनाविरहाच्छब्दानृतमर्थानृतं चेत्युभयमपि निषेध्यमित्यन्यत्र निर्णीतम् । तथा च साधुत्वानिर्णायकसूत्रवार्त्तिकभाष्यकारैस्तिङां कर्त्तर्येव साधुत्वकथनात्तदुल्लघनेन याज्ञे कर्मणि भावनारूपेर्थे प्रयुञ्जाना मीमांसकादयश्चतुर्थीमिव षष्ठ्याद्यर्थे कथं न प्रत्ययन्तु । तथा च साङ्गानुष्ठानेपि तेषामेव प्रायश्चित्तानुष्ठानापात्तिः । न च निर्मूलत्वादेतदनुशासनमनादरणीयम् । तस्माद् "ब्राह्मणेन निष्कारणो धर्मः षडङ्गो वेदो ऽध्येयो ज्ञेय" श्रेति श्रुतेः, "पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् । सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किं चने" ति पराशरोपपुराणादेश्चानेकशो दर्शनात् । न च लकारवत्कर्त्राद्यर्थकत्वमपि कल्पितम् । सर्वत्र कल्पितप्रकृतिप्रत्ययविभागमादायैव पर्यवसितानामर्थविशेषे साधुत्वबोधकत्वस्वीकारात् । तस्मादेतद्दोषनिरासार्थं कर्तृकर्मणोर्वाच्यत्वमावश्यकमिति सिद्धम् ॥ २१ ॥

इति वैयाकरणभूषणे धात्वाख्यातसामान्यार्थयोर्निरूपणं समाप्तम् ॥

एवं प्रत्येकं दशलकाराणामर्थं निरूपयति ॥

वर्तमाने परोक्षे श्वो भाविन्यर्थे भविष्यति ।
विध्यादौ प्रार्थनादौ च क्रमात् ज्ञेया लडादयः २२

तत्र वर्त्तमानेर्थे लट् वर्त्तमानेलडिति सूत्रात् । वर्त्तमानत्वं च प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वं, भूतभविष्यद्भिन्नकालत्वं वा लोकप्रसिद्धमेव । तच्च पचतीत्यादावधिश्रयणाद्यधःश्रयणान्तव्यापारेस्तीति तमादाय लट्प्रयोगः । अथायं कालः किं द्योत्यो वा वाच्यो वा । नाद्यः । तस्य धात्वर्थत्वाभावात् । द्यो-

तकत्वं च शक्त्याधायकत्वं, न चैतद्धातोः शक्त्यभावे सम्भवति । न च स शक्त एव । बहूनां धातूनां तत्र शक्तत्वे गौरवात् । एकस्य लट एव वाचकत्वौचित्याच्च । किं च वर्त्तमानेलडिति विशिष्य विधानेपि लटस्तत्राशक्तत्वे कर्त्तापि वाच्यो न स्यात् । स्याच्च द्योत्य एव । अविशेषात् । अत एव धातोर्वर्त्तमानत्वे लक्षणा तात्पर्यग्राहकस्तु लट् तात्पर्यग्राहकत्वमेव च द्योतकत्वमित्यपि निरस्तम् । न द्वितीयः । लटः सामान्यतो लकारार्थेन निराकांक्षतया तत्रैतस्याप्रवृत्तेः । तथापि प्रवृत्तौ च विशेषेण सामान्यस्य तत्रकौण्डिन्यन्यायाद्धात्वर्थकर्तुर्वाच्यत्वानापत्तेरिति चेन्मैवम् । पक्षद्वयस्याकरेभिहितत्वाद्युक्तिसिद्धत्वाच्च । तथाहि । वर्त्तमानकालो लडद्योत्यः । वर्त्तमानकालस्य धात्वर्थत्वात् तस्य लटं विना चाप्रतीतेः शक्त्याधायकत्वमेव वाच्यम् । न च तस्य धातुवाच्यत्वे उक्तदोषः स्यादिति वाच्यम् । व्यापारसन्तानातिरिक्तकालस्यानभ्युपगमात्तस्य च धातुवाच्यत्वस्योपपादितत्वाच्च । तथाहि । कालो न व्यापारसन्तानातिरिक्तः मानाभावात् । अतिरिक्तकल्पने च तच्छक्तत्वस्यापि कल्पनापत्तौ गौरवापत्तेश्च । किं च अतिरिक्तकालस्यैव वाच्यत्वे आत्मास्तीत्यादौ तत्तत्कालिकसूर्यादीनां क्रियाया निराबाधात्तामादायैवोपपत्तौ कथं पर्वतास्तिष्ठन्ति आत्मास्तीत्यादौ लडादिप्रयोग इत्यर्थकशङ्काभाष्यमसङ्गतं स्यात् । स्याच्च तत्तत्कालिकराज्ञां क्रियामादायोपपत्तिरिति सिद्धान्तभाष्यमपि तथा । तावत्पर्यन्तं दूरे धावनानुपपत्तेः । अस्मत्पक्षे चात्मधारणानुकूलव्यापारस्य प्रारब्धत्वाभावात्प्रारब्धापरिसमाप्तत्वरूपवर्त्तमानत्वस्यासम्भवादाशङ्कासङ्गतेः । सिद्धान्तस्यापि तत्तत्कालिकानां राज्ञां क्रियामादायात्मधारणानुकूल-

व्यापारस्यापि विशिष्टोत्पत्तिमादाय सूपपत्तिरेव । एवमेव सिद्धान्तभाष्यं कैयटोपि व्याचष्टे । इह भूतभविष्यद्वर्त्तमानानां राज्ञां याः क्रियास्तास्तिष्ठतेराधिकरणमिति प्रतीकमादाय तत्र राज्ञां स्थितिर्भूतादिभेदेन भिन्ना पर्वतादिस्थित्यादेर्भेदिकेति क्रियारूपत्वं कालत्रययोगश्चोपपद्यतइत्यर्थ इति । तस्माद्विशिष्टभेदमादायैव भाष्यम् । उक्तं हि वाक्यपदीये । परतो भिद्यते सर्वमात्मा तु न विकल्प्यते । पर्वतादिस्थितिस्तस्मात्पररूपेण भिद्यत इति ॥ विशिष्टभेदाद्भेद इत्येतद्व्याख्यायां हेलाराजीये स्पष्टम् । अत "एवैको ह वै नारायण आसीदि" त्यादौ विशिष्टभेदमादायैवोपपत्तिरिति शब्दकौस्तुभेप्युक्तम् । तस्माद्वर्तमानकालो व्यापारात्मक एव । तन्निष्ठवर्त्तमानत्वस्य चान्वयव्यतिरेकाभ्यां द्योत्यत्वं सुसङ्गतमेव । एवं तस्यैवानुत्पत्तिर्भविष्यत्त्वं निष्पत्तिश्च भूतत्वम् । तस्मिन् द्योत्ये लडादय इति तत्रतत्रावधेयम् । तस्माद् द्योतकत्वमेवेति निरूढः पन्थाः । एवं वाचकत्वेपि नानुपपत्तिः । तथाहि । वर्त्तमानकालो लड्वाच्य एव वर्त्तमानेलडिति सूत्रस्वरसात् । "क्रियाभेदाय कालस्तु सङ्ख्या सर्वस्य भेदिके"ति वाक्यपदीयेन कालस्य क्रियापरिच्छेदकत्वाभिधानाच्च । न च स्वपरिच्छेदकत्वं स्वस्यैवेत्युपपद्यते । किं च । क्रियाया लटं विनापि प्रतीतेस्तन्निष्ठं वर्त्तमानत्वमेव द्योत्यम् । तथा च तदपि धातुशक्यं वाच्यम् । तथा च बहूनां धातूनां तत्र शक्तिकल्पनामपेक्ष्यैकस्यैव लटो वर्त्तमानत्वे शक्तिरित्युच्यताम् । लाघवात् । अपि च वर्त्तमानत्वविशिष्टक्रियाबोधं प्रति लदसमभिव्याहारः कारणमिति त्वया वाच्यं तथा च तुल्यत्वाल्लटो वाचकत्वमेवोच्यताम् । अथैवं तत्र कर्ता वाच्यो न स्यात् । विशेषेण सामान्यस्य बाधादिति चेत् । नैवम् । अर्थद्वयस्या-

पि सम्भवेन बाध्यबाधकभावायोगात् । तदुक्तम् । अस्ति च सम्भवो यदुभयं स्यादिति । किं च । एवं हि लः कर्मणीति निरवकाशमेव स्यात् । स्थलान्तरेपि विध्याद्यर्थैर्बाधापत्तेः । तथा चा "नर्थक्यप्रतिहतानां विपरीतं बलाबलमि" ति न्यायाद्भवति सामान्यप्रवृत्तिः । अथातिरिक्तकालस्य वाच्यत्वे पूर्वमुदाहृतं भाष्यमलग्नकं स्यादिति चेन्न । द्योतकत्वपक्षमादाय तदभिधानात् । वस्तुतस्तु कालस्यातिरिक्तत्वेपि वर्त्तमानत्वं तत्र प्रारब्धापरिसमाप्तक्रियोपलक्षितत्वम् । तच्चात्मास्तीत्यादौ क्रियायाः प्रारब्धत्वाभावान्न सम्भवतीति कथं वर्त्तमानत्वमिति शङ्काशयः । क्रियाया अप्रारब्धत्वे ऽपि किञ्चिद्विशिष्टायाः प्रारब्धत्वात्तदुपलक्षितत्वस्य सम्भवाद्भवति वर्त्तमानत्वादिकमिति सिद्धान्ताशय इति ध्येयम् । वस्तुतः कालो नातिरिक्तः किं तु क्रियैव । तद्गतं प्रारब्धापरिसमाप्तत्वादिरूपं वर्त्तमानत्वादिकं लडर्थ इति परमार्थः । तस्माद्वर्त्तमानत्वं वाच्यमेव । इत्थं चात्मास्ति पर्वतास्तिष्ठन्तीत्यादावपि वर्त्तमानत्वं "तम आसीत्" "तुच्छेनाभ्वपिहितं यदासीत्" "एको ह वै नारायण आसी" दित्यादौ भूतत्वमपि सङ्गच्छते । लिडर्थमाह । परोक्षे इति । परोक्षेलिडिति सूत्रात् । कालस्तावदद्यतनानद्यतनभेदेन द्विविधः । द्विविधोपि भूतभविष्यद्रूपः । तत्रानद्यतने भूते परोक्षे लिडिति भावः । तेनाद्यतने भूते ऽनद्यतने भविष्यति भूतेप्यपरोक्षे च न लिट्प्रयोगः । परोक्षत्वं प्रयोक्तृवृत्तिसाक्षात्करोमीत्येतादृशविषयतालिङ्गानाविषयत्वम् । ननु परोक्षत्वं त्वव्यावर्त्तकं सर्वस्या अपि क्रियायाः परोक्षत्वात् । तदुक्तं भाष्ये । क्रिया नामेयमत्यन्तापरिदृष्टा पूर्वापरीभूतावयवा न शक्या पिण्डीभूता निदर्शयितुमितीति चेन्न । तदनुकूलशक्तिमतां व्यापाराविष्टानां साधना-

नां पारोक्ष्यस्येह विवक्षितत्वात्। तेन क्रियानाविष्टसाधनमात्र-प्रत्यक्षेपि लिट् भवत्येव। यथायं पपाचेत्यादौ। एवं स्वव्यापार-स्यापि वर्त्तमानतादशायां व्यासङ्गादिना स्वयमप्रतिसन्धानेपि ततः कार्येणानुमितौ भवत्येव लिट्। यथा "बहु जगद पुरस्तात्त-स्य मत्ता किलाह" मिति वदन्ति। "व्यातेने किरणावलीमुदयन" इति त्वयुक्तमेव। उक्तरीत्या यथाकथंचित्परोक्षत्वोपपादनेप्य-नद्यतनत्वातीतत्वयोर्बहुतरमनःप्रणिधानसाध्यशास्त्रार्थनिर्णयजन-कशब्दरचनात्मकग्रन्थे विस्तारक्रियायामसत्वेन लिटो ऽयोगा-त्। इदं त्ववधेयम्। क्रियाया एव पारोक्ष्ये लिडित्यर्थो लाघवा-त्। यतो धातोरित्यधिकारस्य धात्वर्थे लक्षणायां स्ववाच्यत्वं सम्बन्धः साधनलक्षणायां स्ववाच्यसाधनत्वं सम्बन्ध इति गौ-रवम्। न च सर्वा क्रिया परोक्षेत्यव्यावर्त्तकं तत्। समुदायस्य परोक्षत्वेपि प्रत्येकमपरोक्षत्वात्। अत एव पिण्डीभूता न निद-र्शयितुं शक्येति भाष्येपि। अत एव पश्य मृगो धावतीत्यत्र धा-वनक्रियाया एव पश्येत्यत्र कर्मत्वं सर्वसिद्धमेव। न च प्रत्येकं न क्रियात्वामिति वाच्यम्। तावतापि धात्वर्थत्वाक्षतेः। परो-क्षत्वमपि भाष्योक्तं क्रियायां सङ्गच्छतइति प्रतिभातीति दि-क्। लुडर्थमाह। श्वो भाविन्यर्थे इति। अनद्यतने भाविनीत्य-र्थः। अनद्यतने लुडिति सूत्रात्। यथा श्वो भवितेत्यादौ। लृड-र्थमाह। भविष्यतीति। भविष्यत्सामान्यइत्यर्थः। लृट्शेषेचेति सूत्रात्। यथा घटो भविष्यतीत्यादौ। तत्त्वं च वर्त्तमानप्रागभा-वप्रतियोगिसमयोत्पत्तिमत्त्वम्। लेटोर्थमाह। विध्यादाविति। लि-ङर्थेलेडिति सूत्रात्। आदिना निमन्त्राणामन्त्राणाधीष्टादयो गृह्य-न्ते। विधिर्नाम प्रेरणम्। भृत्यादेर्निकृष्टस्य प्रवर्त्तनमिति यावत्। निमन्त्रणं नियोगकरणम्। आवश्यके श्राद्धभोजनादौ दौहित्रा-

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली ।

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्ड ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्ड १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं स-भाष्यं खण्ड ६	६	०
सांख्यकारिका-चन्द्रिकाटीकागौडपाद-भाष्यसहिता	१	०
वाक्यपदीयं खण्ड ३	३	०
रसगङ्गाधरः खण्ड ८	८	०
परिभाषावृत्तिः खण्ड २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपा-दप्रणीतभाष्यसहितम् खण्ड २	२	०
शिक्षासङ्ग्रहः खण्ड ५	५	०
नैष्कर्म्यसिद्धिः खण्ड ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्र-म् सभाष्यं खण्ड ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम्	१	०
(बृहत्) वैयाकरणभूषणम् खण्ड १	१	०
न्यायलीलावती (यन्त्रस्था)	०	०

इन से अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकैं हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजैं ॥

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्रचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

व्रजभूषणदास और कम्पनी,
चांदनीचौक के उत्तर नई सड़क
बनारस ।

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 52.

(बृहत्) वैयाकरणभूषणं

सर्वतन्त्रस्वतन्त्रश्रीमत्कौण्डभट्टविरचितम् ॥

(BRIHAT) VAIYÂKARANA BHÛSHANA,

A Treatise on Sanskrit Grammar,

BY PANDIT KAUNDA BHATTA.

EDITED BY

PANDIT RÁMA KRISHNA ŚÁSTRÍ,

Alias TÁTYÁ ŚÁSTRÍ PATAVARDHANA,

PROFESSOR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

FASCICULUS II.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

———:o:———

PRINTED AT THE RAJ RAJESHWARI PRESS & THE TARA PRINTING WORKS,

BENARES.

1899.

देः प्रवर्त्तनामिति यावत् । आमन्त्रणं कामचारानुज्ञा । अधीष्टः सत्कारपूर्वको व्यापारः । प्रवर्तनायां लिङादिति तु निष्कर्षः ॥ चतुर्णां पृथगुपादानं प्रपञ्चार्थम् । तदाहुः । अस्ति प्रवर्तनारूपमनुस्यूतं चतुर्ष्वपि । तत्रैव लिङ् विधातव्यः किं भेदस्य विवक्षया ॥ न्यायव्युत्पादनार्थं वा प्रपञ्चार्थमथापि वा । विध्यादीनामुपादानंचतुर्णामादितः कृतमिति ॥ अत एवैतत्सिद्धान्तकौमुद्यामप्युक्तम् । तत्र प्रवर्त्तना प्रवृत्त्यनुकूलो धर्म इष्टसाधनत्वम् । इष्टसाधनताज्ञानस्य प्रवृत्तिसामान्ये हेतुत्वावधारणेन तस्यैव वाच्यत्वौचित्यात् । तथा च जैमिनीयं सूत्रम् । "शास्त्रफलं प्रयोक्तरि तल्लक्षणत्वादि" ति । शास्त्रसम्बन्धि फलं स्वर्गादि प्रयोक्तरि कर्त्तरि प्रयोक्तृफलसाधनतालक्षणत्वाद्विधेः कर्त्रपेक्षितोपायता हि विधिरिति "कर्ता शास्त्रार्थवत्त्वा" दित्याधिकरणं भामत्यां व्याख्यातम् । अत एव मण्डनमिश्रैरुक्तम् । पुसां नेष्टाभ्युपायत्वात् क्रियास्वन्यः प्रवर्त्तकः । प्रवृत्तिहेतुं धर्मं च प्रवदन्ति प्रवर्तनामिति ॥ नन्विष्टसाधनत्वस्येव कृतिसाध्यत्वस्यापि प्रवर्तकतया शक्यत्वं स्यादिति चेत् । अत्रोक्तं प्रथमाध्यायप्रथमापादेनुव्याख्याने । कार्यता च न कापि चित्स्यादिष्टसाधनतां विना । कार्यं नहि क्रियाव्याप्यं निषिद्धस्य समत्वतः ॥ न भविष्यक्रियाकार्यं स्रक्ष्यतीश इति ह्यपि । कार्यं स्यान्नैव चाकर्त्तुमशक्यं कार्यमिष्यते ॥ साम्यादेव निषिद्धस्य तादिष्टं साधनं तथेति ॥ विवृतञ्चैतन्न्यायसुधायाम् । कार्यत्वविशिष्टबोधकत्वेनैव वाक्यपर्यवसानाद्वृद्धव्यवहारात्कार्यान्विते एव व्युत्पत्तेश्च सिद्धार्थानामबोधकत्वात्कथं वेदान्तैः शुद्धं ब्रह्म प्रतिपाद्यतइत्याशङ्कां निराकर्त्तुं तामेव निर्धारयति । कार्यता वेति । इष्टसाधनतामित्यत्रेष्टत्वं च विनेति शेषः । उपसंहारे तथाभिधानात् । कार्यमिति । व्याख्यातमेतत्

षिद्धस्य ब्रह्महननादेः क्रियाजन्यत्वेन समत्वान्नैतत्कार्यमित्यर्थः । नेदं मया कृतं न वा क्रियते किं तु कार्यमिति व्यवहाराद्भविष्यत्क्रियाकार्यं क्रियानिष्ठभविष्यत्त्वं वा तादित्येतन्निराचष्टे । न भविष्यदिति । स्रक्ष्यतीति । हिशब्दो हेतौ यतः स्रक्ष्यतीत्यत्र सर्जनानुकूलक्रियाया भविष्यत्वेपि कार्यत्वाभाव इत्यर्थः । न चैतत्कार्यमेव । लिङ्ग्वाच्यताङ्गीकारात् । कृत्याश्चेत्यावश्यकार्थे कृत्या भवन्ति । तच्चाकर्तुमशक्यमिति तदेव कार्यमित्याशङ्क्य निषेधति । कार्यमिति । परनारीगमनादेरकर्तुमशक्यत्वात्कार्यत्वापत्तिरित्याह । साम्यादेवेति । तादीति । तस्मादित्यर्थः । इष्टं तत्साधनं कार्यत्वमित्याह । इष्टमित्यादि । तथा चेष्टत्वस्येष्टसाधनत्वस्य वा ब्रह्मण्यबाधात्कार्यत्वविशिष्टप्रतिपादकत्वेपि नास्माकं क्षतिरिति भाव इति । नन्विष्टसाधनत्वस्य चन्द्रमण्डलादिसाधारणत्वात्तत्र प्रवृत्तिः स्यादिति चेन्न । अतीतकार्ये कार्यतायास्त्वदभ्युपेतायाः सत्त्वात्तत्रापि प्रवृत्त्यापत्तेः । इदानीं कार्यताज्ञानं तथेति चेत् । इदानीमिष्टसाधनताज्ञानं तथेति समानम् । तस्मादिष्टसाधनत्वान्यकार्यत्वस्य निर्वक्तुमशक्यत्वाद्वाच्यत्वे मानाभावाच्च न तद्विध्यर्थ इति । तन्तुच्छम् । चन्द्रमण्डलादौ प्रवृत्त्यापत्त्या कृतिसाध्यताज्ञानस्य प्रवर्त्तकत्वात् । न चेदानीमिष्टसाधनताज्ञानं प्रवर्त्तकं तच्च तत्र नास्तीति वाच्यम् । इदानींतनत्वमिच्छायास्तद्विषयस्य वा विशेषणम् । आद्ये, चन्द्रमण्डलफले इच्छाया इदानीं सर्वासिद्धत्वादोषानिवृत्तिः । अत एव न साधने साधनत्वे वा । अन्त्ये, यागादौ प्रवृत्तिर्न स्यात् । स्वर्गस्येदानीन्तनत्वाभावात् । अस्माकं पुनः कृताविदानीन्तनत्वं विशेषणमिति न दोषः । किं च कार्यत्वं न क्रियाजन्यत्वरूपमिति मध्वखण्डनं कार्यतायाः

प्रवर्तकत्वे विध्यर्थत्वे वा । आद्ये, इष्टसाधनत्वं विना प्रवृत्त्ययोगात्त-स्यापि परदारगमनादौ सत्त्वेन तस्य तुल्यत्वात् । निषिद्धे प्रवृत्तेः सर्वसिद्धतया प्रवर्त्तकस्य तत्रातिप्रसक्तेरदूषणतया तदूषणास-ङ्गतेश्च । अन्त्ये, निषेधसाधारण्ये निषेधान्वयो न स्यादित्येव बाधकं फालितम् । तच्च वक्ष्यमाणरीत्या तवापि समानमित्य-लं शिष्यधन्धकदूषणेनेति दिक् ॥ नृसिंहाश्रमास्तु, लिङर्थस्तु हितसाधनत्वमेव । न तु कृतिसाध्यत्वांशोपि । तस्यान्यलभ्य-त्वेनाशब्दार्थत्वात् । आख्यातान्तधातुसामर्थ्यात्तत्सिद्धेः । लिङादेर्हि तिङ्त्वसामान्याकारेणास्ति लडादिवत्कृतौ शक्तिः । सा च सविषयासमभिव्याहृतभावार्थं विषयीकरोतीति प्रवृत्ति-विषयस्य कृतिसाध्यत्वं लभ्यतएव । न चैवं साध्यत्वादि संस-र्गतया भायान्न प्रकारतयेति चिकीर्षानुपपत्तिः । ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावस्यान्यत्रोपपादनात् । किं च । पचतीत्यत्रेवात्रापि यागानुकूला कृतिरित्यन्वयबोधो भवेन्न तु यागविशेष्यकः । तथा च चिकीर्षानुपपत्तिरेव । विधिकृदादेः कृतौ शक्त्यभावेनानुपपत्तेश्चेति वाच्यम् । मनसैव पश्चात्ता-दृशबोधसम्भवात् । यद्वा यागो मत्कृतिसाध्यः मत्कृतिसाध्य-त्वविरोधिधर्मानधिकरणत्वादित्यनुमानात्तद्रूह इति प्राहुः । ते-षामयमाशयः । कृतिसाध्यत्वमात्रे वेदादवगतेपि न तन्मात्रं प्र-वर्त्तकम् । अशक्तस्यापि प्रवृत्त्यापत्तेः, किं तु मदंशाविशिष्टं तच्च लौकिकप्रमाणेनापि सम्भवतीति न विधेस्तत्र शक्तिरन्य-लभ्यत्वात् । मदंशाद्यन्तर्भावेण वेदेन बोधयितुमशक्यत्वाच्चे-ति । वस्तुतः कृतिसाध्यताज्ञानं न प्रवर्तकं कृत्यसाध्ये प्रवृत्त्य-भावश्च तत इष्टाभावेन वृथाश्रमजनकत्वेन द्वेषात्, नातस्तच्छ-क्यम् । न च चिकीर्षानुरोधेन तच्छक्यम् । लोकतस्तदवग-

माच्चिकीर्षासम्भवात् । न चेष्टसाधनताज्ञानस्यापि प्रवर्त्तकत्वं न स्यात् । अनिष्टसाधने उदासीने च कष्टं कर्मेति न्यायेन वृथाश्रमजनकत्वेन द्वेषान्न प्रवृत्तिरिति वाच्यम् । इष्टाजनके आन्तरालिकश्रमे द्वेषाभावदशायामप्रवृत्तेः सर्वासिद्धाया अनुरोधेन तस्य प्रवर्त्तकत्वावश्यकत्वात् । किं चेष्टसाधनत्वमिच्छाविषयसाधनत्वं तत्र शक्यत्वं स्वर्गादिसाधनत्वादिना तेन रूपेण ज्ञानस्यैव प्रवर्त्तकत्वात् । न त्विष्टत्वेन । इच्छाज्ञानानपेक्षणात् । तस्याः स्वरूपत एव हेतुत्वात् । यद्यपि लोके बलाद् गुरुप्रवर्तनया प्रवृत्तिस्थले किञ्चिदिष्टं ज्ञात्वा मां प्रवर्तयतीति ज्ञात्वा प्रवर्ततएव तथापि बहुवित्तव्ययायाससाध्ये आमुष्मिके च विशिष्य तज्ज्ञानं विना न प्रवृत्तिरिति विशिष्यैव विधिना बोधनीयमिति विशिष्यैव तस्य शक्तिरुपेया । अत एव लोके फलसन्देहात्प्रवृत्तावप्येतादृशस्थले तन्निश्चयोपेक्ष्यते तत्र चेच्छा नानार्थत्वपरिहाराय तदादाविव शक्यतावच्छेदकानामनुगामिकेति तत्त्वम् । एवं च स्वर्गादिसाधनत्वमनन्यलभ्यत्वाच्छक्यमेव । न चेदमपि स्वर्गकामादिपदसमभिव्याहारालभ्यतइत्यन्यलभ्यत्वम् । कामान्तपदात्स्वर्गाद्युपस्थितावपि साधनत्वबोधकाभावात् । विश्वजिदादौ स्वर्गकामादिसमभिव्याहारस्याप्यभावाच्चेति ध्येयम् । अथ मधुविषसम्पृक्तान्नभोजनादौ प्रवृत्तिवारणाय बलवदनिष्टाननुबन्धित्वज्ञानस्य प्रवृत्त्यौपयिकतया शक्यत्वं स्यादिति चेन्न । बह्वायाससाध्ये प्रवृत्त्यनापत्तेः । तत्र बहुतरदुःखस्यापि जायमानत्वात् । अल्पदुःखस्यापि कुतश्चिद्बलवत्त्वात् । अनुगतबलवत्त्वस्य दुर्वचत्वाच्च । तस्मात्तत्तद्विषयको बलवान्द्वेषः स्वातन्त्र्येण प्रतिबन्धक इति न तत्कल्पनं युक्तम् । अत एवान्तरालिकश्रमे बलवद्द्वेषान्न ज्योतिष्टोमादौ प्रवर्तते अन्यस्तु तथेति ध्येयम् । नृसिं-

हाश्रमाः पुनर्न बलवदनिष्टाननुबन्धित्वं विध्यर्थः । बलवदनिष्ट-साधनत्वज्ञानस्य प्रतिबन्धकतया तदभावस्यैवापेक्षणात् । न तु तत्साधनत्वाभावज्ञानस्याप्यपेक्षा । अन्वयव्यतिरेकाभ्यां जनकाविघटकस्यापि ज्ञानस्य प्रतिबन्धकत्वात् । अन्यथा कारणाभावादेव कार्यानुदये तस्य प्रतिबन्धकत्वायोगादित्याहुः । तच्चिन्त्यम् । बलवदनिष्टजनकमिति ज्ञानेपि तत्र द्वेषाभावदशायां परदारगमनादौ प्रवृत्तेः सर्वसिद्धत्वात् । तत्रैवं सति द्वेषे प्रवृत्तिप्रतिबन्धात्प्रतिबन्धकत्वेनाभ्युपगतद्वेषादेवाप्रवृत्त्युपपत्तेर्ज्ञानस्य प्रतिबन्धकत्वे मानाभावाच्चेति तस्मादिष्टसाधनत्वमेव शक्यम् । यत्तु प्राभाकराः । नेष्टसाधनत्वं विध्यर्थः यागे क्षणिकतयावगते तस्य बोधयितुमशक्यत्वात् । परम्परासाधनत्वस्यापि द्वारानुपस्थितौ बोधयितुमशक्यत्वात् योग्यताज्ञानस्य शाब्दबोधे हेतुत्वात् । अन्वयप्रयोजकरूपवत्त्वस्यैव च योग्यतात्वात् । न चैवमपि साधनत्वं सामान्यरूपेण बोध्यतामिति वाच्यम् । एकविशेषबाधे सामान्यज्ञानस्य तदितरप्रकारत्वेन नियतत्वात् । किं च । यागः कर्त्तव्यतया नावगम्यते । काम्यादन्यत्काम्याव्यवहितपूर्वसाधनमेव कामी कर्त्तव्यतया ऽवैतीत्यस्यान्यत्र कल्पत्वात् । तथा च द्वारीभूतं काम्याव्यवहितपूर्वसाधनमपूर्वमेव शक्यं कार्यत्वरूपेण । कार्यत्वं च कृत्युद्देश्यत्वं तत्र विशेषणीभूतकृतेराश्रयविषयाकांक्षायां विषयतया यागआश्रयतया स्वर्गकामः सम्बध्यते । सुखदुःखाभावादेर्लोकादिवापूर्वस्यापि वेदेन कृत्युद्देश्यत्वबोधनात् । अपौरुषेये वेदे ऽप्रामाण्यशङ्काया अप्यसम्भवात् । उद्देश्यत्वं च धर्मान्तरमेव तथा च कार्ये तस्मिन्स्वर्गकामस्य प्रथमान्तस्यान्वयासम्भवादुपादानप्रमाणेन तद्विधिशक्त्यैव विहृष्या स्वर्गकामस्येति सम्बन्धः कार्यते । तदुक्तम् । नयाविवे-

कटीकायां वरदराजीये। "मुख्यार्थमभिदधतः शब्दस्य यस्मिन्नर्थे तात्पर्यं तस्य तत्र मुख्यैव वृत्तिः यथा स्वर्गकामस्य कक्षान्तरितनियोज्यपरस्ये"ति। तथा च स्वर्गकामस्य मम यागविषयको नियोग इति बोधः। अत्रापूर्वस्य यागविषयकृत्युद्देश्यत्वमेव यागविषयत्वम्। यागस्य तादृशकृतिविषयत्वे पुरुषस्याश्रयत्वे चान्वयितावच्छेदकमपूर्वकरणत्वं तत्कर्तृत्वं च। तदेव च योग्यता। यथा घटेन जलमाहरेत्यत्र छिद्रेतरत्वम्। योग्यतावच्छेदकोपस्थितिश्च घटेनेत्यादावर्थाध्याहारात्प्रकृते चौपादानिकप्रमाणवशाच्छक्त्यैव। नन्वशक्यमपि तयैव शक्त्योपस्थाप्यते चेत्तर्हि लक्षणोच्छेदः स्यादिति चेन्न। स्वशक्यान्वयबोधकस्यैव स्वोपपादकसकलार्थबोधकत्वाभ्युपगमात्। गङ्गायां घोष इत्यादौ स्वशक्यान्वयबोधकत्वाभावेनोपादानप्रमाणानवकाशात्। काकेभ्यो दधि रक्ष्यतामित्याद्यजहत्स्वार्थलक्षणा तु नास्त्येवेति क्व दोषः। एवं च यः कार्यं स्वकीयत्वेन बुध्यते स नियोज्यः फलकामश्च कार्यं स्वकीयत्वेन बुध्यते अतः काम्ये स्वर्गकामो नियोज्यः। एवं च वेदबोधितमपूर्वमुद्दिश्य पुरुषप्रवृत्तिरुपपद्यतइति स्वर्गनिष्पत्तिरर्थादुपपद्यतइति नेष्टसाधनत्वं विध्यर्थः। किं च। इच्छाविषयसाधनत्वेन स्वर्गसाधनत्वेन वा शक्तिः। नाद्यः। तज्ज्ञानस्याप्रवर्तकत्वात्। प्रवर्तकज्ञानविषयस्यैव च विध्यर्थत्वात्। नान्त्यः। अनेकार्थतापत्तेः। तदादाविवेच्छा शक्यतावच्छेदकानामनुगमिकास्तीति चेन्न। तत्र बोध्यबुद्धेरवच्छेदकत्वात्। प्रकृतेपि बोध्येच्छा तथेत्यभ्युपगमे संन्यासिनामिच्छाविरहिणां बोधानापत्तेः। स्वर्गादेः प्रागनुपस्थितत्वेन शक्त्यग्रहाच्चेति। अपि च। नित्यनैमित्तिकस्थले राहूपरागे स्नायादिति शुचिविहितकालजीविनश्च मम स्नानसन्ध्यावन्दनविषयको नियोग इति बोधान्न फ-

लापेक्षा विधिवाक्ये फलाश्रवणाच्च तत्र फलाभावः । वैदिककर्मण्युद्देश्यत्वेन बोधितमपूर्वमुद्दिश्यैव हि प्रवर्तन्ते । तस्यव च वेदेन स्वतः पुरुषार्थत्वबोधनात् । तथा च काम्ये फलावाप्तिरानुषङ्गिकी । नित्येप्यपूर्वस्योद्देश्यस्य सत्त्वात्प्रवृत्तिः । तस्मात्कृत्युद्देश्यमपूर्वमेव शक्यामिति प्राहुः । अत्रेदं चिन्त्यम् । अपूर्वस्य वाच्यत्वमयुक्तम् । प्रमाणाभावात् । प्रवृत्तिकारणीभूतस्वर्गसाधनताज्ञानस्य तेन विनाप्युपपत्तेः । क्षणिकत्वनिश्चयात्साधनत्वज्ञानासम्भवेपि साधनत्वसामान्यबोधे बाधकाभावात् । एकविशेषबाधे सामान्यज्ञानं तदितरप्रकारतानियतम् । यथा छिद्रबाधे घटेन जलमाहरेत्यत्र छिद्रीतरत्वेनेति चेत् । न । प्रकृतेपि साक्षात्साधनत्वबाधे तादितरसाधनत्वेन बोधसम्भवात् । तादृशबोधे च परम्पराघटकानपेक्षणात् । एतादृशसाधनत्वे च योग्यतावच्छेदकं, परम्पराघटकं तच्चात्रापूर्वम् । तथा च स्वर्गसाधनत्वशक्त्यैव त्वत्सिद्धौपादानिकप्रमाणादपूर्वोपस्थितौ न तद्वाच्यम् । अन्यथा सर्वत्रापि योग्यतावच्छेदकस्य वाच्यत्वापत्तेश्चेत्यनवस्थेति । किं च । वेदात्साधनत्वबोधो जायमानः परम्परासाधनत्वरूपेणापि तद्विषयक एवास्तां कुतस्तदर्थमपूर्वं वाच्यम् । न चापूर्वानुपस्थितौ परम्परासाधनत्वमपि दुर्बोधम् । वाच्यत्वपक्षेपि प्रागनुपस्थितौ शक्त्यग्रहाच्छब्दादप्युपस्थित्यसम्भवात् । कार्यत्वरूपेण लिङ्पदशक्तिग्रहान्यथानुपपत्त्या वा यथाकथञ्चित्तदुपस्थित्या निर्वाहे परम्परासाधनत्वेन तदुपस्थितेस्त्वदुक्तरीत्योपास्थित्या च ममापि निर्वाहः सुकर इति ध्येयम् । एवं काम्यादन्यत्काम्याव्यवहितपूर्वसाधनमेव कर्त्तव्यतयावैतीत्यपि न युक्तम् । काम्यसाधनताज्ञानस्य लाघवात्प्रवर्तकत्वात् । न त्वव्यवहितत्वांशज्ञा-

नं तथा गौरवात् । मानाभावाच्च । किं च । काम्याव्यवहितपूर्वसाधनं हि मुख्यतत्साधनं, गौणतत्साधनमपीति वा । आद्येपि तत्त्वेन ज्ञानं स्वरूपत एव वा । नाद्यः । अपूर्वस्यापि प्रागनुपस्थितत्वेन तत्त्वेन ज्ञानासम्भवाच्च कार्यतयावगमानापत्तेः । न द्वितीयः । अपूर्वस्य कार्यतयावगमानन्तरमपि यागस्य कार्यतयावगमो न स्यात् । मुख्यफले साक्षात्साधनत्वाभावात् । नान्त्यः । यागस्यैव साक्षात्कार्यतयावगमसम्भवादपूर्ववाच्यत्वहानापत्तेः । नापि कार्यमिति ज्ञानस्य लोके प्रवर्तकत्वदर्शनात्तदेव विध्यर्थ इति युक्तम् । कृतिजन्यत्वरूपस्य तस्य धात्वर्थनिष्ठस्य प्रवर्तकत्वात् । न चापूर्वस्य तथात्वसम्भावनापि । तादृशस्य लोकत एव सम्भवाच्चेत्याद्युक्तमेव । एवमिष्टसाधनत्वस्य निर्वक्तुमशक्यत्वान्न तच्छक्यमित्यप्ययुक्तम् । तदादेर्घटत्वाद्यवच्छिन्नवाचित्ववत्सम्भवात् । तथाहि । बुद्धिविषयत्वरूपेणोपस्थितघटत्वपटत्वादिशालिषु बुद्धिविषयतावच्छेदकवति शक्तं तदादिपदमित्येव तदादेः शक्तिग्रहः । बुद्धिविषयत्वमुपस्थितावनुगमकमात्रं न तु तदंशे शक्तिः । एवमत्रापि लिङादिरिच्छाविषयतावच्छेदकस्वर्गत्वादिवत्साधनत्ववाचक इति तत्र शक्तिग्रहः । न चात्र तदादौ वा बोध्यबुद्धिरिच्छा वा प्रविष्टा, तेन विनापि बुद्धिविषयतावच्छेदकवति इच्छाविषयतावच्छेदकवति शक्तामिति शक्तिग्रहसम्भवात् । पदार्थोपस्थितिकालेपि तदादौ प्रकरणादिवशाद्वक्तृबुद्धिविषयतावच्छेदकावच्छिन्नबोधवत्समभिव्याहृतस्वर्गादिपदमाहिम्ना स्वर्गसाधनमित्येवं बोधसम्भवात् । ननु दुःखस्यापि ईश्वरेच्छाविषयत्वसम्भवात्तत्साधनत्वमपि शक्यं स्यादिति चेत्, न । इष्टापत्तेर्वक्ष्यमाणत्वात् । तस्मादिष्टसाधनताज्ञानस्य प्रवर्तकत्वेनावश्यकत्वा-

त्वदेव विध्यर्थो, नापूर्वम् । लौकिकानां तदनुदेशात् । यत्तु निष्फले सन्ध्यावन्दनादौ विध्यर्थबाधापत्तेर्न तद्विध्यर्थ इति । तन्न । तथा सति तत्र प्रवृत्त्यनापत्तेः, निष्फलत्वात्, दुःखैकफलत्वाच्च । प्रवृत्तिमात्रे इष्टसाधनताज्ञानस्य हेतुत्वाच्च । न चापूर्वोद्देशेन प्रवृत्तिः । तावतापि तदेवेष्टमादायेष्टसाधनत्वस्य विध्यर्थत्वोपपत्तेः । वस्तुतः प्रवृत्तिविषयसाध्यत्वे सतीच्छाविषयत्वमेव फले उद्देश्यत्वं, न च तदपूर्वस्य । न चान्यदेव तत्कल्प्यम् । मानाभावात् । पदार्थान्तररूपोद्देश्यत्वस्य प्रवृत्तावनुपयोगाच्च । न च वेदबोधितत्वान्निष्फलेपि प्रवृत्तिः । वेदसहस्रैरपि बोधिते निष्फलत्वज्ञानदशायां पामरादेरप्यप्रवृत्तेः । न चा "फलाकांक्षिभिर्यज्ञो विधिदृष्टो य इज्यते । यष्टव्यमेवेति मनः समाधाय स सात्विक" इतिभगवद्वचनविरोधः । "यज्ञदानतपःकर्म न त्याज्यं कार्यमेव तत् । यज्ञो दानं तपः कर्म पावनानि मनीषिणाम् ॥ एतान्यपि तु कर्माणि सङ्गं त्यक्त्वा फलानि च । कर्त्तव्यानीति मे पार्थ निश्चितं मतमुत्तम" मित्यष्टादशे भगवतैव पावनत्वोक्तेः । तथा चानुद्दिष्टोपि प्रत्यवायपरीहारः फलमिति फलं त्यक्त्वापि क्रियमाणस्य पावनत्वं भवतीति भावः । अत एव नित्यज्योतिष्टोमादौ स्वर्गाद्यर्थमनुष्ठानेपि नित्यप्रयोगसिद्धिरिति सिद्धान्तः । किं च । सन्ध्यावन्दनादेर्निष्फलत्वे 'एतत्सन्ध्यात्रयं प्रोक्तं ब्राह्मण्यं यदधिष्ठितम् । यस्य नास्त्यादरस्तत्र न स ब्राह्मण उच्यते' इत्यस्य 'सन्ध्यामुपासते ये तु सततं शंसितव्रताः । विधूतपापास्ते यान्ति ब्रह्मलोकं सनातन' मित्यस्य च वैयर्थ्यापत्तिः । स्तावकत्वेनोपयोग इति चे, त्तर्हि सर्वेभ्यः कामेभ्यो दर्शपूर्णमासौ सर्वेभ्यः कामेभ्यो ज्योतिष्टोम इत्येतयोरपि तथात्वापत्तिः । दर्शपूर्णमासा-

भ्यां स्वर्गकामो यजेत, ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यतः फलाकांक्षानिवृत्त्यैतयोरनुपयोगात् । न च सर्वेभ्य इति चतुर्थ्याः सन्त्वात्फलसमर्पकत्वमिति वाच्यम् । ऊर्जोवरुध्यै इत्यत्रेवार्थवादत्वमात्रत्वेन चतुर्थ्युपपत्तेः । किं च । स्तावकत्वेनोपयोगेपि स्तुतिरेव वृथेति वैयर्थ्यं दुर्वारम् । प्ररोचनार्थं स्तुतिरिति चेत् । न । तस्या अपि व्यर्थत्वात् । पुरुषप्रवृत्तिस्तत्फलामिति चेत् । न । अर्थवादाप्रामाण्यं जानतस्तदनुपपत्तेः । बहुदुग्धेयं गौरिति वाक्याप्रामाण्यं जानतस्तद्वाक्यादिवेति । अथ स्वर्गार्थकतायामप्रामाण्येपि प्राशस्त्यबोधकत्वद्वारा स्तावकत्वमित्यभ्युपगतेर्थे प्रामाण्यमिति चेन्न । तत्तत्फलजनकत्वातिरिक्तप्राशस्त्यस्य काप्यकल्पनात् । धर्मान्तरप्राशस्त्यज्ञानस्य प्रवर्त्तकत्वाभावाच्च तत्तत्फलाजनकस्यापि तद्बोधनद्वारा प्राशस्त्यमात्रलक्षणायां कुकविवाक्यवदश्रद्धेयता च वेदस्य स्यात् । तस्मात्स्वार्थएवैषां प्रामाण्यम् । एवं च सन्ध्यामुपासीतेत्यादौ विधित इष्टावगमेपि तस्यावान्तररूपेण बोधनद्वारा शीघ्रोत्पत्तिज्ञापनद्वारा वा प्रवृत्तिविशेषार्थमर्थवाद इति ध्येयम् । अत एव "सर्वशक्तौ प्रवृत्तिः स्यात्तथाभूतोपदेशादि" ति सर्वशक्त्यधिकरणपूर्वपक्षसूत्रे पुरुषार्थस्य भाव्यस्योभयत्रापि तुल्यत्वादित्युक्तं भट्टाचार्यैः । व्याख्यातं च, "काम्यं यथा फलायोपदिष्टं तथा नित्यमपीति सूत्रार्थ" इति । एवं चेष्टसाधनत्वमेव विध्यर्थ इति मते नायं दोषः । अथेष्टसाधनत्वस्य विध्यर्थत्वे ज्योतिष्टोमेन स्वर्गकामो यजेतेत्यादौ तृतीया न स्यात् । करणानभिधाने एव तद्विधानादिति चेत् । अत्रोच्यते । आश्रयोवधिरुद्देश्यः सम्बन्धः शक्तिरेव वेति वक्ष्यमाणरीत्या आश्रयस्य शक्तेश्चानभिधाने तृतीयादय इति स्थिते ऽत्रापि साधनत्वाभिधानेपि तदनभिधा-

नाम्नानुपपत्तेरिति । यन्तु माधवाचार्याः । लिङादिनान्तरप्रत्ययप्रकृतियज्यर्थमात्रगतेष्टसाधनत्वे ऽभिहितेपि यागविशेषरूपज्योतिष्टोमादिप्रातिपदिकार्थगतस्यानभिधानेन तृतीया नानुपपन्नेति समाधानमाहुः । तन्न । ज्योतिष्टोमयज्यर्थयोरभेदेनाभिधानस्यावारणात् । अन्यथा देवदत्तः पचतीत्यत्रापि सामान्यतस्तिङा कर्त्राभिधानेपि विशेषरूपेणानभिधानात्कर्तरि तृतीयापत्तेरिति । अन्ये तु कर्तृत्वादिकमाख्यातवाच्यं स्वीकुर्वन्तोनभिहितइत्यस्यापि कर्तृत्वाद्यनभिहितइत्यर्थं वर्णयन्तो ऽत्र साधनत्वमात्राभिधानेपि तद्विशेषकरणत्वानभिधानान्न दोषः । प्रथमवर्णकान्ते विवरणेप्येतत्स्पष्टमित्याहुः । यत्तु अनभिहितइत्यस्यानभिहितसङ्ख्याके इत्यर्थः कर्त्रादेराख्यातावाच्यत्वात् । तथा चात्र सङ्ख्यायाः कर्तर्येवान्वयात्तदभिधानेपि न करणाभिधानमिति । तत्तुच्छम् । पचनो ऽग्निना, पचनी स्थास्य इत्यादिकृदादेर्वारणाय करणतत्सङ्ख्याद्यन्यतरामिधाने इति स्वीकारेत्रापि संख्यानभिधानेपि करणाद्यभिधानात् तृतीयाया दुरुपपादत्वात् । न च कृत्साधारण्यार्थं यत्र कर्तृविशेष्यको बोधो यत्र वा कर्तृविशेष्यकबोधे तात्पर्यं तत्र कर्त्राभिहित इत्यभ्युपगमादत्रापि करणविशेष्यकबोधे तात्पर्याभावान्न करणाभिधानमिति वाच्यम् । बोधस्य तत्तद्व्युत्पत्त्यनुसारित्वेनानियतत्वात्तात्पर्यस्यापीच्छाविशेषरूपद्विष्टत्वमिष्टत्वमप्यव्यवस्थमिति प्रसिद्धेरनुभवाच्चानियतत्वादेवं सति शास्त्रायाप्रामाण्यप्रसङ्गादिति दिक् । अथ साधनत्वं ज्योतिष्टोमे बोधनीयं न च तत्सम्भवति । वाजपेयादपि स्वर्गोत्पत्तेर्व्यभिचारात् । न च विजातीयतत्साधनत्वं बोधनीयम् । जातेरुत्तरकालं कल्पनीयत्वादिति चेत् । अत्रोच्यते । विजातीयतत्साधनत्वं विधि-

ना बोध्यते । न च तत्र व्यभिचारशङ्कापि । तत्र वैजात्यं विधेस्तथा शक्तिस्वीकारादुपस्थितम् । एतदर्थमेव तत्तत्साधनत्वे विधिशक्तिरिति प्रागवोचाम इति । कम्बुग्रीवादिमान्नास्तीत्यादौ गुरुधर्मानवच्छेदकत्वपक्षे घटत्वावच्छिन्नप्रतियोगितायां एव सम्बन्धत्ववदत्रापि विजातीयस्वर्गसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसम्बन्धेन स्वर्गसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वीयो ऽभावः प्रतीयतइति नानुपपत्तिः । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वव्युत्पत्तिश्च नञ्समभिव्याहारस्थलएवेति न तद्विरोध इति समादधिरे रामकृष्णभट्टाचार्याः । यत्तु स्वर्गकाम इत्याकिना न स्वर्गत्वावच्छेदेन ज्योतिष्टोमसाध्यत्वं बोध्यते । अवच्छेदकत्वांशबोधनासामर्थ्यात् असम्भवाच्च । स्वर्गत्वस्य तदजन्यवृत्तित्वादतिप्रसक्तत्वात् । किं तु स्वर्गत्वाश्वमेधजन्यत्वसामानाधिकरण्यमात्रं श्रुत्या बोध्यते । न चात्र व्यभिचारज्ञानं प्रतिबन्धकम् । समानप्रकारकं हि व्यभिचारज्ञानं समानप्रकारकाव्यभिचारज्ञानविरोधि । तथा च स्वर्गत्वावच्छेदेन व्यभिचारग्रहात्तदवच्छेदेन नियतपूर्ववर्त्तित्वं माग्राहि । तदाश्रये धर्मिणि हेतुताग्रहे च न बाधकम् । अथ वा व्यभिचारसन्देहोत्र न प्रतिबन्धकः किं तु योग्यतासंशयपर्यवसन्नत्वेन सोत्रानुकूल एव । तादृशजातिसन्देहात्तद्व्यतिरेकनिश्चयश्च नास्त्येव । तथापि कार्यतावच्छेदकाग्रहे कथं कारणता ग्राह्येति चेत् । न । सामानाधिकरण्यज्ञानाद्यभावेपि शब्दाद्व्याप्तिग्रहवत्फलबलेन तथा स्वीकारात् । अत एव तद्ग्राहकसत्त्वे प्रत्यक्षस्थलेपि क्वचित्तदभ्युपेयते । तथा तृणारणिमणिस्थले । अत एव व्याप्यतावच्छेदकाग्रहेपि फलबलाद्व्याप्तिग्रहो धूमालोकान्यान्यत्वेनोप-

स्थिते धूमादौ सर्वसिद्धः सङ्गच्छते । सहचारदर्शनादिव्याप्तिधीसामग्रीसत्त्वे तद्व्यतिरेकेण कार्यव्यतिरेकादर्शनात् । तस्मान्नानुपपत्तिरिति । अत्रेदं चिन्त्यम् । जन्यत्वं हि तदवच्छेदकधर्मवत्त्वं कथमवच्छेदकग्रहं विना ग्राह्यम् । व्यभिचारज्ञानरूपविरोधिनः सत्त्वे तद्ग्रहासम्भवाच्च । न च शाब्दे न स दोषः । अयोग्यतानिश्चयरूपस्य तस्याप्रतिबन्धकतायां अनुक्तिसम्भावितत्वात् । न च तन्निश्चयो नास्त्येव संशयश्च न विरोधीत्युक्तमिति वाच्यम् । प्रथमं ज्योतिष्टोमं विनाप्यग्निहोत्रात्स्वर्गश्रवणे तन्निश्चयाभावस्यासम्भवात् । तव मते वैजात्यस्यापाततोपि पूर्वमनुपस्थितत्वात् । तृणादीनामपि वैजात्योपस्थितौ विजातीयान्वयव्यतिरेकाभ्यां वा तद्ग्रहः । वक्ष्यते च दूषणान्तरमपीत्यादि ध्येयम् । ज्योतिष्टोमेनेत्यत्र ज्योतिष्टोमवदन्यावृत्तिः स्वर्ग इत्येव बोध्यते । न च तदपि स्वर्गत्वावच्छेदेन बाधितमिति कथमवगन्तव्यम् । अधिकरणतावच्छेदकस्य सामानाधिकरण्येनाप्यन्वयबोधसम्भवात् । अन्यथा गङ्गायां न मत्स्य इत्यादीनां विलयप्रसङ्गात । एवं च साध्येष्टकत्वमेव विध्यर्थः, साध्यत्वं च यस्मिन्सत्यग्रिमक्षणे यत्सत्त्वं यद्व्यतिरेके चासत्त्वमित्येवंरूपम् । अत एव दुःखानुत्पादार्थितया प्रायच्छित्तादौ प्रवृत्तिः सङ्गच्छते । साधनत्वं शक्यमिति मते च तत्प्राक्कालस्थायित्वरूपसाधनत्वज्ञानासम्भवात्तत्र प्रवृत्तिर्न स्यात् । न च साधनत्वज्ञानात्प्रवृत्तिर्न स्यादिति वाच्यम् । समानसंवित्संवेद्यतया तल्लाभादिति तु नैयायिकनव्याः । अत्रेदमवधेयम् । धूमे रासभव्यभिचारग्रहदशायां रासभवदन्यावृत्तिः कश्चिद्धूम इति ज्ञानेपि प्रवृत्त्यभावस्य सर्वसिद्धत्वेनैतस्याप्रवर्तकत्वान्न विध्यर्थता । किं चैवं सत्यग्रेपि वैजात्यकल्पनं न स्या-

त् । प्रथमत एव प्रवर्तकज्ञानसिद्धौ तत्र मानाभावात् । न च पूर्वं गृहीतकारणतानिर्वाहार्थं तत्कल्पनम् । जातिं विनापि स्वर्गस्य यागजन्यत्वे बाधकाभावात् । कारणतास्वरूपे तस्यानुपजीव्यत्वात् । नापि तद्ग्रहे तदुपयोगः । अत्रैवाभावात् । कारणतावत्कार्यतापि सावच्छिन्नेति व्याप्तिश्चात्रयोजिका । एवं सति ज्योतिष्टोमादश्वमेधजन्यः स्वर्गः किं न स्यादिति चेन्न । कल्पितेपि वैजात्ये ज्योतिष्टोमान्तराज्ज्योतिष्टोमान्तरीयस्तवापि किं न स्यात् । स्वभावात्तत्स्वर्गव्यक्तिं प्रति तत्तद्व्यक्तेर्हेतुत्वाद्वेति चेत् । तर्हि प्रथमत एव सोनुस्रियतां किं जात्या ऽवच्छेदिकया । तस्मात्कार्यतावच्छेदकधर्मवत्त्वरूपं कार्यत्वमित्येव वाच्यम् । तच्चावच्छेदकाग्रहे दुर्ग्रहमेव । अस्तु वा स्वर्गत्वमवच्छेदकम् । यथा चातिप्रसक्तस्यावच्छेदकत्वं साधु तथोक्तमस्मत्पितृचरणैरद्वैतसारोद्धारे । नन्वद्वैतसारोद्धारे द्रव्यत्वजातिखण्डने कार्यमात्रसमवायिकारणतावच्छेदकत्वेन द्रव्यत्वासिद्धिमाशङ्क्य सत्त्वेव तदवच्छेदिका । न चैवं गुणादावपि रूपाद्यापत्तिः । तत्तद्रूपे तत्तद्द्रव्यस्य समवायिकारणताया आवश्यकत्वेन विशेषसामग्र्यभावादेव कार्याभावोपपत्तेरित्युक्तं युज्यताम् । त्वया तु कार्यतावच्छेदकमतिप्रसक्तमुक्तम् । तत्त्वयुक्तम् । तथा सति स्वर्गत्वावच्छिन्नस्याग्निहोत्राज्ज्योतिष्टोमरूपकारणाभावादनुत्पत्त्यापत्तेरिति । तथाप्युत्पत्तौ च घटादौ रासभवद्व्यभिचारादग्निहोत्रादेरकारणत्वप्रसङ्ग इति चेत् । अत्रोच्यते । व्रीहिभिर्यजेत यवैर्यजेतेति दर्शपूर्णमासोद्देशेन विहितयोर्व्रीहियवयोः परस्परव्यतिरेकेपि प्रत्येकं फलजनकत्वात्परस्परविरहे कार्योत्पत्तावप्यव्यभिचारवच्चात्रापि तथास्तु । न च तत्तैकशक्तिमत्त्वेनान्यतरत्वादिना चोभयोर्हे-

तुता । एवमपि "स्योनं ते सदनं करोमि घृतस्य धारया सुशेवं कल्पयामि । तस्मिन्सीदामृते प्रतितिष्ठ व्रीहीणां मेध सुमनस्यमान" इतिपुरोडाशसदनसादनप्रकाशकमंत्रयोर्व्रीहीणां मेधेति मंत्रलिङ्गाद् व्रीहिप्रयोगएवाङ्गत्वं न तु यवप्रयोगे इति सिद्धान्तहान्यापत्तेः । तत्रैवापूर्वारब्धकार्यानुत्पत्तिव्यभिचारान्यतरापत्तेः । अपूर्वे वैजात्यकल्पने विकल्पप्रसंगव्यवस्थोपपादने च व्रीहिधर्माणां यवेष्वप्राप्तिप्रसङ्गः ग्रहधर्माणां सम्मर्गादीनां चमसेष्विव । प्रकृतापूर्वसाधनत्वलक्षणायाः सोमापूर्वमादाय चमससाधारण्यात् । अवान्तरापूर्वस्य ग्रहपदादन्तरङ्गतया शीघ्रोपस्थितेश्चमसासंग्रहे च व्रीहिपदादपि व्रीहिसाध्यापूर्वविशेषोपस्थित्या यवेषु प्रोक्षणाद्यप्राप्तिर्दुर्वारा । तस्मादेकजातीयापूर्व एव हेतुता । एवं लोके तृणारणिमणीनां वन्हावपि द्रष्टव्यम् । न चैवं रासभस्यापि घटहेतुतापत्तिः, व्यभिचारात्तत्यागे तृणादेरपि तदापत्तिरिति वाच्यम् । तत्र हेतुतायां मानाभावात् । यवादेः श्रुत्या तृणादेररणिमण्यभाववति स्तोमे तृणसत्त्वे वन्हिसत्त्वं तदभावे ऽनुत्पत्तिरित्यन्वयव्यतिरेकसहकृताध्यक्षात्तत्सिद्धेः । रासभे तु नोभयम् । किं त्ववश्यकल्प्यदण्डादिभिरन्यथासिद्धिरेवेति न हेतुत्वसम्भावनापि । तथापि कारणं विना कार्यासम्भवाद्व्रीह्यभावे कथं यवेभ्यः कार्यमिति चेत्सत्यम् । व्रीहिभिर्यक्ष्यइति सङ्कल्पावच्छिन्नसमयसम्बन्धस्यैव व्रीहिकार्यतावच्छेदकसम्बन्धत्वेनादोषात् । तेन सम्बन्धेनाग्नेयापूर्वस्य यवैरनुत्पत्तेः । एवमुक्तमंत्रलिङ्गानुरोधात्तत्रैव हेतुत्वान्न व्यभिचारः । सङ्कल्पापूर्वं च फलापूर्वोत्पत्तौ नष्टमिति प्रयोगान्तरे यवादीनामुपादानं नानुपपन्नम् । एवं तृणादेरपि तृणत्वावच्छिन्नसंयोगसम्बन्धेन वन्हित्वावच्छिन्नं प्रति तादात्म्येन तृणत्वेन हेतुतेत्यादि द्रष्टव्यम् । अ-

ग्निहोत्रादेः स्वर्गे तु अग्निहोत्रजन्मापूर्वविशिष्टसमवायसम्बन्धेन स्वर्गत्वमवच्छेदकमतः समानजातीयएव स्वर्गोग्निहोत्रादिभ्यो दुर्वार एवेति। श्रूयते च तैत्तिरीयश्रुतौ। "य एवं विद्वानग्निहोत्रं जुहोति यावदग्निष्टोमेनोपाप्नोति तावदुपाप्नोति य एवं विद्वान् पौर्णमासीं यजते यावदुक्थेनोपाप्नोति तावदुपाप्नोति य एवं विद्वानमावास्यांयजते यावदतिरात्रेणोपाप्नोति तावदुपाप्नोती" ति सुधियो विभावयन्तु। अत एव धूमपरामर्शादिकार्यतावच्छेदकं धूमलिङ्गकत्वादिकमेव न तु तत्रानुमितौ वैजात्यकल्पनेत्यभियुक्तोक्तं सङ्गच्छते। यस्तु विधिलभ्यार्थविचारकाले वैजात्यास्वीकारे ज्योतिष्टोमाग्निहोत्रयोः फलसाम्यापत्तौ अल्पवित्तव्ययायाससाध्येनाग्निहोत्रेण समीहितसिद्धौ श्रमपात्राद्याधिक्येन द्वेषादप्रवृत्त्यापत्तौ ज्योतिष्टोमाश्वमेधादिविधीनामननुष्ठानलक्षणमप्रामाण्यमापद्यतइति तत्कल्पनमिति मीमांसकादिभिः परिशीलितः पन्थाः। अत्रोच्यते। इष्टसाधनताज्ञानस्य प्रवर्त्तकस्य ज्योतिष्टोमादावपि सत्त्वान्न प्रवृत्त्यनुपपत्तिः। द्वेषोपि न सर्वस्येति यस्यैव न तस्यैवानुष्ठानसम्भवः। अन्यथा तवापि ज्योतिष्टोमेत्यन्तमालस्यवतो ऽप्रवृत्त्या दोषापत्तेः। वस्तुतः शक्तस्याननुष्ठाने कीर्त्तिरुत्पत्तेस्तन्निवृत्त्यर्थं लौकिकप्रतिष्ठारूपाधिकफलार्थं वा महती प्रवृत्तिर्नानुपपन्ना। अत एव गीतायां "मकीर्त्तिं चापि भूतानि कथयिष्यन्ति तेव्ययाम्। सम्भावितस्य चाकीर्त्तिर्मरणादतिरिच्यते। ततः स्वकीर्त्तिं धर्मं चे"त्यत्र लौकिकप्रतिष्ठादिकं प्रवर्त्तकत्वेनोक्तम्। अत एव सकलशास्त्रविदां युधिष्ठिरादीनां स्वल्पतरफलकराज्यार्थं गोत्रजब्राह्मणादिहनने प्रवृत्तिः सङ्गच्छते। तस्मात्प्रतिष्ठाद्युपाधिकशाज्जायमानोत्कटेच्छैव प्रवृत्तौ प्रयोजिकेति नोक्तदोषः। अत एवाधुनि-

कानां कर्माऽसाङ्गत्वं जानतामपि लौकिकप्रतिष्ठार्थं बहुवित्तव्ययायाससाध्ये प्रवृत्तिर्दृश्यतेपि । प्रतिष्ठादौ रागोत्कटत्वाद्बहुवित्तव्ययायासादौ न द्वेषः । अतस्तज्ज्ञानेपि न निवृत्तिः । वस्तुतस्तु सर्वेभ्यः कामेभ्यो दर्शपौर्णमासाविति यतः सर्वफलेषु दर्शपौर्णमासयोः प्राप्तेस्तवापि पुत्रेष्ट्यादीनामानर्थक्यं दुर्वारम् । दर्शपौर्णमासप्रयोगस्य नित्यतया आवश्यकस्य पुत्रादिकामनयैवानुष्ठाने प्रसङ्गान्नित्यसिद्धिसम्भवेन प्रयुक्तिलाघवलोभात्पुत्रेष्ट्यादौ प्रवृत्त्यसम्भवात् । नन्वेतदर्थमेव पुत्रेष्ट्यादिफले पुत्रे उत्कर्षः कल्प्यते । न चोत्कृष्टस्यापि तस्य सर्वेभ्यः कामेभ्यो ज्योतिष्टोम इतिवाक्यात्तस्यापि पुत्राद्यर्थं विधानेन तस्मादेव सम्भवात्पुनरप्रवृत्त्या आनर्थक्यं दुर्वारमिति वाच्यम् । फले त्रैविध्यं प्रकल्प्य मध्यविधफलार्थतया तत्र प्रवृत्त्युपपत्तेः । यद्वा । सर्वकामवाक्यं दर्शपौर्णमासयोः काम्यसकलेष्टिमात्रफले ज्योतिष्टोमस्य च काम्यसोमयागफलएव विनियोगं विधत्ते इति न पुत्रेष्ट्यादिफलस्य ज्योतिष्टोमालाभसम्भवोपि न वा फलत्रैविध्यकल्पनापीति चेन्न । कृताधानस्य पुत्रादिलोलुपस्य दर्शपौर्णमासात्प्रागपि पुत्रेष्ट्याद्यनुष्ठानसम्भवेनानर्थक्यपरिहारे फलवैजात्यकल्पनाया एव गौरवेणासम्भवात् । न च दर्शपौर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वाक्यात्सोमस्य दर्शोत्तरं तावदिष्ट्यन्तरस्य तथात्वे मानमस्ति । नन्वस्त्वेवमेव न नः किं चिदनिष्टं, परं तु तवैव पुत्रेष्ट्याद्यानर्थक्यप्रतिबन्दी लब्धोत्तरेति चे, तथापि समारब्धदर्शपौर्णमासानां काम्येष्टिप्रवृत्तिविलोपो दुर्वार इति वदामः । वस्तुतस्तु वित्तचित्तादीनां क्षणिकतामालोच्याव्यवधानेन सोमं तत्फलं च चिकीर्षोरनाग्निकस्याग्निफलकत्वेन काम्यस्याप्याधानस्य न

कालप्रतीक्षा नापि तदीये सोमयागे दर्शपौर्णमासोत्तरता प्रतीक्षेति सोमेन यक्ष्यमाणोऽग्निमादधीत नर्तुं पृच्छेन्न नक्षत्रमित्यादिश्रुतिप्रामाण्यादग्निष्टोमे सिद्धान्तितम् । तथा च मासस्याद्यदर्शपौर्णमासयोः स्वर्गोत्कटेच्छावतस्तावत्कालविलम्बसहिष्णोर्धनिकस्य तत्स्वर्गार्थमेव सोमानुष्ठानस्याप्युपपत्तेरानर्थक्यपरिहाराद्दर्शपौर्णमासात्सोमे स्वर्गफलभूमाकल्पनं कथं सिध्येत् । कालादिविलम्बेन स्वल्पवित्तव्ययायासादिलभ्यस्याप्यर्थस्योत्कटशीघ्रलाभेच्छायां बहुवित्तव्ययायासादिभिः सम्पादनस्य लोके प्रायशः सर्वानुभवसिद्धत्वात् । सर्वश्चादधानः सोमेन यक्ष्यमाणो भवत्येवेति अग्निसाध्यकर्माव्यवधानेन यक्ष्यमाणत्वलाभादग्निहोत्रानन्तर्यमपि तदीये सोमे नास्तीत्यपि द्रष्टव्यम् । अपि च । यावज्जीवमग्निहोत्रं जुहोति यावज्जीवं दर्शपौर्णमासाभ्यां यजेतेति विहितनित्यप्रयोगस्यैव फलसमर्पकं सन्निधानात्स्वर्गकामवाक्यमतो नित्यप्रयोगेन प्रत्यवायाभावः फलं कल्प्यः प्रत्यवायोपस्थितिद्वेषतत्प्रयुक्ततदभावकामनानां कल्पनामपेक्ष्य स्वर्गेच्छाया एव लाघवेन "स स्वर्गः स्यात्सर्वान्प्रत्यविशिष्टत्वादि" ति न्यायाच्च कल्पनौचित्यात् । वस्तुतस्तु वैजात्याभावेपि भूयस्त्वाल्पत्वाभ्यामेव ज्योतिष्टोमाग्निहोत्रफलयोर्विशेषोपपत्तौ प्रवृत्तिसम्भवान्नैकस्याप्यप्रामाण्यं कथमन्यथा सर्वेभ्यो दर्शपौर्णमासावित्यतः सर्वफलेषु दर्शपूर्णमासयोः प्राप्तावपि नानर्थक्यम् । वस्तुतस्तु फलाधिक्यादिकल्पनमपि न युक्तं मानाभावाद्गौरवाच्च । किं तु समानफलानामपि कर्मणां शक्ताशक्तभेदेन व्यवस्थैवोचिता । अत एव "सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च । दद्यादपश्च यः शक्त्या सर्वे तुल्यफलाः स्मृता" इति महाभारतं सङ्गच्छते । वित्तशाठ्यं न का-

रथेदित्यादितत्तद्भूतप्रकरणपाठितवाक्येभ्य इष्टान्यत्रापीयं मर्यादा सर्वेषामपि । न चैवं सोमाधिकारिणां दर्शपौर्णमासयोस्तदधिकारिणामग्निहोत्रे चाप्रवृत्त्यापत्तिः । यावज्जीवादिविधिफलार्थं प्रवृत्त्युपपत्तेरित्यलं पल्लवितेन । अपि च । अस्तु प्रवृत्त्यनुरोधेन वैजात्यं तथापि त्वदुक्तरीत्यैवैतत्फलितं यदीष्टसाधनत्वस्येव सामान्यतः स्वर्गसाधनत्वज्ञानमपि न प्रवर्त्तकम् । किं तु तत्फलसाधनताज्ञानमेवेति । तथा च स्वर्गत्वसामानाधिकरण्येनाश्वमेधादिजन्यत्वग्रहेपि अश्वमेधवदन्यादृष्टत्वग्रहेपि च न प्रवृत्तिरिति विधिना तादृशज्ञानजननमप्यफलं प्रवर्त्तकज्ञानविषयस्यैव विध्यर्थत्वादिति न किं चिदेतत् । यत्तु न साक्षाद्विधिजन्यं ज्ञानं प्रवर्तकं किं तु तत्प्रयोज्यमपरम् । अत एव विधिजन्यज्ञानजन्यज्ञानं प्रवर्त्तकमिति चिन्तामणिकृताप्युक्तमिति । तदुच्छम् । कल्पनाया विना बाधकं साक्षादुपपादकविषयत्वनियमेन साक्षात्प्रवर्तकज्ञानविषयएव विधिशक्तेरुचितत्वात् । अन्यथा "विधिर्विवक्षुरभिप्रायः प्रवृत्त्यादौ लिङादिभिः । अभिधेयोनुमेया तु कर्त्तुरिष्टाभ्युपायते" त्युदयनाचार्योक्तरीत्या वक्त्रभिप्राये एव च विधिशक्तिः सिध्येत् । इच्छात्वजातेः शक्यतावच्छेदकत्वलाभेन लाघवात् । तथा च गतमिष्टसाधनत्वशक्त्या । साक्षात्प्रवर्त्तकज्ञानविषयस्यैव शक्यत्वमित्याग्रहे च विजातीयस्वर्गसाधनत्वएव शक्तिरुचिता । अस्मद्रीत्या विधिजन्यज्ञानादेव प्रवृत्तिसम्भवेन तादृशधाराकल्पने मानाभावाद्गौरवाच्चेत्यादि सुधीभिर्ध्येयम् । अथैवमपि न कलञ्जमिति निषेधानुपपत्तिः । कलञ्जभक्षणादेस्तृप्त्यादिरूपेष्टजनकत्वेन तदभावस्य बाधितत्वात् । एतेन श्रुतेष्टसाधनत्वाभावोपपत्तये गुरुतरानिष्टसाधनत्वं कल्प्यतइति परास्ता कल्पतरुकाराद्युक्तिः । य-

तु परिमले गुरुतरानिष्टसाधनत्वे कल्पिते तत्प्रतिसन्धाने सांदृष्टिकफलान्निवर्त्तेत । तन्निवृत्तौ च तस्येष्टत्वं नास्तीतीष्टसाधनत्वाभावस्य नहन्यादित्येतदर्थतायां न कश्चिद्दोष इति प्रपञ्चितम् । तत्तु आस्तिककामुकस्य रागान्धस्य सत्यपि भाविनरकदुःखावश्यम्भावावगमे तात्कालिकफलेच्छा नापैतीति तं प्रतीष्टसाधनत्वाभावबोधकस्य निषेधवाक्यस्याप्रामाण्यापत्तिः । सर्वान्प्रति प्रमाणभूतस्य च वेदस्य पुरुषभेदेन प्रामाण्याप्रामाण्ये न युक्तेइति स्वयमेव निरस्य बलवदनिष्टाननुबन्धित्वमपि लिङर्थः । तथा च विशेषणाभावापन्नो विशिष्टाभावो नञा प्रतिपाद्यतइति न दोष इत्युक्तम् तत्प्रागुक्तरीत्या परास्तमेव । तस्मात्कथमेतादिति चेत् । अत्र वदन्ति । यागादाविष्टसाधनत्वसम्बन्धित्वेनावगतस्य बलवदनिष्टाननुबन्धित्वस्य लक्षणया वा ऽनूदितस्य भ्रान्त्या वा प्रसक्तस्यैव निषेध इति विरोधिलक्षणया ऽसुराविद्यादिवदत्राप्यनिष्टहेतुत्वमेव वागभ्यतइत्यन्ये । न चैवमसुरा अविद्येत्यत्रेव समासापत्तिः । विभाषावचनेन तस्य वैकल्पिकत्वात् । अत एव नानुयाजेष्विति पर्युदासे न स इति प्रागुक्तम् । तत्तत्साधनत्वं विध्यर्थ इति पक्षे स्वर्गादिपदं तत्तत्फलतात्पर्यग्राहकामिति स्वीकारादनिष्टसाधनत्वं लिङर्थो, नञ् तात्पर्यग्राहक इत्यन्ये । तत्साधनत्वं विध्यर्थ इति पक्षे नकलञ्जमित्यत्र प्रत्यवायपरीहारसाधनत्वं विध्यर्थः । साधनत्वं चात्र तत्सत्त्वे नियमतः प्रत्यवायाभावस्तदभावे नियमतः प्रत्यवाय इत्यन्वयव्यतिरेकवत्त्वम् । प्रत्यवायोपि न ब्राह्मणं हन्यादिति विधिभेदाद्विलक्षणो ग्राह्यः । एवं च विध्यर्थनिषेध एव नञा क्रियते । एवं चार्थात्तल्लक्षणादौ सति प्रत्यवायः सिध्यति । तस्मान्न का चिदनुपपत्तिरित्यपरे । कलञ्जभक्षणाभा-

वः प्रत्यवायपरिहारसाधनमित्येव बोध्यते। न च प्रत्ययानां प्रकृत्यर्थगतेत्यादिव्युत्पत्तेः कथमप्रकृत्यर्थे ऽभावे इष्टसाधनत्वान्वय इति वाच्यम्। अभावद्वारकमन्वयमादायोपपत्तेः। नञ्स्थले भिन्नव्युत्पत्तिकल्पनाद्वा। एवं चातिरात्रे षोडशिनं गृह्णाति नातिरात्रे षोडशिनं गृह्णातीत्यत्रापि ग्रहणे ग्रहणाभावे चेष्टसाधनत्वं बोध्यते। फलवैलक्षण्याच्च न दोषः। अत एव कलञ्जभक्षणाभावविषयकं कार्यमिति गुरव इत्यपि के चित्। अथैवं सत्यग्नीषोमीयपश्वालम्भने पापापत्तिः। न हिंस्यादिति निषेधात्। प्रकृते च तत्सङ्कोचकाभावात्। तथाहि। अग्नीषोमीयमित्यादिना ह्यालम्बनमिष्टहेतुरवगम्यते। न हिंस्यादित्यनेन चानिष्टहेतुतोदिता। न चानयोर्विरोधः मधुविषसम्पृक्तान्नभोजने परकीयसुन्दरीगमनादौ च समावेशदर्शनात्। वस्तुतस्तु पशुमालभेतेत्यत्रालम्भतिर्यागलक्षणार्थः। अप्राप्तस्यैव तस्यात्र द्रव्यदेवतासम्बन्धविशिष्टस्य विधेयत्वात्। अस्तु वा आलम्भनमत्र स्पर्शनमात्रम्। विषये प्रायदर्शनादित्यधिकरणे वत्समालभेतेत्यग्निहोत्रप्रकरणपठितवाक्याद्वत्सहिंसाविधानापत्तेरिति पूर्वपक्षे स्पर्शमात्रं तदर्थ इति सिद्धान्तितत्वात्। तथा च त्रिवृच्चर्वधिकरणन्यायेन सर्वत्र स्पर्शार्थकत्वं सिध्यति। तत्र हि त्रिवृद्वहिष्पवमानमित्युक्त्वा स्तोत्रीयानवकस्य वेदेनुक्रान्तत्वात्तदेवार्थः। लोके त्रिवृद्रज्जुरितिप्रयोगात् त्रैगुण्यं, चरुशब्दस्य लोके स्थाली, वेदे त्वादित्यश्चरुरित्युक्त्वा अदितिमोदनेनेत्युक्त्वादोदनोर्थ इति निर्णयेपि यत्र वाक्यशेषो नास्ति तत्र निवृदग्निष्टुदग्निष्टोमः सौर्यं चरुं निर्वपेदित्यादौ तत्राविशेषादुभयं ग्राह्यं वाक्यशेषवत्यपि विकल्पेन पदार्थबोधकत्वांशे लोकवेदयोस्तौल्यादित्याशंक्य विध्येकवाक्यतया बलत्वाद्वाक्यशेषस्य तदुक्त एवार्थो ग्राह्यः।

अन्यत्रापि वैदिकत्वाद्वेदसिद्ध एवार्थो ग्राह्य इति दशमे वक्ष्यतइत्युक्तम् । एवमत्रापि प्रायदर्शनात्स्पर्शार्थत्वनिर्णयादन्यत्रापि स एव ग्राह्य इति सिध्यति । एवं च विधिनिषेधयोः समानार्थत्वस्यैवाभावे क बाध्यबाधकभावः । हिंसा त्वङ्गयागाच्चाक्षेपलभ्या । न च पत्नीसंयाजानां जाघनीवदन्यतः सिद्धैरेव यागसिद्धेः प्रयोगात्तर्हि सा न लभ्यतइति वाच्यम् । प्राचीनपशुसंस्काराणां यज्ञीयपशुद्वारा यागार्थत्वनिर्वाहायावघातादिवदन्तरनुष्ठानसम्भवात् । अन्यथाग्नीषोमीयत्वासिद्ध्यभावापत्तेश्च । विशसनप्रकारविधायकवाक्याद्विशसनं लभ्यते। अन्यथा शस्त्रादिना हननेपि यागसिद्ध्यापत्तिरिति चेन्न । अखण्डिततत्तदङ्गलाभानुरोधेन मायुकरणादिदोषनिवृत्तये च विशसनप्रकारस्याप्यर्थप्राप्तत्वेन विध्यनपेक्षत्वादिति तत्त्वम् । न च निन्दार्थवादप्रायश्चित्तोपदेशाद्यसमभिव्याहृतविधिविधेयत्वस्यानिष्टाननुबन्धित्वव्याप्ततया पर्यवस्यद्विध्यर्थेन समं विरोधान्न निषेधप्रवृत्तिरिति रीतिः साध्वी । शब्दार्थयोर्विरोधे ह्यन्यतरस्याप्रामाण्यभीत्या सङ्कोचकल्पना । पर्यवस्यद्विध्यर्थेन सह विरोधे च न वेदस्याप्रामाण्यमिति सङ्कोचकाभावात् । नाप्यशुद्धमिति चेन्न शब्दादिति सूत्रीयाहिंसारूपत्वात्पापसम्भवात् दुःखम्भवत्विति चेन्न । शब्दविहितत्वात् । 'हिंसा त्ववैदिकी या तु तयानर्थो ध्रुवं भवेत् । वेदोक्तया हिंसया तु नैवानर्थः कथं चने'ति भाष्यस्थाहिंसात्वेन वैदिकहिंसाया अपि पापहेतुत्वात् दुःखं भवत्विति शङ्कते । अशुद्धमिति । नहि हिंसायाः पापहेतुत्वे हिंसात्वं प्रयोजकम् । किं तु निषिद्धत्वम् । तच्चात्र नास्ति । प्रत्युत वायव्यं श्वेतमित्यादिशब्दैर्विहितत्वादित्याह । शब्देति । सोपाधित्वेन दूषितानुमानस्य स्मृतिविरोधं चाह । हिंसेतीति। तत्रत्यटीकास्था

च साध्वी साध्वी । पूर्वपक्ष्याशयानवबोधनिबन्धनत्वात् । नहि पूर्वपक्षिणो हिंसात्वेन पापमापादयन्ति । किं तु निषिद्धत्वेन । इष्टसाधनत्वं विधिरित्यभ्युपगन्तुस्तवापि तस्य तुल्यत्वात् । स्मृतिरप्यनन्तकमठादिश्रुतिकल्पकमध्वकल्पितैवेति न प्रमाणपथमवतरतीति ध्येयम् । एवं च वेणीप्रवेशनसहगमनादिसर्वविलोपापत्तिः । एवं वाजपेयेपि सुराग्रहजन्यपापापत्तिर्दुर्वारैव । तथा चोक्तं प्रथमस्कन्धे । 'यथा पङ्केन पङ्काम्भः सुरया वा सुराकृतम् । भूतहत्यां तथैवैकां न यज्ञैर्मार्ष्टुमर्हती'ति चेत् । अत्रोच्यते । "नेष्यस्यन्यान्वध्यजनान् हिंसा नैषां च धर्मतः । स्वधर्मेण च हिंसैव महाकरुणया समे" ति कर्कटुव्यपाख्यानस्थवासिष्ठात् । "क्षत्रधर्मरतोपि त्वं वृथा हिंसां परित्यजे" ति ब्रह्मोत्तरखण्डस्थऋषभोपदेशात् । 'या वेदविहिता हिंसा सा न हिंसेति कीर्त्यत' इति श्रीधरस्वाम्युदाहृतवाक्यात् । 'यद्घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसे' ति भागवतात् । 'यज्ञार्थं पशवः सृष्टाः स्वयमेव स्वयम्भुवा । यज्ञोस्य भूत्यै सर्वस्य तस्माद्यज्ञे वधो ऽवध' इति या वेदविहिता हिंसा नियता ऽस्मिंश्चराचरे । अहिंसामेव तां विद्याद्वेदाद्धर्मो हि निर्बभौ' विति पञ्चमाध्यायस्थमनुवाक्याभ्यां च पापाभावसिद्धेर्न दोषः । अत्र हिंसा न हिंसा । आलम्बनं न हिंसा । वधो ऽवध इत्यस्याग्रिमहिंसावधशब्दयोर्विनां पापजनकार्थकत्वमसङ्गतेः । यत्तु वैधाहिंसायां यत्किञ्चिद्वधभेदसङ्गतेर्नेदं तत्र साधकमिति । तन्न । व्यर्थहिंसासाम्योद्धारासङ्गतेः । अन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वस्य व्युत्पत्तिसिद्धत्वाच्च । अन्यथा यज्ञीयहिंसायामपि तथाप्रयोगापत्तेः । न च शुद्धपापजनिका नेति तदर्थः । तथासतीष्टानिष्टोभयजनिकेत्येवपर्यवसानेन वैयर्थ्यापत्तेः । विधिनिषेधवा-

क्याभ्यां तद्बोधात् ॥ अत एवेष्टजनकत्वाभावो बोध्यतइत्यपास्तम् । न चैतान्यनुवादकान्येव सन्त्विति वाच्यम् । सति सार्थकत्वे तथासम्भवात् । अन्यथा तत्प्रख्याधिकरणोच्छेदप्रसङ्गात् । तस्माद्वाचनिक एव पापाभावः प्रतिभाति । अत एव स्कान्दे द्रव्यपापमणनायां "हिं सा चैवाविधानत" इत्यविधानेन हिंसैव पापजनकत्वेनोक्ता । अत एव भगवता व्यासेन सूत्रितम् । "अशुद्धमितिचेन्नशब्दादि" ति । अत एव धर्मत्वाधर्मत्वयोः शब्दैकगम्यत्वाद्वैधहिंसाया धर्मत्वेनैवोक्तत्वान्न सा ऽधर्म इति सूत्रार्थ इत्यस्मत्पितृचरणैर्वृत्तौ व्याख्यातम् । एवं वेदाद्धर्मो हि निर्वर्त्यादित्यादौ वेदविहितत्वमेव धर्मत्वे धर्मासंवलने तात्पर्यार्थे च हेतुरुक्त इति सामान्यत एवैतदर्थकवचनकल्पनाच्च सुराग्रहादावपि पापप्रसक्तिः । अस्तु वै तस्य सुराग्रहस्थले इष्टापत्तिरेव । तत्रोक्तभागवतादिना घ्राणभक्षविधानेन तस्य चा"नृतं मद्यगन्धं च दिवाभैथुनमेव च । पुनाति वृषलस्यान्नं बहिः सन्ध्याम्बुपासिते"त्यादिना ऽतिस्वल्पप्रायश्चित्तविधानेन क्षतिविरहादिति सुधीभिर्विभाव्यम् । परे पुनरस्त्येव पशुहिंसादिभिर्यागादावपि प्रत्यवायः । तथा च भगवता व्यासेन पातञ्जले पञ्चशिखाचार्यवचनमुदाहृत्य निर्णीतम् । वचनं च "स्यात्स्वल्पः सङ्करस्तुपरिहारः सप्रत्यवमर्षः कुशलस्य नापकर्षानालं कस्मात्कुशलं ह्येव बहून्यदस्ती" त्यादिः । अस्यार्थः । स्वल्पः सङ्करः पशुहिंसाजन्यः प्रत्यवायः स्यादित्यन्वयः । ननु मधुविषसम्पृक्तान्नभोजनइवात्र प्रवृत्तिर्न स्यादिति चेन्न । बहुतरसुखानुविद्धतया तद्दुःखस्य श्वपादिवदप्रयोजकत्वादित्यभिप्रेत्याह । स्वल्प इति । स्वल्पत्वं च तस्माद्यज्ञे ऽवधइति शास्त्रात् । अनुदरा कन्येतिवन्नञोल्पार्थकत्वात् । न चावध इति वदभावार्थमादाय तस्मादेव

हेतोस्तत्र न प्रत्यवाय इत्येवोच्यतामिति शङ्क्यम् । सामान्यतः प्रवृत्तिनिषेधस्य सत्यां गतौ सर्वथा सङ्कोचासम्भवात् । अत एवाह । सुपरिहरः । अल्पीयसा प्रायश्चित्तेन परिहर्तुं शक्यः । अथ प्रमादतः प्रायश्चित्तं नाचरितं तथापि सप्रत्यवमर्षः क्षन्तुमर्हः । मृष्यन्ते हि महत्फलं कामयमानास्तदनुनिष्पादिक्षुद्रदुःखम् । अत एवाह कुशलस्येत्यादि । पृच्छति । कस्मादिति । उत्तरयति । कुशलं हीत्यादि । न च हिंसाजन्यपापापेक्षया यदि स्वर्गस्याधिक्यं तदेदं सङ्गच्छताम् । तत्रैव किं मानमिति वाच्यम् । उक्तोत्तरत्वात् । पशुहिंसाजन्यपापप्रायश्चित्तस्य स्वल्पवित्तव्ययायाससाध्यतया तन्नाश्यपापस्यापि स्वल्पत्वानुमानाच्च । यागस्य च बहुवित्तव्ययायाससाध्यतया तज्जन्यस्वर्गस्य बहुत्वकल्पनात् । अत एवाश्वमेधशतकफलभोगसमयेपीन्द्रादेरनेकशो रावणमहिषासुरादिभ्यो दुःखधाराश्रुतिपुराणादिषूपवर्णिता सङ्गच्छते । यज्ञान्तर्गतहिंसादिजन्यपापफलस्य तस्य यज्ञफलान्तरुत्पत्तेरुपपत्तिसिद्धत्वात् । अत एव पञ्चशिखाचार्यवचनशेषे पठितम् । स्वर्गेप्यपकर्षमल्पमनुभविष्यतीति । अस्तु वा सुखदुःखयोस्तुल्यता । तथा ऽपि तादृशेच्छावशात्प्रवृत्तिर्नानुपपन्ना । निषिद्धप्रवृत्तिवत् । अत एव विशेषदर्शिनो नैतस्योत्तमत्वं स्वीचक्रुः । अतएवोक्तमेकादशे भागवते "यद् घ्राणभक्षो विहितः सुरायास्तथा पशोरालभनं न हिंसा । एवं व्यवायः प्रजया न रत्यै इमं विशुद्धं न विदुःस्वधर्मं" मिति । आलम्बनमेव प्रागुक्तरीत्या यागः स्पर्शनं वा विहितं न तु हिंसेति स्वधर्मं न विदुः । किं तु हिंसैव विहितेत्येवमेव विदुः । अत एवेमं स्वधर्ममपि विशुद्धं न विदुः । दुःखप्रयोजकत्वादिति भावः । अत एवैतदजानतो निन्दा । ये त्व-

नेवंविदो ऽसन्तस्तब्धाः सदभिमानिनः पशून्द्रुह्यन्ति विश्रब्धाः प्रेत्य खादन्ति ते च तानित्यग्रेपि सङ्गच्छते । नैवमशुद्धं विदुः । असन्तो भोगमात्ररताः । अत एव तदुपसंहारे वासुदेवपराङ्मुखा इति वक्ष्यति । विश्रब्धाः । अनेन मनोरथो भविष्यतीति विश्वस्ता इत्यर्थ इति ध्येयम् । यत्त्वेवं साङ्गयागाननुष्ठानं स्यादिति । तत्र वक्तव्यं, पापेन पुरुषः प्रत्यवैतु । यागस्य साङ्गत्वे को विरोधः । तथा च कर्त्रधिकरणे भट्टैरुक्तम् । "यो नाम क्रतुमध्यस्थः कलञ्जादीनि भक्षयेत् । न क्रतोस्तत्र वैगुण्यं यथाचोदितसिद्धित" इति । यत्तु विध्यपेक्षितप्राशस्त्यबोधकत्वमर्थवादानां सर्वासिद्धम् । तच्च बलवदनिष्टाननुबन्धित्वमेव । अन्यस्यासम्भवात् । अत एवान्यलभ्यत्वान्नात्र विधेः शक्तिर्न वा विधिनिषेधयोः साङ्कर्यमिति । तन्न । बलवद्द्वेषेण तस्यान्यथासिद्धेरुक्तत्वात् । शीघ्रफलदातृत्वादेरेवाननुगतप्राशस्त्यस्य सुवचत्वाच्चेति साङ्ख्यपातञ्जलानुयायिनः । तच्चिन्त्यम् । उक्तवचनेभ्यो निषेधाप्रवृत्तेरुक्तत्वात् । न च ततः पापस्य स्वल्पत्वकल्पनं युक्तम् । सकृत्प्रवृत्तायाः किमवगुण्ठनेनेति न्यायेन निषेधकल्प्यपापस्य साम्यांशे एव सङ्कोचकत्वासम्भवात् । सङ्कोचस्याप्येकदेशबाधत्वात् । यत्त्वनयैवानुपपत्त्या इष्टोत्पत्तिर्नान्तरीयकदुःखाधिकत्वमपि विधिशक्तौ प्रवेशयन्त इष्टसाधनत्वं कृतिसाध्यत्वमिष्टोत्पत्तीत्यादित्रयं शक्यमित्याहुः । तथा च निषेधस्थले तादृशानिष्टजनकत्वमुच्यते । विधिना च तादृशानिष्टाजनकत्वमिति विहिते निषेधः प्रवर्त्ततइति न ज्योतिष्टोमे पश्वालम्भनं पापजनकमिति । श्येनस्थले चेष्टसाधनत्वकृतिसाध्यत्वयोरेवान्वयान्न विध्यर्थबाध इति वदन्ति । अत्रेदं चिन्त्यम् । नान्तरीयकत्व-

स्य दुर्वचत्वात्कथं तच्छक्यम् । इष्टजनकजन्यत्वं तद्वाच्यमिति चेन्न । ब्रह्महत्यादिसकलजन्यनरकस्य नान्तरीयकत्वापत्तेः । इष्टव्याप्यत्वं तदिति चेन्न । तद्यदि कालिकं तर्ह्यान्तरालिकश्रमादेरप्यनान्तरीयकत्वापत्तेर्विध्यर्थबाध एव । यदि दैशिकं, तदोक्तदोषः । इष्टपूर्ववर्त्तित्वं तदिति चेन्न । एतस्य प्रवृत्त्यनुपयुक्तत्वेन विध्यर्थत्वायोगात् । एतस्य प्रवर्त्तकत्वे च बहुवित्तव्ययायाससाध्ये किञ्चिदिष्टजनके प्रवृत्त्यापत्तिः । तदानीन्तनबलवद्द्वेषविषयदुःखाजनकत्वमिष्टोत्पत्तीत्यस्यार्थ इति चेन्न । तादृशयात्किञ्चित्पुरुषीयद्वेषविषयदुःखाजनकत्वस्य कलञ्जभक्षणेपि सत्त्वाद्विध्यर्थनिषेधबाधापत्तेः । सकलद्वेषविषयाजनकत्वं च न ज्योतिष्टोमेपीति विध्यर्थबाधः स्यात् । विजातीयदुःखाजनकत्वं तन्निष्कर्ष इति चेन्न । ज्योतिष्टोमादिदुःखस्यापि कुतश्चिद्विजातीयत्वेन विध्यर्थबाधापत्तेः । नरकाजनकत्वं तत्त्वमिति चेन्न । ज्वरितो न भुञ्जीत नेत्ररोगे न स्त्रियमुपेयादित्यादिवैद्यकशास्त्रोक्तनिषेधानुपपत्तितादवस्थ्यात् । न कलञ्जमित्यादिनाऽनरकाजनकत्वाभावबोधकत्वसम्भवेपि तादृशेषु दृष्टार्थकनिषेधेषु तदभावासम्भवेन बाधितार्थकतापत्तेः । वस्तुतस्तु वेदेन तथा बोधनेपि यस्य न तथा द्वेषः स एव प्रवर्तते नान्य इति विधेस्तथा शक्तिकल्पनं निष्फलम् । न चैवं ज्योतिष्टोमादौ पशुहिंसाजन्यपापापत्त्या शिष्टानामप्रवृत्त्यापत्तेस्तद्वारणाय इष्टोत्पत्तीत्यादौ शक्तिः कल्प्यतइति वाच्यम् । मरणादिरूपमहानिष्टसाधनेपि सहगमनवेणीप्रवेशनादावात्माहुत्यङ्गके सर्वस्वारयज्ञे चोत्कटफलेच्छावशादिव महतामपि प्रवृत्त्युपपत्तेर्बहुधोपवर्णितत्वात् । किं चैवमपि न निषेधसङ्कोचलाभः । श्येनादिवन्निषेधानुरोधेनेष्टसाधनत्वकृतिसाध्यत्वमात्रबोधनेनापि विधिप्रवृत्त्युपपत्तेः ।

वैधहिंसायां विध्यर्थैकदेशबाधस्तु निषेधस्य सर्वथैवाप्रवृत्तिरूपबाधान्नाधिक इत्यादिसूरिभिर्विभाव्यम् । लोडर्थमाह । प्रार्थनेति । आदिना विध्याद्याशिषो गृह्यन्ते । आशिषिलिङ्लोटौ, लोट्चेति सूत्राभ्यां तदवगमात् ॥ २२ ॥

लङादिक्रमेण ङितामर्थमाह ॥

ह्यो भूते प्रेरणादौ च भूतमात्रे लङादयः ।
सत्यां क्रियातिपत्तौ च भूते भाविनि लृङ् स्मृतः२३

ह्योभूतइति । अनद्यतने भूतइत्यर्थः । अनद्यतनेलङितिसूत्रात् । लिङर्थमाह । प्रेरणादाविति । विधिनिमन्त्रणेति सूत्रात् । आदिना आशिषिलिङ्लोटाविति विहित आशीरर्थो गृह्यते । लुङर्थमाह । भूतमात्रे इति । भूतइत्यधिकारे लुङितिसूत्रात् । यथा अभूदित्यादि । अत्र विद्यमानध्वंसप्रतियोगित्वं भूतत्वम् । तच्च क्रियायां निर्बाधमिति विद्यमानेपि घटे घटोभूदिति प्रयोगः । लृङर्थमाह । सत्यामित्यादिना । भूते भाविनीति । हेतुहेतुमद्भावादि स्थलइत्यर्थः । तथाच हेतुहेतुमद्भावे क्रियाया अनिष्पत्तौ गम्यमानायां लृङिति भावः । नन्वेवं कथमेतेष्वेवार्थेषु निर्भरः । अर्थान्तराणामपि दर्शनात् । लक्षणा तत्रेति चेन्न । वैपरीत्यापत्तेः । वक्ष्यमाणरीत्या तस्या अप्यभावाच्चेति चेन्न । सर्वेसर्वार्था इत्यभ्युपगमात् । तत्तदर्थेषु साधुत्वाख्यापकं व्याकरणम् । न तु शक्तिपरिच्छेदकमिति वक्ष्यते । तथा चार्थान्तरे सत्यनुशासने साधुत्वमिष्टमेव । मूलं त्वेतदिक्प्रदर्शनमात्रम् । सर्वे सर्वार्था इत्यनभ्युपगमे च लक्षणैव । प्रसिद्ध्यप्रसिद्धिभ्यां तन्निर्णयात् । परं त्वनुशासनविरुद्धा नैयायिकमीमांसकादिभिरुक्ता । तत्रतत्र लक्षणा न साधुत्वसम्पादिकेति तत्रतत्र स्फुटीकुर्मः । वक्ष्यते चाधिकं सुबर्थनि-

र्णये इत्यलमतिपल्लवितेनेति । एतेषां क्रमनियामकश्चानुबन्धक्रम एव । अत एव पञ्चमो लकार इत्यनेन मीमांसकादिभिर्लेट् एव व्यवह्रियते इति ॥ २३ ॥

इति वैयाकरणभूषणे लडाद्यर्थनिर्णयः ॥

सुपामर्थान्निरूपयति ॥

आश्रयो ऽवधिरुद्देश्यः सम्बन्धः शक्तिरेव वा ।
यथायथं विभक्त्यर्थाः सुपां कर्मेति भाष्यतः॥२४॥

द्वितीयातृतीयासप्तमीनामाश्रयोर्थः । अयं भावः । कर्मणि द्वितीयेति सूत्रात्कर्मरूपेर्थे द्वितीया भवति । तच्च कर्तुरीप्सिततमामिति सूत्राद्धातूपात्तफलाश्रयः । क्रियाजन्यफलवत्त्वेन कर्मण एव कर्तुरीप्सिततमत्वात् । अत एव सिद्धे तस्मिन्निच्छानिवृत्तिर्नान्यथा । एवञ्च फलाश्रयः कर्म । तत्र फलांशस्यान्यलभ्यत्वादाश्रयमात्रमर्थः । तत्त्वमेवाखण्डशक्तिरूपमवच्छेदकमिति बोध्यम् । अथ चैत्रो ग्रामं गच्छतीत्यादौ ग्रामसंयोगादिरूपफलाश्रयचैत्रादेः कर्मत्वं स्यादिति चेत् । इष्टापत्तिः । तर्हि द्वितीया स्यादिति चेन्न । नह्येतदेव द्वितीयाप्रयोजकं, किं तु संज्ञान्तराभावविशिष्टे जायमाना कर्मसंज्ञैव । इह च परया कर्तृसंज्ञया बाधेन कर्मसंज्ञाया अप्रवृत्तेर्न द्वितीया । एकसंज्ञाधिकारात्समावेशस्याप्यसम्भवात् । अत एवात्मानमात्मना हन्तीत्यत्र कर्मसंज्ञोपपादनं शरीरमनोरूपमवच्छेदकभेदमादाय कृतं भाष्ये । कर्मसंज्ञायास्तु घटं करोतीत्यादौ धातूपात्तव्यापारवत्त्वरूपकर्तृत्वविरहिणो घटादेरेव विषयत्वान्नावकाशता । न चाधःसंयोगरूपधात्वर्थफलाश्रयभूम्यादेः वृक्षादूमौ पततीत्यत्रापि कर्मतापत्तिः । साक्षात्तदाश्रयतायाविवक्षायामिष्टत्वात् । क-

र्तृकर्मद्वारा तद्विवक्षायामेवाधारसंज्ञाविधानात् । अत एव द्वितीयाश्रितातीतपतितगतात्यस्तप्राप्तापन्नैरित्यत्र भूमिं पतित इत्युदाहृतम् । न चैवमपि घटं करोतीति न स्यात्फलवत्त्वाभावादिति शङ्क्यम् । उत्पत्तिरूपधात्वर्थफलाश्रयत्वात् । घटं जानातीत्यपि ज्ञानजन्यविषयावच्छिन्नाज्ञानभङ्गरूपफलशालित्वसत्त्वादुपपन्नम् । न चैवमपि नष्टे तं जानातीत्यनुपपन्नम् । तत्रापि सूक्ष्मरूपेण स्थित्यभ्युपगमात् । उक्तं हि वाक्यपदीये । "तिरोभावाभ्युपगमे भावानां सैव नास्तिता । लब्धक्रमे तिरोभावे नश्यतीति प्रतीतय" इति । अतीतादावपि ज्ञानादेर्विषयतासम्बन्धेन वृत्तिस्वीकारे च तद्वदेवावरणतद्भङ्गयोरपि वृत्तिः सुवचैवेति सत्कार्यवादानालम्बेप्यदोषाच्चेति । वस्तुतस्तु जानातीच्छति द्वेष्टि सन्देग्धीत्याद्यनुरोधाज्ज्ञानेच्छाद्यनुकूलो व्यापारो धात्वर्थः । स च ज्ञानजनकमनश्चक्षुःसंयोगादिरेव । अत एव मनो जानाति चक्षुः पश्यतीति प्रयोगाः सङ्गच्छन्ते । इच्छत्यादेश्चेच्छाद्यनुकूलज्ञानादिरेव व्यापारः फलञ्चेच्छादि । तथा च तदाश्रयत्वाद् घटादेः कर्मत्वम् । जानात्यादेः सकर्मकत्वमप्येवमेवोपपादनीयम् । उक्तरीत्यादरे चेच्छादेस्तन्न स्यात् । न चैवमपि फलव्यापारयोः सामानाधिकरण्यात्तदसम्भव इति वाच्यम् । पचत्यादेरपि कालिकसम्बन्धेन फलसमानाधिकरणव्यापारवाचकत्वेनाकर्मकतापत्तेः फलतावच्छेदकसम्बन्धेन वैयधिकरण्यस्यावश्यंप्रवेशनीयत्वात् । प्रकृते च फलतावच्छेदकः सम्बन्धो विषयता व्यापारतावच्छेदकः समवायादिरिति तेन वैयधिकरण्यमस्त्येव । फलव्यापाराविशिष्टबोधककर्मकर्तृप्रत्ययैर्यो यत्र बोध्यते स एव हि तदवच्छेदकः । स च घटादिज्ञानेच्छाद्वेषमादाय घटो ज्ञायते इष्यते द्विष्यते सन्दिह्यते ज्ञात

इष्टो द्विष्टः सन्दिग्ध इतिवदात्मा ज्ञात इष्टो द्विष्टः सन्दिग्धो ज्ञायते इष्यते द्विष्यतइत्यप्रयोगादात्मा जानाति इच्छति द्वेष्टि सन्दिग्धे ज्ञाता एष्टा द्वेष्टा इतिवद् घटो जानाति इच्छति द्वेष्टि सन्दिग्धे ज्ञाता एष्टा द्वेष्टेति चाप्रयोगादुक्तरीत्या विशिष्यैवाभ्युपेय इति विभावयामः । अथ वा सविषयार्थकेषु ज्ञानेच्छाप्रयत्नसन्देहादिरेव धात्वर्थव्यापारः । विषयतैवातिरिक्ता तज्जन्या फलम् । न च तस्यां विषयज्ञानातिरिक्तायां ज्ञानजन्यायां मानाभावः । विषयो घट इति विलक्षणप्रतीतेर्मानत्वात् । विलक्षणप्रतीतिर्हि पदार्थभेदे मानम् । अन्यथा घटपटभेदोपि न सिध्येत् । न च भावकार्यस्य ससमवायिकारणकत्वनियमाद्भूतभाविस्थले तदभावात्फलाभावः । ध्वंसस्य प्रामाणिकत्वे भावत्वस्य व्याप्यतावच्छेदककोटिप्रवेशवद्विषयताया अपि प्रामाणिकत्वे लघुत्वात्समवेतत्वेनैव कार्यत्वस्य विशेषणात् । अतश्च ध्वंसवदेव विषयताया अपि निमित्तकारणमात्रजन्यत्वम् । अतीतानागतज्ञानादेर्विषयरूपविषयताविरहेण निर्विषयत्वप्रसङ्गाच्च । घटत्वादिना निर्णयेपि विषयो न चेति सन्देहाच्च । अत एव न ज्ञानस्वरूपापि । एवं ज्ञानाद्यजन्यत्वे ततः पूर्वमपि ज्ञात इति प्रतीत्यापत्तेः तदा ज्ञानविषये इच्छाविषय इत्यव्यवहाराच्च । तथा च तदाश्रयत्वाद् घटादेः कर्मत्वं धातोः सकर्मकत्वं च नानुपपन्नम् । अतीतादौ निर्वाहश्च प्राग्वदेवेति वृद्धसम्मतः पन्थाः । एवं च कृञ्जानात्यादेरनुपदोक्तरीतिद्वयं उत्पत्तिप्रावरणभङ्गं चादाय त्रेधा तदुपपादनं शक्यम् । इच्छत्यादेरुक्तरीतिद्वये नेति विशेषः । उत्पत्तिमादायैव च क्रियते घटः स्वयमेवेत्युपपद्यतइति दिक् । नैयायिकास्तु क्रियाजन्यफलाश्रयत्वमात्रं न कर्मप्रत्ययार्थः । किं

तु परसमवेतत्वमपि । तेन " भूमिं प्रयाति विहगो विजहाति महीरुहम् । न तु स्वात्मान" मित्यादिप्रयोगोप्युपपद्यते । अत एव चैत्रेण ग्रामो गम्यतइति प्रयोगो न चैत्रेण चैत्र इत्यादिः । द्वितीयाकर्माख्यातयोस्तुल्यार्थत्वात् । इयांस्तु भेदः । द्वितीयया स्वप्रकृत्यर्थापेक्षया परत्वम् । आख्यातेन च स्वार्थफलाश्रयापेक्षया स्वार्थसंख्यान्वयापेक्षया वा बोध्यते । तच्च धात्वर्थक्रियायामन्वेति चैत्रो ग्रामं गच्छतीत्यत्र च ग्रामस्य चैत्ररूपपरनिष्ठक्रियाजन्यसंयोगरूपफलवत्त्वात्कर्मता । घटं करोतीत्यत्र च घटपदस्य कपाले निरूढलक्षणा । तस्य घटरूपफलशालित्वात्कर्मत्वं नानुपपन्नम् । कपालस्य सिद्धत्वेपि घटवत्त्वेनासिद्धत्वात्कृतिविषयत्वं नानुपपन्नम् । घटं जानातीत्यादौ तद्व्यवहारो भाक्त इति नेयमप्यनुपपत्तिरित्याहुः । नव्याः पुनर्न क्रियाजन्यफलशालित्वमित्याद्येव कर्मत्वम् । गमेः कर्मत्वस्य पूर्वस्मिन्देशे त्यजेश्चोत्तरस्मिन् स्यन्देश्च पूर्वापरयोः प्रसङ्गात् । किं तु फलस्य धात्वर्थतावच्छेदकेत्यपि विशेषणम् । एवं च गमेः संयोगस्यत्यजेर्विभागः स्यन्देश्च न किञ्चित्फलं तथेति न दोषः । ननु ग्रामं गमयति देवदत्तो यज्ञदत्तमित्यत्र प्रयोज्यकर्तृव्यापृतिः । उत्तरदेशसंयोगरूपफलस्य प्रयोजकक्रियाफलत्वाभावात् । तदनुकूलक्रियायाः फलत्वेप्यवच्छेदकत्वाभावात् । ननु शुद्धगमधात्वर्थेवच्छेदकत्वविरहेपि सनाद्यन्तधात्वर्थप्रयोजकव्यापारं प्रति फलत्वमवच्छेदकत्वं च प्रयोज्यव्यापारस्याक्षतमेवेति चेत्, तर्हि पाचयति देवदत्तो विष्णुमित्रेणेत्यत्रापि प्रयोज्यकर्तुः कर्मतापत्तौ द्वितीयापत्तेरिति चेन्मैवम् । धात्वर्थफलशालित्वमिति स्वीकर्तृणां वैयाकरणानामप्येतद्दोषस्य दुष्परिहरत्वात् । गतिबुद्धिप्रत्यवसानार्थेति सूत्रेण गत्याद्यर्थानामेवेति नियमाच्चान्येषां

प्रयोज्यव्यापारवत्त्वेन कर्मत्वामिति चेत्, तर्हि, समं ममापीति ध्येयम् । एवं परसमवेतत्वघटितमप्युभयकर्मजसंयोगस्थले ऽन्यदीयकर्मणः स्वापेक्षिकपरसमवेतत्वात्स्वस्य च तज्जन्यसंयोगादिरूपफलशालित्वाच्चैत्रे कर्मलक्षणमतिप्रसक्तम् । चैत्रः स्वात्मानं गच्छतीति प्रयोगापत्तिश्च । तस्मात्परसमवेतक्रियाजन्यफलशालित्वमपि क्रियाभेदेन भिन्नं वाच्यम् । एवं च परसमवेतयत्क्रियाजन्यफलशालित्वं यस्य तस्य तत्क्रियाकर्मत्वं, चैत्रस्य च स्वक्रियायाः परसमवेतत्वाभावात्तामादाय नातिप्रसङ्गशङ्कापि । मैत्रक्रियामादाय च कर्मत्वमिष्टमेव । तत्रैव मैत्रश्चैत्रं गच्छतीति प्रयोगात् । एतेन प्रयोगप्रसङ्गोपि वारितः । चैत्रनिष्ठसंयोगजनकचैत्रान्यवृत्तिक्रियाश्रयस्तादृशक्रियानुकूलकृत्याश्रय इति वा शाब्दबोधासम्भवात् । स्वनिष्ठाक्रियायाः परसमवेतत्वबाधात् परसमवेतक्रियायाश्च स्वस्मिन्नसत्त्वादिति । घटं करोतीत्यत्र घटपदस्य कपाललक्षकत्वे कपालं घटं करोतीति न स्यात् । कपालनिष्ठक्रियाजन्यफलशालित्वात् । तस्माद्वह्निमनुमिनोमीत्यत्रेव घटं करोति जानातीत्यादौ विषयतायां द्वितीयाया लक्षणा रथेन गम्यतइत्यादाविव तृतीयादेः । न च द्वितीयायास्तदर्थे ऽविधानात्कथमत्रार्थे द्वितीयेति वाच्यम् । द्वितीया कर्मणि शक्तेत्येवमादितत्तदनुशासनानामर्थादर्थान्तरे लक्षणयोत्पत्तिसम्भवात् । न च ज्ञानजन्यज्ञाततावत्त्वादस्तु कर्मतेति भाट्टी रीतिः साध्वी । ध्वस्ते घटे जानातीत्यनापत्ते, रितीदं मतं परिष्कुर्वन्ति । अत्रेदमवधेयम् । परसमवेतत्वांशे शक्तिश्चैत्रश्चैत्रमित्यत्र शाब्दबोधवारणाय साधुत्ववारणाय वा कल्प्यते । नाद्यः । चैत्रश्चैत्रमित्यादिशब्दाच्छाब्दबोधस्य फलाश्रयशक्तद्वितीयायाः परसमवेतत्वादिविशिष्टे लक्षणयापि वारणात् । तर्हि शुद्धे फले कः

प्रयोग इति चेत् । चैत्रस्तण्डुलं पचतीत्ययमेव । अथ वा, परसमवेतत्वस्य शक्यत्वेपि चैत्रः स्वात्मानमित्यत्र बाधान्नैतस्यान्वयोस्तु । अन्यांशमादाय तवाप्यन्वयबोधः किं न स्यात् । श्येनेनाभिचरन् यजेतेत्यादिवदिष्टापत्तौ च गतं शक्यत्वेन । अत एव तत्त्वज्ञानान्निःश्रेयसाधिगम इति न्यायसूत्रे कारणत्वार्थकपञ्चम्या नियतपूर्ववर्त्तित्वमात्रं योग्यताबलाद्बोध्यतइति न्यायतात्पर्यटीकायां प्रपञ्चितं सङ्गच्छते । यद्वा परसमवेतत्वस्य शक्यत्वेपि परत्वस्य केवलान्वयितया आवश्यके कार्यकारणभावान्तरे द्वितीयार्थफलप्रकारकबोधं प्रति द्वितीयान्तार्थावृत्तिस्तदन्यवृत्तिर्वा यो व्यापारस्तदुपस्थितिर्विषयतया हेतुरिति कार्यकारणभाव एवोच्यताम् । कुतः परसमवेतत्वमपि तदर्थः कल्प्यते । उभयकल्पने गौरवतरत्वात् । परसमवेतत्वस्यान्यत्रान्वयवारणाय कार्यकारणभावान्तरकल्पनेतिगौरवाच्च । न च चैत्रमैत्रौ परस्परं गच्छत इत्यत्र व्यापारस्य द्वितीयान्तार्थवृत्तित्वाद्व्यभिचारः । द्वितीयान्तार्थवृत्त्यन्योन्याभावप्रतियोगितावच्छेदकव्यापारोपस्थितेर्विवक्षितत्वात् । परस्परव्यापारेपि परस्परवृत्तिभेदप्रतियोगितावच्छेदकत्वाबाधान्न दोषः । परसमवेतत्वे शक्तिग्रहशून्यस्य देवदत्तः स्वात्मानं गच्छतीत्यत्रापि बोधान्नैवं कार्यकारणभाव इति चेत्, प्रस्थितं तर्हि तच्छक्यत्वेन । कृष्णः स्वात्मानं गच्छतीत्यत्र बोधस्येष्टत्वात् । परसमवेतत्वशक्तिग्रहवतस्त्वनन्वयादेव बोधासम्भवात् । नहि घटपदस्य पटे शक्तिग्रहवतः पटबोधाद् घटपदं पटे शक्तं भवति । तादृशस्य साधुत्वं स्यादिति चेन्न । प्राङ्निरासात् । संज्ञयोर्बाध्यबाधकभावस्य प्रागभिधानात् । नहि परसमवेतक्रियाजन्यधात्वर्थतावच्छेदकफलशालित्वं परिष्कृतमपि द्वितीयोत्पत्तौ तत्सा-

धुत्वे वा नियामकम् । ग्रामं गमयति देवदत्तं विष्णुमित्र इत्यत्रैव पाचयति देवदत्तेन विष्णुमित्र इत्यत्रापि द्वितीयापत्तेर्दुर्वारत्वापत्तेः । घटं जानातीच्छति करोति पश्यति शब्दं शृणोति गन्धं जिघ्रतीत्यादौ नियामकाभावेन द्वितीयानुत्पत्तिप्रसङ्गाच्च । न च साविषयान्यस्मिन्नेतत् । तत्र तु विषयतयान्वय एव तथेति वाच्यम् । देवदत्ताय क्रुध्यति द्रुह्यति ईर्ष्यति असूयति कृष्णाय रोचते स्वदते मोदकः । पुष्येभ्यः स्पृहयतीत्यादौ सम्प्रदानादिष्वापत्तेः । अन्यथा देवदत्तमभिक्रुध्यतीत्यपि न स्यात् । अथ संज्ञैव तन्नियामिका तर्हि तावद्वाच्यकथनं निष्फलम् । शाब्दबोधातिप्रसङ्गस्याप्युक्तरीत्यैव निरस्तत्वात् । तस्मान्न परसमवेतत्वमर्थः कल्प्यः । एवमवच्छेदकेत्यपि व्यर्थम् । धात्वर्थफलशालित्वस्यैव तथात्वे लाघवात् । नैयायिकनवीनैः फलव्यापारयोः पृथक् शक्त्यभ्युपगमेन तथा वक्तुमशक्यत्वाच्च । न च घटो भवतीत्यादौ धात्वर्थाश्रये कर्मत्ववारणाय तत्कल्प्यतइति वाच्यम् । तत्रापि कर्तृसंज्ञया कर्मसंज्ञाया बाधेनादोषात् । व्याप्तिरेव भवत्यादौ फलमिति प्रागभिहितपक्षे घटादौ शङ्काया अप्यभावाच्च । नैयायिकादीनामकर्मकेषु फलस्याभावाच्च । यन्तु द्वितीयादिवाच्यं फलमिति । तन्न । धातोः फलवाचकतायाः कृत्योकर्मकतापत्तेरित्यत्र व्युत्पादितत्वेनान्यलभ्यतया द्वितीयायास्तत्र शक्तिकल्पनाऽयोगादिति सुधीभिर्ध्येयम् । यन्तु कर्मत्वत्वादिना बोधात्तत्तद्रूपेणैव शक्तिः । किं चाश्रयत्वरूपस्य तस्य संसर्गत्वेन भानमभ्युपेयम् । तथा च सति तण्डुलः पचतीत्यत्रापि तथा बोधापत्तिः । न च द्वितीयासमभिव्याहार एव तादृशबोधे कारणम् । प्रथमायाः कर्मत्वे शक्तिग्रहदशायां तण्डुलः पचतीत्यत्रापि तथा बोधेन व्यभिचा-

रादित्याहुः । तच्चिन्त्यम् । कर्मत्वत्वादिना बोधस्य तादृशव्युत्पत्त्यधीनत्वेनाप्रमाणत्वात् । सर्वेषां तथानुभवात् । फलांशस्य धातुना आश्रयत्वांशस्य संसर्गतयापि लाभे विशिष्टशक्यत्वस्यान्याय्यत्वाच्च । आश्रयत्वरूपकर्मत्वस्य शक्यत्वे आश्रयत्वत्वस्यावच्छेदकत्वापत्तौ गौरवाच्च । तण्डुलः पचतीत्याद्यतिप्रसङ्गः परेषामपि समानः । तण्डुलपदोत्तराम्पदज्ञानत्वेन हेतुता, तण्डुलः पचतीत्यत्र तदभावान्नास्माकमतिप्रसङ्ग इति चेन्न । तण्डुलान् पचतीत्यत्राम्पदाभावेपि बोधेन व्यभिचारात्तथा हेतुहेतुमद्भावासिद्धेः । तण्डुलपदोत्तरद्वितीयाज्ञानत्वेन हेतुत्वमिति चेन्न । तण्डुलवाचकपर्यायान्तरस्थलेपि बोधेन व्यभिचारात् । तण्डुलार्थकपदोत्तरकर्मत्वार्थकपदजन्योपस्थितित्वेन हेतुत्वमित्यत्र यदा तण्डुलपदान्न तण्डुलोपस्थितिः द्वितीया च कर्मत्वस्य वृत्ता । एवं सोस्तीत्यत्र तण्डुलार्थकात्तत्पदात्तण्डुलोपस्थितिश्च वृत्ता तदापि त्वदुक्तसामग्रीसत्त्वाद्बोधापत्तेः । नन्वेतदर्थं कर्मताविशेष्यकशाब्दबुद्धित्वावच्छिन्नं प्रति कर्मत्ववाचकविभक्तिप्राग्वर्त्तिपदजन्यज्ञानत्वेन हेतुत्वम् । घटं पटमित्यादिसाधारण्यात् । एवं स्वाधेयतासंसर्गावच्छिन्नघटप्रकारकशाब्दबुद्धित्वावच्छिन्नं प्रति घटवाचकपदोत्तरविभक्तिज्ञानत्वेन हेतुत्वं वाच्यं, घटं घटेनेत्यादिसाधारण्यात्तथा च न दोष इति चेन्न । यत्र तच्छब्दादेव घटकर्मत्वोपस्थितिस्तत्र विभक्तिं विनापि बोधेन व्यभिचारात् । कर्मत्वधर्मिकघटाविधेयकशाब्दबोधे एव तद्धेतुरिति चेन्न । प्रथमायाः कर्मत्वे शक्तिभ्रमदशायां बोधेन त्वदुक्तरीत्यैव व्यभिचारात् । पटपदस्य घटे शक्तिभ्रमेपि बोधाच्च । अथ तादृशबोधं प्रति कर्मत्वोपस्थापकविभक्तिप्राग्वर्त्तिपदजन्यज्ञानत्वेन हेतुत्वं वाच्यम् । एवं तादृ-

शबोधे घटोपस्थापकपदोत्तरविभक्तिजन्योपस्थितित्वेन हेतुत्वमिति चेन्न । व्यभिचारात् । घटः कर्मत्वमित्यत्रापि तथा व्युत्पत्तिसत्त्वे बोधस्य सर्वसिद्धत्वात् । अथ कर्मत्वबोधकपदप्राग्वर्त्तिपदज्ञानत्वेन हेतुत्वं वाच्यम् । एवं परत्रापि घटोपस्थापकपदोत्तरपदजन्यज्ञानत्वेन हेतुत्वं वाच्यमिति चेन्न । पदमात्रे व्युत्पन्नानां तादृशानुपूर्वीज्ञानतात्पर्यज्ञानादिमतामपि बोधापत्तेः । सामग्रीसत्त्वात् । घटः कर्मत्वमित्यत्रापि विपरीतव्युत्पत्तिरहितस्य बोधापत्तेश्च । अथ घटप्रकारककर्मत्वविशेष्यकशाब्दबुद्धिं प्रति घटोपस्थापकपदोत्तरकर्मत्वार्थकपदजन्यज्ञानत्वेन हेतुत्वमिति कार्यकारणभावग्रहोपि हेतुरभ्युपेयः । तथा च नौदनः पचतीत्यत्रातिप्रसङ्गः । अनयैव रीत्या विभक्त्यन्तरेपि कार्यकारणभाव ऊहनीय इति चेत् । समानं तर्ह्यस्माकमपि । कर्मणि शक्त्यभ्युपगमात् । एतावांस्तु विशेषो यत्परेषां कर्मत्वबोधकपदघटितानुपूर्वीत्वेन प्रवेशोस्माकं पुनः कर्मबोधकपदत्वेन. तत्रास्माकमेव लाघवम् । न च भवन्मते आश्रयमात्रमर्थः । तथा चाश्रयवाचकपदप्रवेशः कार्यस्तथा चौदनेन पचतीत्यत्रापि कर्मविशेष्यकबोधापत्तिरिति वाच्यम् । आश्रयशब्दस्यैक्येपि कर्मकरणादौ शक्यतावच्छेदकीभूताश्रयत्वस्य तत्तच्छक्तिरूपस्य भिन्नस्याभ्युपगमात् अन्यथा द्वितीयादेः पर्यायतापत्तेः । अस्तु वा फलाश्रयत्वरूपकर्मत्वेन कार्यकारणभावे प्रवेशो । नैतावता फलांशस्य द्वितीयार्थता । अशक्यत्वेपि फलस्य तन्निष्ठत्वानपायादित्याद्यूह्यम् । तस्मात्सिद्धमात्रं द्वितीयार्थ इति । एतच्च सप्तविधमित्युक्तं वाक्यपदीये । "निर्वर्त्य च विकार्यं च प्राप्यं चेति त्रिधामतम् । तच्चेप्सिततमंकर्म चतुर्धान्यत्तु कल्पितम् ॥औदासीन्येन यत्प्राप्यं यच्च कर्तुरनीप्सितम् । संज्ञान्तरैरनाख्यातं यद्यच्चाप्य-

न्यपूर्वकामिति ॥ निवर्त्यादित्रितयस्य लक्षणमप्युक्तम् । सती वा ऽविद्यमाना वा प्रकृतिः परिणामिनी । यस्य नाश्रीयते तस्य निर्वर्त्यत्वं प्रचक्षते ॥ प्रकृतेस्तु विवक्षायां विकार्यं कैश्चिदन्यथा । निर्वर्त्यं च विकार्यं च कर्म शास्त्रे प्रदर्शितम् । यदसज्जायते सद्वा जन्मना यत्प्रकाशते । तन्निर्वर्त्यं विकार्यं तु द्वेधा कर्म व्यवस्थितम् ॥ प्रकृत्युच्छेदसम्भूतं किं चित्काष्ठादिभस्मवत् । किं चिद् गुणान्तरोत्पत्त्या सुवर्णादिविकारवत् ॥ क्रियाकृताविशेषाणां सिद्धिर्यत्र न गम्यते । दर्शनादनुमानाद्वा तत्प्राप्यमिति कथ्यते इति ॥ तत्र निर्वर्त्यम् घटं करोति । अत्र घटस्य प्रकृतिः सत्यपि न परिणामित्वेन विवक्षिता । भस्म करोतीत्यत्रापि काष्ठादिप्रकृतेरविद्यमानाया अविवक्षायां निर्वर्त्यतैव । एवं घटं करोतीत्यत्रापि प्रकृतेः परिणामित्वेनविवक्षायांविकार्यतैवेति केचित् । अन्ये तु घटं करोतीति निर्वर्त्यमेव । घटादि चासदेव नैयायिकादिनये । सदिति स्वरीत्या सांख्यादिमते च । अत एव वक्ष्यति । उत्पत्तेः प्रागसद्भावो बुद्ध्यवस्थानिबन्धनः । अविशिष्टः सतान्येन कर्ता भवति जन्मनः ॥ कारणं कार्यभावेन यदा वा व्यवतिष्ठते । कार्यशब्दं तदा लब्ध्वा कार्यत्वेनोपजायते ॥ यथाहेः कुटिलीभावो व्यग्राणां वा समग्रता । तथैव जन्मरूपत्वं सतामेके प्रचक्षत इति ॥ विकार्यं च द्विविधम् । प्रकृत्युच्छेदसम्भूतम् । प्रकृतिभूतस्यात्मन उच्छेदसम्भूतं प्राप्तम् । काष्ठं भस्म करोति । गुणान्तरोत्पत्त्या । सुवर्णं कुण्डलं करोति । अत्र काष्ठसुवर्णयोः परिणामित्वविवक्षाविवक्षयोरपि भस्मकुण्डलरूपकर्मणोर्निर्वर्त्यतैव । काष्ठसुवर्णयोस्तु विकार्यत्वमित्यवधेयम् । प्राप्यम् । रूपं पश्यतीति । अत्र क्रियाकृतो विशेष आवरणभङ्गरूपोस्त्येव प्रतिपत्तृगम्यश्चेति यद्यपि, तथापि प्रतिपत्तृव्यतिरि-

क्तपुरुषापेक्षया विशेषो न गम्यतइति क्रियाकृतेत्यस्यार्थो बोध्यः। औदासीन्येन । ग्रामं गच्छन् तृणं स्पृशति । कर्तुरनीप्सितम् । विषं भुङ्क्ते । संज्ञान्तरैरनाख्यातम् । अकथितमित्यर्थः । गां दोग्धि । अन्यपूर्वकम् । संज्ञान्तरप्रसङ्ग इत्यर्थः । क्रूरमभिक्रुध्यतीत्यादि सुधीभिरूह्यम् । ननु काष्ठं विकार्यं कर्मेत्युक्तमयुक्तम् । क्रियाजन्यफलाश्रयत्वाभावादिति चेत् । अत्राहुः । प्रकृतिविकृत्योरभेदविवक्षया निरूढयोत्पत्त्याश्रयता । यद्वा । काष्ठानि विकुर्वन्भस्म करोतीत्यर्थः । तण्डुलात् विक्लेदयन्नोदनं निर्वर्त्तयतीतिवत् । एतच्च द्व्यर्थः पचिरिति प्रक्रम्य भाष्ये व्युत्पादितमिति ग्रन्थकृतः ॥ तृतीयाया अप्याश्रयोर्थः । तथाहि । कर्तृकरणयोस्तृतीया । तत्र स्वतन्त्रः कर्त्ता । स्वातन्त्र्यं च धातूपात्तव्यापारवत्त्वम् । धातुनोक्तक्रिये नित्यम् कारके कर्तृतेष्यतइति वाक्यपदीयात् । अत एव स्थाल्यादिव्यापारस्यापि धातुनाभिधाने स्थाल्यादेः कर्तृत्वम् । स्थाली पचतीति दर्शनात् । उक्तं हि वाक्यपदीये । 'धर्मैरभ्युद्यतैः शब्दे नियमो न तु वस्तुनि । कर्तृधर्मविवक्षायां शब्दात्कर्ता प्रतीयते ॥ एकस्य बुध्यवस्थाभिर्भेदेन परिकल्पने । कर्मत्वं करणत्वं च कर्तृत्वं चोपजायते' इति । नन्वेवं "कर्मकर्तृव्यपदेशाच्चे"ति सूत्रे 'मनोमयः प्राणशरीर' इति वाक्यस्थमनोमयस्याब्रह्मत्वे 'एतमितः प्रेत्याभिसम्भवितास्मी'ति प्राप्तिकर्मत्वकर्तृत्वव्यपदेशो विरुद्ध इति भगवता व्यासेन निर्णीतं कथं सङ्गच्छताम् । एव 'मधिकं तु भेदनिर्देशादि' ति सूत्रे जगत्कारणं ब्रह्म शरीरादधिकम् । 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्य' इत्यादिषु कर्तृकर्मभावभेदेन व्यपदेशादिति निर्णीतम् 'भेदव्यपदेशाच्चे' ति सूत्रे मुमुक्षोः प्राणभृतः सकाशाद्गंतव्यस्य द्युभ्वाद्यायतनस्य 'तमेवैकं जा-

नथ आत्मान' मित्यत्र ज्ञातृज्ञेयभावेन भेदेन व्यपदेशाद्भेद इतिनिर्णीतमितिचेत् उच्यते। जीवस्यैव ज्ञेयत्वे प्राप्तिकर्मत्वमपि वाच्यम्। कर्तृत्वं च तस्याख्यातेनोक्तम्। न चैकस्यैकदा संज्ञाद्वयं युक्तम्। कर्तृसंज्ञया कर्मसंज्ञायां बाधात्। तथा चैतमिति द्वितीया न स्यात्। कर्मकर्तृतायां च यगाद्यापत्तिः। किं चैवमपि कर्तृसंज्ञया कर्मसंज्ञाया बाधात् द्वितीयानुपपत्तिरिति भवति शब्दविरोधद्वारा स भेदहेतुरिति। अत एव व्यपदेशान्निर्देशादित्यपि सङ्गच्छते। अन्यथा कर्तृत्वकर्मत्वाभ्यामित्याद्येवावक्ष्यत्। एवमन्यत्राप्यवधेयम्। अत एव घटो भवतीत्यत्र घटव्यापारस्य धातूपात्तत्वात्तत्रास्य कर्तृत्वमुपपद्यतइति भामत्याम्। धातूपात्तव्यापाराश्रयः कर्त्तेति कर्त्तृलक्षणयोगाद् घट एवोत्पत्तिकर्त्तेति कल्पतरौ चोक्तं सङ्गच्छते। अत एव 'यज्ज्वलन्ति हि काष्टानि तत्किं पाकं न कुर्वतइत्याहुः। अत एव बाधलक्षणे ऽस्थियज्ञे क्रत्वर्थे तु क्रियते गुणभूतत्वादिति क्रत्वर्थाभ्युच्चयाधिकरणे। न चैतन्यायापेक्षं कर्तृत्वं काष्ठादीनामपि ज्वलनादौ कर्तृत्वात्। यस्यैवान्यापेक्षया आख्यातोपात्तव्यापारसमवायः स कर्ता। तस्माच्छुक्लान्वारम्भणादिकर्मास्थिभिः कर्तव्यमिति सिद्धान्तितम्। स च व्यापार आख्यातार्थो धात्वर्थो वेत्यन्यदेतत्। एवं चात्रापि व्यापारांशस्य धातुलभ्यत्वादाश्रयमात्रमर्थः। यथा च स्थाल्यादिव्यापारस्याभिधानेपि देवदत्तः स्थाल्या पचति स्थाल्यां वेति नासङ्गतं तथोक्तमधस्तात्। यत्तु कृत्याश्रयः कर्त्ता। कर्त्तेत्यत्र कृधातोः कृतिवाचकत्वात्तृचश्चाश्रयवाचकत्वादिति योगार्थबलात्तत्राश्रयांशस्य प्रकृत्यैव लाभात्कृतिरेवार्थ इति। तन्न। कृतेरपि धातुलभ्यतायाः अस्माभिर्व्युत्पादनात्। यन्तु सामग्रीसाध्ययां क्रियायां सर्वेषां स्वस्वव्या-

पारे स्वातन्त्र्यात्स्वतन्त्र इत्यव्यावर्तकमिति । तन्न । धातूपात्त-व्यापारवत्त्वरूपं स्वातन्त्र्यं पारिभाषिकं नैकदा सर्वेषामिति प्रा-गुक्तत्वात् । माधवाचार्याः पुनर्धातुवृत्तौ " प्रागन्यतः शक्ति-लाभान्न्यग्भावापादनादपि । तदधीनप्रवृत्तित्वात्प्रवृत्तानां नि-वर्त्तनात् ॥ अदृष्टत्वात्प्रतिनिधेः प्रविवेके च दर्शनात् । आरा-दप्युपकारित्वात्स्वातन्त्र्यं कर्त्तुरुच्यते" इति वाक्यपदीयेन स-मादधिरे । तदर्थस्तु करणादितः प्रागेव परस्मादार्थितादेरेव निमित्तात्कर्ता प्रवर्त्तते । करणादि तु तदधीनप्रवृत्ति । तथाहि । अर्थी हि कर्त्ता तत्प्रयुङ्क्ते न तदेनम् । किं च तस्य प्रतिनिधि-र्दृश्यते व्रीह्यभावे नीवारैरिज्यते । कर्त्तुः स नास्ति । तद्भेदे क्रि-यान्तरमेवेति प्रसिद्धिः । किञ्च । कारकान्तरानुपादानेप्यसौ दृश्यते भवत्यादिष्वित्यादिरिति च वदन्ति । अत्राचेतने दण्डः करोतीत्यादौ कथं कर्तृत्वम् । लक्षणाया अपि स्वेच्छामात्रेण बहुशो निराकृतत्वादिति चिन्त्यम् । अयं च त्रिविधः । शुद्धः प्रयोजको हेतुः कर्मकर्ता च । देवदत्तेन हरिः सेव्यते । का-र्यते हरिणा । गमयति कृष्णं गोकुलम् । अत्र देवदत्ताभिन्नाश्र-यको हरिकर्मकः सेवनानुकूलो व्यापारः । हर्यभिन्नाश्रयक उ-त्पादनानुकूलो व्यापारः । गोकुलकर्मकगमनानुकूलकृष्णाश्र-यकतादृशव्यापारानुकूलो व्यापार इत्याद्यूह्यम् । यत्तु कारक-परीक्षायाम् । तत्र पञ्चविधः कर्त्तेति प्रतिज्ञायाभिहितकर्त्ता ऽन-भिहितकर्ता चेति भेदद्वयमुक्तम् । तद् भ्रान्त्यैव । उक्तत्रयस्यै-वाभिधानमनभिधानं चेति तदतिरिक्तभेदाभावात् । अन्य-था त्रयाणामप्यभिधानानभिधानाभ्यां भेदषट्कापत्तिरिति प-ञ्चविधत्वासङ्गतिश्च । अन्यथा कर्म सप्तविधमित्यप्यसङ्गतं स्या-त् । नवविधत्वापत्तेरित्यवधेयम् । करणतृतीयाया अप्या-

अथो व्यापारश्चार्थः । तथाहि । साधकतमकरणम् । तमवर्थः प्रकर्षः । प्रकृष्टं कारणमित्यर्थः । प्रकर्षश्च यद्व्यापारानन्तरमव्यवधानेन फलोत्पत्तिस्तत्त्वम् । एवं च सर्वाण्यपि कारकाणि विवक्षया करणानि । उक्तं च वाक्यपदीये । "क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा यत्र करणं तत्तदा स्मृतम् ॥ वस्तुतस्तदनिर्देश्यं नहि वस्तु व्यवस्थितम् । स्थाल्या पच्यतइत्येषा विवक्षा दृश्यते यत" इति । एवं चाश्रयांशो मूले उपलक्षणमिति बोध्यम् । अथैवं सर्वेषां कारकाणां करणत्वे सर्वत्र तृतीया स्यादिति चेन्न । विवक्ष्यते यदा यत्रेत्यत एव तद्वारणात् । न चैकदा सर्वेषां विवक्षेति । नन्वेवं "कर्ता शास्त्रार्थवत्त्वा"दित्युत्तरमीमांसाधिकरणे "शक्तिविपर्ययादि"ति सूत्रेणान्तः करणस्य कर्तृत्वे करणशक्तिविपर्ययापत्तिरुक्ता न युज्येतेति चेत् । सत्यम् । अभ्युच्चयमात्रं तदिति यथा च तक्षोभयथेत्यधिकरणे भाष्यादौ स्पष्टत्वादिति । अधिकरणसप्तम्या अप्याश्रयमात्रमर्थः । तथाहि । आधारोधिकरणम् । तच्चाश्रयत्वम् । तत्राश्रयोर्थः । आश्रयत्वं चाखण्डशक्तिरूपमवच्छेदकम् । न चाश्रयत्वमात्रेण कर्त्तृकर्मकरणानामाधारसंज्ञा स्यात् । स्यादेव यदि तत्संज्ञाभिः स्वविषये ऽस्या न बाधः स्यात् । नन्वेवमपि द्वितीयातृतीयासप्तमीनां पर्यायतापत्तिरिति चेन्न । फलाश्रये द्वितीयायाः व्यापाराश्रये तृतीयायाः कर्तृकर्माश्रये सप्तम्या विधानात् । यद्यपि कारके इत्यधिकृत्योक्ताथाः सप्तम्याः क्रियाधारे इत्यर्थो लभ्यते । तथापि कर्तृकर्मद्वारा तदाश्रयत्वमक्षतमेवेति न दोषः । उक्तं हि वाक्यपदीये "कर्तृकर्मव्यवहितामसाक्षाद्धारयत्क्रियाम् । उपकुर्वत् क्रियासिद्धौ शास्त्रेधिकरणं स्मृत"मिति । एतच्च त्रिविधम् । औपश्लेषिकं

वैषयिकमभिव्यापकं चेति । कटे आस्ते । गुरौ वसति । मोक्षे इच्छास्ति । तिलेषु तैलमिति । एतच्च संहितायामिति सूत्रे महाभाष्ये स्पष्टम् । अवधिः पञ्चम्यर्थः । अपादानेपञ्चमीति सूत्रात् । तच्च ध्रुवमपायेपादानमिति सूत्रादपायो विश्लेषस्तद्वत्त्वे सति तज्जनकक्रियावधिभूतमपादानमित्यर्थकादवधिभूतमिति भावः । उक्तं च वाक्यपदीये । "अपाये यदुदासीनं चलं वा यदि वाचलम् । ध्रुवमेवातदावेशात्तदपादानमुच्यते ॥ पततो ध्रुव एवाश्वो यस्मादश्वात्पतत्यसौ । तस्याप्यश्वस्य पतने कुड्यादि ध्रुवमिष्यते ॥ उभावप्यध्रुवौ मेषौ यद्यप्युभयकर्मके । विभागे प्रविभक्ते तु क्रिये तत्र विवक्षिते ॥ मेषान्तरक्रियापेक्षमवधित्वं पृथक्पृथक् । मेषयोः स्वक्रियापेक्षं कर्तृत्वं च पृथक्पृथगि,,ति । अस्यार्थः । अपाये इति सतिसप्तमी । तथा च विश्लेषवत्त्वे सति तद्धेतुक्रियाया-मुदासीनमनाश्रयः । अतदावेशात् । विश्लेषहेतुक्रियानाश्रयत्वात् । एवं च विश्लेषहेतुक्रियानाश्रयत्वे सति विश्लेषाश्रयत्वं फलितम् । वृक्षात्पर्णं पततीत्यत्र पर्णस्य तद्वारणाय सत्यन्तम् । धावतोऽश्वात्पततीत्यत्राश्वस्य क्रियाश्रयत्वाद्विश्लेषहेत्विति । कुड्यात्पततो ऽश्वात्पततीत्यत्राश्वस्य तादृशक्रियाश्रयत्वेपि तत्र विरुद्धमित्याह । यस्मादश्वादिति । तद्विश्लेषहेतुक्रियानाश्रयत्वे सतीति विशेषणीयम् । तथा च पुरुषपतनहेतुक्रियानाश्रयत्वं न विरुद्धमिति भावः । एवमश्वनिष्ठक्रियानाश्रयत्वात्कुड्यादेरपि ध्रुवत्वमित्याह । तस्यापीति । ननूभयकर्मजविभागस्थले परस्परस्मान्मेषावपसरत इत्यादौ विभागस्यैक्यात्तद्विश्लेषजनकक्रियानाश्रयत्वाभावादपादानत्वं न स्यादित्यत आह । उभावपीति । मेषान्तरइति । यथा निश्चलमेषादपसरद्द्वितीयमेषस्थले ऽपसर-

द्वद्वितियिमेषाक्रियामादयापरस्य ध्रुवत्वम् । तथात्रापि विभागस्यैक्येपि क्रियाभेदादेकनिष्ठक्रियामादायापरस्य ध्रुवत्वमित्यर्थः । तथा च विश्लेषाश्रयत्वे सति तज्जनकक्रियानाश्रयत्वं तक्रियायामपादानत्वमिति भावः । न चैवमपि वृक्षात्स्यन्दतइति स्यादिति शङ्क्यम् । आसनाच्चलितः इतिवदिष्टत्वात् । न चैवमपि वृक्षात्यजतीति दुष्परिहरम् । वृक्षस्य धात्वर्थफलाश्रयत्वेन कर्मसंज्ञया अपादानसंज्ञाया बाधेन पञ्चम्ययोगात् । तस्मादुक्तावधित्वान्तर्गतव्यापारांशस्य धातुनैव लाभादाश्रयो विभागश्चार्थ इत्याद्यवधेयम् । नैयायिकाः पुनः परसमवेतत्वं विभागश्च पञ्चम्यर्थः । विभागमात्रार्थकत्वे पर्णात्पर्णं पततीति स्यात् । न च धात्वर्थतावच्छेदकफलानाश्रयत्वे सतीत्यपि विशेषणम् । अधोदेशे वृक्षे एव लग्ने पर्णे वृक्षात्पततीत्यनापत्तेः । न च विभागार्थकपञ्चम्याः परसमवेतत्वविशिष्टे लक्षणा तस्य च धात्वर्थेन्वयः । परत्वं च त्वद्रीत्यैव स्वमकृत्यर्थापेक्षयेति वाच्यम् । शुद्धशक्त्या प्रयोगस्थलाभावात् । अन्यथैवकारस्य व्यवच्छेदमात्रे शक्तिः पार्थान्यत्वादिविशिष्टे लक्षणा फलमेव द्वितीयार्थः परसमवेतत्वे लक्षणेत्यपि स्यात् । एवं च परसमवेतत्वं शक्यमेव । तथा च वृक्षात्पर्णं पततीत्यादौ वृक्षनिष्ठविभागानुकूलवृक्षान्यसमवेतपतनानुकूलव्यापारवदिति बोधः । परस्परस्मान्मेषावपसरत इत्यादौ एतन्मेषनिष्ठविभागजनकैतन्मेषान्यनिष्ठापसरणाश्रय इति रीत्या स्वयमूहनीयमित्याहुः ॥ इदं पुनरिहावधेयम् । विभागाश्रयत्वमात्रमर्थः । न त्वस्मद्रीत्या विश्लेषजनकक्रियाविशेषानाश्रयत्वमर्थः । पररीत्या च परसमवेतत्वमिति युक्तम् । व्यर्थत्वात् । पर्णात्पर्णमिति प्रयोगस्यैकदा कर्त्रपादानसंज्ञयोर्बाध्यबाधकभावेना-

सम्भवात् । अन्यथा ग्रामं त्यजतीत्यादौ त्यजिकर्मण्यतिव्याप्तेर्दुर्वारत्वापत्तेः । शाब्दबोधस्यापि द्वितीयार्थनिर्णये निरस्तत्वादिति दिक् । बलाहकाद्विद्योततइत्यादौ निःसृत्येत्यध्याहृत्यावधित्वं द्रष्टव्यम् । रूपं रसात्पृथगित्यादावपि बुद्धिपरिकल्पितमपादानत्वं नानुपपन्नम् । इदं च "निर्दिष्टविषयं किं चिदुपात्तविषयं तथा । अपेक्षितक्रियं चेति त्रिधापादानमुच्यते" इति वाक्यपदीयात्त्रिविधम् । यत्र साक्षाद्धातुना गतिर्निर्दिश्यते तन्निर्दिष्टविषयम् । यथाश्वात्पतति । यत्र तु धात्वन्तरार्थाङ्गं स्वार्थं धातुराह, तदुपात्तविषयम् । यथा बलाहकाद्विद्योततइति । निःसरणाङ्गे विद्योतने द्युतिर्वर्तते । यथा वा कुसूलात्पचतीति । आदानाङ्गे पाकेत्र पचिर्वर्तते । यत्र प्रत्यक्षासिद्धमागमनं मनसि निधाय पृच्छति तदपेक्षितक्रियम् । यथा कुतो भवानिति पृच्छति । पाटलिपुत्रादिति चोत्तरयति । अत्रागमनमर्थमध्याहृत्यान्वयः कार्य इत्याद्यूह्यम् ॥ उद्देश्यः सम्प्रदानचतुर्थ्यर्थः । तथाहि । चतुर्थीसम्प्रदाने इति सूत्रात्सम्प्रदाने चतुर्थी । तच्च कर्मणायमभिप्रैतिससम्प्रदानमिति सूत्रात्कर्मणा करणभूतेन कर्त्रा यमभिप्रैति ईप्सति तत् कारकं सम्प्रदानं स्यादित्यर्थकादुद्देश्यविशेषः । सम्यक् प्रदीयते यस्मै तत्सम्प्रदानमित्यन्वर्थसंज्ञां स्वीकृत्य स्वस्वत्वत्यागपूर्वकत्यागोद्देश्यत्वं चतुर्थ्यर्थ इति तु वृत्त्यनुसारिणः । भाष्यकारास्तु खण्डिकोपाध्यायस्तस्मै चपेटां ददाति, न शूद्राय मतिं दद्यादित्यादिप्रयोगान्नैतावत्पर्यन्तमर्थः । रजकस्य वस्त्रं ददातीत्यादि तु शेषत्वमात्रविवक्षायां षष्ठीत्याहुः । नन्वेवमजां नयति ग्राममिति नयतिक्रियाकर्माभिरजैः सम्बध्यमानस्य ग्रामस्यात्र सम्प्रदानत्वं स्यादिति चेन्न । यमभिप्रैतीत्युक्त्या हि यमिति निर्दिष्टस्योद्देश्यत्वलक्षणं शेषित्वं कर्मणेति निर्दिष्ट-

स्य गवादेः शेषत्वं च प्रतीयते । न चेह ग्रामं प्रत्यजा शेषभूता । अत एव प्रयोजकलक्षणे प्रासनवन्मैत्रावरुणाय दण्डप्रदानमित्यधिकरणे क्रीते सोमे मैत्रावरुणाय दण्डं प्रयच्छतीति विहितं दण्डप्रदानं न प्रतिपत्तिः किं तु द्वितीयापेक्षया बलीयस्या चतुर्थीश्रुत्या अर्थकर्मेत्युक्तमिति प्रपञ्चितं शब्दकौस्तुभे । इदं च "निराकरणात्कर्तुस्त्यागाङ्गं कर्मणेप्सितम् । प्रेरणानुमतिभ्यां च लभते सम्प्रदानता" मिति वाक्यपदीयात्त्रिविधम् । आद्यं सूर्यायार्घ्यं ददाति । नात्र सूर्यः प्रार्थयते न चानुमन्यते न च निराकरोति । प्रेरकं यथा । विप्राय गां ददाति । अनुमन्तृ यथा । उपाध्यायाय गां ददाति । ननु दानस्य तदर्थत्वात्तादर्थ्यचतुर्थ्यैव सिद्धौ सम्प्रदानचतुर्थ्यारम्भो व्यर्थ एवेति चेन्न । दानक्रियार्थं हि सम्प्रदानं न तु दानक्रिया तदर्था । कारकाणां क्रियार्थत्वात् । सम्प्रदानार्थं तु दीयमानं कर्मेति वाक्यार्थभूतायां दानक्रियायां अतादर्थ्यात्तादर्थ्यचतुर्थ्यप्रवृत्तेः । तदेतत्सूत्रयति । त्यागाङ्गं कर्मणेप्सितमिति हेलाराजीयादौ स्थसूम् । अत्र सर्वत्र प्रकृतिप्रत्ययार्थयोरभेद एव संसर्गः । विभक्तीनां धर्मिवाचकत्वात् । न च धर्मवाचकतैव किं न स्यादिति वाच्यम् । आश्रयत्वरूपस्य वाच्यत्वे आश्रयत्वत्वस्यावच्छेदकत्वापत्तौ गौरवात् । तस्य संसर्गतयापि लाभेनान्यलभ्यत्वाच्च । फलव्यापारयोर्धातुनैव लाभात् । कर्मणिद्वितीयेत्यादिसूत्रस्वरसभङ्गापत्तेश्च । पञ्चम्याद्यर्थकसमासानां धर्मिपरतायां निर्विवादत्वेनान्यत्रापि तथैव न्याय्यत्वाच्च । सर्वेषां कर्मप्रत्ययानां कर्मार्थकत्वाच्च । अत एव कृतः कट इति सामानाधिकरण्यं सङ्गच्छते । अत एव सुपां कर्मादयोप्यर्थाः संख्या चैवेति सङ्गच्छते । न च कर्त्रादिपदान्यत्र सर्वत्र त-

स्वपराणि कृतः कट इति सामानाधिकरण्याभावप्रसङ्गादित्याहुः । न च प्रकृतिप्रत्ययार्थयोरभेदान्वयबोधो ऽव्युत्पन्नः । ऐन्द्रं वैश्वदेवीत्यादौ देवतादिविशिष्टामिक्षादिवाचकेषु तथा दर्शनेनाव्युत्पत्तेरभावात् । न चाश्रयमात्रार्थकत्वे प्रातिपदिकस्यापि तदर्थकत्वात्प्रातिपदिकमात्रार्थकप्रथमया सह विकल्पापत्तिः । प्रातिपदिकार्थमात्रइति मात्रग्रहणात्तदतिरिक्तार्थाभावे एव प्रथमाविधानात् । द्वितीयादीनां पुनराश्रयत्वादिरूपकर्मत्वादेरपि वाच्यतावच्छेदिकाया वाच्यत्वादिति ॥ सम्बन्धः षष्ठ्यर्थः । षष्ठीशेषइति सूत्रात् । शेषे, सम्बन्धमात्रविवक्षायामिति व्याख्यानात् । ओदनस्य पाक इति कर्मतायां षष्ठीत्यादिकं कथमिति चेत् । अत्र वक्ष्यामः । नन्वाश्रयोपि न विभक्त्यर्थः । घटादिरूपस्य तस्य प्रकृत्यैव लाभात् । एवमवधिरपि वृक्षादिरूपो न विभक्त्यर्थः । उद्देश्योपि ब्राह्मणादिर्नार्थः । तथा चाश्रयत्वादिकमेवार्थः । अनन्यलभ्यत्वात् । तच्च निरूपकत्वादिना धात्वर्थेऽन्वेति । तत्प्रकारकबोधस्य सर्वसिद्धस्य संसर्गतयापि लाभ इत्यादिहेतुकतामालम्ब्य खण्डयितुमशक्यत्वात् । कर्मणिद्वितीयेत्यादेः शक्तितद्वतोस्तादात्म्याभ्युपगमेनोपपत्तेः । अन्यथा द्व्येकयोर्द्विवचने इत्याद्यनुरोधादेकवचनादेः संख्याविशिष्टाश्रयवाचकतापत्तेर्दुर्वारत्वापत्तेः । तिङ्कृदादेस्तु पचति पक्ता पक्व इत्यादिप्रयोगेष्वाश्रयबाधानुरोधात् । कृतः कटः देवदत्तः पचति इति सामानाधिकरण्यप्रतीतेर्युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यम इति व्यवहारस्योपपत्तेश्चानुरोधाद्युक्तं कर्तृकर्मादिवाचकत्वम् । सुपां च प्रकृत्यैवाश्रयलाभान्न तथात्वसम्भवः । पञ्चम्याद्यर्थकबहुव्रीह्यादीनामप्युक्तरीत्यैव तत्तद्विभक्तिप्रकृत्यर्थकत्वस्वीकारेण धर्मिपरत्वनिर्वाहेण धर्मिवाचकत्वासाधकत्वात् । अन्य-

था षष्ठ्यर्थबहुव्रीहेरपि सम्बन्धिवाचकता न स्यात्। आश्रयत्वस्य वाच्यत्वे तत्त्वस्यावच्छेदकत्वापत्तौ गौरवमिति चेन्न। तस्यैव तादात्म्येनावच्छेदकत्वसम्भवात्। प्रामाणिकगौरवस्यादोषत्वाच्च। व्यापकत्वरूपस्यावच्छेदकत्वस्य शक्तिसिद्धावदोषत्वाच्च। तथात्वे शक्यत्वं तस्यापि स्यादिति चेन्न। अशक्यत्वेप्यवच्छेदकत्वस्य वक्ष्यमाणरीत्या सम्भवात्। एवं चाश्रयत्वादेरेव वाच्यत्वे ध्रुवे तदेवाखण्डं शक्तिशब्देनोच्यते इति मनसि निधाय शक्तिर्विभक्त्यर्थ इति सप्तमीपञ्चम्यौकारकमध्यइत्यादौ भाष्यादौ व्यवह्रियतइति तदेवाभिप्रेत्याह। शक्तिरेव वेति। षण्णां कारकविभक्तीनामिति शेषः। शेषषष्ठ्यास्तु प्रागुक्तं सम्बन्धसामान्यमर्थः। शक्तीनां प्रवृत्तिनिमित्तं स शब्द एव। संज्ञाशब्दत्वात्। उक्तं च हरिणा। "नित्याः षड् व्यक्तयोन्येषां भेदाभेदसमन्विताः। क्रियासंसिद्ध्यर्थेषु जातिवत्समवस्थिताः॥ द्रव्याकारादिभेदेन ताश्चापरिमिता इव। दृश्यन्ते तत्त्वमासां तु षड् शक्तीर्नातिवर्तते॥ निमित्तभेदादैकैव भिन्ना शक्तिः प्रतीयते। षोढा कर्तृत्वमेवाहुस्तत्प्रवृत्तिनिबन्धन"मिति। एतन्मते ऽनभिहितइत्यत्र तत्तच्छक्त्यनभिधानइत्यर्थः। आख्यातार्थेप्यवच्छेदकत्वेन शक्तिरस्त्येवेति कार्यव्यवस्था। एवं च देवदत्तेन पुत्रस्य गौर्हस्तेन ब्राह्मणाय गेहाद्गङ्गायां दीयते इत्यादौ पुत्रसम्बन्धिनी यैका गौस्तत्कर्मकदानानुकूलो देवदत्तकर्तृको हस्तकरणको ब्राह्मणसम्प्रदानको गेहावधिको गङ्गाधिकरणको वर्त्तमानो व्यापार इति बोधः। इत्थमन्यदप्यूह्यम्। पक्षद्वयेपि कारकाणां यथासम्भवं क्रियानिर्वर्तकत्वं संसर्गतया लभ्यामित्याद्यूह्यम्। यत्तु मीमांसकाः, सकर्त्वधिकरणे कर्त्तुरीप्सिततमं कर्म, तथायुक्तं चानीप्सितमिति सूत्रानुरोधादुभयसाधारणं साध्यत्वं द्वितीयार्थः। उ-

उक्तं च शास्त्रदीपिकायाम् । "श्रुत्या साध्याभिधायित्वं द्वितीयायाः प्रतीयते । कर्तुर्यदीप्सितं यच्च तथायुक्तमनीप्सितम् ॥ तत्कर्म तत् द्वितीयार्थ इत्येवं पाणिनेः स्मृतिः । बलीयसी च साचारात्प्रयोगश्चास्ति तादृश" इति ॥ सक्तून् जुहोतीत्यत्र च भूतभाव्यनुपयुक्तत्वेन सक्तूनां साध्यत्वासम्भवेन सक्तुकरणकहोमानुकूलव्यापारप्रतीतये तृतीयार्थः करणत्वं द्वितीयया लक्ष्यते । उक्तं च भट्टपादैः । "भूतभाव्युपयोगं हि संस्कार्यं द्रव्यमिष्यते । सक्तवो नोपयोक्ष्यन्ते नोपयुक्ताश्च ते क्व चित् ॥ प्राधान्यमेव तत्रापि द्वितीयावदिति स्वतः । विरोधात्तेन सम्बन्धी गुणभावस्तु लक्ष्यते" इति ॥ एवं च व्रीहीनवहन्तीत्यत्रावहनेन व्रीहीन् भावयेदित्यर्थः । यद्यपि व्रीहयः सिद्धा एव क्रियायाः साधनानि च । तथा ऽपि संस्कार्यत्वमेव तदत्र बोध्यम् । एवं सक्तून् जुहोतीत्यत्र सक्तुभिर्भावयेदित्यर्थः । अनयैव रीत्या "तत्प्रकृतं चान्यशास्त्र" मिति न्यायात्स एष यज्ञः पञ्चविधः । अग्निहोत्रं दर्शपूर्णमासावित्यादितश्चाग्निहोत्रशब्दस्य नामत्वसिद्धावग्निहोत्रं जुहुयात्स्वर्गकाम इति वाक्ये ऽग्निहोत्रामिति द्वितीया साधनत्वं लक्षयति । तथा चाग्निहोत्रेण स्वर्गं भावयेदिति वाक्यार्थ इत्याहुः । तत्र यद्यपि साध्यत्वे शक्तिविशेष एवाभ्युपेय इति कर्मशक्तिर्वाच्येति न विरुध्यते । वक्ष्यमाणरीत्या द्वितीया कर्मण्येवेति नियमाभ्युपगमेपि सुपांसुलुक्, छदसिबहुलमित्यादिभिश्छन्दस्यर्थान्तरेपि साधुता लभ्यते । तथापि घटं जानाति रथेन गम्यतइत्यादौ सुपां तिङां च लक्षणेत्येवमादि स्वेच्छया न्यायानुरोधेन नैयायिकमीमांसकाद्युक्तां विभक्तौ लक्षणां पूर्वोक्ते प्रमाणोपदर्शनव्याजेन निराचिकीर्षुराह । सुपाकर्मेतीति । अयमभिप्रायः । "सुपां कर्मादयोप्यर्थाः सङ्ख्या

चैव तथा तिङाम् । प्रसिद्धो नियमस्तत्र नियमः प्रकृतेषु चे"-ति वार्त्तिकात्कर्मादेर्वाच्यतायास्तन्नियमस्य च लाभः । तथाहि । स्वौजसमौट्, कर्मणिद्वितीया, द्व्येकयोरित्यादेः तिप्तस्झि, लः-कर्मणि, द्व्येकयोः, तान्येकवचनद्विवचनबहुवचनान्येकश, इत्यादे-श्चैकवाक्यतया कर्मादेः सङ्ख्यायाश्च वाच्यतालाभः । तथा तत्र नियमश्च शास्त्रे प्रसिद्धः । कर्मणि द्वितीयैव, करणे तृतीयैव, अ-भिहिते प्रथमैव, एकत्वे एकवचनमेव, नान्यदित्यर्थनियम इत्य-र्थः । यद्वा । प्रकृतेषु नियमः । प्रकृतार्थापेक्षो नियमः, द्वितीया कर्मण्येव तृतीया करणएव, प्रथमा ऽभिहिते एवेत्यादिरित्यर्थः । उभयथापि व्याकरणस्य "सिद्धे शब्दार्थसम्बन्धे लोकतोर्थप्रयु-क्ते शब्दप्रयोगे शास्त्रेण धर्मनियम" इतिवार्त्तिकात् । "समाना-यामर्थावगतौ साधुभिश्चासाधुभिश्च गम्यागम्येतिवन्नियमः क्रियते" इति भाष्यादिभ्यश्च द्वितीया कर्म्मण्येव साधुर्द्वितीयैव कर्मणि साधुरित्यादेः सर्वत्र पर्यवसानाद् द्वितीया करणादौ लक्षणयाप्यसाधुः स्यात् । एवं शास्त्रेणेति वार्तिकादौ सामान्य-शब्दोपादानाद्व्याकरणस्थाः सर्वे विधयो नियमविधय इति ध्व-नितत्वात्तत्तद्विधिविरुद्धाः स्वेच्छया कं चित् न्यायाभासमङ्गी-कृत्य स्वीकृता मीमांसकनैयायिकाद्युक्ता लक्षणा न साध्व्य इति दिक् । यद्यपि सुपां कर्मादय इति वार्तिकं तथापि इति इत्य-स्येत्यर्थः । तथा चोभयसिद्धतापीति भावः । व्याख्यानव्या-ख्येययोरभेदाभिप्रायेणेदमुक्तमित्यन्ये ॥ २४ ॥

इति वैयाकरणभूषणे कारकार्थनिर्णयः समाप्तः ॥

नामार्थानाह ॥

एकं द्विकं त्रिकं चाथ चतुष्कं पञ्चकं तथा ।

नामार्थ इति सर्वेमी पक्षाः शास्त्रे निरूपिताः २५

एकम् । जातिः । द्विकम् । जातिव्यक्ती । त्रिकम् । सालिङ्गे ते । चतुष्कम् । ससङ्ख्यानि तानि । पञ्चकम् । सकारकाणि तानि । तत्र पूर्वपूर्वस्य प्रातिपदिकार्थत्वे उत्तरमुत्तरं विभक्त्यर्थो विना द्रव्यं चरमपक्षे विभक्तिर्द्योतिकैवेति द्रष्टव्यम् । तत्र प्रथमपक्षे इत्थमुपपत्तिः । जातिरेव पदार्थो लाघवात् नानाव्यक्तीनां शक्यत्वे गौरवात् । न च प्रत्येकं व्यक्तिभिर्विनिगमनाविरहः । एवं व्यक्त्यन्तरे लक्षणायां स्वसमवेतसमवायित्वं संसर्ग इति गौरवम् । जातिशक्तिपक्षे च स्वसमवायित्वं तथेति लाघवात् । किं च । "अन्वयव्यतिरेकाभ्यामेकरूपप्रतीतितः । आकृतेः प्रथमज्ञानात्तस्या एवाभिधेयता" । येनापि व्यक्तिर्वाच्याभ्युपेयते तेनापि जातिर्वाच्याभ्युपेयतएव । अन्यथा शुद्धव्यक्तेः शक्यतापत्तेस्तथानानन्त्याद्व्यभिचाराच्च तत्र शक्तिग्रहानुपपत्तिः । एवं चावश्यकत्वात्सैव वाच्यास्तु । एकाकारप्रतीतिश्च शुद्धव्यक्तिवाच्यत्वे न स्यात् खण्डत्वादेरेव शक्यतावच्छेदकत्वात् । प्रथमत आकृतेरेवोपस्थितेश्च । एवं च नागृहीतविशेषणान्यायेन जातेर्वाच्यत्वावश्यकत्वादास्तां सैवार्थ इति । नन्वेवं गां दद्याद्व्रीहीनवहन्तीति स्थले कथमन्वयः । जातौ तदयोगात् । कथं वा दानकर्मता गौत्वादेरिति चेत् । अत्राक्षेपितव्यक्तौ दानाद्यन्वयः कर्मतापि तस्या एवेत्याहुः । तन्न । प्रत्ययानां प्रकृत्यर्थान्वितेत्यादिव्युत्पत्तेः कर्मत्वान्वयस्यासम्भवात् । पदार्थान्तरान्वयश्चाक्षेपिते न स्यात् । उक्तं हि तद्भूताधिकरणे "गम्यमानस्य चार्थस्य नैव दृष्टं विशेषणम् । शब्दान्तरैर्विभक्त्या वा धूमोयं ज्वलतीतिव" दिति । कश्चाक्षेपपदार्थः । अर्थापत्तिरिति चेन्न ।

अनुपपत्तिज्ञानमन्तरेणापि गां दद्यादित्यादितो बोधदर्शनात् । उक्तदोषानतिरेकाच्च । समानवित्तिवेद्यत्वमिति चेन्न । द्रव्यमित्यादिघटज्ञाने घटत्वभानाभावात् । लक्षणयोपस्थितव्यक्तौ तदन्वयानुपपत्तिरित्यन्ये । तन्न । लक्षणायाः शक्यान्वयानुपपत्तिज्ञानाधीनत्वेनोक्तदोषादिति । अत्र वदन्ति । निरूढलक्षणया जातिव्यक्त्योर्भेदाद्वा व्यक्तेर्लाभः । तदुक्तं भट्टैः, "तेन तल्लक्षितव्यक्तेः क्रियासम्बन्धचोदना । व्यक्त्याकृत्योरभेदो वा वाक्यार्थेषु विवक्षित" इति । नन्वेवं व्यक्तौ संख्याकारकानन्वयप्रसङ्गः प्रत्ययानामिति व्युत्पत्तेरिति चेन्न । प्रकृत्यर्थत्वं हि वृत्त्या प्रकृत्युपस्थाप्यत्वम् । अन्यथा गङ्गायां घोष इत्यत्र तीरेधिकरणत्वान्वयानापत्तेः । तथा च लक्षणयोपस्थितव्यक्तौ तदन्वयो न विरुद्धः । नन्वेवं 'स्वार्थादन्येन रूपेण ज्ञाते भवति लक्षणे' ति नियमात्कथं घटत्वरूपेणोपस्थिते लक्षणेति चेन्न । एतन्नियमे मानाभावात् । नीलमानयेत्यादौ नीलपदस्य नीलरूपवति लक्षणाभ्युपगमाद्व्यभिचाराच्चेति । तदेतदभिप्रेत्यैव 'सवर्णेणग्रहणमपरिभाष्यमाकृतिग्रहणादि'ति वार्त्तिकं सङ्गच्छतइति । अथ वा । व्यक्तिमात्रमेकशब्दार्थः । केवलव्यक्तिपक्षस्यापि शास्त्रे बहुशो दर्शनात् । युक्तं चैतत् । व्यवहारेण शक्तिपरिच्छेदकशिरोमणिना व्यक्तावेव तत्परिच्छेदात् । परिच्छिन्नापि लाघवादग्रे बाध्यतइति चेत् । एवं हि परिच्छिन्नोपि कर्मधारयोग्रे ऽपूर्वविधाकल्पनभिया बाध्येतेति निषादस्थपत्यधिकरणविरोधः । अपि च । गां दद्यादित्यत्रानुपपत्तिः । गोत्वादेर्दानाद्यसम्भवात् शक्यसम्बन्धरूपलक्षणाया अग्रहात् । व्यक्त्यन्तरे सम्बन्धज्ञानस्य व्यक्त्यन्तरबोधाहेतुत्वात् । तथात्वे वा हस्तिपकव्यक्त्यन्तरे तत्त्वं धर्मितावच्छेदकीकृत्यापि हस्तिसम्बन्धग्रहाद्यत्र हस्तिपके स न गृहीतस्तस्यापि हस्तिदर्श-

नास्मरणापत्तेः। सर्वेष्वेव गां नयेत्यादिजातिविशिष्टबोधकवाक्येषु वृत्तिद्वयकल्पनायां गौरवाच्च। युगपद्वृत्तिद्वयाविरोधस्यादूषणतापत्तेश्च। अत एव 'जातेरस्तित्वनास्तित्वे नहि कश्चिद्विवक्ष्यति। नित्यत्वाद्यलक्षणीयाया व्यक्तेस्ते हि विशेषणे, इति मण्डनमिश्राः परास्ताः। जातिव्यक्त्योरभेदादानान्वय इति चेन्न। तथा सति व्यक्तेर्वाच्यत्वमायातमेव। आनन्त्याद्युक्ताकृत्यधिकरणीयदोषतादवस्थ्याच्च। यत्तु तैरुक्तम्। व्यक्तिर्द्विरूपा सामान्यात्मिका विशेषात्मिका च। तत्र सामान्यरूपेण वाच्यता न विशेषात्मनेति। तन्न। विशेषरूपेणावाच्यताया अस्माभिरपि स्वीकारात्। यत्तु मीमांसकादिभिरुक्तम्। "आनन्त्यव्यभिचाराभ्यां शक्त्यनेकत्वदोषतः। सन्देहाच्चरमज्ञानाच्चिन्नबुद्धेरभावतः"। केवलव्यक्तेर्वाच्यत्वे तासां बहुत्वाद्गौरवम्। अनन्तव्यक्तीनामेकपदोपस्थित्यभावेन सङ्केतग्रहासम्भवश्च। ननु यत्र क्वचिदेव व्यक्तौ शक्तिग्रहोस्तु कारणम्, शाब्दबोधे त्वगृहीतशक्तिकैव व्यक्तिर्भासतइत्यङ्गीकार्यमिति चे, तर्हि व्यभिचाराच्छक्तिग्रहः कारणमेव न स्यात्। शक्तिग्रहाविषयस्यापि शाब्दबोधविषयत्वात्। गोपदादश्वादेरपि भानप्रसङ्गश्च। शक्तेः पदार्थान्तररूपत्वात्तस्याश्च सम्बन्धिकपदार्थस्य सम्बन्धिभेदेन भिन्नत्वात्तत्तद्व्यक्तिभेदेन भेदप्रसङ्गाच्च। गोपदादियं सा वेति सन्देहप्रसङ्गाच्च। चरमं व्यक्त्युपस्थितेश्च। गोपदात्खण्डत्वादिरूपेण बोधप्रसङ्गाच्चेति। यदपि काव्यप्रकाशकारेणोक्तं गौः शुक्लश्चलो डित्थ इत्यादीनां जातिगुणक्रियासंज्ञाशब्दत्वेन विषयविभागः शुद्धव्यक्तिवाच्यत्वे न स्यादिति। तच्चिन्त्यम्। येन रूपेणोपस्थिते शक्तिग्रहस्तेन रूपेण पदार्थोपस्थितिः स च धर्मो ऽशक्योपि तदवच्छेदकत्वात् पदात्स्मृतः शाब्दबो-

धे भासते अतो जातिप्रकारकबोधजनकस्तदवच्छिन्नशक्तिमान्वा जातिशब्द इति व्यवस्थावशात् न कश्चिद्दोषः । उक्तं च भट्टपादैररुणाधिकरणे । "आनन्त्येपि हि भावानामेकं कृत्वोपलक्षणम् । शब्दः सुकरसम्बन्धो न च व्यभिचरिष्यती"ति। एवं चाव्यापकस्यापि व्यापकतावच्छेदकत्ववदलक्ष्यस्य च न्यायनये लक्ष्यतावच्छेदकत्ववदकारणत्वेपि कारणतावच्छेदकत्ववदशक्यत्वेपि शक्यतावच्छेदकत्वं सम्भवत्येव । तत्प्रकारकभानमपि हस्तिमात्रादौ हस्तिपकादिसम्बन्धग्रहणात्तद्रूपेणोपस्थितिवत्ससम्बन्धिकपदार्थमात्रएव सम्बन्धग्रहणस्य विशिष्टोपस्थापकत्वात् । न्यायनयेप्याकाशादिपदानां शब्दाश्रयत्वविशिष्टे अशक्तत्वस्वीकारात्तस्माच्छब्दाश्रयत्वरूपेण, गङ्गायां घोष इत्यादौ तीरत्वादिना, दण्डात् घटत्वेन घटाद्दण्डत्वेन चोपस्थित्यर्थं तथानियमावश्यकत्वादिति सुधीभिरूह्यम् ॥ द्विकमिति । जातिव्यक्ती इत्यर्थः। अयं भावः।जातिविशिष्टा व्यक्तिः शब्दार्थः सङ्केतस्य बोधकत्वस्य वा विशिष्टे एव ग्रहात् । घटत्वप्रकारकघटविशेष्यकबोधे घटशक्तिज्ञानत्वेन कारणतेत्यपि न । द्रव्यादिपदानामप्येवमापत्तौ घटपदात् द्रव्यत्वप्रकारकबोधप्रसङ्गात् । न च द्रव्यपदोपस्थितित्वेनापि तत्र हेतुत्वामिति वाच्यम् । तत्पर्यायान्तरात्तथाबोधानापत्तेः । नापि द्रव्यत्वार्थकपदज्ञानत्वेन हेतुता । द्रव्यादिपदानामतथात्वेन ततोपि तथा बोधानापत्तेः । न च पदज्ञानस्य सम्बन्धिज्ञानत्वेन हेतुता । तत्र च येन रूपेणोपस्थितयोः सम्बन्धग्रहस्तेन रूपेणोपस्थापकत्वानियमाद्गवादिपदानां गोत्वरूपेणोपस्थिते तद्भूहाद्गोत्वाद्यंशे शक्त्यग्रहेपि तेनैव रूपेणोपस्थितिर्नान्यथेति वाच्यम् । पदान्नियमेनोपस्थितावपि गोत्वादेः शाब्दे विषयत्वासम्भवात् । तदंशे शक्त्य-

भावात् । अन्यथा गोपदस्य शक्तिग्रहसमये गोत्वस्येव धर्मान्तरस्याप्युपस्थितौ ततस्तत्पदात्तद्धर्मस्याशक्यस्याप्युपस्थितौ शाब्दबोधे भानप्रसङ्गः । घटादिपदादुपस्थितस्याकाशादेरपि शाब्देन्वयापत्तेश्चेति । तस्माद्विशिष्टं शक्यम् । एकामिति पक्षस्य चैकमेवान्तर्भाव्य कार्यकारणभाव इत्यभिप्रायः । तथाहि । घट इत्येतादृशबोधे घटत्वशक्तिज्ञानत्वेन कारणता । लाघवात् । न तु घटत्वविशिष्टशक्तिज्ञानत्वेन । शक्तिज्ञानकारणत्वे वैशिष्ट्यघटयोरवच्छेदकत्वमपेक्ष्य घटत्वमात्रस्यैव तत्त्वौचित्यात्। तथा च त्वया तत्कारणतायामवच्छेदकतया घटस्तद्वैशिष्ट्यं चाधिकं प्रवेश्यते इति गौरवम्। अयं च जातिशक्तिवादो गुरूणामपि सम्मतः॥ अन्यथा केवलजातावेव शक्त्यभ्युपगमे कार्यान्विते पदशक्तिवादस्तेषां न सिध्येत् । व्यक्तीनामेव कार्यान्वितत्वात् । यत्तु घटत्वशक्तिज्ञानत्वेन घट इत्येतादृशबोधे कारणतायां घटोस्तीत्यत्रेव घटत्वमस्तीत्यत्रापि तथा बोधापत्तिरिति विशिष्टशक्तिज्ञानत्वेन हेतुतेति । तन्तुच्छम् । घटत्वप्रकारकघटविशेष्यकशाब्दबोधं प्रति घटत्वांशे ऽन्याप्रकारकघटत्वशक्तिज्ञानत्वेन हेतुत्वाभ्युगमात् । तत्र शुद्धस्याभिलापासम्भवात् घटत्वशब्देनाभिधानं कृतम्। अत एव घटत्वशक्तिज्ञानत्वेन हेतुत्वमते घटत्वत्वप्रवेशाद्गौरवमिति प्रत्युक्तम् । वस्तुतो निरवच्छिन्नप्रकारतासम्बन्धेन घटत्वशक्तिज्ञानत्वेनैव तत्र हेतुत्वम् । घटत्वमस्तीत्यत्र च न घटत्वं प्रकार इति दोषः । तस्माच्छक्तिर्विशिष्टएव । कार्यकारणभावः पुनरुपदर्शितरीत्यैवेत्यवधेयम्। उक्तं हि भाष्ये । नह्याकृतिपदार्थस्य द्रव्यं न पदार्थ इति । अत एव द्विकमिति पक्षेणाविरोधः । अन्यथान्यतरस्याप्रामाण्यापत्तेः । विरोधात् । तदाहुः । 'को हि मीमांसको ब्रूयाद्विरोधे वाक्ययोर्मिथः। एकं प्रमाणमित-

रदप्रमाणमितीदमपि,ति । तथा च द्विकमित्यादेरपि द्विकं शक्यमित्येवार्थो न तथा कार्यकारणभाव इति ध्येयम् । नन्वत्र पक्षद्वये सर्वशब्दानां त्रैलिंग्यं स्यात् । लिङ्गाबाचकत्वस्य सर्वत्र तुल्यत्वादिति चेत्, न । पुल्लिङ्गाभिधायिप्रत्ययत्वं तत्त्वमित्युपपत्तेः । अत्र शुक्लपक्षद्वयेपि लिङ्गस्य प्रत्ययार्थत्वात् । प्रकृतिवर्जिते केवलप्रत्ययादेव स्त्री ईयतीत्यादौ तत्प्रतीतेस्तथैव न्याय्यत्वात् । इदम्शब्दात्किमिदम्भ्यां वोघ इति वतुपो वकारस्य घकारादेशे आयनेयीनीयीयः फढखच्छघां प्रत्ययादीनामित्यनेन घकारस्येयादेशे इदम ईशि यस्येति चेति प्रकृतीकारलोपे उगितश्चेति ङीपि ईयतीति हि रूपम् । अन्वयव्यतिरेकाभ्यां प्रत्ययस्यैव शक्तिसिद्धेश्च । स्त्रियामित्यधिकृत्यैवाजाद्यतष्टाबित्यादिना टाबङ्गीषादेर्विधानात् । तस्माच्छसोनः पुंसीत्यादेरनुशासनस्यानुरोधाच्च । एवं संख्यादावपि द्रष्टव्यम् ॥ त्रिकमिति ॥ जातिव्यक्तिलिङ्गानीत्यर्थः । अयं भावः । स्तनकेशवती स्त्री स्यादित्यादिना विवक्षितमवयवसंस्थानविशेषत्वमेव स्त्रीत्वपुंस्त्वादिकम् । न चैतच्छास्त्रीयव्यवहारहेतुः दारानित्यादौ नत्वाभावप्रसङ्गात् । तटः तटी तटमित्यादौ यथायथं लिङ्गत्रितयनिबन्धनकार्याणामसिद्धिप्रसङ्गाच्चेति वाच्यम् । आरोपादेव निर्वाहसम्भवात् । लिङ्गानुशासनस्य रात्रान्हाहाः पुंसीत्यादेश्च तत्र मानत्वादित्येके । भाष्यकारास्तूक्तानुपपत्त्यैव तन्मतमिरस्य स्त्रियामिति सूत्रे सत्त्वरजस्तमसां प्राकृतगुणानां वृद्धिः पुंस्त्वमपचयः स्त्रीत्वं स्थितिमात्रं नपुंसकत्वम् । अत एवोत्कर्षापकर्षसत्त्वेपि स्थितिमात्रविवक्षायां नपुंसकमिति शास्त्रमुपपद्यते । उत्कर्षापकर्षसाम्यावस्थात्रयसाधारणस्थितिमात्रविवक्षायां नपुंसकं भवतीति तदर्थात् । तच्च केवलान्वय्यर्थनिष्ठं च । अयं पदार्थ इयं

व्यक्तिरिदं वस्त्विति सर्वत्र व्यवहारात् । पुल्लिङ्गः शब्द इत्यादिप्रयोगस्तूपचारात् । पुमान् लिङ्गमस्मात्प्रतीयतइति वा अस्य शक्यमिति वा यौगिको वा । आङोनास्त्रियां, तस्माच्छसोनः पुंसीत्यादिशास्त्रीये शाब्दे लौकिके च व्यवहारेष्येतान्येव निमित्तानीत्याहुः । अन्ये तूपचयापचयादोर्विरुद्धस्यैकत्र समावेशायोगात्कथं तटः तटी तटमित्यादयो व्यवहाराः । गुणानां क्षणिकत्वाभ्युपगमेपि युगपत्तथाव्यवहारानापत्तिः । आत्मा ब्रह्मेत्यादावविकारिण्यसम्भवश्च । आरोपादिकं च पूर्ववादिनापि सुवचमेवेति न तन्मतदूषणाभिनिवेशः सङ्गच्छते । तस्मा "त्तिस्रो जातय एवैताः केषां चित्समवस्थिताः । अविरुद्धा विरुद्धाभिर्गोमनुष्यादिजातिभि" रिति वाक्यपदीयाज्जातिरेव स्त्रीत्वादिकमित्याहुः । नन्वेवमपि समनियतानां जातीनां सर्वत्र प्रतीतेः केवलान्वयित्वं वाच्यम् । तथा चात्र मते भाष्यमते च पशुना यजेतेत्यत्र पशुस्त्रिया यागप्रसङ्गः विवक्षितेपि पुंस्त्वे तस्य केवलान्वयित्वेनाव्यावर्त्तकत्वादिति चेन्न । "छागो वा मन्त्रवर्णा" दिति षष्ठान्त्याधिकरणन्यायेनैव निर्वाहात् । किं च । उक्तमतद्वयेपि कुमारब्राह्मणच्छागादिशब्दानां पुंस्येव प्रयोगव्यवस्थित्यनुरोधेन लौकिकपुंस्त्वविशिष्टे शास्त्रीयपुंस्त्वे शक्तिस्वीकारात्तद्विवक्षयैवानतिप्रसङ्गात् । एवं कुमार्यादिशब्दा लौकिकस्त्रीत्वविशिष्टे शास्त्रीयस्त्रीत्वे शक्ताः । अस्तु वा कुमारशब्द एवोभयत्र शक्तः । ङीबादि स्त्रियां नादि च पुंस्त्वे द्योतकमित्यवधेयम् । एतच्च लिङ्गं केषां चिदुभयं केषां चिदेकं केषां चित्त्रयमपीत्यत्र लिङ्गानुशासनं प्रमाणमिति स्थितं शब्दकौस्तुभे । अत्र प्रथमपक्षे लौकिकलिङ्गे पृथक्शक्तिर्न कल्प्येति लाघवम् । आरोपश्च खट्वेत्यादावभ्युपेयः । चरमे गौरवमनारोपश्च । भाष्यमते तूभयं कल्प्यमिति

विवेकः । वस्तुतस्तु भाष्यमते लिङ्गं शब्दनिष्ठमेव । पुल्लिङ्गः शब्द इत्यादिव्यवहारात् । पुल्लिङ्गवाचकत्वात्तथेति चेत् । तर्हि घटः शब्दे इत्यपि स्यात् । आरोपे सति निमित्तानुसरणमित्यादेरतिगौरवात् । अर्थनिष्ठत्वे तटस्तटीतटमित्यादेरात्माब्रह्मेत्यादेरनुपपत्तेरुक्तत्वाच्च । छाग्या यागप्रसङ्गाच्च । यत्तु छागादिशब्दानां पुंस्येव नियतप्रयोगानुरोधेन लौकिकपुंस्त्वविशिष्टे शास्त्रीये शक्तेस्तद्विवक्षयानतिप्रसङ्ग इति । तन्न । एवमप्यचेतनवाचकानां मध्वादिशब्दानां माक्षिकादौ पुन्नपुंसकत्वं वसन्तादौ शुद्धपुंस्त्वमिति व्यवस्था न स्यात् । एवं "स्वो ज्ञातावात्मनि स्वन्त्रिष्वात्मीये स्वोस्त्रियां धन" इत्यादिलिङ्गनियमोच्छेदापत्तिः । अत्र प्रकारान्तरानुसरणे तेनैवोपपत्तेर्लौकिकलिङ्गे वाच्यत्वकल्पनं मुधैव, शब्दनिष्ठत्वे च नानुपपत्तिलेशोपि । तथाहि । ह्रस्वत्वदीर्घत्वोदात्तत्वानुदात्तत्ववत् । स्त्रीत्वपुंस्त्वादिविरुद्धधर्मवत्त्वाच्छब्दा भिद्यन्ते । आनुपूर्वीसाम्यस्यापि तद्वदेवार्थभेदाच्छब्दभेदवादिनो मतइव चोपपत्तेः । केषां चिल्लिङ्गानुशासनेनैकलिङ्गत्वव्यवहारश्च समानानुपूर्वीकत्वेन तेषां तन्त्रेणानुकरणादुपपद्यते । एवं च तटादिशब्देषु समानानुपूर्वीकेषु लिङ्गत्रयं छागादिषूभयं पदार्थादिष्वेकमस्तीति सर्वत्र मुख्य एव लिङ्गप्रयोगः । तत्र पुंस्त्वे नाभावः स्त्रीत्वादौ टाबादि द्योतकम् । तच्च शब्दनिष्ठमपि शब्दवाच्यमर्थपरिच्छेदकत्वेनान्वेति । लिङ्गविशेषविशिष्टस्यैवार्थविशेषवाचकताया लिङ्गानुशासनशास्त्रसिद्धत्वात्स्वाश्रयवाच्यत्वसम्बन्धेन लिङ्गस्यार्थव्यावर्त्तकत्वोपपत्तेः । अत एव प्रयोगनियमोपपत्तिः । यद्वा । शब्दनिष्ठमेवार्थविशेषनिर्णायकमस्तु बहुव्रीह्यादिस्वर इवान्यपदार्थादेः । एवं च पशुनेत्यत्रापि पुंस्त्वस्य परिच्छेदकत्वान्न पशुस्त्रिया यागप्रसङ्गः । न वा तेषां विरु-

द्धत्वेन क्व चिदारोप इत्यभ्युपगमः । न च पशुशब्दस्य नित्यपुंस्त्वात्पदार्थादिशब्दोदितलिङ्गवत्साधारण्यात्कथं स्त्रीपशुव्यावृत्तिरिति वाच्यम् । पश्वा न तायुं गुहा चरन्तमिति ऋग्वेदे दर्शनात्पशुनेति पुंस्त्वस्य परिच्छेदकत्वान्न पशुस्त्रिया याग इति मीमांसायां निर्णीतत्वाच्च तस्य नित्यपुंस्त्वाभावनिर्णयात् । तथा निर्णयेपि वा नानुपपत्तिः । छागो वा मन्त्रवर्णादिति षष्ठान्त्याधिकरणन्यायेन छागव्यक्तिविशेषस्येव पुंस्त्वस्यापि मन्त्रवर्णत एव लाभात् । छागस्य वपाया इति मन्त्रे छागस्येति पठितस्य छागभिन्नइव स्त्रियामसम्भवात् । यत्र तु विधौ सन्दिग्धं तत्रापि सन्दिग्धे तु वाक्यशेषादित्यधिकरणेन निर्णयः । सङ्ख्यादिवत् । यथा "सारस्वतौ मेषौ भवत" इत्यत्र तद्धितप्रकृतिः स्त्रीलिङ्गः पुल्लिङ्गो वेति सरस्वत्यै चरुं सरस्वते चरुमिति द्वयोरपि दर्शनात्सन्देहे " एतद्वै दैव्यं मिथुन" मित्यर्थवादादेकशेषेण द्वयोर्ग्रहणमवधार्यते । आग्नेयोष्टाकपालो ऽमावास्यायां पौर्णमास्यां वेति वाक्ये तद्धितप्रकृतिरेकवचनान्तो बहुवचनान्तो वेति अग्नये कृत्तिकाभ्यस्ते अस्मा अग्नयो द्रविणं दत्वेत्यादौ द्वयोरपि दर्शनात्सन्देहे सोग्नये ध्रियस्वेति वाक्यशेषादेकवचननिर्णयः । नन्वस्तु तावदेव, तथापि सर्वनामनिष्ठलिङ्गस्य चेतनाचेतनस्त्रीपुंससाधारणत्वात्प्रास्मा अग्निं भरतेति अधिगुप्रैषस्य सारस्वत्यां मेष्यामपि प्रवृत्तिः स्यात् । न चेष्टापत्तिः । लिङ्गविशेषनिर्देशात्समानविधानेष्वप्राप्ता सारस्वती स्त्रीत्वादित्यूहलक्षणाधिकरणे पशूनां समानविधानत्वेपि पुंलिङ्गनिर्देशान्न तत्र मन्त्र इत्युक्तेः । लौकिकलिङ्गवाच्यत्वपक्षे च नानुपपत्तिः मुख्यत्वे गौणताया अन्याय्यत्वेनारोपस्याप्यसम्भवान्नियमसम्भवात् । न च सामान्ये नपुंसकमित्यनुशिष्टम-

स्मै इति नपुंसकमेव मेषीसाधारणमस्त्विति वाच्यम् । अन्वेनं माता मन्यतामनु पितेत्यन्वादेशेन पुंस्त्वनिर्णयात् । अन्वादेशे नपुंसके एनद्वक्तव्य इति वार्त्तिकादेनदित्यापत्तेरिति चेत् । उच्यते । पूर्वोपस्थिततत्तद्रूपेणोपस्थापकादस्मै एनमित्यादिपदाच्छागत्वादिनेव पुंस्त्वेनापि व्यावृत्तपशूनामेव परामर्शान्न मेष्यां प्रवृत्तिः । तत्रापि बहुनुग्रहाय पुंस्त्वमेवानूद्यते । युक्तं चैतत् । अन्यथा मतान्तरेपि पुमान्स्त्रियेति सूत्रात् त्यदादितः शेषे पुन्नपुंसकतो लिङ्गवचनानीति वार्त्तिकाद्वैकशेषेण मेष्यां प्रवृत्तिः किं न स्यात् । एकवचनादेकशेषाभावो निर्णीयतइति चेत् । तर्हि बहुपशुकेषूक्थादिष्वपि मन्त्रो न स्यात् । तथा चाध्रिगुप्रैषश्च तद्वत्समानविधानाश्चेदित्यधिकरणोच्छेदापत्तिः समानविधाना अपि पशवश्चेत्तथाप्यनेकपशुषु अध्रिगुप्रैषो भवति द्विबहुपत्नीकेष्येकवचनान्तपत्नीमन्त्रवादिति तदर्थात् । यत्तु प्रतिव्यक्तिगतैकत्वान्वयेनैकवचनोपपत्तिरिति । तन्न । प्रत्येकं व्यक्तीनामुपस्थितये एकशेषाभ्युपगमे एकवचनस्यैवासम्भवात् । सम्भवे वोक्तरीत्या मेष्याः सग्रहो दुर्वारः । जात्याख्यायां तादिति तु एकशेषेणानेकसङ्ग्रहस्यैव साधकम् । अन्यथा बहुष्वेकवचनविधानवैयर्थ्यापत्तेः । कृत्वाचिन्तयाधिकरणप्रवृत्तिस्तूभयत्र समेति । अत एव गुणिपराणां शुक्लादिशब्दानां गुणांशस्याधिकस्य बोधनेपि विशेष्यपदोदितलिङ्गसङ्ख्यांशेनुवादत्वेन विशेष्यनिघ्नतोपपत्तिः । अत एव पदार्थमात्रविवक्षायां गुणोत्कर्षापकर्षरूपलिङ्गस्याविवक्षितत्वादवर्जनीयसाम्यावस्थया प्रयोगमाभिप्रेत्य सामान्येनपुंसकमिति विधानं सङ्गच्छते । औत्सर्गिकवचनन्यायात् । अजहल्लिङ्गानां तु दारादिशब्दानां नित्यबहुवचनान्तानामेकस्मिन्निवागत्या तथा प्रयोग इति ध्येयम् । एवं

च समनियतजात्यभ्युपगमदोषोपि न । लौकिकपुंस्त्वादौ पृथक् शक्त्यस्वीकारेण लाघवं चेति युक्तः पन्थाः प्रतिभाति ॥ चतुष्कमिति । सङ्ख्यासहितं त्रिकमित्यर्थः । पञ्चकं, कारकसहितं चतुष्कमित्यर्थः । यद्यपि लिङ्गादीनां त्रयाणामन्वयव्यतिरेकादिभ्यः प्रत्ययवाच्यता युक्ता । तथापि प्रत्ययवर्जिते दधि पश्येत्यादौ तत्प्रतीतेर्लिङ्गानुशासनस्य प्रकृतावेव दर्शनाच्च प्रकृतेरपि तत्र शक्तिः कल्प्यते । तथा च यस्यैव वाचकताग्रहस्तत एव तेषामुपस्थितिः । सम्भेदे चोभयतोपि । अत एव "वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तय" इति वाक्यपदीयं सङ्गच्छते । नन्वेवं नामार्थमकारकशाब्दबोधं प्रति सुबादिजन्योपस्थितेर्हेतुत्वमित्यादिकं विलीयेतेति चेन्न । विभक्तिद्योत्यार्थमादायोपपत्तेः । नैतत्त्रिमुनिसम्मतमिति भ्रमं निराचष्टे । शास्त्रेइति । सरूपसूत्रादौ ॥ २५ ॥

स्थलविशेषे षोढापि प्रातिपदिकार्थ इत्याह ॥

शब्दोपि यदि भेदेन विवक्षा स्यात्तदा तथा ।
नोचेच्छ्रोत्रादिभिः सिद्धोप्यसावर्थैवभासते २६

शब्दस्तावच्छाब्दज्ञानविषय इत्यनुभवसिद्धम् । "विषयत्वमनादृत्य शब्दैर्नार्थः प्रकाश्यत" इति वाक्यपदीयेनुभवप्रदर्शनात् । गामुच्चारयेत्यादावर्थोच्चारणासम्भवेन विना शब्दविषयं शाब्दबोधासङ्गतिश्चेति तत्रापि वृत्तिर्वाच्या । न च लक्षणया निर्वाहः । निरूढलक्षणायाः शक्त्यनतिरेकात् । जवगडदशित्यादौ शक्त्याग्रहेण तत्सम्बन्धरूपलक्षणाया अग्रहाच्च । अगृहीतायाश्च वृत्तेरनुपयोगात् । शक्तिभ्रमस्यापि वक्ष्यमाणरीत्यैवासम्भवात् । एवं भाषाशब्दानामप्यनुकरणे प्रतीयमान-

त्वाशेषां शक्तयभावेन लक्षणाविरहादनुपपत्तिश्चेति शक्तिरेव वाच्या। तथा च शब्दोपि यद्यनुकार्यानुकरणयोर्भेदेन विवक्षा तदा तथेति। अनुकार्य्यः प्रातिपदिकशक्य इत्यर्थः। अयं भावः। पटदिति कुर्वित्याद्यनुकरणस्थलेनुकार्यध्वनीनामनुकरणाद्भेदो ध्वनिमयत्ववर्णमयत्वादिविरुद्धधर्मवत्त्वसिद्धः। तथा च तदुपस्थित्यर्थमुपस्थितस्य तस्य शाब्दज्ञानाविषयत्वनिर्वाहार्थं च शक्तिरवश्यमभ्युपेयेति। नो चेद्भेदविवक्षा। तदा श्रोत्रादिभिः। सिद्धः। उपस्थितः। अर्थेव। अर्थवद्भासते न तु तत्र स्वतन्त्रवृत्तिकल्पनेत्यर्थः। अयं भावः। वृत्तिविषय एव च शाब्दबोधविषय इति नियमोतिप्रसङ्गनिरासाय कल्प्यते। स च निरूपकताश्रयतान्यतरसम्बन्धेन वृत्तिमान् तद्विषय इति नियमेपि नेति, भवति तस्य शाब्दबोधविषयतेति। ननु वृत्तिमत एव शाब्दबोधविषयत्वे प्रत्यक्षादिनोपस्थितघटादेरपि शाब्दबोधविषयतापत्तिरिति विषयतया शाब्दबोधमात्रं प्रति वृत्तिसंस्कारज्ञानान्यतरजन्यपदार्थोपस्थितिर्हेतुरिति निर्णीतमन्यत्र। तथा चात्र वृत्तिमत्त्वे श्रोत्रादुपस्थितौ च सत्यामपि तादृशोपस्थित्यविषयत्वात्कथं शाब्दबोधविषयतेति चेत्। उच्यते। अकारादयः क चिच्छक्ताः वर्णत्वात् नलादिपदं क चिच्छक्तं साधुपदत्वादिति सामान्यतः शक्तिग्रह एव तत्पदवाच्यः कश्चिदर्थोस्तीत्याकारके वाच्यत्वसम्बन्धेन पदप्रकारकबोधे हेतुरित्यनुभवसिद्धम्। अत एवाज्ञातार्थकेष्विदमेकं पदमिति ज्ञातेषु चैत्रगवयनलादिपदेषु श्रुतेषु क एतदर्थ इति प्रश्ने उपमानतल्लक्षणकथनादिना तत्प्रतिवचनानि दृश्यन्ते। अत एव सादृश्याद्युपायेन तद्बोधकत्वेनोपमानादेः प्रसिद्धपदसामानाधिकरण्यादिना तद्बोधकत्वेन कोशादेश्च प्रामाण्यं व्युत्पादयन्ति। अन्यथा न-

लादिपदानामस्मदादीन् प्रत्यबोधकत्वप्रसङ्गश्च । नलत्वादिरूपेण शक्तिग्राहकभावात्तेन रूपेण बोधकत्वासम्भवात् । न चातीतनलादिभाविचैत्रादिवर्त्तमानप्रसिद्धासन्निकृष्टवस्तुगोचराः संस्कारा अनादयो धारारूपेण विशिष्य बोधान्यथानुपपत्त्या कल्प्यन्तइति नैयायिकनव्यकल्पनं युक्तम् । हेत्वसिद्धेः । अन्यथोक्तप्रश्नाद्युच्छेदप्रसङ्गात् । किं च देशान्तरगतं प्रसिद्धं चैत्रं काश्यां शृण्वतां विशिष्यागृहीतसङ्गतिकानामपि नलयुधिष्ठिरादिपदादिवद्बोधानुभवात्तदनुरोधेनानादिसंस्काराद्विशिष्य शक्तिग्रहसत्त्वाभ्युपगमे तेषामेव कालान्तरे विश्वेश्वरमन्दिरे तं पश्यतां चैत्रोत्र नास्तीति वाक्याद्बोधो न स्यात् । स्याद्वा विशिष्य गृहीतसङ्गतिकानां तत्र पश्यतामन्येषाम् । विश्वेश्वरदेवालयत्वं धर्मितावच्छेदकीकृत्य चैत्रत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानं प्रति तदेव धर्मितावच्छेदकीकृत्य चैत्रत्वप्रकारकतद्वत्ताधियः प्रतिबन्धकत्वाभ्युपगमस्य सर्वसिद्धत्वात् । विशिष्य गृहीतसङ्गतिकानामिव तदर्शनात्पदस्मरणं च स्यात् । तदुक्तम् । "यत्संज्ञास्मरणं तत्र न तदप्यन्यहेतुकम् । पिण्ड एव हि दृष्टः सन्संज्ञां स्मारयितुं क्षम" इति । चैत्रोस्ति न वेतिसंशयश्च न स्यादित्यादि भावप्रत्ययार्थनिरूपणे वक्ष्यते । तथा च विशेषरूपेण बोधाभावादेव सर्वसङ्गम इति सिद्धा हेत्वसिद्धिः । तथा च घटचैत्रादिपदानां घटत्वचैत्रत्वादिजातिवच्छक्तिसम्बन्धेन पदमपि शक्यतावच्छेदकत्वाच्छाब्दबोधे भासते । तत्र घटत्वादिजातिवच्छब्दांशे नवृत्तिविषयत्वं कल्प्यम् । मानाभावात् । आश्रयत्वेनैव तत्कार्यासिद्धेः । तथा च सम्बन्धस्योभयनिरूप्यत्वेन सम्बन्धिद्वयोपस्थापकत्वाविशेषाद्घटत्वाद्यवच्छिन्नशक्त्यैव घटादिवच्छब्दस्यापि तयैव वृत्त्योपस्थितौ स-

त्यामर्थबोधनतात्पर्ये सति तत्र विशेषणतया स शब्दो भासते तत्रापि घटत्वादिरूपेण विशिष्य शक्तिग्रहवतां पदजात्युभयप्रकारको बोधो ऽन्येषां पूर्वोक्तप्रकारेणोपस्थितकेवलव्यक्तौ शक्तिग्रहाच्छुद्धतद्व्यक्तिविशेष्यकः केवलपदप्रकारको घटपदवाच्यः कश्चिदर्थ इत्याकारको बोध इति विशेषः । यदा तु न गिरागिरेति ब्रूयात् कवतीषु रथन्तरं गायति अच्छावाकीयं साम गायति रथाभ्यान्नोणः, ससजुषोरुः, गवित्ययमाहेत्यादौ ब्रूयात् गायति आहेत्यादिभिः स्थान्यर्थकषष्ठ्यादिभिश्चान्वययोग्यताकांक्षादिवशाच्छब्दमात्रे तात्पर्यं गृह्यते तदा घटो नित्यः स्वर्गो ध्वस्त इत्यादौ विशेषणांशवच्छब्दस्वरूपमात्रं प्राधान्येन तया शक्त्या प्रतिपाद्यते । वृत्तिसत्त्वेपि तात्पर्यविरहादर्थांशो न बोध्यते । लवणमात्रतात्पर्यदशायां सैन्धवशब्दादश्ववत् बुद्धो वा त्यज्यते । यत्र तूक्तानन्यथासिद्धतात्पर्यग्राहकाभावस्तत्र विशिष्योपदेशेन तथातात्पर्यमाचार्यैर्बोध्यते । यथा स्वंरूपंशब्दस्याशब्दसंज्ञेति सूत्रेण भूसत्तायाम् अग्नेर्ढक् इत्यादौ । न चार्थशक्त्यैव तात्पर्यवशात्प्राधान्येन शब्दस्यापि प्रतिपादनमित्ययुक्तम् । तत्प्रकारकव्यक्तिविशेष्यकबोधत्वस्यैव तद्वृत्तिज्ञानकार्यतावच्छेदकत्वात् । अन्यथा घटो नित्य इत्यादेर्घटत्वे लक्षणा न स्यात् । प्राधान्येन बोधार्थं खलु तत्र लक्षणाश्रयणमिति वाच्यम् । तत्र घटत्वत्वादिरूपेण बोधानुरोधेन लक्षणाभ्युपगमात् । अन्यथा घटत्वनिर्विकल्पकापत्तेश्च । अत्रानुपूर्वीविशिष्टवर्णानां पदरूपतया केवलतदुपस्थितावपि आनुपूर्व्या अवच्छेदकत्वेन भानान्नोक्तदोषः विशेष्यव्यक्त्यंशभानात्पदस्य विशेषणत्वं नास्तीति प्राधान्यमप्यर्थायातम् । मोषवादिभिर्नैयायिकैः प्रमेयत्वप्रकारकसकलानुभवात्प्रमुष्टविशेषणकव्यक्तिमात्रस्मरणा-

भ्युपगमवत्प्रमुखविशेषकशब्दस्मरणाभ्युपगमात् । उच्चारयेत्यादिसमभिव्याहारस्य भोक्षे एवोपयोगात् । वस्तुतो न पदप्रकारकबोधत्वमर्थशक्तिज्ञानकार्यतावच्छेदकं किं तु प्रथमोपस्थितत्वात्सामान्यसामग्रीवशाद्विशेषणत्वेन भानम् । न चैवं कदा त्रिद्विशेष्यताया अप्यापत्तिः । निर्विकल्पकोचरप्रत्यक्षे जातेरिवोपपत्तेरिति तत्त्वम् । तदेतत्सर्वमभिप्रेत्योक्तं वाक्यपदीये । "ग्राह्यत्वं ग्राहकत्वं च द्वे शक्ती तेजसो यथा । तथैव सर्वशब्दानामेते पृथगवस्थिते" इति । अस्यार्थः । द्रव्यचाक्षुषमात्रे आलोकसंयोगो हेतुः । अन्यथान्धकारेपि चक्षुःसंयोगमात्राद्घटचाक्षुषापत्तेरित्यविवादम् । तथा चालोकप्रत्यक्षेपि स्वस्मादेवोपपत्तिर्वाच्या । तथा च यथा घटालोकसंयोगादेव घटस्येवालोकस्यापि प्रत्यक्षं तथार्थगोचरशब्दनिष्ठशक्तयैव शब्दस्यार्थस्य च भानम् । यथा वा घटचक्षुःसंयोगाभावे तस्मादेवालोकसंयोगादालोकस्यैव भानं तथार्थे तात्पर्यविरहे तद्बुद्ध्यैव सति शब्दे तात्पर्यं तस्यैव बोध इति । एवं च श्रोत्रादिभिरिति मूलेपि श्रोत्रमादिर्यस्येति व्युत्पत्त्या शक्तिज्ञानतत्संस्कारा गृह्यन्ते । श्रोत्रेणोपस्थिते शक्तिग्रहादित्यवधेयम् । अत एत गामुच्चारयेत्युक्ते विकृतस्यैवोच्चारणापत्तिः । तादृशस्यैव प्रत्यक्षोपस्थितत्वात् । शब्दस्याप्रकृत्यर्थत्वात्तत्र द्वितीयार्थादेरनन्वयापत्तेश्च । प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः । स्वस्यैव प्रत्यक्षेण शीघ्रमुपस्थितत्वाद्वोरस्तीत्यादावपि स्वपरत्वापत्तेश्चेत्यादिदूषणाभासाः परास्ताः । उक्ततात्पर्यवशाद्बुद्ध्यैवाविकृतस्यैव शब्दादुपस्थितत्वात् । अन्यथार्थपरत्वस्यैव न्याय्यत्वात् । तस्मादुक्ततात्पर्यनिर्णये सति शब्द एव प्राधान्येन भासते तदभावे त्वर्थविशेषणत्वेनैवेति सिद्धम् । अत एवो "त्रिदा यजेत

पशुकामः" "अग्निहोत्रं जुहोती" त्यादौ नामधेयत्वं व्यवस्थाप्य तस्यापि विशेषणत्वेनान्वयादुद्भिन्नामकेन यागेन भावयेदिति वाक्यार्थः सम्पन्न इत्युद्भिदधिकरणे मीमांसकैरुक्तं सङ्गच्छते। यत्तु मीमांसकमते ऽपि नाम्नि लक्षणैव। अन्यथा वृत्त्या ऽनुपस्थितत्वेन शाब्दबोधविषयता न स्यात्। अत एव वाक्यार्थे भट्टपादैर्लक्षणाभ्युपगम्यते परं तु नामनामिसम्बन्धे सर्वत्रैव सेति निरूढेति न दोष इति समादधिरे। तन्न साधीयः। उक्तरीत्या क्लप्तशक्त्यैवोपपत्तौ गौरवग्रस्तलक्षणाकल्पनानौचित्यात्। लक्षणया सर्वत्रानिर्वाहस्य प्रागुक्तत्वाच्च। किञ्च। एवं हि नामतोच्छेदापत्तेर्वृद्धिमिच्छतो मूलनाशन्यायापातः। गुणविधित्वे हि 'मत्वर्थलक्षणापत्तेर्नामधेयत्वमास्थितम्। विशिष्टविधिपक्षे हि भवेन्मत्वर्थलक्षणा॥ सोमादौ गत्यभावात्सा न त्वत्र गतिसम्भवा' दित्युक्तेः सा च नामधेयत्वेपि समा चेत्कुतो गुणविधित्यागः सामानाधिकरण्यानुपपत्तेर्गुणविधाविवात्रापि बीजत्वेनापेक्षणात्। नहि विना बीजं लक्षणा। साध्यत्वं द्वितीयार्थ इतिसक्त्वधिकरणे व्यवस्थापितत्वेन वाजपेयाधिकरणोक्तन्यायेनैकस्यां क्रियायां साध्यद्वयासमवायात्काष्ठैस्तण्डुलं पचतीत्यादावपि मत्वर्थलक्षणाया आवश्यकत्वान्निरूढत्वानिरूढत्वे अपि समे। गुणविधौ सर्वत्र मत्वर्थलक्षणाभ्युपगमस्य मीमांसकप्रसिद्धेश्च। अस्मन्मते च नाम्नः शक्यतावच्छेदकत्वेन विनैव लक्षणां यागत्वादिवदुपस्थितेर्नामधेयत्वं सुसङ्गतमिति विभावयामः। अत एव च कथितपदत्वं न क्व चिद्दोष इत्यत्रो "देति सविता ताम्रस्ताम्र एवास्तमेति च। संपत्तौ च विपत्तौ च महतामेकरूपता"। अत्र ताम्रपदान्तरं विना न तादृशो बोध इति काव्यप्रकाशकारेण चोक्तं सङ्गच्छते। अत्र घटकलशपदाभ्यां

घटबोधे विशेषाभावात्ताम्रार्थकेन रक्तादिपदेन तादृशबोधसम्भवाच्छब्दांतरात्तादृशबोधासम्भव इत्यादेरलग्रकतापत्तेः । अस्मद्रीत्या पुनस्ताम्रपदरूपविषयवैलक्षण्याद्वैलक्षण्यमित्यवधेयमिति । यद्वा ज्ञानमात्रे शब्दभानमतेन व्याचक्ष्महे । अनुकार्यानुकरणयोर्भेदे ऽनुकार्यस्तथा प्रातिपदिकार्थः । नो चेद्भेदविवक्षा तथापि श्रोत्रेण गृहीतसङ्गतिकघटादिभिर्बोपस्थितेर्थे पदार्थे घटादौ व इव अर्थो विशेषणीभूतघटत्वादिवद्भासते विशेषणत्वेनैव भासते इत्यर्थः । डित्थोयं ब्राह्मणोयमिति प्रत्यक्षइव शाब्देपि स विषयः "न सोस्ति प्रत्ययो लोके यः शब्दानुगमादृते । अनुविद्धमिव ज्ञानं सर्वं शब्देन भासते" इति प्रसिद्धेः । तथा च घटपदवाच्यमानयेति शाब्दबोध इति भावः । अनुकरणे तु स्वातन्त्र्येणैव भानमिति विशेष इति । अत्रेदं तत्त्वम् । अनियमेन घटादेरपि प्रकारान्तरेणोपस्थितिसम्भवाच्छाब्दबोधविषयतापत्तिवारणाय वृत्त्या शब्दादुपस्थितमेव शाब्दबोधविषय इति कल्पनीयम् । शब्दस्य च नियमेन तदानीमुपस्थितिसत्त्वात्तस्यास्तादृशतया न शाब्दबोधविषयत्वानुपपत्तिः । एवं च यथाभिहितान्वयवादिनां मते वृत्तिं विनैवाकांक्षादिवशाद्वाक्यार्थस्य शाब्दबोधे भानं कुञ्जशक्तिवादिनां वा वृत्त्या ऽनुपस्थितस्यैव भानम् । तथा वृत्त्यविषयशब्दस्यापि ज्ञानसामान्यसामग्र्या तात्पर्याकांक्षादिवशाद्गौर्नित्या गौरनित्येत्यादौ गोत्वादेरिव स्वातन्त्र्येण विशेषणत्वेन वा भानं भवेत् । पर्वतो वन्हिमानिति शाब्दानुमित्यादितस्तदैव वन्ह्यर्थिप्रवृत्तिदर्शनाज्ज्ञानसामान्यसामग्र्या एवार्थविशेषणतया वर्त्तमानकालभासकत्वकल्पनवत्प्रत्यक्षशाब्दादौ सर्वत्र शब्दभानानुभवाज्ज्ञानसामान्यसामग्र्याः शब्दभासकत्वकल्पनात् । तत्रापि विशिष्य गृहीतशक्तिकेभ्यः पदेभ्योर्थविशे-

षस्यैवार्थाच्छब्दविशेषस्य भानम् । अन्यत्र नलपदवाच्यः कश्चिदर्थ इति पदविशेषणकवस्तुसामान्यबोधवदर्थदर्शनादप्येतद्वाचकं किञ्चित्पदमिति पदस्यापि सामान्यत एव बोधः । अत एव तदुत्तरं विशेषजिज्ञासया किमस्य नाम इत्यादिप्रश्नप्रतिवचनान्युपपद्यन्ते । अत एव वृत्त्याविषयवद् घटादिपदैः समवायादिसम्बन्धेन सम्बन्धिन आकाशादेरप्युपस्थितस्यान्वयबोधप्रसङ्गः । किं च । गामुच्चारयेत्युक्ते विकृतस्यैवोच्चारणापत्तिः । तादृशस्यैव प्रत्यक्षोपस्थितत्वात् । शब्दस्याप्रकृत्यर्थत्वाद् द्वितीयार्थादेरनन्वयापत्तेश्च । प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तेः । स्वस्यैव प्रत्यक्षेण शीघ्रमुपस्थितत्वाद्गौरस्तीत्यत्रापि स्वपरत्वापत्तेश्चेति निरस्तम् । घटादिपदादुपस्थितस्याप्याकाशादेः शाब्दज्ञानविषयत्वाभावस्तन्नियामकाभावात् । विकृतोदेरपि तात्पर्याभावात् । सति च तस्मिन् लक्षणादिना त्वयापि तथा वाच्यत्वात् । न च तात्पर्येणैव सर्वनिर्वाहे वृत्तिमात्रोच्छेदः । तस्य शाब्दसामान्ये हेतुत्वानभ्युपगमात् । अननुगमात् । शब्दादमुमर्थं प्रत्येमि वक्तुस्तात्पर्यं तु न जानामीति सकलानुभवासिद्धत्वाच्च । किं तु क्वचिच्छब्दजन्यबोधप्रमात्वे नियामकं तद्विषयकतात्पर्यज्ञानं तदन्यगोचरज्ञाने प्रतिबन्धकं वा नातो नानार्थानुपपत्तिः । इत्थं च पदादनेकेषामर्थानामुपस्थितावेकस्यैव वानेकसम्बन्धसम्भवे पदार्थविशेषसम्बन्धविशेषयोरध्यवसानाय तात्पर्यं नियामकं कल्प्यतइति न वृत्तिं विना निर्वाह इत्यादिकमूह्यम् ॥ २६ ॥

नन्वनुकार्यानुकरणयोर्भेद एव युक्तः । अभेदेप्यस्तु स्वस्मिन्स्वस्य शक्तिः । अन्यथानुकरणशब्दानां वृत्तिविषयाप्रातिपादकत्वेनार्थवत्त्वाभावात्प्रातिपदिकसंज्ञा न स्यात् । तथा च

"वार्त्रघ्नी पौर्णमास्यां कवतीषु रथन्तरं गायति" "ऐरं कृत्वोद्वेय" मित्यादिश्रुतयः, एरः, एचोयवायावः, रषाभ्यामोण इत्यादिसूत्राणि च विरुध्येरन् । प्रातिपदिकात्सुबन्ताद्वा तद्धितोत्पत्तेः सिद्धान्तितत्वात् । न चैवं धातूपसर्गादिगणपठितानामनुकरणानामनुकार्यधात्वाद्यर्थवत्त्वात्प्रातिपदिकत्वापत्तौ विभक्तिश्रवणापत्तिः । अविवक्षयैव अइउणित्यादौ स्वरसन्ध्यकरणवत्सम्भवात् । तत्रेकारोकारादेस्तत्तत्संज्ञास्वसन्देहसिद्धेरिव सत्यां विभक्तौ नलोपजश्त्वादेरप्यापत्तावदन्तत्वनान्तत्वधान्तत्वदान्तत्वादिनिर्णयानुरोधस्य सत्त्वात् । णोपदेशत्वषोपदेशत्वनिर्णयायेव यत्नान्तरापत्तिगौरवापत्तेश्चानुरोधसत्त्वादित्याशङ्कां मनसिकृत्याह ॥

अत एव गवित्याह भूसत्तायामितीदृशम् ।
न प्रातिपदिकं नापि पदं साधु तु तत्स्मृतम् २७

अत एव यतो न भेद उक्तरीत्योपस्थितस्यैव वा भानमत एव गवित्ययमाह भूसत्तायामित्यत्र वृत्तिविषयबोधकत्वरूपार्थवत्त्वाभावादर्थवदधातुरित्यप्रवृत्तेः प्रातिपदिकत्वाभावे गौः भूरिति विभक्त्यनुत्पत्तिः । तथा च न प्रातिपदिकं नापि पद, मेतत्साधु तु भवत्येवेत्यर्थः । अयं भावः । भूसत्तायामित्याद्यर्थनिर्देशसहितेष्वसन्दिग्धेषु विभक्त्यसंवलितनिर्देशः परम्परापठनादिसिद्धो भाष्यकारायभ्युपगतश्च तस्य चोक्तलाघवानुगृहीताभेदपक्षे एवोपपत्तौ निर्बीजाविवक्षयोपपादनमयुक्तम् । सन्दिग्धस्थले तदकरणेप्यत्र विभक्तिविवक्षाया दुर्वारत्वात् । प्रत्ययः परश्चेति नियमाच्च । उक्तश्रुतिषु च वृत्तावक्तवानां जहत्स्वार्थत्वाभ्युपगमादनुपपत्तिरस्तीव भेदपक्षाश्रयणेपि । सा

चावयव्यर्थमवयवे आरोप्य समाधेयेति वृत्तिनिर्णये वक्ष्यते। उक्तसूत्रेष्वप्यनुकार्यशब्दानां स्थानित्वादेशत्वबोधनाय षष्ठी-स्थानेयोगेत्याद्यनुरोधादसमर्थसमासवद्वक्ष्यमाणरीत्या प्रातिपदिकत्वविभक्त्यादिकं सौत्रमेव। भुवोवुग्लुङ्लिटोरित्याद्यप्येवमेव। तस्माद्युक्ततरमभेदपक्षं प्रतीमः। अथ भू सत्तायामित्यादावधातुरितिपर्युदासादेव न प्रातिपदिकत्वं न वा पदत्वम्। अन्यथा पर्युदासवैयर्थ्यापत्तिः। किं चाधातुरितिपर्युदासादर्थवत्त्वलाभादर्थवद्ग्रहणमुत्तरार्थमिति ग्रन्थानामेवमसामञ्जस्यापत्तिः। भूसत्तायामित्यादेरनर्थकत्वात्। अनर्थकत्वादत्र विभक्तिर्नेत्यादिकृत्तद्धितसमासाश्चेति सूत्रे मनोरमायां स्पष्टत्वात्। अपि च धातुरनर्थक इति व्याहतमित्यर्थवत्सूत्रे मतान्तरदूषणाय मनोरमापि स्ववचनविरुद्धैव स्यात्। न च भूसत्तायामित्यनुकरणस्य न धातुत्वं किं त्वेतदनुकार्यस्य भवतीत्यादौ प्रयुज्यमानस्यैव तत्रैव नामत्वसुबुत्पत्त्योर्वारणाय पर्युदासोपीति वाच्यम्। एवं हि भूकादयोधातव इति सूत्रस्यानुकरणस्यानर्थकत्वेनानुकार्यस्य गणपाठाभावेनाधातुतापत्तावसम्भवित्वापत्तेः। तस्य गणपठितत्वगर्भतायाः प्राग्व्युत्पादनात्। घटाभिन्नस्याघटत्ववद्धात्वभिन्नस्याधातुताया असम्भवाच्च। किं च। प्रकृतिवदनुकरणमित्यतिदेशादेव धातुत्वप्रयुक्तपर्युदासलाभात्प्रातिपदिकत्वाभावसम्भवे कुतस्तत्पक्षाभ्युपगमः। कथमन्यथा ऋतइद्धातोरितीत्वं कीरित्याद्यनुकरणे लभ्येत। न चैवं धातुत्वमयुक्तप्रकृतित्वलाभेन न केवला प्रकृतिः प्रयोज्येति निषेधलाभापत्तिः यत्तदेतेभ्यः परिमाणेवतुबिति ज्ञापकेन यावत्कार्यप्रवृत्तेर्ज्ञापितत्वात्। अत एव कीरित्यनुकरणे प्रातिपदिकत्वं सङ्गच्छते। तस्माद्भूसत्तायामित्यभेदपक्षसाधकमयुक्तम्। किं चानुकार्यत्वानु-

करणत्वधातुत्वाधातुत्वध्वनिमयत्ववर्णमयत्वरूपविरुद्धधर्माध्यासा-
दभेदपक्ष एवानयोर्न युक्तः । भेदपक्षोपि न युक्तः । भू-
वादय इति सूत्रविरोधात् । गणपठितत्वे सति क्रिया-
वाचित्वं धातुत्वमिति हि तदर्थः । स चास्मिन्न सम्भावि-
तः । अनुकार्यस्य गणे पाठाभावात् । अनुकरणस्या-
र्थवत्त्वेपि क्रियावाचकत्वाभावात् । समानानुपूर्वीकशब्द-
मात्रतात्पर्यकत्वं तादृशशब्दमात्रवाचकत्वं वा ऽत्र मते ऽनुक-
रणत्वम् । शब्दशब्दवारणाय मात्रपदम् । तस्माद्भूसत्तायामित्यु-
दाहरणं पक्षद्वयं चासङ्गतमेवेति चेत् । अत्रोच्यते । आनुपूर्वीभेद
एव शब्दभेदे तन्त्रम् । अत एव नानार्थत्वव्यवस्था । तथा च
स्वाभिन्नशब्दमात्रतात्पर्यकोच्चारणविषयत्वार्थतात्पर्यकोच्चारण-
विषयत्वरूपे अनुकार्यत्वानुकरणत्वे कथं विरुद्धे । कथं वा
भूसत्तायामिति शब्दमात्रतात्पर्यकस्य क्रियावाचकत्वरूपं धातु-
त्वम् । तथा च न पर्युदासत्ववार्त्तापि । किं त्वनर्थकत्वान्न
नामत्वमित्येव युक्तम् । प्रकृतिवदनुकरणमित्यतिदेशेप्यधातुत्व-
प्रयुक्ता संज्ञा दुर्वारैव । छांदसत्वं त्वगतिकगतिः ज्ञापकमा-
त्रोच्छेदकरं चेति बोध्यम् । एवं च न धातुत्वाधातुत्वयोर्विरोधो-
पि । वर्णनित्यतावादिनामानुपूर्व्याः ध्वनिमात्रनिष्ठत्वात्तस्योभ-
यत्र तुल्यत्वात् । अव्यक्तानुकरणस्थले व्यक्तिभेदेपि भेदप्रयोज-
कानुपूर्वीभेदाभावाद्युक्त एवाभेद इत्यभेदवादिनां मतम् । अन्ये
त्वित एवार्थभेदाच्छब्दभेदं च मन्वानाः शब्दार्थवाचकत्वाभ्या-
मनयोर्भेदमिच्छन्ति । अत्र मते गणपठितशब्दवाच्यत्वं गण-
पठितत्वमतो न भूवादिसूत्रविरोधः । अस्मिन्मते भूसत्तायामि-
त्यत्र विभक्तिर्दुर्वारेत्यभिप्रेत्य पक्षद्वयं लक्ष्यानुसारेण स्वीकृत-
माकरे इति न कश्चिद्दोष इति ध्येयम् ॥ २७ ॥

इति श्रीवैयाकरणभूषणे नामार्थपरिच्छेदः समाप्तः ॥

समासान्विभजते ॥

सुपां सुपा तिङा नाम्ना धातुनाथ तिङां तिङा ।
सुबन्तेनेति च ज्ञेयः समासः षड्विधो बुधैः २८

सुपां सुपा । पदद्वयमपि सुबन्तम् । यथा राजपुरुषः । षष्ठीति समासः । सुपां तिङा । पूर्वपदं सुबन्तमुत्तरं तु तिङन्तम् । यथा पर्यभूषत् । अनुव्यचलत् । गतिमतोदात्तवता तिङापि समास इति वार्तिकात् । सुपां नाम्ना । कुम्भकार इत्यादि । उपपदमतिङिति समासः । स च गतिकारकोपपदानां कृद्भिः सह समासवचनं प्राक् सुबुत्पत्तेरिति वचनाद्भवति सुबुत्पत्तेः प्राक् अत्रोत्तरपदे सुबुत्पत्तेः प्रागित्यर्थात् । अन्यथा चर्मकीतीत्यादौ नलोपानापत्तेः । सुपां धातुना । उत्तरपदं धातुमात्रं न सुप्तिङन्तम् । यथा कटप्रूः । आयतस्तूः । वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घश्चेति वार्त्तिकोक्तनिपातनात् । अत एव नञो धातुमात्रेण समास इत्यनुदात्तसम्पदमित्यत्र कैयटः । तिङां तिङा । पिबतखादता । पचतभृज्जतेत्यादि । "आख्यातमाख्यातेन क्रियासातत्य" इति मयूरव्यंसकाद्यन्तर्गणसूत्रात्समासः । सुबन्तेनेति चेति । चकारात्तिङामित्यर्थः । जहिस्तम्ब इत्यादिः । "जहिकर्मणा बहुलमाभीक्ष्ण्ये कर्त्तारं चाभिदधाती"ति मयूरव्यंसकाद्यन्तर्गणसूत्रात् । स्पष्टं चैतच्छब्दकौस्तुभे ॥ २८ ॥

स्वयं भाष्यादिसिद्धं तद्भेदं व्युत्पाद्य प्राचीनवैयाकरणोक्तविभागस्य सलक्षणस्याव्याप्त्यतिव्याप्त्यादिभिः प्रायिकत्वं

दर्शयति ॥

समासस्तु चतुर्धेति प्रायोवादस्तथा परः ।
योयं पूर्वपदार्थादिप्राधान्यविषयः स च ॥ २९ ॥
भौतपूर्व्यात्सोपि रेखागवयादिवदास्थितः ।

चतुर्धा । अव्ययीभावतत्पुरुषद्वन्द्वबहुव्रीहिभेदात् । अयं प्रायोवादः । भूतपूर्वः । इन्भूः । काराभूः । आयतस्तूः । कटप्रूः । वागर्थाविव । विस्पष्टपटुरित्याद्यसंग्रहात् । तथापरः प्रायोवाद इत्यन्वयः । परं दर्शयति । योयमिति । पूर्वपदार्थप्रधानोऽव्ययीभावः । उत्तरपदार्थप्रधानस्तत्पुरुषः । उभयपदार्थप्रधानो द्वन्द्वः । अन्यपदार्थप्रधानो बहुव्रीहिरिति लक्षणरूपः । उन्मत्तगङ्गं, सुप्रति । अर्धपिप्पली, द्वित्रः, शशकुशपलाशमित्यादौ परस्परव्यभिचारात् । तथाहि । उन्मत्तगङ्गमित्यव्ययीभावे पूर्वपदार्थप्राधान्याभावादव्ययीभावलक्षणाव्याप्तिरन्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणातिव्याप्तिश्च । अन्यपदार्थे च संज्ञायामिति समासात् । सुप्रतीत्यव्ययीभावे उत्तरपदार्थप्राधान्यात्तत्पुरुषलक्षणातिव्याप्तिरव्ययीभावलक्षणाव्याप्तिश्च । सुप्प्रतिनामात्रार्थइति समासात् । अर्धपिप्पलीति तत्पुरुषे पूर्वपदार्थप्राधान्यसत्त्वादव्ययीभावलक्षणातिव्याप्तिस्तत्पुरुषलक्षणाव्याप्तिश्च । "अर्धनपुंसक" मिति समासात् । एवं पूर्वकाय इत्यादितत्पुरुषेपि द्रष्टव्यम् । द्वित्रा इति बहुव्रीहावुभयपदार्थप्राधान्याद् द्वन्द्वलक्षणातिव्याप्तिर्बहुव्रीहिलक्षणाव्याप्तिश्च । "सङ्ख्ययाव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येय" इति समासात् । शशकुशपलाशमिति समाहारद्वन्द्वे समाहारान्यपदार्थप्राधान्याद्बहुव्रीहिलक्षणाव्याप्तिश्च । तस्मान्नैतानि लक्षणानि । किं

त्वव्ययीभावाधिकारपठितत्वमव्ययीभावत्वं, तत्पुरुषाधिकारपठितत्वं तत्त्वमित्यादि द्रष्टव्यमिति भावः ॥ असम्भवश्चैषां लक्षणानामिति ध्वनयन्नुक्तिसम्भवमाह । भौतपूर्व्यादिति । स्वार्थे ष्यञ् । पूर्वं भूतो भौतपूर्व्यस्तस्मात् । उत्सर्गोपि, सोपि । रेखागवयादिवादिति । तथा च रेखागवयादिनिष्ठलांगूलादेर्वास्तवपश्वलक्षणत्ववदेतेषामपि न समासलक्षणत्वम् । तत्र विशिष्टशक्त्यभ्युपगमेन पदानामनर्थकत्वात् । किं तु बोधकत्वमात्रं स्यात् । रेखागवयवदिति भावः ॥ २९ ॥

ननु व्यपेक्षां सामर्थ्यमेकइति भाष्यकारैः प्रदर्शितानां व्यपेक्षावादिनां प्राचां मतएतानि लक्षणानि साधून्येव । तथाहि । समर्थःपदविधिरिति परिभाषायां सामर्थ्यं व्यपेक्षारूपमेव सूत्रभाष्यसिद्धम् । एकार्थीभावे समासस्यार्थवत्सूत्रेणैव प्रातिपदिकत्वसम्भवेन समासग्रहणं न कुर्यात् । पराङ्गवद्भावे एकार्थीभावाभावेन तस्यासंग्रहापत्तेश्च । न चेष्टापत्तिः । तथा सति सुबामन्त्रिते पराङ्गवत्स्वरे' इत्यनन्तरमेव समर्थसूत्रं कुर्यात् । किंचैवं यत्ते दिवो दुहितर्मर्तभोजनमित्यादौ दिवःशब्दस्यामन्त्रितनिघातफलकपराङ्गवद्भावेवदयमग्नेजरिता, ऋतेन मित्रावरुणावृतावृधावृतस्पृश इत्यादावयमृकतेनेत्यादेः सुबामन्त्रितइति पराङ्गवद्भावापत्तिः । सम्बोधनप्रथमान्तस्यामन्त्रितस्याग्निमित्रावरुणादिपदस्य सत्त्वात् । ननु तन्निमित्तग्रहणं कर्त्तव्यमिति वार्त्तिकात्तस्यामन्त्रितस्य यन्निमित्तं तदेव पराङ्गवत्स्यादित्यर्थकान्नायं दोष इति चेन्न । एवं सति मित्रावरुणावित्यस्यापि पराङ्गवद्भावापत्तेः । ऋतस्य वर्धयितारावित्यर्थेन्तर्भावितण्यर्थाद्धृधेः क्विपि ऋतावृधाविति रूपम् । न च मित्रावरुणौ तन्निमित्तम् । न च मा भूत्पराङ्गवद्भाव इति वाच्यम् । ऋतावृधावित्यस्य निघातानाः

पत्तेः । द्वितीयपादादित्वेनानुदात्तंसर्वमपादादाविति पर्युदस्तत्वात् । अन्यथेमं मे गङ्गे यमुने सरस्वति शुतुद्रि स्तोमसिति मन्त्रे पूर्वपूर्वामन्त्रितस्याविद्यमानवद्भावान्मेशब्दात्परतामुपजीव्य कृतोपि निघातो गङ्गे इत्यादित्रयस्येव शुतद्रीत्यस्यापि स्यात् । तथा च पादादित्वेपि पराङ्गवद्भावादामन्त्रितस्य चेत्याद्युदात्तता ऋतेनेत्यादेर्दुर्वारा । न च मित्रावरुणावित्यस्य पराङ्गवद्भावो न सम्भवत्येव आमन्त्रितं पूर्वमविद्यमानवदित्यविद्यमानवद्भावादिति वाच्यम् । परस्य कार्ये ह्यसावतिदेशः पूर्वग्रहणात् ज्ञापकात् । न च पराङ्गवद्भावः परस्य कार्यं किं तु स्वस्य । अस्तु वा मित्रावरुणावित्यामंत्रितं सामान्यवचनम् । तद्विशेषणमृतावधाविति । तथा च नामंत्रिते समानाधिकरणे सामान्यवचनमित्यविद्यमानवद्भावनिषेधान्न दोषः । तस्मात्तन्निमित्तग्रहणे कृते ऋतेनेत्यत्रेव मित्रावरुणावित्यत्रापि स न स्यात्तस्मात्समर्थपरिभाषयैव निर्वाहमभ्युपेत्य तन्निमित्तग्रहणं त्याज्यमिति वेदभाष्यशब्दकौस्तुभयोः स्पष्टम् । तथा च परस्परान्वयरूपा व्यपेक्षैव सामर्थ्यम् । तच्च कारकाणां क्रियायामेवान्वयादृतेनेत्यस्याशाथे इत्यनेनैव सहान्वयान्न मित्रावरुणाभ्यामन्वय इति सामर्थ्याभावान्न पराङ्गवद्भावः । मित्रावरुणावृत्तावृधाविति तयोस्तु पार्ष्णिकाभेदान्वयात्सामर्थ्यसत्त्वाद्भवति स इत्युपपद्यते । एवमेव च भार्या राज्ञः पुरुषो देवदत्तस्य, पश्य देवदत्त कृष्णं श्रितो विष्णुमित्रो गुरुकुलमित्यादौ न समास इत्युपपद्यते । उपपद्यते चाधिहरि राजपुरुषश्चित्रगुरित्यादिषु समासः । पदार्थानां परस्परमन्वयरूपसामर्थ्यसत्त्वात् । अत एव रामकृष्णावित्यादौ परस्परमनन्वयात्सामर्थ्याभावेन समासो न स्यात् । एवं धवखदिरौ छिन्धीत्यादावपि । न चैकस्यां क्रियायामन्वयित्वमेव सामर्थ्यमत्रास्तीति कैयटोक्तं

युक्तम् । एवं हि कृतः सर्वो मृत्तिकयेत्यादौ कृतः सर्वमृत्तिक-इति समासापत्तेः । असूर्यम्पश्या इत्यादेरसमर्थसमासत्वोच्छेदप्रसङ्गाच्च । न चैकस्यां क्रियायां कर्मत्वाद्येकरूपेणान्वयित्वमेव सामर्थ्यं वाच्यम् । अथ वा चार्थेद्वन्द्व इति विध्यवैयर्थ्यायासामर्थ्येपि स स्यादिति वाच्यम् । एवं हि वटो भिक्षामट गां चानयेत्यादा "वहरहर्नयमानो गामश्व पुरुषं पशुम् । वैवस्वतो न तृप्यति सुराया इव दुर्मद" इत्यादौ चातिप्रसङ्ग इत्याशङ्क्य युगपदधिकरणवचने द्वन्द्व इति व्युत्पादितं भाष्ये । तथा च परस्परमभेदान्वयरूपं सामर्थ्यमेवातिप्रसङ्गपरीहारव्याजेन भाष्यकारैः समर्थितम् । एकार्थीभावपक्षे च तस्मिन्नेव समास-इति समर्थसूत्रालब्धत्वादहरहरित्यादौ समासाप्रसङ्गाद्युगपदधिकरणवचनताव्युत्पादनवैयर्थ्यापत्तेः । अधिकरणं वार्त्तिपदार्थौ रामकृष्णौ, तयोर्युगपद्वचने पदद्वयेनाभिधाने द्वन्द्वो भवतीति तदर्थः । ननु सेयं युगपदधिकरणवचनता दुःखा च दुरुपपादा चेति भाष्यएव सा दूषितेति चेत् । सत्यम् । विग्रहे सा दुरुपपादेति तदभिप्रायस्य शब्दकौस्तुभादौ व्युत्पादितत्वात् । विग्रहे खल्वपि युगपदधिकरणवचनता दृश्यते धवौ च खदिरौ चेत्येव विग्रह इत्यादि, ततः पूर्वं भाष्ये व्युत्पादितत्वात्तथैव युक्तत्वात् । अत एव धवौ च खदिरौ चेति न विग्रहः । प्रक्रियादशायां प्रथमप्रवृत्तस्यैकवचनस्य त्यागायोगात् । अन्यथा समासदर्शनानुरोधेन विग्रहकरणे षष्ठीतत्पुरुषोच्छेदः स्यात् । तथा च षष्ठ्या अलुग्विधायकानां तत्स्वरादीनां चोच्छेदापत्तिरित्येवोक्तं शब्दकौस्तुभे । अत एव तद्राजस्य बहुषु तेनैवास्त्रियामित्यनेनापत्यकृतबहुत्वाविवक्षायां तद्राजस्य लुग्विधीयमानो ऽङ्गवङ्गकलिङ्गा इत्यादौ सिध्यति । नहि विना युगपदधिकरणतां त-

द्राजार्थस्य बहुत्वान्वयः । तस्य व्यासज्यवृत्तित्वात् । न च तद्राजान्तेन बहुत्वोक्तौ लुगित्येवार्थोस्त्विति शङ्क्यम् । प्रियो वाङ्गो येषामित्यर्थे प्रियवाङ्गा इत्यत्रापि प्रसङ्गादिति । न च कर्मधारयेप्यभेदान्वयरूपसामर्थ्यसत्त्वाद् द्वन्द्वाविशेषस्तस्य स्यादिति वाच्यम् । समस्यमानपदैरेकविषयताशालिबोधजनने द्वन्द्वस्तदर्थमेव युगपदधिकरणवचनतास्वीकारादिति विशेषसम्भवात् । न चैवमपि रामकृष्णावित्यादौ विरूपाणामपि समानार्थानामित्येकशेषापत्तिः । विभक्त्युत्पत्तेः पूर्वं समानार्थतायामिष्टत्वात् । तदुत्तरमेकशेषाप्रसङ्गात् । पूर्वमेवैकशेष इति सिद्धान्तात् । तथा च विवक्षयोभयथापि प्रयोगो युक्त एव । पितरावित्यादौ तात्पर्यानुरोधेनैवार्थविशेषनिर्णयस्य वाच्यत्वात् । तथा च विवक्षया व्यवस्था आश्रयणीया चार्थे द्वन्द्व इति न्यासपक्षेपि विभक्त्युत्पत्तेः पूर्वं सहभावविवक्षणे एकशेषस्तदुत्तरं विवक्षणे च द्वन्द्व इति वाच्यमेव । नन्वेवं सति एकशेषे द्विवचनबहुवचनान्तेन विग्रहप्रदर्शनमपि शक्यं वक्तुम् । परं त्वेकवचनान्तेनैव तत्प्रदर्शनमयुक्तम् । प्रागुक्तन्यायेन द्विवचनादेरपि न्यायप्राप्तत्वादिति कथं द्विवचनान्तेन तत्प्रदर्शनं निषिद्धमिति चेत् । उच्यते । नहि येषामेकशेषस्तेषामेव तथाविधानां विग्रहे प्रवेशः तस्य नित्यत्वात् । किं तु यदा युगपद्वाचित्वाविवक्षणान्नैकशेषस्तदा तद्बोधकचकारमादाय सः । तथा च तत्र न द्विवचनप्राप्तिरिति विग्रियमाणे तथा दर्शनादेव तत्रापि युगपद्वाचितांविवक्षां कृत्वा तथा विग्रहो वाच्यस्तत्र चोक्तदोषो युक्त इति । अथ विभक्त्युत्पत्तेः प्राक् सहभावविवक्षायामेवैकशेष इत्यभ्युपगमे तदा सहभावाविवक्षणात्प्रत्येकं विभक्त्युत्पत्तौ ततस्तद्विवक्षणे द्वन्द्वापत्तौ घटघटौ घटघटघटा इत्यापत्तिर्दुर्वारा । न चाकृतव्यूहपरिभाषया

भाविद्विबहुवचनादिविरुद्धतया वा न प्राग्विभक्त्युत्पत्तिरिति शंक्यम् । इतरेतरयोगादावप्यनापत्तेः । अथ यदि घटत्वादिरूपेणैकशक्त्या विभीतकत्वाद्यनेकतात्पर्यवच्छाद्युगपदनेकशक्त्या विशिष्टलक्षणया वा मातृत्वपितृत्वस्त्रीत्वपुंस्त्वश्वशुरत्वाद्यनेकरूपेणैकस्मादेव पदादुपस्थितौ घटा अक्षाः पितरौ ब्राह्मणौ श्वश्वुरावित्यादिप्रयोगाणां सम्भवान्नैतत्साधनायैकशेषकरणं किं तु घटोयं घटोयमिति धारावाहिकाभिलापवत्साहित्याविवक्षणात्प्रत्येकव्यक्तिजातिक्षितिक्षमामात्रे मातृमात्रोः सहभावे च तात्पर्याद्विभक्त्युत्पत्त्यनन्तरं सहभावविक्षणाद्वा प्राप्तस्य घटघटौ अक्षाक्षौ क्षमाक्षमा मातृभ्यामित्याद्यनिष्टरूपस्यासाधुत्वबोधनायेति नोक्तदोषः । एवं च साहित्यविवक्षाचिकीर्षायामेवैकशेषः बहुव्रीहिचिकीर्षायामिव नबहुव्रीहावित्यादिवत्प्रवर्त्ततइति कल्प्यते । प्रत्ययोत्पत्तेर्व्यर्थगौरवभयात्प्रक्रियादोषप्रसङ्गाच्च नान्तरा कल्पना युक्ता । समासादौ तूपजीव्यत्वात्तदादर इति । उक्तं च शब्दकौस्तुभे । 'घटकुम्भौ कुम्भकुम्भौ मातृभ्यां चेति पाक्षिकम् । अनिष्टत्रितयं प्राप्तं सूत्रेणानेन वार्यते ॥ घटावित्यादिसिद्धिस्तु स्यादेवैतद्विनापि हि । जातिपक्षे व्यक्तिपक्षेपीति निष्कर्षसंग्रह' इति ॥ अत्रापि पक्षे पितामात्रेत्यादिद्वयं व्यर्थं मातापितरौमातरपितरावित्यादेरिष्टत्वेन नियमार्थतायां असम्भवात् । मातराविति तदर्थे निवारयितुं सूत्रमिति चेन्न । एकस्य मातृशब्दस्य पितर्यपरस्य मातरि तात्पर्ये सरूपैकशेषेणापि विशिष्टलक्षणया युगपद्वृत्तिद्वयेन वा मातरावित्यस्य दुर्वार्यत्वेन सूत्रानर्थक्यावारणादिति विभाव्यते । तन्न । तथापि घटकुम्भाविवितवद्रामकृष्णावित्यस्यासाधुतापत्तेरिति चेत् । मैवम् । सहविवक्षातः प्राक् समानार्थतायामेवैकशेषात् । अन्यथा द्वन्द्वे प्राप्ते एकशेषा-

सदा युगपदधिकरणवचनतायां अव्यभिचारात्समानार्थानामित्यस्यानर्थक्यापत्तेः । द्वन्द्वविधानवैयर्थ्यापत्तेश्चेति दिक् ॥ नन्वेवमप्येनेकमन्यपदार्थे इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे बहुव्रीहिविधानाच्चित्रगवादिपदानां सर्वेषां तदभिधायकत्वे युगपदधिकरणवचनतासत्त्वाद् द्वन्द्वापत्तिः । न चोत्सर्गापवादन्यायेनान्यपदार्थमादाय तस्यां बहुव्रीहिः समस्यमानपदार्थमादाय तस्यां च द्वन्द्व इत्यभ्युपेयमिति वाच्यम् । एवं हि समाहारद्वन्द्वासम्भवापत्तेः तस्यान्यपदार्थत्वादिति चेन्न । न तावत्समाहारवाचकत्वेन समाहारद्वन्द्व इति व्यवहारः । रामकृष्णावानय पाणिपादं वादयेत्यनयोर्बोधपदार्थान्वययोर्वैलक्षण्यादर्शनात् । किं तु द्वन्द्वश्च प्राणितूर्येत्यादिप्रकरणेन प्राण्यादिद्वन्द्वे एकवचनविधानात्समाहार इव समाहारः एकवचननिमित्तत्वादिति गौणो व्यवहारः । एतदेवादाय द्वन्द्वाच्चुदषहान्तात्समाहारे इत्यादिसौत्रव्यवहारा अप्युपपद्यन्तइति ध्येयम् । न च परस्परान्वयसामर्थ्यपक्षे ऋद्धस्य राजपुरुष इत्यादिविशेषणाद्यन्वयापत्तिरिति वाच्यम् । सविशेषणानां वृत्तिर्न वृत्तेस्य वा विशेषणयोगो नेति वार्तिकेन विशेषणयोगे समासासाधुत्वज्ञापनात् । एकार्थीभावपक्षेपि राज्ञः पदार्थैकदेशत्वान्नान्वय आकाङ्क्षाविरहादित्युक्तावपि ऋद्धस्य राजपुरुष इत्यादेः साधुतावारणाय वार्त्तिकस्यावश्यकत्वात् । अत एव देवदत्तस्य गुरुकुलमित्यादौ साधुत्वज्ञापनाय भवति वै नित्यसापेक्षस्यापि समास इति वार्त्तिकं सङ्गच्छते । न च राजपुरुष इत्यादौ पदार्थयोरुपस्थितावप्यन्वयः कस्यार्थ इति वाच्यम् । तस्य संसर्गमर्यादयैवोपस्थितेः । न च नामार्थयोर्भेदेनान्वयासम्भवः । समासेन्यथैव व्युत्पत्तेरिति व्यपेक्षावादिनां मतम् ।

तस्माद्व्यपेक्षापक्षे पूर्वोत्तरपदयोरर्थसत्त्वात्पूर्वपदार्थप्रधान इत्यादिव्यवस्था अव्याप्त्यतिव्याप्त्यादिदोषदुष्टापि नासम्भविनीत्याशङ्कां मनसिकृत्याह ॥

जहत्स्वार्थाजहत्स्वार्थे द्वे वृत्ती ते पुनस्त्रिधा ।
भेदः संसर्ग उभयं चेति वाच्यव्यवस्थितेः ॥३०॥

यद्यप्यत्र महाभाष्ये नाना पक्षा निरूपिताः । तथाप्यत्रैव विश्रान्तिस्तेषामिति विभाव्यते ॥ कैयटो हरदत्तश्च यां व्यवस्थां प्रचक्रतुः । सा न्यायभाष्यानुगुणा नेत्युपेक्ष्येति विद्महे ॥ तथाहि । यद्यपि समर्थसूत्रे भाष्यकारैरनेके पक्षा निरूपिता इति भाति । तथापि तद्विवेके सति जहत्स्वार्थाजहत्स्वार्थपक्षयोरेव पर्यवसानं लभ्यते । तद्यथा । इयं तावद्भाष्ये पक्षसृष्टिः प्रतीयते । समासादावेकार्थीभावः विग्रहवाक्ये च व्यपेक्षेत्येकः पक्षः । अथ ये वृत्तिं वर्तयन्ति इत्यारभ्य जहत्स्वार्था ऽजहत्स्वार्था चेति पक्षभेदेन मतान्तरम् । समासादावपि वाक्यवद्व्यपेक्षैव सामर्थ्यमिति चापरं मतमिति । तत्रेत्थं कैयटेन निर्णीतम् । नित्यशाब्दिकमते राजपुरुषादीनि वाक्यविषयपदसरूपावयवानि वर्णवदनर्थकोपलभ्यमानावयवानि तत्त्वतो निरवयवान्येव केवलमसत्यप्रक्रियाश्रयेणान्वाख्यायन्ते नातस्तत्र जहदजहत्पक्षावतारः । अतस्तत्रैकार्थीभाव एव । वाक्ये तु व्यपेक्षा । परस्पराकाङ्क्षा च व्यपेक्षेति प्रथमः पक्षः । कार्यशाब्दिकानां वाक्याद्विकल्पेन वृत्तिनिष्पत्तिं मन्यमानानां मते जहत्स्वार्थाजहत्स्वार्थपक्षविकल्पः । अथ ये वृत्तिं वर्तयन्ति किं तआहुरित्यादिना भाष्यात्तथैव स्पष्टत्वात् । तत्र जहत्स्वार्था नाम राज्ञो विशेषणान्वयसहिष्णुतारूपप्राधान्यत्याग एव । तद्यथा । तक्षा राज-

कर्मणि प्रवर्त्तमानः स्वं तक्षकर्म जहाति न हिक्कितश्वासेते-त्यादिना दृष्टान्तेन तथैव भाष्ये व्युत्पादितत्वात् । एकार्थी-भावस्त्वत्र पक्षे राजपदेन राजपुरुषयोरुपादानसिध्यर्थमङ्गीक्रियते। तदनभ्युपगमे राज्ञि विशेषणान्वयापत्तेः । अजहत्स्वार्था च राज्ञांशस्यापरित्यागमात्रात् । भिक्षुकोयं द्वितीयां भिक्षां लब्ध्वा पूर्वां न जहाति सञ्चयाय प्रवर्त्तते इत्यादिभाष्येण तथैव लाभात् । अथ वा पुरुषव्यावर्त्तकत्वमात्रेण राजांशस्योपयोगाद्राज-पदं स्वार्थं जहात्येव । न चैतावता तन्निमित्तं विशेषदर्शनं निवर्त्तते पुरुषे । नह्यग्निसम्बन्धजनितपाकजरूपादिनिवृत्तिर्घटेग्नि-संयोगे निवृत्ते भवति । अथ वान्वयाद्विशेषणं भवति घृतघटश्च-म्पकपुट इतीत्यादिना भाष्ये तथैव स्पष्टत्वात् । तस्माद्वृत्तिनि-ष्पत्तिवादिमते जहत्स्वार्थाजहत्स्वार्थान्तर्भावेण पक्षद्वयं स्थिम् । व्यपेक्षावादस्तु स्वतन्त्र एवेति । हरदत्तस्तु एकार्थीभावस्तावद्राज-पदेन राजपुरुषोपस्थापनाय पुरुषपदेनाप्युभयोपस्थापनायावश्य-कः। अन्यथा राज्ञः पुरुषोश्वश्चेतिवद्राजपुरुषोश्वश्चेति राज्ञः पुरुषो देवदत्तस्य चेति वापत्तेः। नपुनर्जहत्स्वार्थवृत्तौ राजपदानर्थक्यं युक्तं पश्यामः । तथा सति राज्ञो बोधासम्भवेन राजपुरुषमान-येत्यत्र पुरुषमात्रस्यानयनप्रसङ्गः । न च राज्ञः प्रतीतये समासे शक्तिः कल्प्या, मानाभावात् नापि राजपदं वाक्ये व्युत्पन्नं पुनः समासे व्युत्पत्तिमपेक्षते । न वा राजबोधाय समासे व्युत्पत्तिग्र-होपेक्ष्यते । तस्मादजहत्स्वार्थैव वृत्तिः । अर्थाभिधानप्रकारभेद इत्येव साम्प्रतम् । एवं चैकार्थीभाववद्व्यपेक्षापि समासादौ । अन्यथैकार्थीभावमात्रमाश्रित्य द्रष्टुं गतः कृष्णं श्रितो गुरुकुलं विष्णुमित्र इत्यादौ समासप्रसङ्गः । तस्मादेकार्थीभावो, व्यपेक्षा, ऽजहत्स्वार्था, चेति त्रयं समुच्चितं परिभाषापवृत्तिहेतुः । न

चाप्येतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्य इति व्यपेक्षापक्षदूषणार्थकभाष्यविरोध इति वाच्यम्। व्यपेक्षामात्रवादे तद्दूषणाभिधानात् । न चैवमप्येकार्थीभावशून्ये पराङ्गवद्भावे विभक्तिविधाने च सा न प्रवर्त्तेतेति वाच्यम्। पराङ्गवद्भावे तन्निमित्तग्रहणात्। विभक्तौ क्रियाकारकसम्बन्धाविनाभावात्क्व चिदन्तरान्तरेणयुक्तइत्यादौ युक्तग्रहणाच्च सर्वत्रादोषेण एकार्थीभावशून्ये परिभाषाप्रवृत्त्यभावेप्यक्षतेः। अत एव संसृष्टार्थानां सम्बद्धार्थानामित्यादिना सामर्थ्यद्वयसमुच्चयो वृत्तौ ध्वनित इति व्युत्पादयांबभूव । अत्रेदं प्रतिभाति। न तावदाद्यएकार्थीभावोखण्डं समासमभ्युपेत्येति कैयटोक्तिर्युक्ता। अथ क्रियमाणेपि समर्थग्रहणे किं सामर्थ्यं नाम। पृथगर्थानामेकार्थीभावः सामर्थ्यम्। क्व पृथगर्थानि क्व वा एकार्थानि, वाक्ये पृथगर्थानि समासे एकार्थानि इत्येकार्थीभावोपपादकभाष्यविरोधात् । न वा ऽखण्डे पदानि सन्ति । येनैतत्स्यात्। तुल्ययुक्त्या वाक्यस्याप्यखण्डत्वापत्तेश्च । अन्यथार्धजरतीयतापत्तेः। ननु नित्यशाब्दिकास्तु वृत्तिवाक्ये नित्ये विविक्तविषये मन्यन्तइति तत्रैव कैयटेनोक्तत्वादत्रेष्टापत्तिरिति चेत्। तार्हि वाक्येप्येकार्थीभाव एव स्यात्। तथा च वाक्ये व्यपेक्षेति भाष्यमसङ्गतं स्यात् । एवं वावचनानर्थक्यमप्यनर्थकं स्यात् । व्यपेक्षायां समासो न, एकार्थीभावे वाक्यं नेति विविक्तविषयत्वादनयोर्बाध्यबाधकभावो न भवति । एकार्थानां विकल्पनादिति कैयटेनैव तद्भावार्थस्योपवर्णितत्वात् । नह्यखण्डे वाक्ये परस्पराकांक्षारूपव्यपेक्षासम्भवः । किं बहुना वाक्यपदयोरखण्डत्वे तुल्ययुक्त्या स्थिते व्याकरणस्थविधिमात्रस्यासंलग्नकतापत्तिः। प्रकृतिप्रत्ययागमादेरसत्त्वात्। अ[illegible]पञ्चको-

शकल्पनान्यायेन शास्त्रप्रवृत्तिः प्रकृत्यादिकल्पनयेत्युच्यते । समर्थः पदविधिः सहसुपेत्याद्यपि शास्त्रान्तर्गतत्वात्तदशायामेवेति कथमखण्डमभ्युपेत्य प्रवर्त्तताम् । तस्मान्नाखण्डपक्षाश्रयणेन प्रथमः पक्ष इति स्यादेव तत्रापि जहदजहद्विचारप्रवृत्तिः । एतेन यद्यपि शब्दान्तरमेव वृत्तिरवयवा वर्णवदनर्थकास्तथापि सादृश्यात्तत्वाध्यवसानं पदानामाश्रित्य पृथगर्थानामेकार्थीभाव इत्युक्तमिति पूर्वमुदाहृतभाष्यावतारः कैयटोक्तो विद्वद्भिर्नादरणीयः । अपि चोक्तरीत्या समासवद्वाक्येप्येकार्थीभावाभ्युपगमे व्यपेक्षायां सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धो नाम स सर्वः संगृहीतः समासस्त्वेको ऽसंगृहीतः । एकार्थीभावसामर्थ्ये च समासस्त्वेक एव संगृहीत इति भाष्यम् । समासएवैकार्थीभावो ऽन्यत्र व्यपेक्षेति स्ववचनं च विरुद्धं स्यात् । वृत्ताविव वाक्येपि विशेषणयोगानापत्तेश्च । एतेन समासादौ व्यपेक्षैकार्थीभावयोः समुच्चयोपि हरदत्तोक्तो ऽपास्तः । किं च । जहत्स्वार्थाजहत्स्वार्थयोः समुच्चयोपि विकल्पमुखेनैव भाष्ये पक्षद्वयावतारात्तद्विरोधाच्चादरणीयः । अपि च हरदत्तपक्षे राजपुरुषयोरप्युभयार्थत्वकल्पना व्यर्था । विशेषणान्वयनिरासस्य राजपदे तथाकल्पनेनैव वारणात् । राजपुरुषो देवदत्तस्य चेति वारणार्थं तथा कल्प्यतइति चेन्न । एवमपि राजपुरुषो गौर इत्यादिवत्तथा प्रयोगापत्तेर्दुष्परिहरत्वात् । अन्यथा राजपुरुषो गौर इतिवद्गौरस्य राजपुरुष इत्यपि स्यात् । भेदः संसर्ग इत्यादिना मूलएव निरसिष्यमाणत्वाच्च । तथा च न पुरुषपदस्योभयार्थतोक्तिर्युक्ता । नापि राजपदमात्रस्येति कैयटोक्तिरपि तथा । एकार्थीभावस्य पूर्वपदमात्रनिष्ठतापत्तेः समासनिष्ठतानापत्तेः । समासत्वस्य व्यासज्यवृत्तित्वात् । उ-

भयनिष्ठत्वस्य चोक्तरीत्या ऽसम्भवात् । अपि चैवं पुरुषपदस्याप्युभयार्थत्वे राजपदे जहत्स्वार्थता किं न स्यात् राजप्रतीतेः पुरुषपदादेवोपपत्तेः । राजपदस्य च तात्पर्यग्रहणार्थमुपयोगेनानर्थक्याभावात् । चम्पकपुट इत्यादिभाष्येणैवमेव लाभाच्च । अन्यथा तद्भाष्यासामञ्जस्यात् । सम्भवन्त्यामुपपत्तौ क्लिष्टकल्पनानवकाशात् । वक्ष्यते चान्यदुपरिष्टात् । तथा च तस्मादजहत्स्वार्थैव वृत्तिरिति हरदत्तौदिस्तद्रीत्यैवायुक्तेति परिभाव्यतां सूरिभिः । तस्मान्न कैयटहरदत्तादिभिरुक्तं युक्तम्। तस्मादेकार्थीभावो व्यपेक्षा चेति यत्पक्षद्वयं भाष्ये व्युत्पादितं तदेवाभिप्रेत्य जहत्स्वार्थाजहत्स्वार्थविचारः। एकार्थीभावे जहत्स्वार्था, व्यपेक्षायामजहत्स्वार्था । एकार्थीभावश्च समासादौ। पृथगर्थानामेकार्थीभावः सामर्थ्यमिति भाष्यस्वरसादिति व्यवस्थां वयं विभावयामः । अत एवैकार्थीभावव्यपेक्षयोर्मतान्तरत्वेपि संशये कोटितयोल्लेखवज्जहत्स्वार्थाजहत्स्वार्थयोस्तदन्तर्गतयोरपि विकल्पेनोल्लेखः सङ्गच्छते । कथं तर्ह्यत्र पक्षे अथ ये वृत्तिं वर्णयन्ति किं ते आहुरिति मतान्तरमवतार्य जहत्स्वार्थादिविचारो भाष्ये सङ्गच्छतइति चेत् । उच्यते । नैतन्मतान्तराभिप्रायं भाष्ये, विना समुदायशक्तिं जहत्स्वार्थाया विना व्यपेक्षामजहत्स्वार्थायाश्च दुर्वचत्वात् । किं तु वृत्तिलक्षणाभिधानाय प्रश्नरूपम् । अत एव परार्थाभिधानं वृत्तिमाहुरिति तल्लक्षणकथनं सङ्गच्छते । अन्यथा मतान्तरे लक्षणनिर्वचनमेतादित्यभ्युपगमे उक्तैकार्थीभाववक्ष्यमाणव्यपेक्षापक्षयोर्वृत्तिलक्षणानभिधाविकल्पनोः । तथा च ये एकार्थीभाववादिनो व्यपेक्षावाण्डे वाक्ये परस्पद्वितैकशेषसमाससनाद्यन्तधातुरूपां पदविक्यपदयोरखण्डत्वे तु च वर्णयन्ति किं ते वृत्तिलक्षणमाहुः संलग्नकतापत्तिः । प्रकृति

ति प्रश्नग्रन्थार्थः । उत्तरयति । परार्थाभिधानमिति । परो विशिष्टो योर्थस्तदभिधानं शक्त्या लक्षणया आकांक्षादिवशात्संसर्गमर्यादया वा यत्र सा वृत्तिः । एकार्थीभावे शक्त्या व्यपेक्षायां लक्षणया तदभिधानमस्त्येवेति भावः । तस्मादुक्तैव व्यवस्था भाष्यसिद्धेत्यभिप्रेत्य तथैव स्पष्टयति । द्वे वृत्तीति । कैयटादिरीत्यादरे च भेदाधिक्यस्यापि भावाद्धरदत्तरीत्या जहत्स्वार्थाविरहाच्च द्वे इत्ययुक्तं स्यादिति द्रष्टव्यम् । तत्रैकार्थीभावपक्षेपि जहत्स्वार्थता न युक्ता । राजादिपदानां कल्पशक्तित्यागायोगादित्याशङ्कायामाह । जहत्स्वार्थेति । जहति पदानि स्वार्थं यस्यां सा जहत्स्वार्था । पदे वर्णवद्वृत्तौ पदानामानर्थक्यमित्यर्थः । अयं भावः । समासादाववश्यकल्प्यातिरिक्तशक्त्यैव राजविशिष्टपुरुषबोधसम्भवेन राजपुरुषपदयोरपि पुनस्तद्बोधकत्वं कल्प्यं वृषभयावकादिपदेषु वृषादिपदानामिव । अन्यथा रामादिपदेष्वपि द्रव्यचतुर्भुखनारायणादीनामवयवार्थानां पदार्थोपस्थितिशाब्दबोधयोरापत्तेः । क्तवत्वन्तर्गतक्तस्य जातीयान्तर्गततीयस्य वयपयचयतयणयान्तर्गताऽयस्य यञन्तर्गताञोप्यर्थवत्त्वापत्तेश्च । तथा च प्रौढ इत्यत्रैव प्रोढवानित्यत्र प्रादूहोढोढ्येषैष्येष्विति वृद्धेः पटुजातीयायेत्यत्र तीयस्य ङित्सु सर्वनामता वाच्येति सर्वनामतायाः ववये पेये चेये इत्यादीनां लिटि दयायासश्चेत्यामः, बहिषष्टिलोपो यञ्च, देवाद्यञञाविति सिद्धयोर्वाह्या दैव्या इत्यनयोष्ठिढाणञित्यञन्तत्वान्ङीबापत्तौ प्रौढवान् पटुजातीयस्मै वयाञ्चक्रे पेयाञ्चक्रे चयाञ्चक्रे नयाञ्चक्रे वाहीका दैवीत्याद्यनिष्टापत्तेः । इत्थमन्यत्राप्यनेकशो दोषापत्तिर्दुर्वारा अस्माकमर्थवद्ग्रहणेनानर्थकस्येति परिभाष्यैकदेशानामनर्थकानामग्रहणान्न दोषः । न च यञश्चे-

त्यनेन बाह्वा इत्यादौ ङीबापत्तिस्तवापि समा । तस्यापत्याधिकारे एव प्रवृत्तेराकरे स्पष्टत्वात् । इत्थं चानेकशः प्रयोगेष्वतिप्रसङ्गापत्त्या स्वव्यापकशक्तावच्छेदकानुपूर्वीविरहविशिष्टानुपूर्वी शक्तावच्छेदिका वाच्या । एवं च क्त्वतुजातीयाद्यन्तर्गतक्तीयाद्यानुपूर्वी न तादृशीति नोक्तदोषः । अर्थवद्ग्रहणे नानर्थकस्येति परिभाषोपपत्तिश्च । अन्यथा समुदायान्तर्गतैकदेशस्यापि स्वातन्त्र्येण क चिच्छक्ते परिभाषाया विषयालाभेनासम्भवापत्तेः । एवं च समासान्तर्गतराजादिपदानामपि प्रागर्थवत्त्वं समुदायानुपूर्वीवतो ऽनर्थकत्वं वृषपदस्य केवलस्यार्थवत्त्वं न वृषभान्तर्गतस्येत्याद्युपपत्तौ नीलोत्पलं राजपुरुष इत्यादौ प्रत्येकपदजन्योपस्थितिमादाय नोद्देश्यविधेयभावान्वयो विशेषणान्वयापत्तिर्बोधावृत्त्यापत्तिर्वा । न चैवं निमित्तापायन्यायेनार्थवत्त्वनिमित्तकप्रातिपदिकत्वपदत्वयोरपि हान्यापत्तिरिति वाच्यम् । अकृतव्यूहाः पाणिनीया इति परिभाषातिरिक्ततन्न्यायास्वीकारात् । तस्याश्च निमित्तं विनाशोन्मुखं दृष्ट्वा तन्निमित्तं शास्त्रं न कुर्वन्तीत्यर्थः । प्रकृते च समाससंज्ञायां तयोरुपजीव्यतया आवश्यकत्वेन कारणस्यावश्यकत्वात् । अत एव समाससंज्ञानिमित्तसुपो लुक्यपि सा न निवर्तते। न चैवमपि कृतमपि शास्त्रं निवर्तयन्तीति परिभाषान्तरबलात्कृतस्यापि निवृत्तिर्दुर्वारा । प्रक्षालनाद्धि पङ्कस्य दूरादस्पर्शनं वरमिति न्यायेनाकरणस्यैव लाघवोपष्टब्धतया युक्तत्वेन ततोपि गुर्व्याः राजा इत्यादौ नलोपे सति तन्निमित्तकोपधादीर्घहान्यापत्त्या चैतस्याः सिद्धान्तासंमतत्वात् । अथैवमर्थवद्ग्रहणपरिभाषया नलोपसूत्रमपि राजेत्याद्यर्थवत्प्रातिपदिके चरितार्थं समासान्तर्गतेनर्थके न प्रवर्तेत । अपि च । वृत्ति-

मात्रेतिरिक्तशक्तेर्भवत्सिद्धान्तासिद्धत्वाद्व्यवस्थापयिष्यमाणत्वाच्च कृत्तद्धितान्तर्गते धातुप्रत्यययोरप्यनर्थकतापत्तिः । तथा च कर्त्तरि कृत् सास्यदेवतेत्यादेरनर्थकतापत्तिः । "प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् । धर्ममात्रं वाच्य"मिति । यद्वा 'शब्दपरादमी' इत्यादिवक्ष्यमाणं मूलं च विरुद्धं स्यात् । केवलक्तक्तवत्वोरनर्थकत्वाविशेषात्प्रौढ इत्यत्रैव प्रौढवानित्यत्रापि वृद्धेः तीयजातीययोरुभयोरनर्थकत्वात्पटुजातीयस्मा इति सर्वनामत्वस्य यञञोरनर्थकत्वाट्टिड्ढाणञ्चिति ङीपा द्वैपीदैवीबाहीतिप्रयोगस्य तवाप्यापत्तिश्च तुल्या । राजादिपदशक्तावव्यच्छेदकगौरवं च तवातिरिच्यते । सार्वधातुकार्धधातुकयोरिति गुणः मृजेर्वृद्धिरिति वृद्धिः पाघ्राध्मास्थाम्नादाण्दृश्यर्तिसर्त्तिशदसदां पिबजिघ्रधमतिष्ठमनयच्छपश्यर्च्छधौशीयसीदा इत्याद्यादेशविधानादिकं चार्थवति तिङन्ते धातौ चरितार्थं कृदादौ न प्रवर्तेतेति च तवाधिकमनिष्टम् । तथा च जय जय भवन् मार्ग्यः पिबः धम इत्यादिकं न सिध्येत् । यत्तु वृषण्वस्वश्वयोरिति वार्त्तिकेन वृषणश्च वृषण्वसुरित्यत्र भसंज्ञाविधानाज्ज्ञापकान्नलोपविधावर्थवद्ग्रहणपरिभाषाप्रवृत्त्यसम्भवः । अनेन हि भत्वं सम्पाद्यते न पदत्वं व्युदस्य पदान्तत्वाभावान्नलोपो वार्यते । सोयमर्थवत्परिभाषयैव निर्वाहे व्यर्थः स्यात् । तथा च न समासे नलोपाप्रसक्तिः । वृत्तिमात्रे ऽतिरिक्तशक्तावपि प्रत्ययानां विधानाय कल्पितमर्थमादायानुशासनमग्रिमत्वाद्यर्थविचारोर्थवत्परिभाषाप्रवृत्त्या वृध्याद्यतिप्रसङ्गश्च न दुर्वारः । शक्तावच्छेदकगौरवं चागत्या पक्षतावदाश्रयणीयम् । त्रसिगृधिधृषिक्षिपेः क्नुरिति क्नोः कित्करणाज्ज्ञापकादानर्थक्येपि धातुकार्यस्य ज्ञापनान्न गुणवृद्धिपिबाद्यादेशानामप्रवृत्तिः । गुणनिषेधार्थं हि कित्करणं गुणा-

प्राप्तावनर्थकं स्यात्। तस्माद्वयवानर्थक्ये न दोष इति। तच्चिन्त्यम्। ज्ञापकेन निर्वाहाभ्युपगमे टिड्ढाणञ्द्वयसज्दघ्ञमात्रच्तयप्ठक्ठञ्कञ्क्वरपः, दयायासश्च, वृश्चभ्रस्जसृजमृजयजराजभ्राजच्छशांष इत्यादौ ठञ्द्वयभ्राजग्रहणं व्यर्थम्। अत्र अयूराज्ग्रहणेनैव तेषां लाभादित्येकदेशग्रहणे समुदाया न गृह्यन्तइति ज्ञापनार्थं तेषां पृथग्ग्रहणमित्यपि वक्तुं शक्यत्वेनैकदेशानामर्थवत्त्वेपि वृध्याद्यतिप्रसङ्गपरिहारसम्भवात् कल्पितार्थवत्त्वत्यागायोगात्। एवं च धातुकार्यार्थं न ज्ञापकाश्रयणम्। युक्तं चैतत्। अन्यथा केवलप्रत्ययानां प्रयोगाभावेन समुदायशक्तिव्यतिरेकेण स्वशक्त्या प्रत्ययैः क्वाप्यर्थाप्रत्यायनादर्थवत्त्वकल्पनाया अपि निरालम्बनत्वादुक्तरीत्या जातीयादौ तीयादिकार्यस्य दुर्वारत्वापत्तेः। न च भ्राजिग्रहणं न ज्ञापकम्। राजिसहचरितफणादेरेव ग्रहणसिद्धये तदुपादानात्। विभ्राक् विभ्राट् इतिरूपद्वयसाधकत्वेन सार्थक्यादिति वाच्यम्। एवं हि षत्वस्य गणकार्यत्वापत्तौ यङ्लुक्यभावापत्तेः। साहचर्यस्य नियामकस्य व्याख्यातृभिरनुक्तेश्च। एवं सत्यपि रूपद्वयेप्याग्रहश्चेत् सूत्रे राजपदं ऋकारान्ते पठ्यताम्। गणान्तरीयभ्राजेरकारान्तत्वमस्तु। तथा सति नाग्लोपिशास्वृदितामिति चङ्परे णावुपधाह्रस्वाभावस्य, ऋकारकार्यस्य गणान्तरीये ऽकारान्ते प्रवृत्त्यसम्भवेन तस्य णौचङ्युपधायाह्रस्व इत्यनेन ह्रस्वरूपस्यापि सिद्धौ तत्सिध्यर्थं भ्राजभासभाषदीपजीवमीलपीडामन्यतरस्यामित्यत्र भ्राजिग्रहणं न कार्यमित्यतिलाघवमपि लभ्यते। अस्तु वा गणान्तरीयभ्राजेरादावृकारः। तावतापि सूत्रे ऋकारान्तग्रहणेन केवलाग्रहणसम्भवात्। सूत्रे राजपदमेव वा तन्त्रावृत्त्या राजिद्वयपरमस्तु। साहचर्यादेकदेशेन तस्यैव ग्रहणसम्भवात्। एवं च शक्तावव-

च्छेदकलाघवानुरोधेनैकदेशोर्थवानेव । अत एव कृत्तद्धितविधिसूत्रेष्वर्थग्रहणं प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति कृदादौ सकलासिद्धौ व्युत्पत्तिः । राजादिपदे समासात्पूर्वं नामत्वाद्यर्थमर्थवत्त्वं समासोत्तरमनर्थकत्वमिति पक्तेत्यादौ प्रत्ययोत्पत्तये धातुत्वमानेतुं क्रियावाचकत्वरूपार्थवत्त्वम् । प्रत्ययोत्पत्तौ वृत्तावनर्थकत्वमिति च विरुद्धकल्पनाभावः । पङ्कजपदादौ योगरूढिभ्यां तत्तच्छक्तिग्रहशालिनां बोधः "सत्यासक्तमनाः प्रवृद्धनरकच्छेदी द्विजेन्द्राश्रयो यश्चानेकमुखोद्भवाश्रयतनुः श्रीर्यत्र संराजते । योगङ्गां च सदा बिभर्त्ति स शिवो यः कामदेहाश्रयः सद्यः साम्यमयं प्रयातु भवतां कृष्णेन रुद्रेण वे" ति श्लेषप्राणकाव्ये बोधः । ओं कारे अकारोकारमकारैर्विष्णुत्वाशिवत्वब्रह्मत्वादिना बोधस्तदर्थकाथर्वशिखाद्युपनिषत्पुराणादीनां प्रामाण्यं च सङ्गच्छते । अन्यथा सकलैतद्विप्लवो योगरूढ्यच्छेदश्च स्यात् । नन्वेवं पाचयति देवदत्त इत्यादिणिजन्ते णिचः पूर्वभागस्यार्थवत्त्वे तदर्थभावनायाः वर्तमानत्वादिविवक्षायां मध्ये तिबादिकं स्यात् । अस्माकमानर्थक्यादधातुत्वान्न प्रसङ्ग इति चेन्न । प्रत्ययः परश्चेति सूत्राभ्यां प्रत्ययः पर एव न केवलो व्यस्तो मध्ये वा भवतीति नियमान्मध्ये तिङुत्पत्तौ णिचः परत्वहान्यापत्त्या तदसम्भवात् । विधानसमये धात्वव्यवधानसत्वेप्यग्रे तद्बाधे ऽकृतव्यूहपरिभाषया पूर्वमेवाप्रवृत्तेः । विशिष्य विधानात्तु बहुचः पुरस्तादकचः प्रकृतिमध्ये शबादेः प्रकृतिप्रत्यययोर्मध्यउत्पत्तिर्नान्यत्र । अत एव पक्तेत्यादौ धातुत्वसत्वेपि मध्ये न तिङ् । किं च । क्नोः कित्करणाज्ज्ञापकादानर्थक्येपि कृदादाविवात्रापि धातुकार्यं तवापि दुर्वारमेव । शमादिपदे च प्रत्येकवर्णशक्तिग्रहवतां पदार्थोपस्थितिस्तात्पर्ये सति वाक्यार्थबोधश्चेष्ट एवेति न कश्चि-

त्मत्येकार्थत्वे दोषः साधकं च लाघवाद्युक्तमेवेति चेत् । अत्रेदं प्रतिभाति । अवधृतशक्तिकानां पदैकदेशानामर्थवत्त्वे तेषामर्थवत्सूत्रेण प्रातिपदिकसंज्ञाविभक्त्युत्पत्त्यादिकं दुर्वारम् । अत एवार्थवत्पदं प्रत्येकवर्णवारणायेति प्राचां ग्रन्थाः कालापे दुर्गसिंहश्च सङ्गच्छते । न चेष्टापत्तिः । तन्मध्यपतितस्तद्ग्रहणेन गृह्यते इति न्यायेन प्रत्येकोत्तरसुपः प्रातिपदिकावयवत्वाल्लोपसम्भवादिति वाच्यम् । धनं वनमित्यादौ झलाञ्जशोन्ते नलोपः प्रातिपदिकान्तस्येति चापत्तेः । भासृदीप्तौ, यासृरासृ वाशृ शब्दे, दासृ दाने इत्यादावन्तर्गतभायारावादाइत्यादेरपि भा दीप्तौ या प्रापणे रा आदाने वा गतिगन्धनयोः दाण् दानइत्यादौ क्रियावाचित्वदर्शनादर्थवत्त्वाद्धातुत्वापत्तौ मध्ये तिङुत्पत्त्यापत्तेश्च । न चैकाच्द्विर्वचनन्यायेन धातुसंज्ञासमुदायएव भवेन्नावयवइति वाच्यम् । समुदायद्वित्वेप्यवयवानां द्वित्वं सम्पन्नमेवेति तत्र तथास्तु । समुदायस्य धातुसंज्ञायामपि प्रत्येकमवयवानां पर्याप्त्या तदभावादत्र सा स्यादेवेति वक्ष्यमाणत्वात् । पङ्कजं पीताम्बरः चित्रगुः अणुधनः महागृहः एकाक्षः पण्डितपुत्रः पुत्रवान् इत्यादौ शङ्कादिभिरन्यपदार्थस्याभेदान्वयापत्तेश्च । न च सति तात्पर्ये इष्टापत्तिः । शाब्दव्युत्पत्तिमात्रोच्छेदापत्तेः । सर्वत्रैवं सम्भवात् । स्वस्वशक्त्युपस्थापितयोर्विरुद्धविभक्तयनवरुद्धनामार्थयोरभेदान्वयस्य च सति तात्पर्ये दुर्वारत्वात् । समुदायेवयवानर्थक्ये चार्थवत्त्वक्रियावाचित्वयोरभावान्न प्रातिपदिकधातुसंज्ञे इति न विभक्त्युत्पत्तिरभेदान्वयो वा । ठ्वदयादिग्रहणेनैकदेशे समुदाया न गृह्यन्तइति ज्ञापनेनैव निर्वाहे अर्थवद्ग्रहणे नानर्थकस्येति पृथक् परिभाषाया व्यर्थत्वेनास्वीकाराच्च राजपुरुष इत्यादौ नलोपाप्रसङ्गो न वा तीयादिग्रहणे

जातीयादिग्रहणमित्याद्यतिप्रसङ्गः । न चाथेवत्परिभाषायाः पृथगस्वीकारे काशे कुशइत्यत्र शे इति प्रगृह्यत्वापत्तिः स्पष्टश्चात्रार्थवत्परिभाषयैव निर्वाहो भाष्यइति वाच्यम् । लक्षणप्रतिपदोक्तयोः प्रतिपदोक्तस्यैव ग्रहणमिति न्यायेनैवानतिप्रसङ्गे तदारम्भस्यान्याय्यत्वात् । सास्यदेवतेत्याद्यपि वैश्वदेवीत्यादिबोधकपदार्थानुशासनमवयवद्वारा लाघवोपायतया लः कर्मणिचभावेचाकर्मकेभ्यः, अन्हः खः क्रतुसमूहे प्राचांष्फतद्धितः, वृद्धाच्छः, दध्नष्ठक्, कालाठञ्, कलेर्ढक् इत्यादिवन्न विरुध्यते । नहि लकारठगादिभ्यः कदापि बोधः किं तु तिबीनायन्नीयादिभिः । एतदेवादाय प्रयोगोपाधीत्याद्याग्रिमादिविचारोपि प्रकृतिप्रत्यययोः प्रत्ययार्थप्राधान्यमिति व्युत्पत्तिरप्येवमेव । समानानुपूर्वीकस्य तस्यैव राजपदस्य धातोश्च वृत्तेः प्रागानुपूर्वीशक्ततावच्छेदिका आसीदित्यर्थवत्त्वम् । तदशायां च तदभावान्नार्थवत्त्वमिति को विरोधः । यथैकस्यैव मणेः सिद्धेश्चोत्तेजकौषधसिषाधयिषादशायां न प्रतिबन्धकत्वं तदभावदशायां च प्रतिबन्धकत्वं सर्वसिद्धम् । पङ्कजपदेपि समासशक्तिवादिभिश्चित्रगुः राजपुरुष इत्यादिवद्योगार्थमन्तर्भाव्यैव साभ्युपेयतइति न योगार्थबोधानुपपत्तिर्योगरूढ्युच्छेदो वा । वृक्षविशेषे शक्ते अश्वकर्णपदे पुनर्योगार्थस्य शक्तावननुप्रवेशात्केवलरूढतैव । अत एव सत्यासक्तमना इत्यादावप्यनेकार्थशक्तसमासादनेकार्थबोधान्नानुपपत्तिगन्धोपि । न चैवमपि व्युत्पन्नानां श्वेतो धावतीत्यादौ कुक्कुर इतो धावति शुभ्रो वा तथेत्यर्थद्वयबोधो न स्यादिति वाच्यम् । प्रत्यहं विश्वेश्वरो दृश्यते इत्यत्र काका प्रश्नादर्शनोपहासानां तथात्ववत् "द्वारोपान्तानिरन्तरे मयि तया सौन्दर्यसारश्रिया प्रोल्लास्योरुयुगं परस्परसमासक्तं समासादि-

तम् । आनीतं पुरतः शिरोंशुकमधः क्षिप्ते चले लोचने वाचस्तच्च निवारितं प्रसरणं सङ्कोचिते दोर्लते" इत्यादौ प्रच्छन्नकान्ताविषयाकृतविशेषबोधवच्चोपपत्तेः । ओंकारस्थले चोमित्येकाक्षरं ब्रह्मेति भगवद्वचनात्समुदायशक्तिवदक्षरगतैकत्वस्यापि सिद्धेः प्रत्येकवर्णानामेवाभावात्क्वानर्थक्यापादनशङ्का । न च समुदायैक्यमादायैकत्वं तापिनीयाथर्वशिखादिश्रुतौ "ततोभूत्रिवृदोङ्कारो योव्यक्तप्रभवः स्वराडि" त्युपक्रम्य "तस्य ह्यासंस्त्रयो वर्णा अकाराद्या भृगूद्वह । धार्यन्ते यैस्त्रयो भावा गुणनामार्थवृत्तय" इति भागवताद्यनेकपुराणादौ च वर्णत्रयस्य प्रतिपादितत्वादिति वाच्यम् । वर्णसमाम्नायादौ ऋषिभिर्व्यञ्जनस्यार्धमात्रिकत्वाभिधानान्मकारेण प्रश्नोपनिषदुक्तमात्रात्रयस्यार्थवशिखोक्तसार्धमात्रात्रयस्य प्रणवस्यार्धमात्रायामपि नादबिन्दुकलाविकलेति भेदस्य चानेकपुराणाद्युक्तस्यैवमप्यनुपपत्तेस्तुल्यतयोपासनार्थमेवार्धमात्रादेरिव वर्णत्रयस्यापि कल्पनयैव श्रुत्यादौ तथा वर्णनस्योपपादनीयत्वात् । तथाप्यकारोकारमकारध्वनिभिः नारायणशिवब्रह्ममायावच्छिन्नमेकमेवेश्वरचैतन्यमुच्यतइति न विरोधः । "त्रयीं तिस्रो वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिरपि दधत्तीर्णविकृति । तुरीयं ते धाम ध्वनिभिरवरुन्धानमणुभिः समस्तं व्यस्तं त्वां शरणद गृणा त्योमिति पद" मित्यप्यत एव सङ्गच्छते । तस्मान्न काश्चिदवयवानर्थक्ये दोषः । यद्वा । अर्थवत्त्वं क्रियावाचकत्वं च फलोपधानात्मकमेववक्तव्यम् । अत एवार्थवत्सूत्रेर्थवत्पदमुन्मत्तवाक्येतिव्याप्तिवारणायेति दुर्गासिंहः सङ्गच्छते । तथा च समासांतर्गतराजपदादेरस्त्वानुपूर्वीशक्तावच्छेदिकेति न गौरवम् । समुदायशक्तिज्ञानस्यावयवशक्तिज्ञानजन्यबोधप्रतिबन्धकत्वस्योक्तावयवे धातुसंज्ञाद्यतिप्र-

सङ्गवारणायावश्यकत्वात्स्वार्थबोधफलोपधानाभावरूपाजहत्स्वार्थता सूपपादैव । अस्मिन्नपि पक्षे प्रागुक्तरीत्यार्थवत्परिभाषाया अस्वीकारान्नातिप्रसङ्गादित्यवधेयम् । एवं च जहत्स्वार्थतावशादेव नीलोत्पलं अक्ष इत्यादौ नोद्देश्यविधेयभावान्वयो न वान्यपदार्थे त्रित्वस्य सत्यपि तात्पर्ये ऽन्वयबोध इत्यादिकं सङ्गच्छते । ननु समुदायशक्तिनिबन्धनेयं जहत्स्वार्थता तादृशशक्तिमति समासे एव भवेत्। तत्कथं वृत्तिमात्रे जहत्स्वार्थतेति सिद्धान्तो मूलं वा सामान्यतः सङ्गच्छताम् । न च वृत्तिमात्रे एवातिरिक्तशक्तिः सिद्धान्तासिद्धेति तन्निबन्धनेयमपि स्यादिति वाच्यम् । व्यपेक्षायां सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगन्धः स सर्वः संगृहीतः समासस्त्वेको ऽसंगृहीत इति भाष्यविरोधादिति चेन्न । भाष्ये समासग्रहणस्योपलक्षणत्वात् । एकार्थीभावे वृत्तिरन्यथा वाक्यमिति सिद्धेः समर्थानांप्रथमाद्वेत्यत्र समर्थग्रहणमकर्त्तव्यं क्रियतइति समर्थसूत्रे भाष्यात्। समर्थपदं कृतसन्धित्वार्थकमन्यथा व्यर्थत्वादिति तत्रापि भाष्योक्तेश्च । पदविधिरिति लिङ्गाच्च । पदमुद्दिश्य यो विधिः प्रवर्तते तस्यैव पदविधित्वात् । एवं च कृत्सु ये पदमुद्दिश्य विहितास्तत्रैव जहत्स्वार्थता नान्यत्रेति द्रष्टव्यम् । यथाश्रुते व्याकरणस्थसर्वविधीनां पदसंबन्धित्वाविशेषाद्व्यावर्त्तकतापत्तौ पदवैयर्थ्यापत्तेरिति दिक् । तथा चैकार्थीभावे एव जहत्स्वार्थता सूपपादेति स एव जहत्स्वार्थपक्षः । नन्वस्मिन्पक्षे द्वन्द्वादौ युगपदधिकरणवचनता व्यर्था स्यात् । अहरहरित्यादौ एकार्थीभावाभावेन समासाप्रसङ्गादिति चेत् । इष्टापत्तिः । समर्थसूत्रे कथितव्यपेक्षावादिमते परं तादिति द्रष्टव्यम् । अत एव सेयं युगपदधिकरणवचनता दुःखा च दुरुप-

पादा चेति भाष्यएव स्वमतमभिप्रेत्योक्तम् । ननु विग्रहे सा नास्तीत्येवमभिप्रायं तदित्युक्तामिति चेन्न । समासे तस्याः साधकस्य भाष्यकारैरन्यथासिद्ध्यपवर्णनविरोधापत्तेः । तथा चायमर्थः । सेयं पूर्वं व्युत्पादिता युगपदधिकरणवचनता दुःखासमर्थसूत्रे दूषितव्यपेक्षावादस्मारकत्वात् । दुरुपपादा दुष्टं निःसारमुपपादनं प्रमाणं यस्याः सा तथा । निष्प्रमाणेत्यर्थः । तथाहि । न तावत् द्यावा क्षामेति व्यासे दर्शनात्समासे सा स्वीकार्या । द्यावा क्षामेत्यस्य छान्दसत्वात् । नाप्यहरहरित्यादौ समासप्रसङ्गवारणाय सा स्वीकार्या । समर्थः पदविधिरिति परिभाषयैव तद्वारणात् । धवखदिरावितीतरेतरयोगे भेरीपटहमिति समाहारे च पुष्पवन्तौ पश्येत्यादाविवैकपदोपात्तो मिलितावेवान्वियातां न तु प्रत्येकम् । अन्यथा पश्य धवं खदिरं छिन्धीत्यादाविव पश्य धवखदिरौ छिन्धीत्यादावपि प्रत्येकान्वयबोधापत्तिः । तथा च साहित्यरूपेणोपस्थित्यर्थं शक्त्यभ्युपगमेनैकार्थीभावसामर्थ्यसत्त्वाद्भवति समासः । अहरहरिति समुच्चये प्रत्येकं गवादेः क्रियान्वयेन विशिष्टशक्त्यस्वीकारेणासामर्थ्यान्न सः । एवमन्वाचयेपि द्रष्टव्यम् । भाष्यकारास्तु चार्थेद्वन्द्व इति सूत्रेर्थवद्ग्रहणसामर्थ्यादेव तद्वारणमाहुः । अन्यथा च द्वन्द्व इत्येवावक्ष्यत् । तथा च समुच्चयान्वाचयेतरेतरयोगसमाहारेषु समुच्चयान्वाचययोरर्थग्रहणसामर्थ्याल्लुभ्यस्य चैनेव यः प्रकाशितोर्थस्तत्र विद्यमानमनेकं सुबन्तं समस्यतइत्यर्थस्याभावान्न समासः । प्रतीयते च गामश्वमित्यत्र समुच्चयो विनापि चकारम् । भिक्षामट गां चानयेत्यन्वाचये चानुषङ्गि पदं चार्थे वर्त्तते न प्रधानाभिधायीत्यनेकं चार्थे न वर्त्तते अतस्तयोः समासाभावेपि इतरेतरयोगसमाहारयोश्चार्थयोर्विवक्षायां समास

इति चार्थेद्वन्द्व इति सूत्रादेष लाभान्निष्प्रमाणा सेति विभाव्यतां सूरिभिः । उक्तं च कैयटेनापि । दुःखेतिप्रतीतावनुपरोधात् । दुरुपपादेति प्रमाणाभावात् । वृद्धव्यवहाराद्धि शब्दार्थाध्यवसायो न च प्लक्षशब्दस्य न्यग्रोधाभिधायित्वं दृश्यते । न च गौणार्थत्वं प्लक्षशब्दस्य । न्यग्रोधशब्देनैव न्यग्रोधस्य प्रतिपादितत्वात् । न च प्लक्षन्यग्रोधावित्युक्तेर्थद्वयप्रतीतेरावृत्तिः । समासस्य चानेकार्थाभिधानात्ततः परयोर्द्विवचनबहुवचनयोरुपपत्तिरिति द्विवचनबहुवचनान्यथानुपपत्त्यापि नास्ति युगपद्वाचितामतिपत्तिरिति । तद्राजस्य बहुष्वित्यस्य बहुवचनान्तस्य तद्राजस्य लुक् स्यात्तेनैव तद्राजार्थेनैव बहुत्वान्वयश्चेदित्यर्थः । स च प्रत्येकं बहुत्वसमवायादुपपद्यते । अस्मिंत्पक्षे सुबामन्त्रित इति सूत्रे समर्थःपदविधिरिति शब्दाधिकारमाश्रित्यानुवर्त्य व्यपेक्षारूपमर्थमादायोपपादनीयम् । व्यपेक्षावादमभिप्रेत्याह । अजहदिति । न जहति पदानि स्वार्थं यस्यां सा तथा । अस्याभिप्रायः प्राक् प्रपञ्चितः । नव्यास्त्वन्यथैवोपपादयन्ति । तथाहि । परस्परान्वयरूपाव्यपेक्षैव सामर्थ्यं सूत्रसिद्धम् । इसुसोः सामर्थ्यइत्यादौ समर्थपदस्य तथार्थकत्वकल्पेः पराङ्गवद्भावानुरोधाच्च । अन्यथा पराङ्गवद्भावे एतत्समासादावेकार्थीभाव इत्युपगमे सूत्रस्यार्थभेदाद्वाक्यभेदापत्तेः । पुरुषो राज्ञो भार्या देवदत्तस्येत्यादौ राजभार्येति समासोप्यत एव न । न चात्रानभिधानान्न समास इति भाष्योक्तं युक्तम् । इसुसोः सामर्थ्यइत्यादावपि तद्वैयर्थ्यापत्तेः । तिष्ठतु सर्पिः पिब त्वमुदकमित्यत्र षत्वाभावस्यानभिधानादुपपत्तेः । किं चैवमिकोयणचीत्यत्राज्ग्रहणानर्थक्यं स्यात् । हलि परे यणभावस्यानभिधानादुपपत्तेरिति । धवखदिरावित्यादौ चानेकमन्यपदार्थे चार्थेद्वन्द्व इति विध्यवैयर्थ्याया-

सामर्थ्येपि समासः दध्योदन इतिवत्। अन्वाचयसमुच्चययोस्त्वर्थग्रहणसामर्थ्यादेव नातिप्रसङ्ग इति भाष्यसिद्धं प्रागवोचाम। नन्वत्र पक्षे ऋद्धस्य राज्ञः पुरुष इत्यत्रापि समासापत्तिः। न च सविशेषणानामिति वार्त्तिकान्निस्तारः। एवंविधानेकवचनकल्पने गौरवापत्तेः। अत एव व्यपेक्षापक्षमुद्घाट्य अथैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्य इति तन्मतदूषणाय भाष्यम्। विवृतं चैतत् कैयटेन। यदि वृत्तावेकार्थीभावो नाभ्युपगम्येत तर्हि वाक्यवत्सङ्ख्याविशेषोपसर्जनविशेषणादीनां प्रसङ्गात्तदभावो वचनेन प्रतिपाद्यः। वावचनं च कर्त्तव्यम्। समानार्थस्य वाक्यस्यानिवृत्त्यर्थम्। एवं निष्कौशाम्बिर्गोरथो घृतघटो गुडधानाः सुवर्णालङ्कारो द्विदशाः सप्तपर्ण इत्यादिषु क्रान्तयुक्तपूर्णमिश्राविकारसुच्प्रत्ययलोपवीप्साजातिविशेषाभिधायित्वं वचनप्रतिपाद्यं स्यादिति गौरवप्रसङ्ग इति तस्मादयुक्तोयं व्यपेक्षापक्ष इति चेन्न। अस्माकमपि राजपदस्य राजसम्बन्धिनि निरादीनां निष्क्रान्त्यादौ लक्षणाभ्युपगमेन पदार्थैकदेशत्वाद्विशेषणलिङ्गसङ्ख्याद्यनन्वयस्य लक्षणयोक्तार्थत्वाक्रान्ताद्यप्रयोगस्य च सम्भवात्। सा च निरूढलक्षणाकरणे तथाप्रयोगापत्तिः। लक्षणया तथा प्रतिपादने समासोऽन्यथा विग्रह इत्यपि स्वभावत एव स्यादिति वाचनारम्भगौरवमपि नाशङ्कनीयम्। अत एवोक्तभाष्यकैयटार्थं मनसिनिधाय "बहूनां वृत्तिधर्माणां वचनैरेव साधने। स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रित" इति व्यपेक्षावाददूषणैकार्थीभावयोः साधनाय वक्ष्यमाणं मूलमपास्तमिति वक्ष्यते। तस्मादथैतस्मिन्नितिभाष्यं न तद्दूषणाय तदभावात्। किं तु भूषणाय। अस्मिन्व्यपेक्षासामर्थ्यपक्षे योयमेकार्थीभावकृतोतिरिक्तशक्तिकृतो विशेषः स लक्षणया

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली ।

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्ड ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्ड १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं स-भाष्यं खण्ड ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपाद-भाष्यसहिता	१	०
वाक्यपदीयं खण्ड ३	३	०
रसगङ्गाधरः खण्ड ८	८	०
परिभाषावृत्तिः खण्ड २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपा-दप्रणीतभाष्यसहितम् खण्ड २	२	०
शिक्षासङ्ग्रहः खण्ड ५	५	०
नैष्कर्म्यसिद्धिः खण्ड ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्र-म सभाष्यं खण्ड ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम्	१	०
(बृहत्) वैयाकरणभूषणम् खण्ड २	२	०
न्यायलीलावती (यन्त्रस्था)	०	०

इन से अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकैं हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजैं ॥

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

विज्ञापनम् ।

बनारससंस्कृतसीरीजनाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

——:o:——

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्रचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

व्रजभूषणदास और कम्पनी,
चांदनीचौक के उत्तर नई सड़क
बनारस ।

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.,

AND

G. THIBAUT, Ph. D.

No. 53.

(बृहत्) वैयाकरणभूषणं

सर्वतन्तस्वतन्तश्रीमत्कौण्डभट्टविरचितम् ॥

(BRIHAT) VAIYÂKARANA BHÛSHANA,

A Treatise on Sanskrit Grammar,

BY PANDIT KAUNDA BHATTA.

EDITED BY

PANDIT RÂMA KRISHNA ŚÂSTRÍ,

Alias TÂTYÂ ŚÂSTRÍ PATÂVARDHANA,

PROFESSOR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

FASCICULUS III.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

———:o:———

PRINTED AT THE RAJ RAJESHWARI PRESS & THE TARA PRINTING WORKS,

BENARES.

1899.

स्वयं विभाव्य वक्तव्यः । न तु मया पृथगुच्यते वपर्वगौरवभयादिति भावात् । एवं च दूषणपरतया व्याख्यन् कैयट उपेक्ष्यो विद्वद्भिः । अथ व्यपेक्षापक्षे समासस्यार्थवत्त्वाभावेन प्रातिपदिकत्वं न स्यादिति भाष्याशय इति चेन्न । समासग्रहणस्यासमर्थसमासे संज्ञाविधानाय विध्यर्थत्वावश्यकत्वेन तत एव समाससामान्यस्यापि तत्सम्भवात् । न चासूर्यललाट्योरिति ज्ञापकादसमर्थसमासस्य सा स्यादसूर्यललाट्योरित्यनेन असूर्यशब्दे उपपदे खश् विधीयते । उपोच्चारितं पदमुपपदम् । पदं च सुप्तिङन्तमिति स्वीकारादिति वाच्यम् । एवं हि कृत्तद्धितान्तयोरपि ज्ञापकादेव तत्सिद्धौ कृत्तद्धितसमासाश्चेति सूत्रवैयर्थ्यापत्तेः । तथाहि । आतोधातोरित्यनेनाकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपो विधीयमानो धातोः साक्षात्प्रातिपदिकसंज्ञाविरहेण सुबन्तत्वाभावाद्यचिभमिति भसंज्ञाया अप्रवृत्तेरनुपपन्न इति क्विबादिप्रत्ययान्तस्य तावाक्षिपत्सामान्यात्कृदन्तमात्रस्य तज्ज्ञापयति । एवं तद्धितश्चासर्वविभक्तिरिति केवलतद्धितस्य धातुवत्पर्युदासेन प्रातिपदिकत्वाभावेन विभक्त्यन्तत्वविरहादसर्वविभक्तिरिति विशेषणवैयर्थ्यापत्तेः । सर्वस्य तद्धितस्याव्ययत्वापत्तेश्च तद्विशिष्टस्य तावाक्षिपत्सामान्यात्तद्धितान्तमात्रस्य तज्ज्ञापयति । ज्ञापकसिद्धं न सर्वत्रेति न्यायात्कृत्तद्धितान्तमात्रस्य सा न स्यादिति चेत्तर्ह्यश्राद्धभोजी ब्राह्मणः अनचिच, सर्वचर्मणःकृतःखखञौ,विल्वादेरप्यसाधुतापत्तेः । असूर्यललाट्योरिति ज्ञापकसिद्धस्यासार्वत्रिकत्वात् । अथ मूलकेनोपदंशमित्यादौ प्रातिपदिकत्वाप्राप्तिः कुद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया तस्य कृदन्तत्वात् । तथा च तद्वारणाय जन्मवानिति संग्रहाय च यत्र संघाते पूर्वो भागः

पदमुत्तरश्च न प्रत्ययस्तस्य नेत्यपि वचनं कर्त्तव्यमिति गौरवं स्यादिति समासग्रहणमेव तदर्थमस्तु। एकार्थीभावमभ्युपेत्यार्थवत्सूत्रेण समासस्य संज्ञास्त्विति चेन्न। अधातुरिति पर्युदासबलादेव पूर्वसूत्रेर्थवत्त्वलाभसम्भवेन व्यर्थस्यार्थवत्पदस्यैवैवंविधनियमार्थत्वसम्भवे पृथक् समासे शक्तिकल्पने गौरवात्। न चोत्तरसूत्रे तदन्तत्वसिद्ध्यर्थमावश्यकस्यानर्थक्यविरहात्कथं नियामकत्वमिति वाच्यम्। उत्तरार्थस्यापीह किञ्चित्रपो इति न्यायेन नियमार्थताया वक्तुं शक्यत्वात्। विनापि तदन्तत्वस्य केवलानां कृत्तद्धितानां संज्ञाया निष्प्रयोजनत्वेन डतरडतमान्तयोरिव लाभसम्भवाच्च। अन्यथा केवलडतरडतप्रयोरपि सर्वनामसंज्ञापत्तेः केवलप्रयोगाभावेन सा निष्फलेति चेत्तुल्यम्। किञ्चार्थवद्ग्रहणानुवृत्त्या कथं तदन्तत्वसिद्धिः। केवलकृत्तद्धितयोरपि तत्तद्विध्यनुरोधेनार्थवत्त्वाक्षतेः अन्यथा प्रादूहोढोढ्येषैष्येष्वित्यत्र प्रौढ इति क्तान्तवत्प्रोढवानिति क्तवत्वन्तग्रहणस्य तीयस्य ङित्सु सर्वनामतायां द्वितीयस्माइत्यादाविव पटुजातीयायेत्यत्राप्यापत्तेश्च। अर्थवद्ग्रहणे नानर्थकस्येति परिभाषाप्रवृत्तेरुभयोरनर्थकत्वादसम्भवात्। अथ डतरडतमयोः संज्ञा व्यर्थेति तदन्तत्वसिद्धिरस्तु। इह च केवलकृत्तद्धितयोः संज्ञायाः फिषोन्तउदात्त इति स्वर एव प्रयोजनम्। न च प्रत्ययस्वरेण बाधान्न तत्सम्भवः। येन नाप्राप्तिन्यायेन प्रातिपदिकस्वरस्य सुब्धातौ धातुस्वरवत्प्रबलत्वात्। एवं प्राक्रियादशायां कल्पितमर्थवत्त्वमादायार्थवद्ग्रहणपरिभाषा सूपपादा। कृत्तद्धितौ यावर्थवन्तावित्यन्वये प्राशस्त्यार्थकमतुपा प्रशस्तार्थवन्त्वं लभ्यते। तच्च प्रत्ययाज्ञानेपि समुदायव्युत्पन्नानां बोधात्तस्यैवेति सिध्यत्यर्थवत्पदेन तदन्तत्वमिति चेत्तर्ह्यर्थवदप्रत्ययः प्रातिपदिकमित्येवोपपत्ता-

धातुरिति धातुप्रत्ययपर्युदासवैयर्थ्यापत्तिः । तयोः प्रशस्तार्थवत्त्वाभावात् । सुबन्तानामेव प्रशस्तार्थवत्त्वाद्राम इत्यादेरनापत्तेश्च । अन्वयव्यतिरेकाभ्यामर्थवत्त्वं च केवलप्रत्ययेपि समम् । नातस्तेन तदन्तत्वसिद्धिः । वस्तुतस्तु शशशृङ्गं नास्तीत्यादौ शशशृङ्गशब्दस्य संज्ञासिद्धये समासग्रहणं विध्यर्थमेवोचितम् । अन्यथा सा न स्यात् । अर्थाभावेनार्थवत्त्वाभावात् । किं च यदि वृत्त्यार्थप्रतिपादकत्वमर्थवत्त्वं सूत्रे गृह्यते तर्ह्येकार्थीभावस्य त्वया वृत्तिमात्रे स्वीकरात्कृत्तद्धितान्तयोरपि तेनैव संग्रहात्सुबन्तातिङन्तयोरेकार्थीभावाभावेनासंग्रहादर्थवत्सूत्रे प्रत्ययान्तपर्युदासस्य कृत्तद्धितसूत्रवैयर्थ्यस्य चापत्तिर्दुर्वारा । कृद्ग्रहणाभावेन च मूलकमित्यादिष्वतिप्रसङ्गासम्भवान्न नियमार्थमपि समासग्रहणावश्यकत्वमिति विभावयामः । तस्मान्न कश्चिद्दूषणापक्षे दोषः । अयमेव पक्षो नैयायिकाद्यङ्गीकृत इति स्फुटीकरिष्यामः । एतन्मते एव वाप्यश्च इत्यादावीदूतौ च सप्तम्यर्थ इत्यत्रार्थग्रहणसामर्थ्यादीदुदन्तस्य सप्तम्यर्थमात्रपर्यवसन्नत्वलाभात्तदभावान्न प्रगृह्यसंज्ञेति भाष्ये स्थितं सङ्गच्छते । तस्मात्परस्परान्वये योग्यतारूपा व्यपेक्षैव सामर्थ्यम् । तच्च पदानां स्वार्थत्यागे न सम्भवतीति अजहत्स्वार्था व्यपेक्षा चैकैव । तथा चात्र मते लक्षणानि नासम्भवीनीत्याशङ्का सुदृढेति भावः । नन्वत्र पक्षद्वयेपि पुरुषांशप्राधान्यसत्त्वाद्राजपुरुषः सुन्दर इतिवद्राजपुरुषो देवदत्तस्य चेत्यपि स्यादित्याशङ्कां निरसितुमाह । ते पुनरिति । वृत्तिद्वयमपीत्यर्थः । तत्र हेतुं प्रदर्शयन्नेव विभजते । भेद इत्यादि । वाच्यत्रैविध्यादेव त्रैविध्यमिति भावः । भेदः । अन्योन्याभावः । तथा च । राजपुरुष इत्यादावराजकीयभिन्नः पुरुष इति बोधः । तथा चैतद्विरोधान्नोक्तप्रयोगापादनमिति भावः ।

सम्बन्धमात्रभानमिति पक्षे त्वाह । संसर्ग इति । तथा च राजसम्बन्धी इति बोधः । अत्र पक्षे भेदस्य पूर्वमते संसर्गस्य भानमानुमानिकं तद्विरोधान्नातिप्रसङ्ग इति भावः । भेदसम्बन्धयोरुभयोरपि शाब्दं भानमिति मते त्वाह । उभयं चेति । तथा चाराजकीयभिन्नः राजसम्बन्धी च पुरुष इति औपगव इत्यत्रानुपगवपत्यभिन्नस्तदपत्यं चेति बोधः । यद्यपि संसर्गमपेक्ष्य भेदो गुरुः तद्बोधश्च मानसोपि सम्भवति । तथापि बोधकत्वं शक्तिस्सा चैतद्बोधस्यौत्तरकालिकत्वे मानाभावाच्छाब्दयामीत्यनुव्यवसायान्मानसत्वे नियतनिर्णयासम्भवाच्च गौरवस्य प्रामाणिकत्वाद्व्यापारोभावनेति कारिकोक्तरीत्या प्रयोजकत्वाच्च निर्बाधेति द्रष्टव्यम् । पक्षत्रयमप्येतत्समर्थसूत्रे स्पष्टमाकरे । नन्वेतद्वाच्यरूपं त्रिविधं सामर्थ्यं वाक्यमात्रएवेति वाक्ये तावत् त्रेधा सामर्थ्यमित्यादिना शब्दकौस्तुभे सूचितत्वाद्वृत्तेस्त्रैविध्यं कथमत्र सङ्गच्छतामिति चेत्सत्यम् । अथ वा समर्थाधिकारोयं वृत्तौ क्रियते सामर्थ्यं भेदः संसर्गो वेत्यादिना आहत्य भाष्ये वृत्तावेव त्रिविधसामर्थ्यलाभेनादोषात् । वस्तुतस्तु वृत्तावेव तत्त्रितयं युक्तम् । न तु वाक्ये । तथा सति राजपुरुषो देवदत्तस्य चेतिवद्राज्ञः पुरुषो देवदत्तस्य चेत्यपि न स्यात् । शब्दकौस्तुभेपि वाक्ये वृत्तिवाक्ये इति व्याख्येयमिति दिक् । परे पुनर्जहत्स्वार्थाजहत्स्वार्थयोर्लक्षणावृत्तिविशेषत्वं मन्यमाना यत्र शक्याशक्योपसंग्राहकं रूपं लक्ष्यतावच्छेदकं सा ऽजहत्स्वार्था । यथा काकेभ्यो दधि रक्ष्यतां भूवादयो धातवः लम्बकर्णमानयेत्यादौ दध्युपघातकत्वक्रियावाचित्वसमवायादिसबन्धादिकमादाय लक्षणायाम् । अन्यत्र जहत्स्वार्थेति । अन्ये तु नायं विभागः । तथा स-

त्येकस्य लक्ष्यतावच्छेदकत्वे शक्यस्य कर्मादेर्विशेष्यतापत्तेः । किं तु यत्र विधेयविशेषणतया शक्यस्यान्वयस्तत्राजहत्स्वार्था । यत्रोपलक्षणतया तत्र जहत्स्वार्था । चित्रगुरित्यत्र चित्रगोसम्बन्धित्वेनोपस्थितावप्युपलक्षणतया जहत्स्वार्थेति । यत्रैव यत्राकांक्षितच्छक्यान्वयस्तत्राजहत्स्वार्थान्यत्र च न कथं चिदपि तत्र जहत्स्वार्थेत्यपि के चित् ॥ ३० ॥

एकार्थीभावे समास एकः संगृहीतो न व्यपेक्षायामिति भाष्यादेकार्थीभाव एव सिद्धान्तसम्मतः । राज्ञः पुरुष इति वाक्यप्रतिपाद्यार्थस्य विशिष्टरूपेण शक्त्या प्रतिपादनं च तत्त्वम् । व्यपेक्षावादिमतं च युक्तिभाष्यविरोधादयुक्तमेवेति तन्मूलको लक्षणानामुक्तिसम्भवोप्ययुक्त इति समाधिं हृदि निधाय भाष्यकारमतं समासेतिरिक्तां शक्तिं साधयन् समर्थयते ।

समासे खलु भिन्नैव शक्तिः पङ्कजशब्दवत् ।
बहूनां वृत्तिधर्माणां वचनैरेव साधने ॥ ३१ ॥
स्यान्महद्गौरवं तस्मादेकार्थीभाव आश्रितः ॥

तथाहि । चित्रगुरित्यत्र चित्रगोस्वामिनो राजपुरुष इत्यत्र राजसम्बन्धिनः सम्बन्धस्य वा । उपकुम्भमित्यत्र कुम्भसामीप्यस्य । धवखदिरावितीतरेतरद्वन्द्वे साहित्यस्य पाणिपादमिति समाहारे पदार्थानां बहुत्वादेकवचनान्वयार्थं समाहारस्य प्रतीतये शक्तिरुपेयैवेति भावः । अत्र व्यपेक्षावादिनो नैयायिकादयः । न तावद्बहुव्रीहौ शक्तिः । लक्षणयैवोपपत्तेः । यद्यपि चित्रगुरित्यादौ चित्रपदलक्षणायां गोः चित्रान्वयानुपपत्तिः । चित्रपदस्य तत्स्वाम्यर्थकत्वेन तस्य पदार्थैकदेशत्वात् । गोपदलक्षणायां गावि चित्रान्वयो न स्यादिति लक्षणा न युक्ता

तथापि पदद्वयमपि लक्षकम् । परस्परं तात्पर्यग्राहकत्वाच्च नान्यतरवैयर्थ्यमिति सम्प्रदायः । वस्तुतस्तूत्तरपदे एव लक्षणा । प्रत्ययानां सन्निहितपदार्थगतस्वार्थबोधकत्वव्युत्पत्तेः । ननु तथाप्यन्यपदार्थे नियततात्पर्याच्छक्तिरेव । तस्य शक्तिमात्रनिर्वाह्यत्वात् । न च तदेवासिद्धम् । अत एव लोहितोष्णीषा ऋत्विजः प्रचरन्तीत्यत्र नान्यपदार्थे तात्पर्ये प्राप्तत्वादिति पूर्वमीमांसायां निरूढमिति वाच्यम् । तर्हि तत्र तात्पर्याभावात्तत्र लक्षणापि न स्यादिति चेन्न । निरूढलक्षणयापि तन्निर्वाहादिति नव्याः । तथा तत्पुरुषेपि राजपुरुष इत्यादौ राजपदस्य सम्बन्धिनि लक्षणयोपपत्तौ न शक्तिः । नन्वनुपपत्तिं विना कथं लक्षणेति चेत् । यदि न लक्षणा तर्हि राजपुरुषयोरभेदान्वयबोधः स्यात् । तथा राजवाहनमित्यत्रापि । किं चैवं राजसम्बन्ध्यभिन्नः पुरुष इति बोधो न स्यात् । तस्माद्राजपदस्य तत्सम्बन्धिनि निरूढलक्षणा । नियततात्पर्यानुरोधात् । न तु षष्ठ्यर्थलक्षणा । राजसम्बन्धरूपः पुरुष इति बोधापत्तेः । समानाधिकरणइति व्युत्पत्तेरिति के चित् । राजसम्बन्धे एव लक्षणा षष्ठ्या सम्बन्धमात्रस्य विवरणात् । न चोक्तरीत्या ऽभेदान्वयापत्तिः । घटो नेत्यत्र व्यभिचारेण तथा व्युत्पत्तेरसिद्धेः । नञः स्थले भिन्नैव व्युत्पत्तिरिति चेन्न । समासेपि तथा सम्भवादित्यन्ये । कर्मधारये च न शक्तिर्न वा लक्षणा पदार्थयोः पदाभ्यामभेदस्य च संसर्गतया लाभात् । अत एव षष्ठीतत्पुरुषापेक्षया कर्मधारयो लघीयानिति निषादस्थपत्यधिकरणे स्थितम् । उपकुम्भमित्यत्रापि सामीप्ये लक्षणयोपपत्तौ न शक्तिः । पाणिपादमिति समाहारेपि समाहारे लक्षणयोपपत्तौ न शक्तिः । स चैकबुध्यवच्छिन्नत्वं सेनावनादिवत्, तुल्यवदेकक्रियान्वयित्वं चेति चोभ-

योः समामिति वदन्ति । अपरे तु पाणिपादमित्यादौ पदार्थमात्रप्रतीतेर्न समाहारे शक्तिर्लक्षणा वा । तदप्रतीतेः । न च पाणिपादयोरनेकत्वाद् द्विवचनापत्तिः । अनुशासनादत्र द्विवचनादेरसाधुत्वादित्याहुः । धवखदिरावितीतरेतरद्वन्द्वादावपि लक्षणयैवोपपत्तौ न शक्तिः । न च साहित्यलक्षणायां चैत्रमैत्रौ गच्छत इति द्वित्वगमनादेरन्वयो न स्यात्साहित्ये तदभावादिति वाच्यम् । इतरेतरद्वन्द्वे साहितस्य पदार्थस्यैव विशेष्यत्वात् । तस्य च द्वित्वादौ योग्यत्वात् । अत एवेतरेतरद्वन्द्वसमाहारयोर्भेदः । तत्र साहित्यस्य विशेष्यत्वात् । अत एव तस्यैकत्वादेकवचनम् । अत्रापि पूर्वपदे लक्षणा । प्राथम्यात् । न चैवं तस्याप्रकृतित्वाल्लक्ष्ये विभक्त्यर्थान्वयो न स्यादिति वाच्यम् । समस्यमानपदार्थगतस्वार्थबोधकत्वस्यैव स्वीकारात् । सर्वसाधारण्यात्पूर्वोक्तरीत्यादरे चोत्तरपदे एव सास्त्विति सम्प्रदायः । नात्र शक्तिर्न वा लक्षणा । एकस्मृत्यारूढपदद्वयात्स्वस्वशक्त्यर्थयोरेकदा स्मृतिसम्भवादुपस्थिते तत्र द्वित्वान्वयसम्भवाच्च । साहित्यमप्येकक्रियान्वायित्वमग्रे एवावगम्यते इति न तदर्थमपि शक्तिलक्षणे । विभक्त्यर्थान्वयस्यापि त्वदुक्तरीत्यैवोपपत्तेः । न च विभक्तेरेकमात्रपदार्थगतस्वार्थबोधकत्वादुभयत्र द्वित्वान्वयो न स्यादिति वाच्यम् । मात्रपदान्तर्भावेण मानाभावाद्गौरवाच्च व्युत्पत्तेरसिद्धेः । न चैवमपि योग्यतावच्छेदकं साहित्यमन्तरेण द्वित्वान्वयासम्भवात्साहित्यलक्षणा । योग्यतावच्छेदकोपस्थितेरनपेक्षणात् । उपस्थिते योग्ये एव तदन्वयनियमात् । अत एव घटेन जलमाहरेत्यत्र छिद्रेतरस्यैव योग्यतावलादन्वयः । किं च द्वित्वादिरूपप्रत्ययार्थान्वये प्रकृत्यर्थतावच्छेदकमेव योग्यतावच्छेदकम् । अन्यभिचारात् । छे-

दमादिपदार्थान्तराम्वयेपि तदेव तथा । नन्वेवं सौमे वसानावग्निमादधीयातामित्यत्र समुच्चितयोरधिकारो न स्यात् । तेन रूपेणानुपस्थितेरिति चेन्न । उक्तरीत्या आदधीयातामित्यनेन पश्चात्साहित्ये बुद्धे सहितयोरधिकारबोधसिद्धेः । यत्कर्त्तव्यं तदनया सहेत्यनेन सिद्धत्वाच्चेति नव्याः । एवमन्यत्रापि लक्षणयोपपत्तौ न शक्तिरित्याहुः । तान्निराचष्टे । पङ्कजपदवदिति । पङ्कजशब्दस्थडप्रत्ययस्यापि पद्मत्वरूपेण पद्मे लक्षणयोपपत्तौ न रूढिः सिद्ध्येदिति भावः । न च पङ्कजपदान्नियमेनोपस्थितेः प्रामाणिकानां शक्तिव्यवहाराच्च शक्तिरिति वाच्यम् । तुल्यत्वात् । कथमन्यथा निरूढलक्षणेति सङ्गच्छते । यत्तु पङ्कजपदे न रूढिरिति दृष्टान्तासिद्धिमाहुः प्राभाकराः । तत्र रथकारवत्सम्भवात् । तत्रापि रूढ्यस्वीकारे रथकाराधिकरणहानिरिति ॥ ११ ॥

ननु पङ्कजपदस्थले ऽवयवमजानतोपि बोधादवयवशक्तिरविदुषोपि बोधाच्च न लक्षणया निर्वाहः । नचैवं चित्रगुरित्यादौ रथकारादावापि प्रकारान्तरबलात्तथेत्यतः समाधत्तेऽन्तरमाह । बहूनामिति । अथात्र वृत्तेर्धर्मा विशेषणलिङ्गसङ्ख्याद्ययोगादयः । तेषां वचनैः साधने गौरवम् । तदर्थं वचनारम्भे गौरवं, तस्मादेकार्थीभावः । अखण्डशक्तिरूप इत्यर्थः । अयं भावः । यदि लक्षणाभ्युपेयते तदा शोभनायां गङ्गायामित्यादौ लाक्षणिकेपि सङ्ख्यालिङ्गविशेषणान्वयबद्राजपुरुष इत्यत्र राज्ञः, चित्रगुरित्यत्र चित्रे गवि च, उपकुम्भमित्यत्र कुम्भे, पाणिपादमित्यत्र पाण्यादौ, औपगव इत्यत्रोपगोः, पक्केत्यत्र पाके, इत्येवमादिषु शोभन इत्यादिविशेषणानां लिङ्गसङ्ख्याकारकाणां च यथापथमन्वयप्रसङ्गादिति । अथ सविशेषणानां वृत्तिर्न वृत्त-

स्य वा विशेषणयोगो नेति वार्त्तिकाम्नायं दोष इत्यत आह । वचनैरिति । गौरवमित्यन्तेनान्वयः । न्यायेनैवार्थसिद्धौ वार्त्तिकवैयर्थ्यादिति भावः । अत एव मत्याख्यातमेतद्भाष्ये इति व्याचक्षते । तच्चिन्त्यम् । लक्षणापक्षेपि राज्ञः पदार्थैकदेशत्वसत्त्वेनान्वयासम्भवात् । शोभनायां गङ्गायामित्यत्र च गङ्गापदस्यैव शोभनगङ्गातीरलक्षकत्वं पदान्तरं तात्पर्यग्राहकमिति लक्षणावादिनां मतमिति न दोष इति दिक् । तस्माद्राजपुरुष इत्यादौ लक्षणां विना प्रथममुपपादितं सन्निधानात्संसर्गलाभ इति भाष्यसिद्धं मतमनेन दूष्यतइति भावार्थो वर्णनीयः । एतन्मते राज्ञः पदार्थैकदेशत्वाभावेन विशेषणान्वयो दुर्वार एवेति भावः । एवं चाथैतस्मिन्व्यपेक्षायां सामर्थ्ये योसावेकार्थीभावकृतो विशेषः स वक्तव्य इति भाष्यं, यदि वृत्तावेकार्थीभावो नाभ्युपगम्यते तदा वाक्यवत्सङ्ख्याविशेषोपसर्जनविशेषणान्वयः स्यादिति तदभावो वचनेन प्रतिपाद्यः वावचनं च कर्त्तव्यं समानार्थकवाक्यस्यानिवृत्त्यर्थमिति तद्व्याख्यायां कैयटश्च भाष्योदाहृतानां लक्षणामस्वीकुर्वाणानां व्यपेक्षावादिनां मते इति बोध्यम् । स्पष्टं चैतत्तद्विदां, तत्र तथैव । वचनैरित्यादि प्राग्वत् । न च ऋद्धस्य राजपुरुष इत्यादेः साधुतावारणाय वार्त्तिकं तवाप्यावश्यकमिति वाच्यम् । तन्ना सुन्दरः घटो नित्यः जातिरित्यादिः विना लक्षणां पुत्रे घटत्वे चान्वयमादाय साधुतावारणाय पदार्थैकदेशान्वये वाक्यस्यासाधुत्वस्य सामान्यत एव निर्णीतत्वादिति भावः । इदमुपलक्षणम् । वार्त्तिकात्तादृशप्रयोगसाधुत्वनिराकरणेपि शाब्दबोधस्तादृशप्रयोगात् दुर्निवार इति शक्तिस्वीकार आवश्यक इत्यपि द्रष्टव्यम् । अथातिरिक्तशक्तिपक्षे कथं तदनन्वय इति चेत् । उच्यते । एक-

देशे निराकांक्षत्वात्र तत्रान्वय इति । तथाहि । राजपुरुष इत्यत्र राजा, चित्रगुरित्यत्र चित्रादि, उपकुम्भमित्यत्र कुम्भः, पाणिपादमित्यादौ पाण्यादि पदार्थैकदेशः । तत्र च मान्वयः पदार्थैः पदार्थेन सम्बध्यते न तु तदेकदेशेनेति व्युत्पत्तेः । अथ चैत्रस्य नप्ता चैत्रादन्यः देवदत्तस्य गुरुकुलमित्यत्र विशेषणेष्वन्वयवदत्रापि किं न स्यादिति चेन्न । तत्तत्वं स्वजन्यजन्यत्वम् । तत्र स्वजन्यपुत्रसम्बन्धेन नप्तर्येव चैत्रादेरन्वयः । अत एव घटादन्य इत्यत्रापि स्वप्रतियोगिभेदसंसर्गेणैवान्वय इति दृष्टान्तासिद्धेः । उक्तं हि वाक्यपदीये "समुदायेन सम्बन्धो येषां गुरुकुलादिना । संस्पृश्यावयवांस्ते तु युज्यन्ते तद्वता सहे" ति । अत एव समाहारे पाणिपादमित्यत्र समासे शक्तिसिद्धौ पाणिपादं वादयेत्यादौ समाहारे विशेष्ये वादनकर्मत्वान्वयासम्भवात्परम्परया तत्रान्वय इति न दोषः । यद्वा ससम्बन्धिकपदार्थस्थले एवैकदेशान्वयः । तथैव व्युत्पत्तेः । तथा च वाक्यपदीयेप्युक्तम् । "सम्बन्धिशब्दः सापेक्षो नित्यं सर्वः समस्यते । वाक्यवत्सा व्यपेक्षास्य वृत्तावपि न हीयत" इति । पक्षद्वयमप्येतत्समर्थसूत्रे भाष्ये स्पष्टम् । यत्तु स्वीकृतायामपि वृत्तौ राजपदाद्युपस्थापिते तदन्वयस्तवापि दुर्वार इति, तज्जहत्स्वार्थेति कारिकायां निरस्तम् । तस्मान्न क्लृप्तशक्त्योपपत्तिरिति शक्त्या लक्षणया वा विशिष्टार्थबोधकत्वरूप एकार्थीभाव आवश्यक इति भावार्थ इति विभावयामः । यद्वा न प्राचीनवैयाकरणोक्तरीत्या क्लृप्तशक्त्योपपत्तिर्न वा नैयायिकादिरीत्या लक्षणयेति सर्वत्र समासादौ शक्तिः स्वीकार्येत्याभिप्रेत्यायं ग्रन्थ इति व्याचक्ष्महे । तथा च वृत्तेर्धर्माः प्रातिपदिकसंज्ञा प्राचीनमुवृत्तिरपरतदुत्पत्तिरूपा बहवस्तेषां वचनैः साधने गौरव-

पित्यर्थः । तथाहि । राजपुरुषश्चित्रगुरित्यादौ प्रातिपदिकसंज्ञासुत्पत्त्यादिकं सर्वासिद्धम् । तच्च शक्तिलक्षणान्यतरसम्बन्धेनार्थवत्त्वाभावादर्थवदधातुरित्यस्याप्रवृत्तेर्न सम्भवति । न च कृत्ताद्धितसमासाश्चेत्यतस्तेषां प्रातिपदिकसंज्ञेति वाच्यम् । तत्राप्यर्थवद्ग्रहणानुवृत्तेरावश्यकत्वात् । अधातुरिति पर्युदासादेव पूर्वसूत्रेर्थवत्त्वसिद्धावर्थवद्ग्रहणानर्थक्यात् । उत्तरसूत्रे तदन्तग्रहणार्थं तदावश्यकत्वाच्च । न चैवमनुवृत्तस्यार्थवद्ग्रहणस्य तदन्तत्वसिद्ध्यर्थं कृत्ताद्धितयोरेवान्वयोस्तु न समासेपि फलाभावादिति वाच्यम् । निराकांक्षतया तयोरेवान्वयासम्भवात् । एकपदार्थतावच्छेदकावच्छिन्नएवापरपदार्थान्वयस्य साकांक्षत्वात् । अन्यथैतौ देवदत्तयज्ञदत्तौ पण्डितौ इत्यस्यान्यतरस्मिन्नपण्डिते पलाशे छेदनानन्वये धवखदिरपलाशांश्छिन्धीत्यादेश्च निराकांक्षत्वानापत्तेः । न चैवमप्यसूर्यंपश्या इत्यादावसमर्थसमासे ऽर्थवत्त्वाभावात्प्रातिपदिकसंज्ञा न स्यादिति वाच्यम् । तत्र तस्य समासस्य तावदर्थे शक्तावनुपपत्त्यभावेनार्थवत्सूत्रेणैव तत्सम्भवात् । उक्तं च समर्थसूत्रे कैयटेन । "असमर्थसमासेपि क्रियायामुभयोः सन्निपातादेकार्थीभावस्तद्द्वारकोस्त्येवे"ति शशशृङ्गादिपदे पुनर्विश्वकलितप्रसिद्धं शशशृङ्गादिकमारोपितसम्बन्धे शक्यमतोर्थवत्सूत्रादेव सेति ध्येयम् । तस्मान्न समासग्रहणात्सा । किं चैवं कृत्ताद्धितपदयोः समासग्रहणस्य च विध्यर्थत्वे मूलकेनोपदंशमित्यादौ प्रातिपदिकत्वापत्तिः । न च समुदायोत्तरं न कृत्प्रत्ययाममो ऽतो न तत्कृदन्तमिति वाच्यम् । कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणमिति परिभाषया विशिष्टग्रहणसम्भवात् । किं च वक्ष्यमाणरीत्या वाक्यस्याप्यर्थवत्त्वे प्रातिपदिकसंज्ञापत्तेः । न च तत्प्रत्ययान्तमेवेति वाच्यम् । प्रत्ययग्रहणे

यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया तस्या-प्रत्ययान्तत्वात् । तथापि चैतदुभयवारणार्थं वाक्यस्य नेत्यपि वचनं कर्तव्यम् । किं च कृत्तद्धितपदाभ्यां तदन्तस्यैव प्रातिप-दिकसंज्ञा विधीयते न तद्विशिष्टमात्रस्य । पचतकीतिमध्यस्थि-ततद्धितस्याप्यापत्तेः । औपगव इत्यादिसुबन्तानामापत्तेश्च । पूर्वसूत्रे प्रत्ययान्तस्य पर्युदासे प्राप्ते तद्विशिष्टस्य प्रातिप्रसव इ-त्यस्यैव पर्यवसन्नत्वात् । तथा च बहुपटव इत्यादौ तद्धितान्त-स्वाभावात्सा न स्यात् । न च पूर्वं विद्यमानजसैव रूपासि-द्धेर्नैव पुनः प्रातिपदिकसंज्ञेति वाच्यम् । स्वरभेदार्थं तत्स्वीकारात् । तस्मात्तत्सिद्ध्यर्थं वचनान्तरारम्भापत्तिरिति भावः । तस्मा-दिति । तथा च समासस्य बहुपटव इत्यादेश्चार्थवत्त्वादर्थव-त्सूत्रेणैव सेति मूलकेनोपदंशमित्यादौ संज्ञावारणार्थं समासग्रहणं वाक्यस्य चेत्तर्हि समासस्यैवेति नियमार्थकमिति भावः । यत्तु वृत्तिमात्रे एवैकार्थीभावात्सुबन्ततिङन्तयोस्तदभावादर्थवत्सूत्रे प्र-त्ययान्तपर्युदासस्य कृत्तद्धितसमासाश्चेति सूत्रस्य चारम्भ एवा-युक्त इत्युक्तम् । यच्चार्थवत्सूत्रेर्थवत्त्वमर्थप्रतीत्यनुकूलवृत्तिमत्त्व-मात्रम् । तच्च समासादेर्विशिष्टस्यातिरिक्तत्वाभावात्पदसमुदाय-रूपत्वाच्च पदनिष्ठवृत्त्याश्रयत्वमादायैव शक्तसमुदायस्यापि सुलभमेव । तथा च धातुप्रत्ययार्थमादायैव कृदन्तादेरप्यर्थव-त्सूत्रेणैव प्रातिपदिकसंज्ञासिद्धिः । न चैवं पचति रामः अजा छागी गामानयेत्यादेरपि प्रकृतिप्रत्ययार्थमादायार्थवत्त्वात्प्राति-पदिकत्वापत्तिः । कृत्तद्धितसमासाश्चेति सम्पूर्णसूत्रस्य नियमार्थतया सर्ववारणात् । तथाहि । यदि प्रकृतिप्रत्ययान्तसमुदा-यस्य संज्ञा तर्हि कृत्तद्धितान्तयोरेव । पदसमुदायस्य चेत्तर्हि स-*मासस्यैवेत्येवं नियमः कल्पनीयः । एवं चार्थवत्सूत्रे धातुप्रत्ययप-*

र्युदासेनैवोपपत्तौ प्रत्ययपदमात्रार्थं प्रत्ययान्तपर्युदासोपि न कार्यः । उक्तनियमेनैव सर्वातिप्रसङ्गवारणादिति वदन्ति । तन्न । किबन्तधातूनां किब्लोपे सत्यधातुरिति पर्युदासात् इयान् इयदित्यादावप्रत्यय इति पर्युदासात्प्रातिपदिकसंज्ञानापत्तेः । विधायकाभावात् । तदर्थं कृत्तद्धितग्रहणस्य विध्यर्थत्वे प्रागुक्तेष्वतिप्रसङ्गो दुर्वारः । अथ तिप्तझीत्यारभ्य ङ्योः सुबिति तिप्प्रत्याहारो भाष्यसिद्धस्तमादायातिप् प्रातिपदिकमित्येव सूत्र्यतां कृतं प्रत्ययतदन्तमात्रपर्युदासं विधाय कृत्तद्धितग्रहणेन । समासग्रहणं च नियमार्थमास्तां, तथा च समासस्यापि संज्ञा नानुपपन्नेति चेन्न । एवमपि प्रत्येकं वर्णानां केवलकृत्तद्धितधातूनां च संज्ञावारणायार्थवत्त्वादेरवश्यं प्रवेश्यत्वेन समासासंग्रहस्य गौरवस्य च त्वन्मते दुष्परिहरत्वात् । यत्तु समासान्तर्गतप्रत्येकपदानामर्थवत्त्वमादाय समुदायस्य संज्ञा स्यादेव । अन्यथा टिघुभादिषु समुदायशक्त्यस्वीकारेण समुदायस्य सा न स्यात् । तत्रापि शक्तिस्वीकारे साधुत्वापत्तौ तेषां साध्वसाधुबहिष्कारासम्भवादिति । तन्तुच्छम् । तथा सति गौरश्वः पुरुषो हस्तीत्यादौ समुदाये धनं वनमित्यादौ च प्रत्येकं प्रातिपदिकत्वापत्तिः । तथा च सुपोधातुप्रातिपदिकयोरिति विभक्तिलोपस्य नलोपः प्रातिपदिकान्तस्येति नलोपस्य चापत्तेः । देवदत्तादिसंज्ञाशब्देष्विव टिघुभादिष्वपि सांकेतिकशक्त्यार्थवत्त्वात्प्रातिपदिकत्वसम्भवाद् दृष्टान्तासिद्धेश्च । अनादित्वरूपसाधुत्वमपि टिघुभादीनां सादित्वपक्षे नेति तत्पक्षे एव तेषां साध्वसाधुबहिष्कारस्तेषामनादित्वपक्षे अनपभ्रष्टत्वादिलक्षणान्तरपक्षे वा तेषामपि साधुत्वं भाष्यादिसिद्धमेवेत्यलं दन्द्रभणेन । अर्थार्थप्रतीतिजनकज्ञानविषयशब्दत्वमर्थवत्त्वं वाच्यम्, तच्चै-

कस्य पदस्य लक्षणया अपरस्य तात्पर्यग्राहकत्वादिना वेत्येवं समूहस्य निर्बाधम्। प्रत्येकं तत्र विभक्त्यनुत्पत्तेरेकाच्चाद्विर्वचनन्यायात्। सङ्घातस्यैकार्थ्यात्सुबभावो वर्णादीति वार्त्तिकादेति निपातानां द्योतकत्वादिनिर्णये वक्ष्यमाणरीत्या द्रष्टव्यमिति चेन्न। अवयवानां द्वित्वे समुदायो नानुगृहीतः समुदायस्य द्वित्वेवयवो ऽनुगृहीत इति हि स न्यायः। न चात्र तथा समुदायात्सुबुत्पत्तावपि पूर्वावयवानामसुबन्तत्वात्। तथा च वर्णोत्तरं विभक्त्युत्पत्तौ बहुतरदोषप्रसङ्गात्। विनिगमनाविरहएवैकाच्चाद्विर्वचनन्यायबीजामिति चेत्तथाप्यत्र विभक्त्युत्पत्तितत्कार्यादिकं प्रकृते विनिगमकम्। सङ्घातस्यैकार्थ्ये तु सिद्धा समुदायशक्तिः। सङ्घातार्थे एवैकत्वान्वयात्सङ्घाते विभक्तिरित्येव तदर्थादिति ध्येयम्। अथ समासे उत्तरपदस्यैव प्रातिपदिकसंज्ञा न समुदायस्येति, तत्रानुपदं वक्ष्यामः। अथ समासवाक्यस्य विशिष्टार्थलक्षणायामर्थवत्त्वाबाधात्प्रातिपदिकसंज्ञा नानुपपन्ना। न च शक्यसम्बन्धरूपा सा तत्रासम्भविनी। ज्ञाप्यसम्बन्धस्यैव लक्षणात्वात् तस्याश्चात्राविरोधात्। गम्भीरायां नद्यां घोष इत्यनुरोधेनास्या एवोचितत्वाच्च। तत्र प्रत्येकं पदेषु तदसम्भवात्। तथाहि। न तावद्गम्भीरपदं तीरलक्षकम्। नद्यामित्यनन्वयापत्तेः। नहि तीरं नदी। अत एव न नदीपदेपि। न च पदद्वये, प्रत्येकं विशिष्टनदीतीराप्राप्तिप्रसङ्गात्। न च गभीरनद्योरन्वयबोधोत्तरं विशिष्टनद्यास्तीरं लक्ष्यते नदीपदेन। साक्षात्सम्बन्धात्। नदीपदस्य जनितान्वयबोधत्वेन निराकांक्षत्वात्कथं पुनर्लक्षकत्वमिति चे, त्सत्यम्। तात्पर्यविषयीभूतबोधजनकादाकांक्षासत्त्वात्। अन्यथा ऽवान्तरवाक्यार्थबोधजननक्षमत्वेन निराकांक्षत्वप्रसङ्गादित्यादिकं साध्विति वाच्यम्।

निम्नं गभीरं गम्भीरमिति कोशाद्गम्भीरादिपदानामपि द्रव्यवाचित्वेन तुल्यत्वात् । वस्तुतः शूरोदारपदानामिवैषामपि गुणमात्रे प्रयोगादर्शनात् द्रष्टव्यवाचित्वमेव । अन्यथा नीलादिपदानामिव गुणे प्रयोगप्रसङ्गादिति ध्येयम्। नापि प्रत्ययानां मकृत्यर्थगतेत्यादिव्युत्पत्तेर्नदीपदे एव सा न गभीरपदे, तदुत्तरविभक्तेः साधुत्वमात्रार्थत्वादिति वाच्यम् । अभेदार्थकताया नैयायिकैरुणान्यायान्मीमांसकैश्चार्थवत्त्वस्वीकारात्। अर्थसाधुत्वे सम्भवति शब्दसाधुत्वस्यान्याय्यत्वाच्च । गभीरपदे लक्षणायां तस्यैव विशेष्यत्वसम्भवाच्च । नापि विनिगमनाविरहात्पदद्वयेपि विशिष्टलक्षणा । वाक्ये एकलक्षणायां तस्मात्समुदायएव सा । अत एव सर्वत्र वाक्येन वाक्यार्थो लक्ष्यतइति भट्टपादवाचस्पतिमिश्रकल्पतरुप्रभृतिभिर्निर्णीतम् । उक्तं च "वाक्यार्थो लक्ष्यमाणो हि सर्वत्रैवेह च स्थित"मिति । अत एव प्राभाकरा अप्यर्थवादवाक्ये प्राशस्त्यलक्षणां मेनिरे । तदुक्तं नयविवेकटीकायां वरदराजेन । यद्यप्येकैकपदसम्बन्धिता प्राशस्त्ये नास्ति एकैकपदादप्रतीतेः । तथापि समुदायसम्बन्धितास्त्येव । न च समुदायसम्बन्धिनि लक्षणा न युक्ता । सम्बन्धानुपपत्त्योर्लक्षणाहेत्वोः समत्वादिति । अत एवाथातो ब्रह्मजिज्ञासेत्यत्र जिज्ञासेत्यत्र जिज्ञासाशब्देनान्तर्णीतं विचारमुपलक्ष्येति विवरणाचार्यैरुक्तम्। अत एव यज्ञायुधिशब्देन यजमानो लक्ष्यतइति संक्षेपशारीरककृतोक्तम् । यज्ञायुधिशब्दजिज्ञासाशब्दयोः सुबन्तत्वलक्षणपदत्वेपि शक्तत्वलक्षणापदत्वाभावेन शक्यसम्बन्धरूपलक्षणाया असम्भवात् । अत एव सत्यं ज्ञानमनन्तं ब्रह्मेत्यत्र वाक्ये एव लक्षणेति वेदान्तैकदेशिनः । अत एव तद् ब्रह्म विजिज्ञासस्वेति श्रुतौ जिज्ञासाशब्देन विचारो

लक्ष्यते । सा च छत्रिण इतिवत्समुदाये एवेति वेदान्तभूषणकृतः । एवं च वाक्यलक्षणापक्षे एवैतत्सङ्गच्छतइति स एव न्याय्यस्तथा सति प्रकृतेपि लक्षणयार्थवत्त्वात्प्रातिपदिकत्वं नानुपपन्नमिति चेन्न । शक्यसम्बन्धस्यैव लक्षणात्वात् । अन्यथा ऽपभ्रंशेपि लक्षणापत्तेः । तज्ज्ञाप्यस्य सत्त्वात् । किं चैवमपि प्रत्येकं पदैर्निगमकाभावात् पदेषु भिन्ना लक्षणा वाक्ये चापरेति गौरवं स्यात् । शक्यसम्बन्धपक्षेणाविरहाल्लाघवमिति । वस्तुतस्त्वेवं सति पदघटितपदानां चानुपूर्वी लक्षकतावच्छेदिका वाच्येति गौरवम् । अस्मन्मते च वाक्ये तद्विरहात्पदानां सा नावच्छेदिकेति लाघवम् । किं च । ज्ञाप्यसम्बन्धइत्यत्र वृत्त्या ज्ञापकत्वमर्थबोधजनकज्ञानविषयत्वमात्रं वा प्रविष्टम् । आद्ये न वाक्यलक्षणा शक्यभावात् । अन्त्ये प्रत्येकं वर्णनामप्यर्थवत्त्वापत्तौ विभक्त्याद्युत्पत्तिः स्यात् । अपि चैवमेतज्ज्ञाप्यसम्बन्धीदमिति ज्ञानजन्योपस्थितिरेव लक्षणाजन्येति पर्यवसितम् । तथा च समवायादिना घटपदज्ञाप्याकाशसम्बन्धिनोप्युपस्थितस्य शाब्दबोधविषयतापत्तिरिति ध्येयम् । एवं चैतन्मूलकाः पूर्वोक्ता ग्रन्थाः श्लथा एव । एवं च तद्ब्रह्म विजिज्ञासस्वेत्यत्रापि न समुदायलक्षणा । यत्तु छत्रिण इत्यत्रेव समुदायलक्षणेति । तदश्रद्धेयम् । विषमत्वादुपन्यासस्य । तथाहि । युगपद्वृत्तिद्वयाभ्युपगमे छत्राभावे लक्षणया छत्रिणस्तदभाववन्तश्च गच्छन्तीति बोधोपपत्तेः । तदस्वीकारे च छत्रविशिष्टछत्राभावे लक्षणासम्भवात् । अत एवाथातो ब्रह्मजिज्ञासेत्यत्र ज्ञाधातोः साध्यावस्थापन्नज्ञाने लक्षणासनश्च विचारे इति स्वीकृत्य श्रोतव्य इत्यादिश्रुतिसमानार्थत्वाय कर्त्तव्येतिपदं वाध्याहृत्य ज्ञानाय विचारः कर्त्तव्य इति सू-

आर्थ इति नृसिंहाश्रमैर्विवरणटिप्पणतत्त्वविवेकयोर्निर्णीतम् । इदं पुनरिहावधेयम् । ज्योतिष्टोमः स्वर्गसाधनमित्यत्र साध्यत्वेनोपस्थितिं विनापि यथा साध्यसाधनभावबोधस्तथात्राप्यनुवादादिदोषपरीहारायाध्याहृतेन कर्तव्येतिपदेनेषूसाधनत्वार्थकेन साध्यसाधनभावबोधसम्भवान्मास्तु साध्यावस्थज्ञाने लक्षणा । तच्च साधनत्वं ज्ञाननिरूपितमेव । धातोर्लक्षणाकल्पकस्यैव तत्र मानत्वात् । कर्त्तव्य इत्यत्र तव्यप्रत्ययो ऽर्हार्थे भविष्यतीति चेत्तर्हि श्रुतिसमानार्थत्वहानिः स्यात् । अत एव प्रत्ययानां प्रकृत्यर्थगतेत्यादिव्युत्पत्तेस्तव्यार्थः साधनत्वमपि कृतावन्वियान्न विचारइति परास्तम् । तथा च श्रुतिसमानार्थत्वायेति वा असङ्गतं स्यादिति दिक्। तस्मादविद्यानिवर्तकतावच्छेदकधर्मविशिष्टज्ञानस्यैव विचाररूपश्रवणसाध्यत्वात्तादर्थ्यकं साध्यावस्थपदमिति तत्त्वमित्यास्तां प्रकृतानुपयुक्तविचार इति दिक् । तथा च प्रातिपदिकसंज्ञारूपं कार्यमेव शक्तिं साधयति धूम इव वन्हिमिति तात्पर्यार्थ इति युक्तं पश्यामः । अथ वा वृत्तिधर्माणामुद्देश्यविधेयभावेनान्वयाभावादीनामित्यर्थः । अयं भावः । नीलमुत्पलं पण्डितो ब्राह्मण इत्यसमासइव नीलोत्पलं पण्डितब्राह्मण इत्यादौ नोद्देश्यविधेयभावेनान्वय इति सर्वसिद्धम् । तथा वषट्कर्तुः प्रथमभक्ष इत्यत्र भक्षानुवादेन प्राप्यविधानापत्तिमाशङ्क्य प्रथमभक्ष इति समस्तमेकं पदं तत्र चैकप्रसरत्वान्नैकांशेनभक्षणमुद्दिश्य प्राथम्यविधानं युक्तमिति भक्षान्तरविधिरिति वषट्काराच्च भक्षयेदिति शेषलक्षणे । अङ्गैः स्विष्टकृतं यजतीत्यत्र पशौ चोदकप्राप्तः स्विष्टकृत्प्रधानहविर्भ्यो हृदयादिभ्य एकादशभ्योपि कर्त्तव्यत्वेन प्राप्त इति त्र्यङ्गैरिति वचनमङ्गानुवादेन त्रित्वविधानार्थमित्याशङ्क्य एकं हीदं समासपदं तत्सर्वमुद्देशकमुपादा-

यकं वा युक्तम् । उत्तरार्द्धेन्तूद्दिश्य पूर्वार्द्धे विधीयमाने प्रसरभेदात्सामर्थ्यविघातात्समासो न स्यादिति त्रित्वविशिष्टाङ्गान्तरविधिरिति बाधलक्षणे च व्यवस्थितमेकार्थीभावानभ्युपगमे ऽसङ्गतं स्यात् । सति च तस्मिन् घटपदे घटघटत्वयोरिव विशिष्टशक्त्यैव त्रित्वविशिष्टांगोपस्थितौ न वाक्यार्थरूप उद्देश्यविधेयभावादिना ऽन्वयो युज्यते । न चान्यतरपदे विशिष्टार्थलक्षणयैव नायं दोष इति वाच्यम् । अग्रिमकारिकायां तदसम्भवस्य व्युत्पादयिष्यमाणत्वात् । न च यद्वृत्तयोगप्राथम्याद्युद्देश्यताबोधकस्य तद्वृत्तयोगपाश्चात्यादिविधेयताबोधकस्य चाभावान्न तथेति वाच्यम् । प्रथमो भक्षः पण्डितो ब्राह्मण इत्यत्रापि सति तात्पर्ये भक्षब्राह्मणाद्युद्देश्यकप्राथम्यपाण्डित्यादिविधेयकबोधदर्शनेन तस्य व्यभिचारित्वात् । किं तु भक्षब्राह्मणाद्युद्देश्यकप्राथम्यपाण्डित्यादिविधेयकशाब्दबोधे भक्षाद्युपस्थापकपदसमभिव्याहृतप्राथम्यवाचकपदोपस्थितिरेव नियामिका । इत्थमेव सर्वत्रोद्देश्यविधेयभावस्थले व्यवस्था । सा च निर्बाधैव । न च तवाप्येवं तथान्वयबोधापत्तिः । इत एव जहत्स्वार्थतास्वीकारात् । न च ममापि तथैव निस्तारः । तथासति राजादिबोधाय समुदायशक्तिं विना तस्या ऽसम्भवेन तदुपपादकत्वेन च शक्तिस्वीकारापत्तावितरसिद्धेः । न चोद्देश्यविधेयभावावच्छिन्नविषयतया शाब्दबोधं प्रत्यसमस्तपदजन्योपस्थितिर्हेतुरित्येव कार्यकारणभावोस्त्विति वाच्यम् । दामोदरः पूज्यः राजपुरुषः सुन्दरः प्रथमभक्षः कर्तव्यः पीतवासाश्चतुर्भुजः गङ्गाधरः सर्वेश्वरः राजपुरुषश्चित्रगुः 'यदि रथन्तरसामा सोमः स्यादैन्द्रवायवाग्रान् गृह्णीया' दित्यादौ तथा बोधानापत्तेः । प्रकारान्तरस्य दुर्वचत्वात् । न च भक्षस्याङ्गनां चोद्देश्यताबोधकाद्वितीयादेः प्रा-

थम्यत्रित्वादेर्विधेयतावोधकस्तृतीयादेश्चाभाव एवैकप्रसरताभंगशब्दार्थ इति वाच्यम् । पण्डितो ब्राह्मणः भक्षः प्रथम इत्यादावुद्देश्यविधेयभावयोरिव स्वर्गकामो यजेतेत्यादौ कर्मत्वकरणत्वयोरिव च बोधसम्भवात् । तयोर्लाक्षणिकत्वोक्तिस्तु वाक्यार्थलक्षणाभ्युपगमान्नानुपपन्ना । न च विधेयवाचकपदस्य परतन्त्रोपस्थापकत्वम्, उद्देश्यवाचकपदस्य प्रधानोपस्थापकत्वम्, तादृशोपस्थितिविषयत्वं चार्थस्योद्देश्यत्वम् । तच्चैकपदे अव्युत्पन्नं कल्प्येतेत्येवैकप्रसरताभङ्गशब्दार्थ इति वाच्यम् । अतिरिक्तभक्षमप्राकृतकार्यतां चापेक्ष्य तथाकल्पनस्यैव युक्तत्वात् । प्रथमो भक्ष इत्यत्रैव समासेपि पदद्वयसत्त्वाच्च । पदभेदे चोद्देश्यविधेयभावप्रवृत्तेर्दुर्वारत्वात् । अवान्तरविभक्त्यभावस्य दधि मधुरमित्युद्देश्यविधेयभावे ऽपि सत्त्वेनाप्रयोजकत्वात् । समासातिरेकेणैकनामार्थयोः परस्परानन्वयेपि तत्रैव एकपदोपस्थाप्यानां परस्परमन्वयकल्पनवत्तथापि कल्पनासम्भवाच्च । न चाङ्गानुवादेन त्रित्वं भक्षानुवादेन प्राथम्यं चैं नात्र विधातुं युक्तम् । अङ्गानां बहुत्वेन बाधात् । अध्वर्यादिभक्षाणामपि प्राथम्यापत्तेश्च । तथा च स्विष्टकृत्साधनत्वविशिष्टांगं वषट्कर्तृविशिष्टं भक्षणं चानूद्यतइति स्वीकार्यं तथा च नैरपेक्ष्यत्याग एव बीजमिति शङ्क्यम् । प्रथमभक्षपदे भक्षाणां त्र्यङ्गैरित्यत्राङ्गानां च विशेष्यत्तया तद्विशेषणवित्रक्षायामपि राजपुरुषः सुन्दर इत्यत्रेव नैरपेक्ष्यहान्यभावात् । न च विशिष्टोद्देशे वाक्यभेदापत्तिरेव तद्बीजम् । केवलाङ्गानाम्भक्षस्य चोद्देष्टुमशक्यतया हविरार्त्यधिकरणन्यायेन तादृशोद्देश्यलाभादिति विभावयामः । अथैवं सप्तदशारत्निर्वाजपेयस्य यूपः, एकं साम तृचे क्रियते, लोहितोष्णीषा ऋत्विजः प्रचरन्ती, त्यादौ वाजपेयसम्बन्धियूपारत्निम् ऋ-

चमुष्णीषं चोद्दिश्य साप्तदश्यत्रित्वलौहित्यानां विधिर्न स्यात्। समासे उद्देश्यविधेयभावाभावादिति चेन्न। "विधाने चानुवादे च यागः करणमिष्यते। तत्समीपे तृतीयान्तस्तद्वाचित्वं न मुञ्चतीतिस्वीकारेपि व्रीहिभिर्यजेतेत्यादौ द्रव्यविधिवद्यागस्योद्देश्यत्ववदुपपत्तेः। अत एव यद्यपि चतुरवत्ती यजमानः पञ्चावत्तैव वपा कार्येत्यत्रावत्तानुवादेन पञ्चत्वविधानं व्याख्यातम्। अनया च रीत्या वषट्कर्त्तुः प्रथमभक्ष इत्यत्रापि भक्षानुवादेन प्राथम्यविधानं कुतो नेति तु समं समासेप्युद्देश्यविधेयभावस्वीकारे। तृचे क्रियतइत्यादौ भावनानुवादेनैव त्रित्वविधानम्। तच्च ऋगाश्रितमेवोपस्थितमिति तथैव लभ्यते। एवमन्यत्रेत्यपि समम्भक्षान्तरविधानायापि विध्यध्याहारेण भावनोद्देशसंभवादिति दिक्। एतेन कर्मधारये तु न शक्तिर्न वा लक्षणेति परास्तम्॥ १२॥

यत्तु द्वन्द्वे ऽपि न शक्तिर्न वा लक्षणेति। तदपि नेत्याह॥

चकारादिनिषेधोथ बहुव्युत्पत्तिभञ्जनम्।
कर्त्तव्यं ते न्यायसिद्धं त्वस्माकं तादिति स्थितिः ३३

निषेध इत्यन्तेनान्वयः। आदिर्दूषणान्तरार्थो भिन्नक्रमश्च। चकारोनिषेधादिरित्यर्थः। अयं भावः। रामकृष्णावानयेति द्वन्द्वस्य विवरणे चकारादिः प्रयुज्यते न समासे। न च वृत्तौ चकाराद्यर्थो नास्तीति वक्तुं शक्यम्। तथा सति तस्य विवरणत्वं न स्यात्। समानार्थकसमस्यमानपदसमूहस्यैव विग्रहत्वात्। चकाराद्यर्थबोधस्य सर्वसिद्धत्वाच्च। चार्थेद्वन्द्व इत्यादिना तत्तदर्थएव समासानुशासनाच्च। न च वस्तुतश्चार्थे सति द्वन्द्व इत्यादिस्तदर्थः। भू सत्तायामित्यत्रापि तथात्वाप-

क्तेः । क्वाप्यनुशासनादर्थनिर्णयो न स्यात् । किं चैवं सहविवक्षाविरहेपि भेरीपटहं वादयेति स्यात् । वस्तुतश्चार्थस्याव्यावर्तकतया चार्थइत्यस्य वैयर्थ्यापत्तेश्च । न च कर्मधारयवारणार्थं तत् । एवमपि त्वदुक्तरीत्या ग्रामं गत इत्यादिद्वितीयातत्पुरुषादौ द्वन्द्वप्रसङ्गस्य दुर्वारत्वात् । न च द्वितीयातत्पुरुषेण बाधः । कर्मधारयेपि तथात्वाविरोधात् । चार्थस्य वाच्यत्वे च तदाविवक्षणान्न द्वन्द्व इति तद्वाचित्वमवश्यं वाच्यम् । अतो न तद्वाचकचकारप्रयोगः । उक्तार्थानामप्रयोग इति भाष्यात् । किं च धवप्रकारकशब्दबुद्धिं प्रति तदुपस्थापकपदाव्यवहितोत्तरवर्त्तिविभक्तिजन्योपस्थितिर्हेतुरित्यावश्यकम् । अन्यथा धववन्तमानयेत्यादौ धवादेः कर्मत्वादिप्रत्ययापत्तेः । तथा च धवखादिरौ छिन्धीत्यादौ न धवे तदन्वयः स्यादिति । नन्वस्तु द्वन्द्वादौ लक्षणा समासान्तरवत् । परं तूत्तरपदस्यैवेति नायं दोषः । तस्यैव सर्वत्र प्रातिपदिकसंज्ञाप्यस्तु । नातः प्रागुक्तोपि दोषः । विशिष्टस्याप्रातिपदिकत्वेपि समासोत्तरं प्रत्ययसम्भवात् । विशिष्टलक्षणयार्थोपस्थितावुद्देश्यविधेयभावेनान्वयासम्भवाच्चेति चेत् । अत्रोच्यते । उत्तरपदमात्रस्य प्रत्ययान्तत्वेन प्रातिपदिकसंज्ञाया एवासम्भवः, । न च तल्लोपोत्तरं पुनः सेति वाच्यम् । पूर्वं प्रातिपदिकसंज्ञां विना लोपासम्भवात् । न च राजन् ङस् पुरुष सु इत्यत्र सत्यां समाससंज्ञायां प्रातिपदिकसंज्ञोत्तरं पूर्वसुब्निवृत्तौ पुनरुत्तरपदमात्रस्य सा संज्ञेति वाच्यम् । विशिष्टस्य समाससंज्ञायामप्यर्थवत्त्वाभावेन प्रातिपदिकत्वासम्भवात् । उत्तरपदस्य संज्ञायाः प्रागेव सिद्धत्वेन पुनस्तस्या व्यर्थत्वाच्च । पुनः प्रातिपदिकसंज्ञायाः प्रत्ययान्तत्वेनासम्भवाच्च । लुप्तेपि पूर्वतने प्रत्यये प्रत्ययलक्षणस्य दुर्वारत्वात् । अत एव प्रथमत एवोत्तर-

त्वात्। अथ प्रकृतित्वं न प्रकृतितापर्याप्त्यधिकरणत्वम्। किं तु तदाश्रयत्वमात्रम्। तत्समूहे प्रत्येकमवयवेष्वपीति चेन्न। पङ्कजमानय दण्डिनं छिन्धि। शूलिनं पश्येत्यादौ सत्यपि तात्पर्ये विना लक्षणां पङ्कदण्डशूलानामानयनच्छेदनदर्शनकर्मतयान्वयबोधप्रसङ्गात्। अपटानानयेत्यत्र पटे कर्मत्वाद्यन्वयापत्तेश्च। न च दण्डादीनां विशेषणतया न तत्रान्वयः। वन्हिमान्धूमादित्यत्र पञ्चम्यर्थज्ञानज्ञाप्यत्वस्य वन्हावनन्वयापत्तेः। ऋद्धस्य राज्ञः पुरुषः तण्डुलं पचतीत्यादौ राजादीनामिव स्वातन्त्र्याबाधाच्च। यन्तु प्रत्ययान्यवहितपूर्वपदत्वमेव प्रकृतित्वम्। तदन्वितस्वार्थबोधकत्वं च पूर्वपदार्थप्रधानादव्ययीभावादुभयपदार्थप्रधानद्वन्द्वादर्धर्चपिप्पल्यादितत्पुरुषाच्चान्यत्र नियतमिति तदनुरोधादुत्तरपदे एव बहुव्रीहौ लक्षणा। अस्तु वा सर्वत्रैवायं नियमः। अव्ययीभावद्वन्द्वादावुत्तरपदलक्षणयैव शक्यानिर्वाहत्वादिति। तत्तुच्छम्। अव्यवहितपूर्वपदत्वस्य बहुपटुः सर्वक इत्यादौ पटुसर्वादिशब्देष्वव्याप्त्या दधी इयति ददातीति बहुपटुर्ददातीत्यादौ दध्यादावतिव्याप्त्या च प्रकृतित्वासम्भवात्। विभाषासुपोबहुच्पुरस्तात्तु अव्ययसर्वनाम्नामकच्प्राक्टेरिति सूत्राभ्यां तयोरादौ मध्ये च विधानेनान्ते तदसम्भवात्। एवं व्यतिसे इत्यादावुपसर्गस्यापि तिङ्प्रकृतित्वापत्तिः। किं चैवं नञ्यरीत्या द्वन्द्वन्यायेन लक्षणाविरहेणि द्वित्रा इति बहुव्रीहौ पूर्वपदार्थे विभक्त्यर्थान्वयो दुरुपपाद एव। तस्मात्प्रत्ययविधानावधित्वमेव प्रकृतित्वम्। तच्च न समासादावुत्तरपदमात्रस्येति तल्लक्षणयामपि प्रत्ययार्थान्वयानुपपत्तिर्दुर्वारेति। यदपि प्रकृत्यर्थत्वं तज्जन्यज्ञानविषयत्वमात्रं तच्चात्राविरुद्धमिति। तन्न। पङ्कजमित्यादौ पङ्केतिप्रसङ्गात्। किं च।

एवं हि गामुच्चारयेत्यादौ शब्दस्य स्वपरतायां लक्षणेति सिद्धान्तहान्यापत्तेः । घटं पश्येत्यादौ शब्दात्समवायेनाकाशोपस्थितौ विभक्त्यर्थान्वयापत्तेश्च । न च सति तात्पर्ये इष्टापत्तिः । वृत्युच्छेदापत्तेः । तस्माद्वृत्त्या प्रकृत्युपस्थाप्यत्वं वक्तव्यम् । तथा चावश्यिकैव समूहशक्तिः । अथ प्रत्ययप्राग्वर्तिपदजन्योपस्थितिविशेष्यत्वं प्रकृत्यर्थत्वम् । तच्च द्वन्द्वादावुभयो, रव्ययीभावे पूर्वपदस्येति चेन्न । चक्रिणं पश्येत्यादौ चक्रेतिप्रसङ्गात् । गामानयति कृष्णो दण्डेनेत्यत्र कृष्णे करणत्वान्वयापत्तेश्च । बहुपटुः सर्वक इत्यादावव्याप्तेः । इयदधीयती स्त्री ददातीत्यादावतिप्रसङ्गश्च । यदुत्तरं प्रत्ययो विहितस्तत्त्वे सतीति वाच्यमिति चे, दिहापि तदभावस्योक्तत्वात् । अथ समस्यमानपदार्थगतस्वार्थबोधकत्वमेव वाच्यं, तथैव व्युत्पत्त्यन्तरकल्पनादिति । मैवम् । पङ्कजं पश्य राजपुरुषमानयेत्यादौ पङ्कादौ कर्मत्वाद्यन्वयापत्तेः । अथ प्रकृत्यर्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितिर्हेतुरिति सामान्यतो न हेतुहेतुमद्भावः । मानाभावात् । घटः कर्मत्वमित्यादौ बोधस्य तथा व्युत्पत्तिग्रहशालिनामिष्टत्वात् । अनिष्टत्वेपि घटप्रकारककर्मत्वविशेष्यकशाब्दबुद्धिं प्रति घटार्थकपदोत्तरकर्मत्ववाचकविभक्तिजन्योपस्थितिर्हेतुरिति विशिष्यैव सोस्तु न तु सामान्यतः तत्प्रत्ययविधानावाधित्वरूपस्य प्रकृतित्वस्य कार्यतावच्छेदककोटिप्रविष्टस्याननुगतत्वात् । अनुगमे च दण्डेन गामभ्याजेत्यत्र दण्डे कर्मत्वस्य गवि करणत्वस्यान्वयस्य दुर्वारत्वापत्तेः । अस्मद्रीत्या तु नायं दोषः । एवं च समासे उत्तरपदलक्षणायां न विभक्त्यर्थान्वयानुपपत्तिः । पुरुषमानयेत्यत्र पुरुषपदस्य राजविशिष्टपुरुषे तात्पर्ये सति विशिष्टकर्मत्वबोधेन तादृशबोधे पुरुषपदोत्तरकर्मत्वबोधकविभक्त्युपस्थि-

तेर्हेतुत्वकल्पनात्। एवं चित्रगुः धवखदिरौ छिन्धीत्यादावपि द्रष्टव्यम्। तथा च कल्पितकार्यकारणभावादेवोपपत्तिरस्माकमिति लाघवम्। विशिष्टशक्तिपक्षे च तादृशबोधे राजपुरुषपदोत्तरविभक्त्युपस्थितिर्हेतुरिति कार्यकारणभावान्तरकल्पनायामतिगौरवापत्तेः। किं च। सामान्यतो हेतुहेतुमद्भावाभ्युपगमे स्तोकं पचति शोभनं पचतीत्यादौ नामार्थस्य साक्षाद्धात्वर्थेऽन्वयानापत्तिः। तस्याप्रत्ययार्थत्वात्। अपि च। प्रकृतित्वाननुगमेन सामान्यतो हेतुहेतुमद्भावग्रहासम्भव इति चेत्। उच्यते। सामान्यतो हेतुहेतुमद्भावानभ्युपगमे चक्रिणमहं पूजयामीत्यादौ चक्रस्येन्यर्थइवान्यत्राप्याकाङ्क्षासत्त्वादन्वयापत्तिः। न चानासन्नत्वान्नान्यत्रान्वयः। नहि पदान्यवधानमासत्तिः। गिरिरग्निमान् भुक्तं देवदत्तेनेति तात्पर्यग्रहवतो गिरिर्भुक्तमाग्निमान् देवदत्तेनेत्यत्राबोधप्रसङ्गात्। किं तु पदजन्यपदार्थोपस्थितिमात्रम्। सा च समूहालम्बनादिरूपा तुल्यैव। कथमन्यथा वज्राङ्कुशध्वजसरोरुहलाञ्छनाढ्यं भगवतश्चरणारविन्दं भजेतेत्यादावासत्तिः। किं चैवं हेतुहेतुमद्भावानुपगमे काष्ठं तण्डुलः पचति रामो बाणो हतो वालीत्यादौ करणत्वकर्मत्वकर्तृत्वादिसम्बन्धेन काष्ठबाणतण्डुलरामादेः पाकहननादिक्रियास्वन्वयप्रसङ्गः। कर्मत्वादिविशेष्यकबोधे एव द्वितीयादिजन्योपस्थितेर्हेतुत्वात्। अत्र कर्मत्वादेरविशेष्यतया द्वितीयाद्यभावेऽप्यक्षतेः। अत एव स्तोकं पचतीत्यादौ तव तदन्वयोऽप्युपपद्यते। अस्मन्मते चाभेदे कर्मण्येव चेयं द्वितीयेति धात्वर्थनिर्णये प्रपञ्चितम्। नन्वभेदातिरिक्तसंसर्गेण नामार्थप्रकारकशाब्दबोधं प्रति तदुत्तरसार्थकविभक्तिजन्योपस्थितिर्हेतुरिति कार्यकारणभावादेव नायं दोष इति चेन्न। दण्डिनं चक्रिणं पश्येत्यादौ व्यभिचारात्। इनादेरवि-

भक्तित्वात् । प्रत्ययजन्योपस्थितिरेव हेतुरस्त्विति चेन्न । दधीयतीं ददातीत्यादौ दध्नो मतुबर्थे ऽन्वयापत्तेः । विहितत्वेन प्रत्ययो विशेषणीय इति चेन्न । समासेपि प्रत्येकपदोत्तरमविधानात्तल्लक्षणायामपि विभक्त्यर्थानन्वयापत्तेः । किं च । पङ्कजं पश्येत्यादौ पङ्कादेः कर्मत्वप्रत्ययाय सा तथा हेतुहेतुमद्भावस्यैवासम्भवात् । अव्यवहितोत्तरवर्त्तित्वं विभक्तिविशेषणं वाच्यमिति चेन्न । तां पश्य, आचार्यकल्पं पूजय, भक्ततरं शिवतमं प्रार्थयेत्यादौ टाबादिष्वव्यवहितविभक्त्यर्थानन्वयप्रसङ्गात् । प्रत्ययातिरिक्ताव्यवहितत्वं विशेषणमिति चेन्न । दण्डिमन्तमानयेत्यादौ दण्डादेः कर्मत्वान्वयावारणापत्तेः । गौरवाच्च । तथा च यथोक्तमेव युक्तम् । प्रकृतित्वं तत्पर्याप्त्यधिकरणत्वमिति न दोष इत्युक्तम् । यदपि तादृशकार्यकारणभावग्रहासम्भव इति । तन्न । यथा पितृत्वपुत्रत्वादेरननुगतत्वेपि स्वापितृभ्यः पिता दद्यादित्यादौ चैत्रपितृभ्यश्चैत्रो दद्यान्मैत्रापितृभ्यो मैत्रो दद्यादित्यादिसर्वोपसंहारेणान्वयबोधः । यथा वा दारत्वस्वत्वयत्वादेरननुगतत्वेपि ऋतौ स्वदारान् गच्छेदेव, "ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छती"त्यादौ चैत्रीयतद्दारसम्बन्धितदृतौ चैत्रस्तान् दारानभिगच्छेत् चैत्रस्तद्दारीयतदनुकालीनगमनमकुर्वन्प्रत्यवैतीत्यादिस्तथा बोधस्तथा तत्तन्निरूपितप्रकृतित्वाननुगमेपि प्रकृत्यर्थप्रकारकबोधं प्रतीत्यादिशब्दात्सर्वोपसंहारेण कार्यकारणभावाग्रहसम्भवात् । स्वत्वत्वापितृत्वत्वादीनामनुगमनेन तदेव स्वरूपसदुपलक्षणीकृत्य तदादिवच्छक्तिग्रहाद्, आकाङ्क्षावशाच्च विशिष्य पदार्थबोध इत्यपि तुल्यम् । प्रकृतित्वं स्वरूपसदनुगमकमादाय शक्तिग्रहः आकांक्षावशात्कार्यकारणभावबोधकवाक्याद्विशिष्य तद्ग्रह इत्यस्य सुवचत्वात् । न चैवं धात्वर्थफलस्य तदर्थे एवान्वय एवं क-

थं स्यादिति वाच्यम् । धात्वर्थान्वये तथात्वेनादोषात् । अत एव पश्य नृत्यातितरां पचातिकल्पामित्यादौ समुदायशक्त्यभावेपि धात्वर्थभावनया सह धात्वाख्यातार्थइव तरबाद्यर्थोप्यन्वेतीति दिक् । यच्च पुरुषपदमात्रस्य विशिष्टार्थलक्षणास्थले कार्यकारणभावः क्लृप्त इत्यादि । तन्न । समासे शक्तिग्रहाद्बोधस्थले ऽन्वयानुरोधेनास्यापि क्लृप्तत्वादित्यास्तां विस्तरः । तस्मादुत्तरपदमात्रस्याप्रकृतित्वान्न कर्मधारयद्वन्द्वयोस्तल्लक्षणायामपि विभक्त्यर्थान्वयसम्भव इति दुर्वारा शक्तिः । एवं बहुव्रीहावपीति वयं विभावयामः । यद्वा । साधकान्तरमाह । अथेत्यादिना । व्युत्पत्तिः । अन्वयनियामकं तद्भङ्गो लक्षणापक्षे स्यादित्यर्थः । अयं भावः । राजपुरुष इत्यादौ लक्षणायामपि न निर्वाहः । तथाहि । राजपदादेः किंसम्बन्धिनि लक्षणा सम्बन्धे वा । नान्त्यः । ओदनः पचतीत्यत्रान्वयबोधापत्तिवारणायाभेदातिरिक्तसंसर्गकप्रातिपदिकार्थप्रकारकबोधे विभक्तिजन्योपस्थितेर्हेतुत्वकल्पनात् । ओदनस्य च पाके द्वितीयादिविभक्त्यभावेन भेदेनान्वयासम्भवात् । एवमभेदसंसर्गकप्रातिपदिकार्थप्रकारकबोधे प्रातिपदिकादिजन्यैवोपस्थितिर्हेतुरभ्युपेया । नीलो घट इत्यादौ च विभक्तिः साधुत्वार्था । उक्तं ह्यनभिहितसूत्रे भाष्ये । अथवा कट एव कर्म तत्सामानाधिकरण्याद्भीष्मादिभ्यो द्वितीया भविष्यतीति । भीष्मादीनां स्वयमकर्मत्वेपि विशेष्यसम्बन्धिन्यैव विभक्त्या भवितव्यम् । तदेकयोगक्षेमत्वात् । केवलानां च प्रातिपदिकानां परश्चेति नियमादप्रयोगार्हत्वात् । ततो यथेश्वरसुहृदः स्वयं निर्धना अपि तदीयेनैव धनेन फलभाजः । एवं गुणा अपीति तु कैयटः । अथ देवदत्तो घटमानयतीत्यत्र देवदत्तघटयोः सत्यपि तात्पर्ये ऽभेदान्वयः कथं न जायते कारणस-

त्त्वात् । न च विरुद्धविभक्तिरहितपदजन्योपस्थितिर्हेतुरिति वाच्यम् । चैत्रस्य सुतस्य धनमित्यत्रातिप्रसङ्गतादवस्थ्यादिति चेन्न । विभक्त्यर्थमनन्तर्भाव्य नामार्थान्वयएवोक्तव्युत्पत्तेः कल्पनात् । एतदेवाभिप्रेत्य राज्ञः सुतस्य धनमित्यत्र दूषणमभिधाय दूषणान्तरं प्रागवोचामेति दिक् । एवं च समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेः राजसम्बन्धरूपः पुरुष इति बोधापत्तेः । समासे भिन्नैव व्युत्पत्तिरिति चेत् । स्वीकृतैव तर्हि शक्तिः । नञः स्थलेपि सम्बन्धलक्षणयैवोपपत्तिर्निपातानां द्योतकत्वाद्वा नानुपपत्तिरितिं वक्ष्यते । नाद्यः । राजपुरुष इत्यादेः कर्मधारयत्वापत्तेः । समानाधिकरणतत्पुरुषस्यैव कर्मधारयत्वात् । यत्तु समासपूर्वदशायां यत्राभेदान्वयस्तत्रैव कर्मधारयः यत्र भेदेन तत्र तत्पुरुषमात्रमिति । तन्न । नित्यसमासे विग्रहशून्यत्वेन तादृशकर्मधारयतत्पुरुषयोरव्याप्तेः । तत्राप्यलौकिकविग्रहसत्त्वेपि राम सु इत्यादेर्निराकांक्षतया तादृगन्वयबोधस्वरूपायोग्यत्वात् । यच्च किञ्चिद्विशिष्टद्वितीयादिविभक्त्यर्थतावच्छेदकविशिष्टवतो यत्र नाभेदान्वयस्तत्रैव कर्मधारयः । अन्यत्र तत्पुरुषः । राजपुरुष इत्यादौ राजत्वादिविशिष्टषष्ठ्यर्थसम्बन्धत्वविशिष्टं लक्ष्यतावच्छेदकमिति न कर्मधारयत्वम् । केवलं सम्बन्धित्वेन लक्षणाय राजरूपेणैव लक्षणायां च कर्मधारयत्वमेवेति कल्पनम् । तन्न श्रद्धेयम् । राजसम्बन्धिपदयोश्चैत्रस्वशब्दयोर्धनस्वामिशब्दयोश्च षष्ठीसमासोत्तरं पुरुषसुवर्णराजशब्दैः सह कर्मधारयस्वीकारेण तत्राव्याप्तेः । सम्बन्धस्वत्वस्वामित्वादेः षष्ठ्यर्थत्वाभ्युपगमात् । न च समासात्पूर्वं यत्र पदयोस्तुल्यविभक्तिकत्वं तत्रैव कर्मधारयो नान्यत्रेति वाच्यम् । पूर्वावस्थाया अपि समासार्थविवक्षानुसारेणैव कल्प्यतया भवद्रीत्या समासवाक्ये तत्पु-

रुषकर्मधारययोर्बोधविशेषाभावेन षष्ठ्याद्यन्तर्भावेण पूर्वावस्था-कल्पनस्याप्यसम्भवात् । अत एव च न विधेयमाणसमानार्थं विवरणमिति व्युत्पत्तिभङ्गोपि। अन्यथा असमानार्थत्वे विवरणत्वं न स्यात् । तथात्वे वा शक्तिपरिच्छेदकत्वं न स्यात् । तस्माल्लक्षणाया असम्भवादावश्यिकैव समूहशक्तिरिति दिक् ॥ अथ वा ओदनः पचतीत्यादिवारणाय प्रातिपदिकार्थप्रकारकबोधमात्रं प्रति सुबजन्योपस्थितिर्हेतुर्वाच्या । नीलं घटमानयेत्यादौ च प्रत्येकं विशेषणविशेष्ययोर्भावनायामेवान्वयः। पार्ष्णिको ऽभेदान्वयस्तु न शाब्दः । उक्तं हि भाष्ये । अथ वा कटोपि कर्म भीष्मादयोपि कर्माणीत्येव सिद्धमिति । एतदेवारुणाधिकरणे जैमिनीयैः परिष्कृतम् । अस्तु वा विशेषणविभक्तिरभेदार्था तदप्युक्तम्भाष्ये । न चान्या उत्पद्यमाना तत्सम्बन्धमुत्सहते वक्तुमिति कृत्वा द्वितीया भविष्यतीति । भिष्मादियुक्तकटसम्बन्धिकर्मत्वं प्रतिपाद्यम् । तत्र यथा कटशब्देन भीष्मत्वादीनामनभिधानात्तदभिधानाय भीष्मादिशब्दप्रयोगस्तथा द्वितीयापि तेभ्यो भविष्यति । नह्यन्यथा तद्विशिष्टत्वं कटस्य प्रतिपादयितुं शक्यते इति कैयटः । युक्तं चैतत् । एककार्यकारणभावकल्पने लाघवात् । चैत्रो नास्तीत्यत्रापि प्रतियोगिलक्षार्थकप्रथमाद्वारैवान्वयः । तथा च चैत्रः पचति नीलो घटः स्तोकं पचतीत्यादौ प्रथमादेरभेदोर्थः । एवं च विभक्त्यर्थमद्वारीकृत्य प्रातिपदिकार्थस्यान्वयायोगात् । राजपुरुषः नीलोत्पलमित्यादावन्वयाय विशिष्टशक्तिः व्युत्पत्त्यन्तरं वा आदर्तव्यमिति दिक् । तदेतदभिप्रेत्योक्तम् । बहुव्युत्पत्तीति विभावयामः । अन्ये तु प्राप्तमुदकं यं, जायया प्रतिग्राहिते गन्धमाल्ये ययेति विग्रहे यत्कर्मकप्राप्तिकर्तृदकम् । जायानिष्ठप्रेरणाविषयीभूतयत्कर्तृकप्रतिग्रहकर्मणी गन्धमाल्ये

इति बोधः । प्राप्तोदकः जायामतिग्राहितगन्धमाल्यामिति वृत्तौ तूदककर्तृकप्राप्तिकर्म जायानिष्ठप्रेरणाविषयीभूतगन्धमाल्यकर्मकग्रहणकर्त्रीमिति बोधः । तथा च विशेषणविशेष्यभावव्यत्यासाय वाक्ये कल्पं व्युत्पत्तिभञ्जनं समासे स्यात्परेषाम् । अस्माकं तद्भञ्जनमेकार्थीभावकृतविशेषात्मकत्वान्न्यायसिद्धमित्यर्थेत्यादेरर्थः । एवमूढो रथो येन, उपहृतः पशुर्यस्मै, उद्धृत ओदनो यस्यां, बहवः पाचका यस्यां शालायामित्याद्यषष्ठ्यर्थबहुव्रीहिविग्रहे यदनड्वाहादिकर्तृकोढ्वहनकर्म रथः, यद्वुद्राद्युद्देश्यकोपहरणकर्म पशुः, यत्स्थाल्याद्यवधिकोद्धरणकर्म ओदनः, यच्छालाद्यधिकरणकभावनाश्रया बहव इत्यादिः रथपशुश्चोदनपाचकादितत्तत्पदार्थविशेष्यक एव बोधः । समासे तु ऊढरथः उपहृतपशुरुद्धृतौदना बहुपाचिकेत्यादौ रथकर्मकोढ्वहनकर्त्ता, पशुकर्मकोपहरणोद्देश्यः, ओदनकर्मकोद्धरणावधिः, बहुपाककर्त्राधिकरणमित्याद्यन्यपदार्थविशेष्यक एव बोधः । एवं च भिन्नभिन्नव्युत्पत्तिकल्पनमपेक्ष्य शक्तिकल्पनमेव वरं किं न रोचयेः । एकार्थीभावकृतविशेषात्मकत्वादस्योपपत्तेः । तथा च कल्पितशक्त्योपपत्तावतिरिक्तशक्तिकल्पने गौरवमिति शब्दमात्रमेवास्ति भवताम् । व्युत्पत्त्यादिनामान्तरेण तस्याः स्वीकारादित्यभिप्रेत्याह । अषष्ठ्यर्थेतीत्यप्येवमेव व्याचक्षते । तच्चिन्त्यम् । पौनरुक्त्यापत्तेः । व्युत्पत्तिभञ्जनानुवाद एव स इत्युक्तावपि नैतद्युक्तिसहम् । परैरपि समासे विशिष्टान्यपदार्थे लक्षणाभ्युपगमेन तद्विशेष्यकबोधसम्भवादिति दिक् ॥ ३३ ॥

साधकान्तरमाह ॥

अषष्ठ्यर्थबहुव्रीहौ व्युत्पत्त्यन्तरकल्पना ।

कल्पत्यागश्चास्ति तव तर्हि शक्तिं न कल्पयेः३४

अषष्ठ्यर्थबहुव्रीहिर्द्वितीयान्तार्थकबहुव्रीहिस्तत्र व्युत्पत्त्यन्तरकल्पना कल्पत्यागश्चास्तीति वरं शक्तिकल्पनेत्यर्थः । अयमाशयः । चित्रगुरित्यादौ स्वाम्यादिप्रतीतये शक्तिरावश्यकी । न च लक्षणया निर्वाहः । सा हि न चित्रपदस्य चित्रस्वामिनि चित्रा गौरिति बोधानापत्तेः स्वामी गौरित्यापत्तेश्च । पदार्थः पदार्थेन सम्बध्यते न तु तदेकदेशेनेति न्यायात् । अत एव गोपदे गोस्वामिलक्षणेत्यपास्तम् । न च चित्रा गौरिति शक्त्युपस्थाप्ययोरन्वयबोधोत्तरं गोपदेन चित्रपदेनैव बोधाभ्यां वा उपस्थितविशिष्टस्वार्थसम्बन्धी लक्ष्यतइति वाच्यम् । एवमपि प्राप्तोदक इत्याद्यषष्ठ्यर्थबहुव्रीहौ तदसम्भवात् । प्राप्तिकर्त्रभिन्नमुदकमिति बोधोत्तरं तत्सम्बन्धिग्रामलक्षणायामप्युदककर्तृकप्राप्तिकर्म ग्राम इत्यर्थालाभात् । प्राप्तेति क्तप्रत्ययस्यैव कर्त्रर्थकस्य कर्मणि लक्षणेति चे, तर्हि समानाधिकरणप्रातिपदिकार्थयोरभेदान्वयव्युत्पत्तेरुदकाभिन्नं प्राप्तिकर्मेति स्यात् । अन्यथा तद्बुध्यत्पत्तिभङ्गापत्तेः । प्राप्तेर्धात्वर्थतया कर्तृतासम्बन्धेन भेदेनोदकस्य तत्रान्वयासम्भवाच्च । अन्यथा देवदत्तः पच्यतइत्यत्रानन्वयानापत्तेः । अथोदकाभिन्नकर्तृका प्राप्तिरिति बोधोत्तरं तत्कर्म ग्रामो लक्ष्यतइति चेन्न । प्राप्तेर्धात्वर्थतया क्त्यार्थं प्रति विशेष्यत्वासम्भवात् । प्रकृतिप्रत्ययार्थयोः प्रत्ययार्थप्राधान्यनियमात् । प्राप्तपदे प्राप्तेर्विशेष्यतया तस्या एव नामार्थत्वेनोदकेन सममभेदान्वयापत्तेश्च । एवमूढरथ इत्यादावपि द्रष्टव्यम् । अत एव चित्रगुरित्यादौ गोपदस्यैव लक्षणा साक्षात्सम्बधात्, चित्रपदस्य रूपवाचकतया तल्लक्षणायाः परम्परासम्बन्धरूपत-

या गुरुत्वादित्यपास्तम् । अषष्ठ्यर्थबहुव्रीहावन्तर्गतप्राप्तादिपदानामपि कर्त्रादिवाचकत्वेन साक्षात्सम्बन्धसत्त्वेन विनिगमनाविरहतादवस्थ्यात् । अत एवाषष्ठ्यर्थेति विशेषणमुपात्तम् । न च प्रासादिपदानां यौगिकत्वात्तल्लक्षणाया धातुप्रत्ययतदर्थज्ञानसाध्यतया गौरवादुत्तरपदे एव सा कल्प्येति वाच्यम् । तद्ज्ञानं विना तात्पर्यनिर्णयासम्भवेनोत्तरपदेपि तस्या असम्भवात् । शूरादिपदानां द्रव्यवाचकतया शूरगुरित्यादौ विनिगमनाविरहाच्च । न च प्रत्ययसन्निधानलाभायोत्तरपदे एव सेति नवीनोक्तं युक्तम् । तथा सति बहुव्रीहेरेवासम्भवापत्तेः । अनेकमन्यपदार्थे इत्यनेनानेकसुबन्तानामन्यपदार्थप्रतिपादकत्वे तद्विधानात् । कथं चिदनेकेषामन्यपदार्थप्रतीत्युपयोगित्वेन तत्सम्भवेपि घटादिपदेष्वपि समुदायशक्तिविलोपापत्त्या दुर्वचम् । तथाहि । चरमपदस्यैवान्यपदार्थलक्षणया समुदायशक्त्यस्वीकारे घटमोस्तम्भादिपदेष्वपि घट चेष्टायां गम्लृ गतौ स्तम्भु रोधने इत्यादिधातुभ्यः पचाद्यजादिभिर्व्युत्पादनसत्त्वेनान्तर्गतप्रत्यये जातिविशेषलक्षणया नियतबोधः सम्भवत्येव । नन्वेवं पाचकादिपदवद्घटादिपदमपि यौगिकमेवास्तु । न च रूढालाभः । भूवादिपदानामेव तादृशत्वात् । अत एवैतदव्युत्पन्नं प्रातिपदिकमिति मुकुटः । अर्थवत्सूत्रारम्भसामर्थ्येन तादृशस्य कस्य चिदवश्यकल्प्यत्वादिति चेन्न । एवं सति रूढ्या निर्णयः क्वापि न स्यात् । सर्वेषां यौगिकत्वापत्तेः । मूकपदेपि मूं कायतीति योगसम्भवात् । कै गै रै शब्दे इति धातूनां स्पष्टत्वात् । अर्थवत्सूत्रारम्भस्य बहुपटव इत्यादिसाधकत्वेन चरितार्थत्वात् । ज्ञापकत्वे वा त्वद्रीत्या ज्ञाप्यालाभादनुपपत्तिरेव । एतेनाषष्ठ्यर्थबहुव्रीहौ विनिगमनाविरहादुभयत्रापि लक्षणास्तित्वत्यपा-

स्तम् । घटादिपदेष्वपि धातुप्रत्यययोस्तत्सम्भवात् । तस्मादा-वश्यकैव समुदायशक्तिरिति समुदायार्थ इति विभाव्यतां सू-रिभिः । वस्तुतस्तु अवयवानां शक्तिं लक्षणां वा ऽजानतामपि बालानां समुदायव्युत्पादने बोधः सर्वानुभवसिद्धः । अत एव तेषां समुदायार्थबोधेपि विना व्याकरणादिव्युत्पत्तिं पदविभा-गसामर्थ्याभावोपीत्यप्यनुभवसिद्धम् । न चैतेषां शक्तिभ्रमाद्बोध इति युक्तम् । बोधकत्वस्याबाधेन तज्ज्ञानस्याभ्रमत्वात् । पदत-दर्थोपस्थितिशक्तेर्भ्रमासम्भवस्यासकृदावेदितत्वात् । न चाज्ञातैव प्र-त्येकपदलक्षणोपयुज्यतइति शंक्यम् । अगृहीतशक्तिकादप्यर्थोप-स्थित्यापत्तेः । तीरादौ गङ्गासम्बन्धाग्रहवतो गङ्गायां घोष इ-त्यादौ बोधापत्तेश्च । तथा च प्रत्येकवृत्त्यज्ञानेपि बोधादावश्यि-का समुदायशक्तिः । घटादिपदेष्वपीदमेव तत्साधकम् । अत एव पङ्कजपदेपीत एव तत्स्वीकारः प्रकारान्तरासम्भवादित्युक्तप्राय-म् । न च समुदायशक्त्यज्ञानदशायां लक्षणयापि बोधान्न शक्तिः । गङ्गादिपदानामपि तीरादौ शक्तिग्रहदशायां लक्षणया प्रवाहबो-धकत्वाच्छक्तिसिध्यनापत्तेः । अत्रावयवेभ्य इव तीरादिपदेभ्यो-पि लक्षणया गङ्गाबोधदर्शनाच्च । अपि च । भाषासु संस्कृते च व्यवहारसाम्येपि शक्तत्वाशक्तत्वनिर्णयो विना व्याकर-णकोशादिकमसम्भावित इति गृहीतप्रामाण्यात्तस्मात्समर्थः प-दविधिरिति सूत्रतद्भाष्यादि सामान्यरूपादनेकमन्यपदार्थेत्यादि विशेषाच्च समासशक्तिनिर्णयो दुर्वार एव । उक्तं च प-राशरीयपुराणे । पाणिनीयं महाशास्त्रं पदसाधुत्वलक्षणम् । सर्वोपकारकं ग्राह्यं कृत्स्नं त्याज्यं न किञ्चनेति ॥ न च साधुत्वमात्रपरिच्छेदकत्वं शास्त्रस्योक्तं न तु शक्ति-निर्णायकत्वमिति वाच्यम् । भवद्रीत्या शक्तत्वस्यैव साधुत्वपर्य-

वस्त्रानादित्याद्यन्यत्र प्राक् प्रपञ्चितम् । वक्ष्यते च अत एवारुणाधिकरणारम्भोप्युपपद्यते । अन्यथा पूर्वपक्षस्यैवासम्भवात्तदसम्भवापत्तेः । तथाहि । किमरुणिमा वाक्याद्धित्वा प्रकरणे निवेश्यः किं वा क्रीणातिना सम्बध्य तदङ्गमेकहायन्यामिति संशये क्रीणातिना सम्बध्यमानस्तृतीयासंयोगात्करणकारकं स्यात् । न चामूर्त्तस्य तद्युक्तमिति नास्य क्रयसम्बन्ध इति ततः पृथग्भूतः प्रकरणे निविशतइति हि पूर्वः पक्षः । स चानुक्तिसम्भवः । समासशक्त्यस्वीकारे पिङ्गाक्ष्येकहायनीशब्दयोरपि पिङ्गत्वाक्षित्वैकत्वहायनत्वादेर्वाच्यतया तेषामप्यमूर्त्तत्वात् क्रीणातौ करणत्वासम्भवेन क्रीणातिकरणस्यैतद्वाक्यादलाभादारुण्यस्य वाक्यभेदशङ्काया एवासम्भवात् । त्रिष्वपि लक्षितद्रव्यविध्युपपत्तौ वाक्यभेदशङ्काया निर्बीजत्वाच्च । बहुव्रीह्योररुणशब्दस्य च लाक्षणिकद्रव्याभिधायकताया अविशिष्टत्वेन बहुव्रीह्योरेव द्रव्यविधायकत्वं नारुणपदस्येत्यत्र विनिगमकासम्भवात् । वाक्यभेदेन प्रकरणे निवेशस्याप्यसम्भावितत्वाच्च । तथाहि । प्रकरणेप्यमूर्त्तत्वात्क्रियाभिः कारकत्वाच्च द्रव्यैरपि सम्बन्धोऽसम्भवी । अनुपात्तानि च द्रव्याणि कथं गुणेनानेन सम्बध्येरन् । न च तृतीयया प्राकरणिकानि करणद्रव्याण्यनूद्य गुणस्तत्परिच्छेदकत्वेन विधीयते न तु गुणस्यात्र तृतीयया करणत्वं येन द्रव्यसम्बन्धो न स्यात् । तृतीयया द्रव्याणामुपादानाच्च नानुपादानदोषोपीति वाच्यम् । नहि तृतीया करणद्रव्याभिधायिनी येन तया तेषामनुवादः स्यात् । शक्तय एव निष्कृष्टा विभक्तिवाच्या इति मीमांसकसिद्धान्तात् । अथ प्रातिपदिकमेव गुणवचनमपि लक्षणया द्रव्यपरं तच्च तृतीयासंयोगात्करणम् । तथा च गुणविशिष्टं करणं प्रतीयते । तत्र करणतयावगतानि प्रक-

रणगतानि विशेष्यतयानूद्य विशेषणभूतो गुणः परिच्छेदकत्वेन विधीयते । येन द्रव्येण किं चित्क्रियते तेनारुणगुणकेनेति पूर्वपक्षाशय इति चेन्न । एवं हि लक्षितद्रव्यस्य क्रयएव करणत्वसम्भवाद्वाक्यभेदायोगात् । अथ श्रौतैकहायन्यवरुद्धे लाक्षणिकद्रव्यनिवेशो न युक्त इत्युक्तमेवेति चेन्न । पिङ्गाक्ष्येकहायनीशब्दयोरपि समासत्वाल्लक्षणयैव द्रव्यप्रतिपादकत्वेनैकहायन्याः श्रौतत्वासम्भवात् । तस्मात्पूर्वपक्षासम्भवादरुणाधिकरणोच्छेदापत्तेर्बहुव्रीहौ शक्तिरावश्यकी । अन्यथा यौगिकानां द्रव्यवाचकत्वसाधनं वार्त्तिकोक्तं च व्यर्थं स्यात् । अथ त्रयाणामपि गुणवाचकत्वे अमूर्त्तत्वात्क्रीणातौ करणत्वासम्भवात्त्रिभिरपि प्राकरणिकद्रव्यानुवादेन गुणा विधीयन्ते इति पूर्वपक्षरचनेति चेन्न । अनुवादाय त्रयाणामपि द्रव्ये लक्षणाभ्युपगमेन तत्रयविशिष्टक्रयभावनाया अपि विधिसम्भवे क्रीणात्यनन्वयस्याप्राप्तानुवादेनानेकविधाने वाक्यभेदस्य च पौर्णमास्यधिकरणन्यायेन सिरस्ततया पुनः शङ्कितुमप्यशक्यत्वात् । अथैकत्वे द्रव्यगुणयोरैककर्म्यान्नियमः स्यादिति सूत्राविरोधाच्च । द्रव्यगुणयोः समावेशे एव सूत्रप्रवृत्तेः स्पष्टत्वात् । तस्मादरुणाधिकरणारम्भाय स्वयापि बहुव्रीह्यादौ शक्तिः स्वीकार्येत्युन्नयामः । बहुव्रीहौ लक्षणायाः समस्यमानानेकपदतत्सामानाधिकरण्यालोचनापेक्षाधिक्येन विलम्बितत्वान्न तेन द्रव्यविधिः स्यात् । किं तु गुणशब्देनैवेति क्रयसाधनद्रव्यनिवेशस्य पूर्वोत्तरपक्षयोः साम्यात्तदाक्षेपपूर्वपक्षस्य वाक्यीयद्रव्यनिवेशसिद्धान्तस्य घायोगाद्बहुव्रीहौ शक्त्यस्वीकारे अरुणाधिकरणारम्भासम्भव इत्याहुः । अथैवं निषादस्थपत्यधिकरणोच्छेदापत्तिः । निषादः स्थपतिर्यस्येति बहुव्रीहिणा निषादस्वामिके श्रुतिवृत्तः शब्दः क-

र्मधारये वाक्यवृत्त इति न्यायेन बहुव्रीहेरेवापत्तेः । यन्तु कर्मधारये यावन्तः श्रुतपदार्थास्तावतां वाक्यार्थे ऽन्वय इति प्राबल्यम् । बहुव्रीहितत्पुरुषयोस्त्वेकस्यैवेति ततस्तयोर्दौर्बल्यम् । षष्ठीतत्पुरुषादौ बहुव्रीहौ चैकस्यैवान्वय इति तयोर्यद्यपि साम्यं तथापि तत्पुरुषे एकपदार्थत्यागो बहुव्रीहौ द्वयोरिति बहुव्रीहेर्दौर्बल्यमित्याहुः । तच्चिन्त्यम् । बहुव्रीहौ शक्तिपक्षे बहुव्रीहौ श्रुतिवृत्तता । कर्मधारयतत्पुरुषयोर्वाक्यवृत्ततेति श्रुतिलिङ्गाधिकरणन्यायेन बहुव्रीहेरेवापत्तेर्निषादस्थपत्यधिकरणाद्युच्छेदावारणात् । न च बहुव्रीहावपि विनियोजकं वाक्यमेवेति न तत्र तन्न्यायप्रवृत्तिरिति वाच्यम् । नहि विनियोजिकां श्रुतिं ब्रूमः । किं तु अभिधात्रीम् । अत एव रथकाराधिकरणे योगाद्रूढेः प्राबल्यं सिद्धान्तितम् । तथा च तादृशस्थले वाक्याच्छ्रुतेः प्राबल्ये यच्छीघ्रप्रवृत्तत्वादि बीजं तन्न्यायेन कर्मधारयादिकं पराभूय बहुव्रीहिरेव स्यादिति वदाम इति चेन्न । बहुधास्माभिर्न्यायेन कर्मधारयेपि शक्तेः प्राग्व्यवस्थापनात् द्वयोरपि श्रुतित्वेन विरोधाधिकरणन्यायस्यात्राप्रवृत्तेः । कर्मधारयनिर्णयस्य तत्पुरुषस्वरेणैव सम्भवाच्च । अत एव स्वरस्य षष्ठीतत्पुरुषे साम्यात्स एवाशङ्क्य निरस्तः । नन्वेवमपि इन्द्रपीताधिकरणे स्वरत एव बहुव्रीहिनिर्णयसम्भवात्तत्पुरुषाशङ्का नावतरेदिति चे, त्तवापि स्वराद्बहुव्रीहिनिर्णयस्य स्थूलपृषतीमनड्वाहीमालभेतेत्यादिवत् सम्भवात्तदवतारासम्भवस्य तुल्यत्वात् । उक्तं हि शब्दकौस्तुभे मूलकृता । एवमेवेन्द्रपीतस्योपहूतो भक्षयामीत्यत्रापि स्वरेणैव निर्णये इन्द्रपीताधिकरणमवैयाकरणान्प्रति कृत्वाचिन्तया वा नेयामिति । नन्वेतदसङ्गतं तृतीयाकर्मणीत्यनेन कर्मणि क्तान्ते परे पूर्वपदं तृतीयान्तं प्रकृत्येति पूर्वपदप्रकृतिस्वरविधानेन बहु-

व्रीहौ प्रकृत्या पूर्वपदमिति बहुव्रीहिस्वरस्यैव सम्भवात्तस्मान्निर्णयासम्भवात्। अन्यथा नखानिर्भिन्नम्भवतीत्यत्रापि तत्पुरुषत्वं न स्यादिति चेत् । अत्रोच्यते । अचेतनदेवतायाः यानासम्भवात् पिबतिर्दानलक्षणार्थ इति वार्त्तिके स्पष्टमेव । उक्तं च शास्त्रदीपिकायामपि । तत्पुरुषे इन्द्रपीतशब्द इन्द्राय दत्तस्येत्येवं विशेषणं स्यात् । न चासाविन्द्राय दत्तः पूर्वसङ्कल्पितो हि हुताहुतसमुदायस्तस्मै दत्तस्तदवयवस्त्वयमित्यादिना । अपि चैवं इन्द्राग्निभ्यां पीतेपीन्द्रपीतत्वस्य डित्थडपित्थयोर्मातरि डित्थमातेतिवद्वक्तुं शक्यत्वादैन्द्राग्नेपि मन्त्रलिङ्गाबाधान्मन्त्रप्रवृत्तावैन्द्राग्ने तु लिङ्गभावात्स्यादित्यधिकरणोच्छेदापत्तिः। तस्मात्पीतशब्दो दानार्थक इति स्वीकार्यम् । तथा चेन्द्रोद्देश्यके दाने इन्द्रस्य कर्त्तृत्वकरणत्वयोरसम्भवान्न ततस्तृतीयेति तृतीयाकर्मणीत्यस्य प्रवृत्तिः सम्भावितैव न । अथ कर्त्तृकरणतृतीयाया असम्भवेपि हेतुतृतीया स्यात् । न चोपपदविभक्तेः कारकविभक्तिर्बलीयसीति न्यायान्न हेतुतृतीया सम्भवतीति वाच्यम् । एवं हि त्वया सम्प्रदानचतुर्थी वाच्या तथा च समासो न स्यात् । तादर्थ्यसमासस्य बलिरक्षितग्रहणात् ज्ञापकात्प्रकृतिविकारमात्रविषयताया व्युत्पादितत्वादिति चे, तर्हि तृतीयापक्षेपि समासासम्भवात्सापि न युक्ता। तृतीयातत्कृतार्थेत्यादितद्धितायकेषु हेतुतृतीयायाः समासानभिधानात् । तृतीयेति योगविभागश्चतुर्थीति योगविभागेन तुल्यः । बलिरक्षितग्रहणानर्थक्यं च तृतीयासमासविधायकान्तरानर्थक्यापत्त्या तुल्यम् । तस्मात्समासश्छान्दसः षष्ठीसमासो वेति वाच्यम् । तत्र स्वरान्निर्णय इति सुष्ठूक्तम् । अथ चेतनदेवतापक्षे इदमधिकरणम् । तत्र पानसम्भवात्कर्तृतृतीया स्यादिति चे, तर्ह्यैन्द्राग्ने तु लिङ्गभावात् स्यादित्यधिकरण-

विरोधः स्पष्टः । किं च चेतनत्ववदनेकत्वस्यापि युक्तिसाम्यादापत्तौविन्द्रादिशब्दानां जातिशब्दतापत्तिः । स्वीकृतं च तथोत्तरमीमांसायां देवताधिकरणे, तथा च जातिकालसुखादिभ्योनाच्छादनात्तोंकृतमितप्रतिपन्ना इति विधानादन्तोदात्ततापत्तौस्वरविरोधः सिद्धान्ते स्यात् । तस्माद्युक्तः स्वरान्निर्णयः । वस्तुतस्तु पीतशब्दस्य दानार्थकत्वे तत्पुरुषापत्तिर्दुर्वारा । समुदायदानेवयवानामपि दानात् । अन्यथा धान्यराशिदानेप्येकदेशस्वीकारो न प्रत्यवेयात् । अत एव सर्वप्रदानाधिकरणे "नन्वग्न्यादिभ्यो दत्तं कथं स्विष्टकृते दीयते त्यक्तस्य पुनः स्वीकारे शिष्टाचारविरोधादित्याशङ्क्य प्रत्यक्षवचनविहितत्वान्न दोष" इति परिहृतं सङ्गच्छते । अन्यथोर्वरितस्यैकदेशस्य त्यागविरहाच्छङ्काया एवाभावादलग्नकतापत्तेः । न चात्र समुदायदानमेव नास्तीति वाच्यम् । पूर्वसङ्कल्पितो हि समुदायस्तस्मै दत्तः तदवयवस्त्वयमित्यादिग्रन्थानामुक्त्यसम्भवापत्तेः । "तस्मात्तत्पुरुषे स्वार्थलाभः स्यादुत्तरपदे बहुव्रीहौ द्वयोरन्यपरत्वात् दुर्बलत्वधी"रिति पूर्वपक्षे पीतशब्दे लक्षणेति सिद्धान्तवचः शिष्यधन्धनमालमिति विभावयामः । किं तु स्वराद्बहुव्रीहौ समुदायशक्तिं स्वीकृत्य श्रुत्या वा निर्णय इत्येव तत्त्वं भट्टपादैरभ्युपेयमिति परिभाव्यतां सूरिभिः । ग्रन्थस्त्वित्थं योज्यः । अषष्ठ्यर्थबहुव्रीहिर्द्वितीयाद्यन्तार्थकबहुव्रीहिः । षष्ठ्यर्थबहुव्रीहौ दामोदरं इत्यादौ रूढेरपि स्वीकारात् केवलं यौगिकत्वसूचनायेदं तत्रापि व्युत्पत्त्यन्तरस्य शक्तेः कल्पनात् क्लप्तस्यानन्यलभ्यार्थन्यायस्य त्यागश्च तव मीमांसकम्मन्यस्यास्ति । तत्किमन्येष्वपि समासेषु शक्तिं न कल्पयेरिति । अषष्ठ्यन्तेति पाठे स्वरूपसद्विशेषणं परमतनिराससूचकम् । तद्यथा । इत्थं ह्याहु-

मीमांसकाः । चित्रगुरेकहायनी पिङ्गाक्षी इत्यादौ चित्रा गावो यस्येति न विवरणम् । किं तु चित्राणां गवामयमिति । उक्तं ह्यरुणाधिकरणवार्त्तिके । यदि ह्यन्यपदार्थः षष्ठ्यन्त एव स्यात्ततो यथा राज्ञः पुरुष इत्यत्र षष्ठ्यन्तत्वाद्राजा पुरुषविशेषणं भवति प्रथमान्तत्वाच्च पुरुषः प्रधानत्वरूपेण समासार्थो भवति । एवमेव चित्रगवादिपदैरपि देवदत्तादिविशिष्टा गाव एव प्रतीयेरन् न चित्रगोविशिष्टदेवदत्तादिः । तस्माच्चित्राणां गवामयमितीदृशेऽर्थे बहुव्रीहिर्वर्त्तते । यद्यप्यन्यथाविग्रहस्तथाप्युत्तरकालमीदृशार्थदर्शनादेवमेव विग्रहोपि वक्तव्यः । अतश्च सम्बन्धविशिष्टाभिर्गोभिर्देवदत्तादिर्विशिष्ट इति समासार्थो विज्ञायतइति । यद्यप्येवमपि चित्राणां गवां राज्ञः पुरुष इत्यादौ षष्ठ्यर्थप्राधान्यदर्शनात्समासेपि तथात्वापत्तिः । न चेष्टापत्तिः । यथैव राज्ञः पुरुष इत्यत्र षष्ठ्यां प्रयुज्यमानायां सम्बन्धः प्रधानभूतो विज्ञायते कृते तु समासे निवृत्तायां विभक्तौ पूर्वोत्तरपदयोः प्रत्येकप्रयोगदृष्टार्थात्यागात्सम्बन्धाधिक्यस्य च सामीप्यावगतविशिष्टार्थप्रत्ययादेव सिद्धेन सम्बन्धपरः समासो भवति एवमेव बहुव्रीहावपि न सम्बन्धप्राधान्यमित्युत्तरग्रन्थविरोधात् । तथापि चित्रगोसम्बन्धी राजसम्बन्धवांश्च समासार्थ इत्येव युक्तम् । सम्बन्धविशिष्टाभिर्गोभिरिति पूर्वग्रन्थस्वरसात् । सामीप्यात्संम्बन्धभानामिति त्वयुक्तमेव । निषादस्थपत्यधिकरणभङ्गप्रसङ्गात् । षष्ठीतत्पुरुषेपि लक्षणाविरहेण गौरवविरहात् । अस्मद्रीत्या च सम्बन्धविशिष्टे लक्षणायां गौरवं स्फुटमेव । तथा च राजसम्बन्धाविशिष्टाभिन्नः पुरुष इति बोधः । न चैवमपि तत्पुरुषे विग्रहसमासयोः समानार्थत्वहानिर्नोद्भूतेति वाच्यम् । राजा चासौ पुरुषश्चेत्येव विग्रहस्य तन्त्ररत्नात्प्रतीतेः । अत एव द्व-

न्द्वे युगपदधिकरणवचनस्वदर्शनाद्वासौ च कृष्णौ चेत्येव विग्रह इति महाभाष्ये स्थितमित्याहुः । तत्र यद्यपि षष्ठ्यन्तेन समासे विग्रहेण समानार्थत्वहानिर्नोद्भूतैव तत्पुरुषे प्रथमान्तानामेव समासे षष्ठीति समासविधायकस्य षष्ठ्या आक्रोशतीति समासषष्ठ्या अलुग्विधायकानां षष्ठीप्रत्येनसीति स्वरैकलक्षण्यस्य चोच्छेदापत्तिरिति विग्रहसमासयोरतिसमानार्थत्वनियमो नास्त्येव । अथ षष्ठ्यन्तेनैव विग्रहोस्तु । परं तु समासवद्व्यासेपि राजपदं सम्बन्धिलक्षकं षष्ठी चाभेदार्थेति स्वीकार्यमतोत्र समानार्थत्वहानिरिति चेत्तथापि षष्ठ्यर्थस्याभेदस्य विग्रहे प्राधान्यात्समासे तदापत्तेरवारणादिति दूषणमस्त्येव तथापि स्फुटत्वात्तदुपेक्ष्याह । अषष्ठ्यन्तेति । दूषणबीजप्रदर्शनम् । अप्रथमाविभक्त्यर्थइति वार्त्तिकेन प्रथमान्तार्थे तदसम्भवस्य कण्ठत एव प्रतिपादितत्वान्न चित्राणां गवामयमिति विग्रहप्रदर्शनं युज्यते । अषष्ठ्यर्थबहुव्रीहावेवमप्यर्थसाम्यालाभाच्चेति भावः । तथाहि । प्राप्तोदक इत्यादावुदककर्तृकप्राप्तिकर्मेति बोधः सर्वसिद्धः । अत एव समासेनाभिहितत्वान्न द्वितीयेत्यनभिहितइत्यादौ स्पष्टम् । एवमूढरथ इत्यादावपि द्रष्टव्यम् । अत्र समानार्थको विग्रहो ऽसम्भावित एव । द्वितीयान्तान्यपदार्थस्य विग्रहे धात्वर्थक्रियाविशेषणत्वात् । नन्वत्रापि प्राप्तस्योदकस्यायं, कृतस्य विश्वस्यायम्, ऊढस्य रथस्यायम्, उपहृतस्य पशोरय, मुद्धृतस्यौदनस्येय, मित्यादिविग्रहः कार्य इति चेत्। एवं हि ग्रामकर्मकप्राप्तिकर्तृत्वमुदके उदककर्तृकप्राप्तिकर्मत्वं च ग्रामे न लभ्येतेति गृहं प्राप्तस्योदकस्याश्रयो ग्राम इति वत्प्राप्तोदकं ग्राम इत्यपि स्यात् । अपि च । समासे पूर्वोत्तरपदार्थयोर्विशेषणत्वाद्विग्रहेपि तथैव वाच्यत्वे ह्यलौकिकप्रक्रियावाक्यं प्रथमान्तेन

षष्ठ्यन्तेन वा । नाद्यः । अलौकिके प्रविष्टानामेव पक्षान्तरे परिनिष्ठितेपि प्रयोगसम्भवे उपस्थितपरित्यागस्यान्याय्यत्वात्षष्ठ्यन्तत्वेन विग्रहप्रदर्शनायोगात् । तथा ऽसम्भवाच्च । तथाहि । कृतसु विभक्तिषु इत्यादि सर्वत्र स्थितौ विभाषा समाससंज्ञायां यदा सा जाता तदा प्रातिपदिकसंज्ञा । ततः सुपोधातुप्रातिपदिकयोरिति विभक्तिलोपो भवति । यदा तु सा न भवति तदा तस्या विभक्तेः को निवारयितेति विभाव्यताम् । तथा च तस्या एवोत्तरं प्रवृत्तानुशासनाच्छ्रवणं स्यात् । इत्थमन्यत्राप्यूह्यम् । न द्वितीयः । शेषोबहुव्रीहिरित्यत्र यस्यैव त्रिकस्य न समास उक्तस्तस्यैवोक्तादन्यत्वात्तन्मात्रगत एवात्र शेषो विवक्षित इति प्रथमान्तानामेव स इति भाष्यकारैर्व्यवस्थापित[illegible] तस्मान्नोक्तविग्रहसम्भवः । एतेनाग्निहोत्रं जुहोति [illegible] विधिवाक्ये ऽग्नये होत्रमस्मिन्निति यौगिकमग्निहोत्रनामेति वदन्तो मीमांसकाः परास्ताः । यत्तूक्तं परिमले नात्यन्तं व्यधिकरणबहुव्रीहेरसम्भवः । सप्तमीविशेषणेबहुव्रीहाविति ज्ञापकेन कण्ठेकाल इत्यादौ तदभ्युपगमात् । तदेवं व्याप्तिन्यायेन सच्छास्त्रजन्मा हि विवेकलाभ इत्यादिपञ्चम्यन्तोप्यवर्ज्यो बहुव्रीहिरिति वामनेनोक्तत्वाच्च । परं त्वेकज्ञापकसिद्धोप्यसौ न सर्वत्र युक्तः । शेषोबहुव्रीहिरित्यनुशासनवैयर्थ्यापत्तेः । किं तु प्रामाणिकप्रयोगात्क चिदेवेति । तच्चिन्त्यम् । सप्तमीविशेषणेबहुव्रीहाविति ज्ञापकसिद्धस्यापि ज्ञापकसिद्धं न सर्वत्रेति परिभाषाविरोधेन सर्वत्र प्रवृत्त्ययोगात् । अन्यथा शेषोबहुव्रीहिरिति सूत्रानर्थक्यं च स्यात् । किं चैवं वैयाकरणाख्यायां चतुर्थ्या इति ज्ञापकात्प्रकृतिविकारभावाभावेपि चतुर्थीसमासस्वीकारापत्तौ तन्निरासकत्वोक्तिविरोधापत्तेः । तथा "अथातो धर्मजिज्ञा-

सा" "अथातो ब्रह्मजिज्ञासे"त्यादौ धर्माय जिज्ञासा, ब्रह्मणे च जिज्ञासेत्यादि व्याचक्षाणाः शबरस्वामिनः प्राचीनवृत्तिकृतश्च भट्टपादैर्वाचस्पतिमिश्रप्रभृतिभिश्च पर्यवसितार्थपरतया व्याख्येयाः पर्यनुयोज्याश्च न स्युः । नहि ज्ञापकसिद्धत्वस्य तुल्यत्वेपि तएव प्रामाणिका विपरीताश्च शक्यन्ते वक्तुम् । यत्तु परिमले प्रकृतिविकारभावाभावेपि चतुर्थीसमासस्वीकारे चतुर्थीतदर्थेति सूत्रे बलिरक्षितग्रहणवैयर्थ्यापत्तिरित्युक्तम् । तत्त्विहापि समम् । वस्तुतस्तु अग्निहोत्रपदमन्तोदात्तं पठ्यते । तच्च समासस्येत्यनेन तत्पुरुषादावुपपद्यते । बहुव्रीहौ तु बहुव्रीहौ प्रकृत्या पूर्वपदमिति विशिष्य स्वरान्तरविधानादत्र तदभावादयुक्त एव बहुव्रीहिरिति तद्भर्मे यौगिकामिदं नामेत्याद्ययुक्तमेव । तस्माद्यादि यौगिकं नामेत्याग्रहस्तदा हूयतेस्मिन्निति होत्रम् । ताभ्यामन्यत्रोणादय इत्यधिकरणे त्रः । तत अग्नेर्होत्रमग्निहोत्रमिति तत्पुरुष एव । एवं स्वरो न विरुद्ध इत्यादि सुधीभिर्ज्ञेयम् । तस्मात्षष्ठ्यन्तादिना विग्रहासम्भवादगत्यात्र विग्रहवाक्ययोर्विशेषणविशेष्य[illegible] साम्यत्याग इति स्थितम् ॥ ३५ ॥

[illegible]वस्तु प्रथमान्तानामेव बहुव्रीहिः पक्षे चित्रा गावो यत्यपि वाक्यमस्तु । परं तु विग्रहत्वं चित्राणां गवामित्यस्यैव अतिसमानार्थत्वात् । अन्यथा विग्रहाच्छक्तिनिर्णयो न स्यात् । एवं प्राप्तोदक इत्यत्रापि प्राप्तमुदकं यमित्यस्य न विवरणत्वं किं तूदककर्तृकप्राप्तिकर्म ग्राम इत्यस्यैव । न चैवं समस्यमानपदैर्विवरणविरहाद्बहुव्रीहेर्नित्यसमासतापत्तिः । समासार्थबोधकवाक्यासम्भविन एव नित्यसमासत्वात् । यथोन्मत्तगङ्गं लोहितगङ्गमित्यादेः । अत्रान्यपदार्थे च संज्ञायां समासः । संज्ञा चोन्मत्ता गङ्गा यस्मिन्नित्यनेन न बोध्यतइति न लौकिको वि-

ग्रह इति स्पष्टमन्यत्रेति चेन्न। उन्मन्तगङ्गेति गङ्गाद्वारसंज्ञेति वाक्यस्य तत्रापि विग्रहत्वसम्भवात्। नित्यसमासोच्छेदापत्तेः। अधिहरीत्यत्रापि हरिनिष्ठतेति वाक्यसम्भवात्। अत एव यत्र न लौकिको विग्रहः स नित्यसमास इति सिद्धान्तकौमुद्यां ग्रन्थकृतैव व्युत्पादितम्। एवं च चित्रा गावो यस्येति न विवरणम्। बहुव्रीहेर्नित्यसमासत्वादिति मणिकारोक्तिरप्यपास्तेति दूषणं स्फुटत्वादुपेक्ष्य दूषणान्तरमाह॥

आख्यातं तद्धितकृतोर्यत्किञ्चिदुपदर्शकम्।
गुणप्रधानभावादौ तत्र दृष्टो विपर्ययः॥ ३५॥

तद्धितकृतोर्यत्किञ्चिदर्थबोधकं विवरणमाख्यातं तत्रापि विपर्ययो दृष्टः। तथाहि। आक्षिकः कुम्भकार इत्यत्राक्षकरणकक्रियाश्रयः कुम्भानुकूलव्यापाराश्रय इति बोधः। तद्विवरणे ऽक्षैर्दीव्यतीत्यादावक्षनिष्ठव्यापारजन्या भावना। कुम्भं करोतीत्यत्र कुम्भनिष्ठोत्पत्त्यनुकूला भावनेति बोधः। तथा च विशेषणविशेष्यभावांशे समानार्थत्वविरहेऽप्यन्यांशे विवरणत्वं शक्तिनिर्णायकत्वं च समानार्थत्वात्स्यादिति भावः॥ ३५॥

नन्वेवं सर्वत्र समासे शक्तिस्वीकारे कर्मधारयतत्पुरुषयोस्तुल्यत्वापत्तिस्तथा च लाघवात्कर्मधारय इति निषादस्थपत्यधिकरणविरोधः। स्वरादेरपि साधकान्तरस्याभावात्सिद्धान्तासङ्गतिश्चेत्यत आह॥

पर्यवस्यच्छाब्दबोधाविदूरप्राक्षणस्थिते।
शक्तिग्रहेऽन्तरङ्गत्वबहिरङ्गत्वचिन्तनम्॥ ३६॥

पर्यवस्यंश्चासौ शाब्दबोधश्च तस्मादविदूरश्चासौ प्राक्ष-

णश्च । तदानींतनलाघवमादायाधिकरणाविरोध इत्यर्थः । अयं भावः । निषादस्थपतिपदे समासशक्तिपक्षे निषादरूपे स्थपतौ, निषादानां स्थपतौ, निषादस्वामिके पुरुषान्तरे चेत्येवं सर्वत्र शक्तत्वान्नानार्थम् । तथा च नानार्थे तात्पर्यवशाद्विशेषावगतिरिति निषादस्थपतिपदस्य निषादरूपे स्थपतौ निषादानां स्थपतौ वा तत्कल्प्यमिति सन्देहे उपस्थित्यादिलाघवान्निषादरूपे तत्रैव तत्कल्प्यते । परेषामपि सति तात्पर्ये षष्ठीः प्रवेशयेतिवल्लक्षणाया दुर्वारत्वात्तात्पर्यमेव कल्प्यकोटावविशिष्यते इति न काश्चिद्दोष इति । यत्तु परिमले, षष्ठीसमासेपि कर्मधारयवत्पदार्थयोः पदैरुक्तत्वादभेदस्यैव षष्ठ्यर्थस्यापि संसर्गमर्यादया लाभान्न लक्षणा युज्यते । न च विग्रहवाक्ये विभक्त्यर्थस्य संसर्गतया ऽप्रतीतेः समासेपि तत्प्रकारकबोधार्थं लक्षणापेक्षेति वाच्यम् । पर्वतो वन्हिमानित्यत्र मतुबर्थस्य पक्षसाध्यसम्बन्धस्येव विभक्त्यर्थसंसर्गस्यापि संसर्गतया प्रतीत्युपपत्तेरित्याशंक्य ऐक्ये लाघवं सम्बन्धे भेदकल्पनागौरवमिति सार्वत्रिकः कर्मधारयबलीयस्त्वे हेतुः । राज्ञः पुरुष इत्यादौ तु भेदनियतषष्ठ्याद्यनुरोधादैक्यत्याग इत्यब्रुवन् । तन्न श्रद्धेयम् । विरुद्धविभक्त्यनवरुद्धप्रातिपदिकार्थयोरभेदस्यैवोक्तरीत्या युक्तत्वेन षष्ठ्यर्थद्वारा भेदेनान्वयस्यासम्भवात् । एतेन षष्ठ्यर्थो लक्षणीय इति कल्पतरुकाराद्युक्तिरयुक्ता । तथा च सम्बन्धिन्येव लक्षणा । अत एव "निषादपदमेवं तु स्थपतौ लक्षणां व्रजेदि"ति पार्थसारथिमिश्रेणोक्तम् । अत एव राजा चासौ पुरुषश्चेत्येव ते विगृह्णन्ति । एवं भेदे गौरवमिति सिद्धान्तोप्ययुक्तः । वस्तुतो भेदाभेदयोः सत्त्वेन गौरवाद्यभावात् । तत्र तात्पर्यं कल्पनीयमिति चेन्न । तस्य पदाप्रतिपाद्यतया तत्कल्पनायोगात् । एवं मतुबर्थः

सम्बन्धः संसर्ग इत्यप्ययुक्तम्। नैयायिकमीमांसकैः सम्बन्धिवाचकत्वस्यैव स्वीकारात्। 'भूमनिन्दाप्रशंसासु नित्ययोगेतिशायने। सम्बन्धेस्तिविवक्षायां भवन्ति मतुवादय' इति भाष्ये तु विशेष्यत्वेनैव वाच्यत्वस्वीकारादिति ध्येयम्। चिन्तनमित्यत्र नासङ्गतमिति शेषः ॥ ३६ ॥

इति वैयाकरणभूषणे समासशक्तिनिर्णयः ॥

शक्तिप्रसङ्गात्पदमात्र एवातिरिक्तां शक्तिं समर्थयते ॥

इन्द्रियाणांस्वविषयेष्वनादिर्योग्यता यथा।
अनादिरर्थैः शब्दानां सम्बन्धो योग्यता तथा ॥३७॥

इन्द्रियाणां चक्षुरादीनां स्वविषयेषु चाक्षुषप्रत्यक्षादिषु यथा ऽनादिर्योग्यता बोधकारणता तथा शब्दानामपि सैव योग्यतेत्यर्थः। इयं च पदार्थान्तरम्। ननु कल्पेश्वरेच्छैवास्तु पदार्थान्तरत्वे चातिगौरवमिति चेन्न। ईश्वरेच्छाज्ञानप्रयत्नानामन्यतमपरिशेषे मानाभावात्सर्वेषां च तथात्वे गौरवम्। किं चेश्वरेच्छा अपभ्रंशक्षणिकसाधारणीति तेषामपि शक्तत्वापत्तिः। अपि चेश्वरेच्छाया अतिप्रसङ्गाद्विशिष्य शक्तित्वासम्भव इति वदन्ति। अत्रोच्यते। विनिगमकाभावे चास्त्वीश्वरज्ञानस्य शक्तित्वम्। अत एव लीलावत्युपाये प्रथमत एवेश्वरज्ञानं शक्तिरित्युक्तम्। वस्तुतस्तु कल्प्यमानपदार्थेनापि प्रत्येकं विनिगमकाभावान्नातिरिक्ततत्सिद्धिः। न चेच्छाया अतिप्रसक्तत्वात्तत्तदुपाधिवैशिष्ट्यापेक्षणानपेक्षे एव विनिगमकम्। घटपदाद् घटो बोद्धव्य इत्येतादृशविलक्षणविषयतासम्बन्धेनेयं घटपदस्य शक्तिरित्यभ्युपगमेनोक्तदोषाभावात्। नन्वेवं विनिगमनाविरहात्पदार्थ सिद्धिर्न स्यादिति चेन्न स्यादेव। अपभ्रं-

शादावपि तेन सम्बन्धेनाभावान्नातिप्रसङ्ग इति । यद्वा । घटपदात् घटो बोद्धव्य इत्येतादृशविलक्षणतत्तत्पदार्थसम्बन्धत्वं शक्तित्वम् । अपभ्रंशलाक्षणिकादौ च न तस्याः सम्बन्धत्वम् । संस्कृते तस्याः सम्बन्धत्वस्यावश्यकत्वादन्यत्र चारोपादेवोपपत्तेस्तत्कल्पकाभावात् । तथा च नातिप्रसङ्गादिदोष इति । न सापेक्षत्वानपेक्षत्वे इति । मिश्रास्तु, अस्माच्छब्दादयमर्थो बोद्धव्य इतीच्छयोच्चरितत्वं शक्तिरतो न लाक्षणिकाद्यतिप्रसङ्गः । न चाधुनिकमैत्रपदाव्याप्तिः । द्वादशेन्हि पितेत्यादितो नामत्वेन तेषामीश्वरोच्चरितत्वात् । न च नापभ्रंशितवै इत्यादिनापभ्रंशस्यापि तदुच्चारितत्वम् । तत्र तदिच्छयोच्चारणाभावात् । इह तु नामपदार्थालोचनयैव तथा तात्पर्योन्नयनादित्याहुः । तन्न । वैदिकलाक्षणिके शक्त्यापत्तेः । किं च नामपदस्येश्वरोच्चरितत्वेपि चैत्रादिपदं तेनानुच्चारितमेवेति कथं तेषां तत्र शक्तिः । न च नामशब्देन तद्वाचकः शब्दस्तं प्रयुञ्जीतेति तदर्थपर्यालोचने तद्वाचकत्वरूपेण तत्तत्पदानामीश्वरोच्चरितत्वमस्त्येवेति वाच्यम् । तद्वाचकत्वं यदि तच्छक्तत्वं तदा शक्त्यनिर्णये दुर्ज्ञेयं, यदि च तद्बोधकत्वमात्रं तदा यकिञ्चित्सङ्केतिते द्वादशेन्हि पितृप्रयुक्ते शक्त्यापत्तेरिति दूषणमत्राहुः । तस्मादीश्वरसङ्केतः शक्तिरिति स्थितम् । अत्र माध्वाः । शब्दार्थयोः स्वाभाविक एव सम्बन्धः । तथा च प्रथमाध्याये प्रथमचरणेनुव्याख्याने । प्रत्यक्षवच्च प्रामाण्यं स्वत एवागमस्य हीति । विवृतं चैतत्सुधायां जयतीर्थेन । शब्दस्यार्थेन सह सम्बन्धः स्वाभाविकः सङ्केत एव वेति संशये सिद्धान्तयति । स्वतएवेति । स्वाभाविकेनैव सम्बन्धेनेत्यर्थः । तदुक्तं जैमिनिना, औत्पत्तिकस्तु शब्दस्यार्थेन सम्बन्ध इति । ननु सति स्वा-

भाविके सम्बन्धे व्युत्पन्नस्यापि बोधः स्यात् । नन्वग्निरविदितशक्तिर्न दहतीत्यत्र प्रत्यक्षादेः स्वाभाविकेऽर्थप्रत्यायकत्वे सत्यपि यथेन्द्रियसन्निकर्षापेक्षा तथात्रापि सङ्केतग्रहसचिवस्यैव बोधकत्वमित्याह । प्रत्यक्षवच्चेति । अथापि स्वाभाविकः सम्बन्धः सर्वेषां शब्दानां सर्वैरर्थैः समास्थीयते कस्य चित्केन चिदेव सम्बन्धो वा । नाद्यः । शब्दार्थव्यवस्थानुपपत्तेः । अन्त्ये, आर्यम्लेच्छानामनियमाभावप्रसङ्गः । तथाहि । आर्या हि यवशब्दं दीर्घशूके प्रयुञ्जते दीर्घशूकमेव च बुध्यन्ते म्लेच्छास्तु प्रियङ्गौ प्रयुञ्जते प्रियंगुं च बुध्यन्ते इत्येवं नियमः स्वाभाविक्यां शक्तौ न स्यात् । नहि प्रदीपो रूपप्रकाशनशक्तौ रसमपि प्रकाशयति । सङ्केतपक्षे सङ्केतानियमादनियमो युज्यतइति चे,न्न वयं क्व चिदपि शब्दस्य सङ्केताद्बोधकत्वं नास्तीति ब्रूमः । किं तु क्व चित्स्वाभाविकया शक्त्या बोधः क्व चित्सङ्केतादित्यनियमो युज्यते । यद्वा । स्वाभाविकी शक्तिरेकत्रैवास्ति । व्युत्पत्तिवशाद्व्यवहारनियमसम्भवात् । यथा खलु शुक्तिसन्निकर्षेण चक्षुषा कश्चिच्छुक्तिकां प्रतिपद्यते कश्चिद्रजतम् । न चैतावता चक्षुषोऽर्थप्रत्यायकत्वं न स्वाभाविकम् । तथा शब्दस्यापि शक्त्यनुसार्यननुसारिव्युत्पत्तिलक्षणसहकारिवशादानियमेपि स्वाभाविकशक्तिसद्भावः सम्भवतीति । तदिदमाह । प्रत्यक्षवच्चेति । इयान्विशेषः । शब्दः सङ्केतेनापि बोधको न प्रत्यक्षमिति । ननु स्वाभाविकसम्बन्धग्राहकत्वेन सङ्केतावश्यकत्वे किं स्वाभाविकया शक्त्या । अथासति स्वाभाविके सम्बन्धे सङ्केतनियम एव कथं स्यात् । सत्यम् । सर्गादिभुवा हि महर्षिदेवतानां परमेश्वरानुग्रहवतां परमेश्वरात्सङ्केतस्य सुशकत्वात् । तद्व्यवहाराच्चान्येषामित्यस्मत्पर्यन्तं सुग्रहः सङ्केतः । न चैवं साध्वसाधुविभा-

गो न स्यादिति वाच्यम् । यत्र परमेश्वरसङ्केतः स साधुरित्य-भ्युपगमादिति चेत् । अत्र ब्रूमः । परमतेपीश्वरसङ्केतएवाङ्गमस्म-दादीनामपि वा । आद्ये कथमार्यम्लेच्छानामनियमो बोधकता-याम् । तत्रेश्वरसङ्केतस्याभावात् । किं चैश्वरसङ्केतोपि गृहीत ए-वाङ्गम् । अन्यथा व्युत्पन्नानां बोधापत्तेः । ग्रहश्चास्मदादिव्य-वहारात्तथा चास्मदाद्युपदेश एव शक्तिः, किमीश्वरसङ्केत-कल्पनया । इदानीन्तनसङ्केतेनेश्वरसङ्केतो ज्ञाप्यतइति चे, त-र्ह्यस्मन्मतेपि स्वाभाविकः सम्बधो ज्ञाप्यतइति तुल्यम् । द्वितीये, पदार्थोपस्थितिमात्रस्य प्रयोजनत्वात्साध्वसाधुविभागार्थकं व्या-करणादि व्यर्थमिति । औत्पत्तिकसम्बन्धे एव किं मानमिति चेत् । अधुनातनो न सङ्केतयिता । लोकोत्तरे च न मानमि-त्यतोन्यथानुपपत्तिरेव । तस्मादीश्वरसङ्केतो न शक्तिरिति वद-न्ति । तन्तुच्छम् । क चित्सङ्केतस्य क चिच्छक्तेर्ज्ञानं कारणमि-ति व्यभिचारादेकस्यापि तत्तथा न स्यात् । अस्माकं पुनः स-ङ्केतत्वरूपेणैव तद् ज्ञानं हेतुः । तच्चेश्वरसङ्केतसाधारणम् । न चास्मदादीनामेव स तथास्तु । नियतशक्तिसाधुत्वाद्यनुरोधेन भ-गवत एव तत्कल्पनात् । सृष्ट्यादिव्यवहारे त्वयापि तस्य श-क्तिग्राहकत्वेनाभ्युपेतव्यत्वात् । उभयासिद्धेश्वरेच्छां त्यत्कात्ति-रिक्तकल्पने गौरवाच्च । तादृशेश्वरसङ्केतितत्वं च साधुत्वम् । तत्परिच्छेदकं च व्याकरणकोशादिकमिति न तद्वैयर्थ्यम् । एवं च सर्वथाप्यतिरिक्तपदार्थान्तरकल्पनमयुक्तामिति संक्षेपः । त-स्मादीश्वरेच्छैव शक्तिरिति नैयायिकानुसारिणः । राद्धान्तस्तु न तावत्सङ्केतः शक्तिः । ईश्वरादेः सङ्केतमज्ञात्वापि मीमांसका-दीनामर्थप्रत्ययेन तद्ज्ञानकारणतायां व्यभिचारात् । स्वरूपसम्बे-व स हेतुरिति चेन्न । अगृहीतशक्तिकादपि बोधापत्तेः । अप-

भ्रंशादपि बोधेन व्यभिचाराच्च । न च शक्तिभ्रमात्साधुश-
ब्दस्मरणाद्वा तत्र बोधः । अनुपदमेव खण्डयिष्यमाणत्वात् ।
एवं लौकिकानां गवादिपदे तत्तदर्थबोधजनकत्वग्रहानन्तरमेव बो-
धदर्शनात्सङ्केतत्वादिरूपेणापि तज्ज्ञानकारणतायां व्यभिचार
एव । एवं चार्थधीजनकत्वमेव पदस्य शक्तिः । यत्तु धीजनकत्वं
तद्योग्यता । सा च तदवच्छेदकधर्मवत्त्वम् । स च क्लृप्तत्वा-
दीश्वरसङ्केत एव । अक्लृप्तकल्पनायां गौरवात् । तवापि
पदस्यार्थधीजनकत्वं ज्ञाप्यसम्बन्धं विनानुपपन्नं सम्बन्धत्वेन
क्लृप्तत्वात्तामेव कल्पयति । यद्यपि सङ्केतत्वेन तज्ज्ञानं न का-
रणं व्यभिचारात् । तथापि तद्धीजनकतावच्छेदकत्वेनैव वाच्यम् ।
न चेतोपि लाघवात्तद्धीजनकत्वेनैव तज्ज्ञानं कारणम् । आधुनिके
देवदत्तादौ सङ्केतज्ञानादेव बोधेन व्यभिचारात् । न चात्रापि
विशेषणतया तद्धीजनकत्वमवगाहतएवेति वाच्यम् । स्वातन्त्र्ये-
ण तज्ज्ञानस्यावश्यकत्वात् । अन्यथा नेदं तद्धीजनकमिति जा-
नतो ऽस्माच्छब्दादयमर्थो बुद्धोनेनेति जानतस्तद्ग्रहापत्तेरिति ।
तत्तुच्छम् । तद्धीजनकतावच्छेदकत्वेन ज्ञानस्यार्थप्रतीतिहेतुत्वे
गौरवात् । आधुनिकदेवदत्तापदिपदे इदं पदमेनमर्थं बोधयत्वि-
ति सङ्केताद्बोधस्थलेवच्छेदकत्वेन ज्ञानस्य व्यभिचाराच्च । ननु
तवाप्यत्र व्यभिचार इत्युक्तामिति चेत् । भ्रान्तोसि । विशेष-
णतया तद्धीजनकत्वस्य तत्रावगाहनात् । न च नेदामिति पूर्वो-
क्तदोषः । तत्र बाधेन तद्धीजनकत्वस्यानवगाहनात् । अन्यथा
नेदं रजतमिति जानतो भ्रान्तिज्ञस्य पुरोवर्त्तीनि तुल्ययुक्त्या र-
जतत्वभाने भ्रान्तत्वापत्तेरिति । के चित्त्वाधुनिकदेवदत्तादिपद-
स्थले तद्धीजनकत्वज्ञानमग्रे मानसं कल्प्यते ततो बोधः । ला-
घवानुरोधात् । अत एव परमते परामर्शान्यथाख्यात्योः सिद्धि-

रिति वदन्ति । नन्वस्तु तावद्बोधकत्वज्ञानमेवार्थस्मरणहेतुः परं तु सर्वेषां पदानां लक्षणया शक्तिभ्रमाद्वा सकलबोधकत्वात्सर्वत्र सर्वेषां शक्त्यापत्तेरीश्वरेच्छा शक्तिरुच्यते । कारणं पुनरेतद्ज्ञानं न ब्रूम इति चेत्तथापि ईश्वरसङ्केतः शाब्दबोधहेतुपदार्थस्मरणहेतुज्ञानविषय इति सिद्धान्तोसङ्गत एव । शेषमुपरिष्टाद्वक्ष्यामः । तस्माद्बोधकत्वमेव शक्तिः । तच्च बोधजनकत्वामिन्द्रियादिवत् । अत एव कारणत्वं शक्तिरिति सिद्धान्तं स्फुटीकर्तुमेवेन्द्रियाणामिति वाक्यपदीयकारिकामुदाजहार ग्रन्थकारः । तथा स्मरणाभिमानप्रमोषखण्डने विवरणेप्युक्तम् । बोधजननसामर्थ्यमेव शब्दस्यार्थेन सम्बन्ध इति । एवमपभ्रंशानां वाचकत्वविचारे शब्दकौस्तुभेप्युक्तम् । घटबोधजननसामर्थ्यमेव घटादिपदानां शक्तिरिति । तच्चातिरिक्तमनतिरिक्तं वेत्यन्यदेतत् । अथैवं लक्षणोच्छेदः । एवं व्यञ्जनावादे तदुच्छेदश्चेति चेत् । अत्रोच्यते । लाक्षणिकेपि शक्तिरेव । शक्तिग्राहकस्य व्यवहारस्य मुख्यलाक्षणिकसाधारणत्वात् । अत एव प्रायः सर्वे सर्वार्था इति सिद्धान्तप्रवादः पदेन सति तात्पर्ये प्रायः सर्वेषां बोधनात् । युक्तं चैतत् । अन्यथा प्रत्यक्षादिजन्योपस्थितेः शाब्दबोधानङ्गत्वाच्छाब्दबोधं प्रति शक्तिजन्योपस्थितेर्लक्षणाजन्योपस्थितेश्च कारणत्वं वाच्यम् । तथा च कार्यकारणाभावद्वयकल्पने गौरवं स्यात् । अस्माकं पुनः शक्तिजन्योपस्थितित्वेनैव कारणतेत्येक एव स इति लाघवम् । अपि च लक्षणावृत्तिस्वीकारे कार्यकारणभावस्य प्रत्येकं व्यभिचारः शक्तिजन्योपस्थितिं विनापि लक्षणाजन्योपस्थितितः शाब्दबोधात् । न चाव्यवहितोत्तरत्वसम्बन्धेन तत्तदुपस्थितिमत्त्वं कार्यतावच्छेदकम् । तत्तदुपस्थितित्वं च कारणतावच्छेदकम् । अनन्तकार्यकारणभावप्रस-

ज्ञात् । किं च । पदार्थोपस्थितिं प्रत्यपि शक्तिज्ञानत्वेन लक्षणा-ज्ञानत्वेन च हेतुतेति व्यभिचारो गौरवं च पूर्ववदेवेति द्रष्टव्यम् । न चेदं पदमेतदर्थबोधजनकमित्यादिशक्तिज्ञानकार्यकारणभाव-कल्पनेपि पदतदर्थभेदेनानन्तकार्यकारणभावकल्पनं तवापि समानम् । परस्परं व्यभिचारवारणायाव्यवहितोत्तरत्वघटितत्वे च सुतरामिति वाच्यम् । शक्तिभ्रमानुरोधेन तत्तत्पदतत्तदर्थभे-देन तादृशकार्यकारणभावकल्पनागौरवस्य तवापि तुल्यत्वात् । लक्षणाज्ञानकार्यकारणभावकल्पनागौरवं पुनर्भवतामतिरिच्यते । अथ वृत्तिजन्योपस्थितित्वेनैव शाब्दबोधहेतुता वृत्तिज्ञानत्वेन च पदार्थोपस्थितिकारणतेति नानेकतत्कल्पनागौरवमिति चेत् । वृत्तित्वं हि शक्तिलक्षणान्यतरत्वं शाब्दबोधहेतुपदार्थोपस्थित्य-नुकूलपदपदार्थसम्बन्धत्वं वा न कारणतावच्छेदकं शक्तित्वम-पेक्ष्य गौरवात् । शाब्दबोधहेतुतावच्छेदकस्य पदार्थोपस्थितिवृ-त्तेरज्ञानं तद्घटितकार्यकारणभावग्रहस्याप्यसम्भवात् । किं च कार्यमेव कुत्र जायतां क नेत्यतिप्रसङ्गवारणार्थं तदवच्छेदकादरः तच्च कार्यस्यावच्छेदकत्वे न सङ्गच्छतइति । यत्तु शक्यसम्बन्धरूप-लक्षणायां शक्तेरपि प्रवेशान्ममापि पदार्थोपस्थितौ शक्तिज्ञानत्वेन शाब्दबोधे च शक्तिजन्योपस्थितित्वेनैव हेतुतेति । तदश्रद्धेयम् । श-क्तिज्ञानपदार्थोपस्थित्योस्तत्कार्यकारणभावे समानविषयत्वस्या-वश्यकत्वात् । अन्यथा घटमानयेति वाक्यं हस्तिनं च समूहा-लम्बनविधया स्मरतो घटपदादिभ्यो घटादेः गजाद्धस्तिपक-स्य समूहालम्बनस्मरणे सति घटानयनवद्धस्तिपकस्यापि शा-ब्दबोधविषयतापत्तिः । समूहालम्बनरूपायां पदार्थोपस्थितौ वृ-त्तिजन्यत्वसत्त्वात् । किं चेह सहकारतरौ मधुरं पिको रौतीत्या-दिप्रसिद्धपदसामानाधिकरण्याद्व्यवहाराद्वा शक्तिग्रहस्थले प्रत्य-

क्षादिना जातिरूपाधिकरणानामपि शक्यग्रहे ग्रहात्पदात्स्मृतेस्तेषां कदा चित्सर्वानुभवसिद्धौ तदा शाब्दबोधविषयतापत्तिः। इष्टापत्तौ घटत्वादेरप्यशक्यतापत्तिः सम्बन्धितावच्छेदकत्वेन नियतोपस्थितस्य वृत्त्याविषयत्वेपि शाब्दबोधविषयत्वोपपत्तेः; घटपदं घटे शक्तामिति जानतस्तादृशघटात्पदोपस्थितौ ततस्तादृशपदवानाकाश इति परम्परया आकाशोपस्थितेः शाब्दबोधाङ्गत्वापत्तेश्च। नन्वेवं नाकाशस्य पदजन्योपस्थितौ शक्तिज्ञानोपयोगः पुत्रात्पितुरिव एकसम्बन्धिज्ञानादपरसम्बन्धिस्मरणमित्यन्यसाधारण्येनैव तदुपयोगादिति चे, तर्हि गङ्गायामित्यत्रापि गङ्गापदाद्गङ्गोपस्थितौ तया च तीरोपस्थितेः प्रत्यक्षादिसाधारण्यान्न शक्तिज्ञानोपयोग इति तुल्यम्। न च पदाच्छक्योपस्थितिस्ततो लक्ष्यबोध इति न ब्रूमः। किं त्वाहत्य पदमेव स्वशक्यसम्बन्धेन लक्ष्यं बोधयतीति तत्र शक्तेः साक्षादेवोपयोग इति वाच्यम्। एवं हि स्वशक्ताश्रयत्वसम्बन्धेन पदादप्याकाशोपस्थितावतिप्रसङ्गापत्तेरवारणादिति ध्येयम्। ननु शक्यसम्बन्धग्रहादेव तीरं यत्रोपस्थितं तत्र बोधस्य सर्वसिद्धत्वाल्लक्षणाज्ञानकार्यकारणभावकल्पने तवापि समानामिति न प्राक्तनगौरवावकाशो, न वा शक्योपस्थितिपूर्वकतानियम इतिचे, न्मैवम्। अस्मन्मते गङ्गापदात्तीरबोद्धव्यमिति वक्तुस्तात्पर्यज्ञाने एव गङ्गापदे तीरबोधकत्वस्य ग्रहात्तस्यैव चोक्तरीत्या शक्तित्वात्समानविषयकशक्तिज्ञानस्याबाधेनादोषात्। अथ वा तत्राप्यग्रे बोधकत्वज्ञानम्, तत एव बोध इत्यस्तु। न च ज्ञानव्यक्त्यन्तरकल्पना दोषाय। फलमुखत्वात्। वस्तुतः सुषुप्त्यपगमक्षणमारभ्य पुनस्तदुत्पत्तिक्षणपर्यन्तं प्रत्यक्षात्मविशेषगुणोत्पादोवश्यं वाच्यः अत एव सुषुप्त्यभिन्नप्रत्यक्षात्मविशेषगुणशून्यः काल एव मू-

र्च्छेत्युच्यते । तथा च तावत्कालमन्तराज्ञानाद्यावश्यकतया ज्ञानान्तरमपेक्ष्येदमेव कल्प्यते इति क्व गौरवमिति हि वदन्ति । ननु तवापि बोधकत्वरूपशक्त्यन्तरकल्पनागौरवं स्यादिति चेन्नैवम् । गङ्गापदात्तीरोपस्थितौ तत्र तद्बोधकत्वस्यावश्यकल्प्यत्वात् । किं च गङ्गापदं तीरे शक्तमिति ज्ञाने सति विना लक्षणाज्ञानं ततस्तीरोपस्थितिः सर्वसिद्धा । न चात्र तद्भ्रमः । पदतदर्थघटितशक्तेर्भ्रमासम्भवात् । तस्माल्लाक्षणिके शक्तिस्वीकार आवश्यकः । एतेन शक्यसम्बन्धरूपा लक्षणा क्लृप्ता, तस्यां सम्बन्ध्यन्तरबोधजनकत्वमप्येकसम्बन्धीति न्यायात् क्लृप्तम् । तज्जन्यस्मृतेः शाब्दबोधोपयोगित्वमात्रं कल्प्यते त्वया तु शक्तिधर्मी कल्पनीय इति गौरवम् । किं च । गङ्गापदजा तीरस्मृतिः शाब्दबोधोपयोगिनीति तवापि मतम् । तज्जनकत्वं शक्यसम्बन्धस्यैव कल्प्यते क्लृप्तत्वात् । न च क्लृप्तशक्तेरिति निरस्तम् । उक्तरीत्या शक्तेरपि तत्रतत्र क्लृप्तत्वात् । कार्यकारणभावकल्पनागौरवाच्च । यदि च शक्तिप्रयोज्यैवोपस्थितिर्हेतुरिति न लक्षणाज्ञानकार्यकारणभावान्तरं कल्प्यतइत्युच्यते तदा भवतैव लक्षणा निरस्तेति सिद्धं नः समीहितम् । नहि शक्यसम्बन्धमेव लक्षणाखण्डकः खण्डयति, न वा तस्य सम्बन्धत्वम् । किं तु पदपदार्थसम्बन्धत्वं तज्ज्ञानकार्यकारणभावं चेत्याद्यवधेयम् । ननु लक्षणाया अकल्पने सर्वेषां पदानां नानार्थत्वादक्षादिपदवदर्थसन्देहः स्यात् । किं च । एवं हि लक्षणायां सर्वसिद्धानुपपत्तिज्ञानवैयर्थ्यम् । अन्यायश्चानेकार्थत्वमिति न्यायविरोधश्चेति चेन्न । यस्य नानार्थत्वज्ञानं नास्ति न तस्य सः । अपरस्य संशय इष्ट एव । अत एवाक्षादिपदस्थले एकत्रैव शक्तिग्रहवतो न सन्देहः । अत एव गङ्गापदं तीरशक्तमिति व्यव-

हारापत्तिरित्यपास्तम् । परमतेपि लक्षणादिनार्थान्तरप्रतिपादन-संशयात्स्यादेव सः । प्रसिद्ध्यादिकं च समानम् । अन्वयानुपपत्तेस्तात्पर्यज्ञाने एवोपयोगः सर्वेषां नानार्थत्वाच्च तदावश्यकत्वात् । अन्यायश्चानेकार्थत्वं च लाघवमूलकम् । तच्च नेति प्रागेवोक्तम् । यत्तु अपभ्रंशे शक्तिनिरासार्थं पदार्थसम्बन्धत्वरूपं प्रागुक्तरीत्या शक्तित्वं, एवं च लाक्षणिकस्थलेपीश्वरेच्छायाः सम्बन्धत्वं कल्पनीयं शक्यसम्बन्धस्य च सम्बन्धत्वं क्लृप्तमिति गौरवमेव तवेत्याहुः । तच्चिन्त्यम् । परमते शक्यसम्बन्धरूपलक्षणाया इवेश्वरेच्छायाः क्लृप्तत्वेन कल्पनीयत्वाभावात् । न च शक्तिः सम्बन्धिभेदाद्भिन्नेति गौरवम् । तवापि सम्बन्धानां नानात्वात् । न च क्लृप्तेश्वरेच्छा अस्माच्छब्दादयमर्थो बोद्धव्य इत्येवंरूपा न क्लृप्तेति वाच्यम् । सन्मात्रविषयिण्यास्तस्यास्तादृश्या अप्यावश्यकत्वात् । न चेच्छायाः क्लृप्तत्वेपि सम्बन्धकत्वं कल्पनीयमिति गौरवमेवेति वाच्यम् । अपभ्रंशेपि शक्तिग्रहाद्बोधानुरोधेन तथा कल्पनावश्यकत्वात् । वक्ष्यते चैतदुपरिष्टात् । अस्मद्रीत्या चेच्छायाः शक्तित्वमेव नेति प्रागुक्तरीत्येदमसङ्गतमेवेत्यादि सुधीभिर्ध्येयम् । तस्माद्यत्रान्यत्र साधोस्तद्वृत्तिगुणसजातीयगुणबोधनायाप्रसिद्धे तत्प्रयोगस्तत्र लक्षणेति व्यवहार इति ध्येयम् । उक्तं हि वाक्यपदीये । "एकमाहुरनेकार्थं शब्दमन्ये परीक्षकाः । निमित्तभेदात्सर्वत्र सार्वार्थ्यं तस्य भिद्यते ॥ यौगपद्यमतिक्रम्य पर्यायेष्ववतिष्ठते । अर्थप्रकरणाभ्यां वा योगाच्छब्दान्तरेण वा ॥ यथा सास्नादिमान्पिण्डो गोशब्देनाभिधीयते । तथा स एव गोशब्दो वाहीकेपि व्यवस्थितः ॥ सर्वशक्तेस्तु तस्यैव शब्दस्यानेकधर्मिणः । प्रसिद्धित्यागाद्गौणत्वं मुख्यत्वं वोपजायते" इति ॥ तस्माद्बोधकत्वं श-

क्तिरिति मते न कश्चिद्दोष इति सिद्धम् ॥ ३७ ॥

नन्वेवं भाषादितोपि बोधदर्शनात्तत्रापि शक्तिस्वीकार आवश्यकः । न च शक्तिभ्रमात्ततो बोधो, मानाभावात् । न च तत्परिच्छेदककोशाद्यभाव एव बाधकः । कोशस्येव वृद्धव्यवहारस्य सर्वेषामुपजीव्यत्वेन मुख्यस्य तत्र सत्त्वात् । कोशादीनां व्याकरणसिद्धसाधुत्वमात्रबोधकतायां वक्ष्यमाणत्वाच्च । तथा च शक्तिमत्त्वाविशेषाद्गाव्यादिशब्दानां साधुतापत्तिरिति चेत् । अत्र नैयायिकादीनां समाधिमाह प्रथमार्धेन ॥

असाधुरनुमानेन वाचकः कैश्चिदिष्यते ।
वाचकत्वाविशेषे वा नियमः पुण्यपापयोः ॥३८॥

असाधुर्गाव्यादिः । अनुमानेन, साधुस्मरणाच्छक्तिभ्रमाद्वा । कैश्चिन्नैयायिकादिभि, रुच्यते नातः साधुरिति शेषः । अयं भावः । संस्कृते एव शक्तिः कल्पकस्य व्यवहारादेस्तुल्यत्वेपि भाषाणां तत्तद्देशभेदेन नानात्वान्न शक्तिः । न च नानार्थन्यायेनैकस्याप्यनेके वाचकाः स्युः । अन्यथा पर्यायोच्छेदश्च स्यादिति वाच्यम् । तत्र क शक्तितः क लक्षणेत्यत्र विनिगमकाभावात् । अन्यत्राप्यशक्तत्वेन लक्षणाया अप्यसम्भवात् । अत्र च संस्कृतस्य सर्वदेशे एकत्वात्तत्रैव शक्तितः । भाषाणां च प्रतिदेशं भिन्नत्वात्संस्कृतैः सह पर्यायतापत्तेश्च न शक्तितः । न चापभ्रंशाद्बोधो न स्यादिति वाच्यम् । व्युत्पन्नस्य साधुशब्दस्मरणाद्बोधोपपत्तेः । उक्तं हि वाक्यपदीये आगमसमुच्चयकाण्डशेषे । " ते साधुष्वनुमानेन प्रत्ययोत्पत्तिहेतवः । तादात्म्यमुपगम्येव शब्दार्थस्य प्रकाशकाः ॥ न शिष्टैरनुगम्यन्ते पर्याया इव साधवः । न यतः स्मृतिशास्त्रेण तस्मात्सा-

क्षादवाचकाः ॥ अम्बाम्बोति यदा बालः शिक्ष्यमाणः प्रभाषते । अव्यक्तं तद्विदां तेन व्यक्ते भवति निर्णयः ॥ एवं साधौ प्रयोक्तव्ये योपभ्रंशः प्रयुज्यते । तेन साधुव्यवहितः कश्चिदर्थोभिधीयते " इति ॥ अव्युत्पन्नस्य शक्तिभ्रमादेव बोधः । न च पामराणां शक्त्यग्रहे कथं तद्भ्रमः । पूर्वपूर्वभ्रमादुत्तरोत्तरभ्रमोपपत्तेः । प्रथमतस्तु व्युत्पन्नोपभ्रंशात्साधुशब्दं बुध्वा व्यवहृतवान् । तन्मूलकः शक्तिभ्रमोन्येषामिति । इत्थं च संस्कृते एव शक्तिसिद्धौ शक्यसम्बन्धरूपवृत्तेरपि तत्रैव भावात्तत्वं साधुत्वम् । तद्विषया एव साधुभिर्भाषितव्यमित्यादयो विधयः । तथा च नातिप्रसङ्ग इति । एतज्ज्ञानं शाब्दबोधकारणम् । ग्राम गाम इत्यादावन्वयाबोधादिति सम्प्रदायः । वस्तुतो वृत्तिमत्त्वं न साधुत्वम् । सङ्केतत्वाद्यज्ञानेपि साधुत्वव्यवहारात् । समासादौ साधुशब्दे सङ्केतादिसत्त्वे सङ्केतस्यैव शक्तित्वेन शक्त्यापत्तेश्च । प्रकृतिप्रत्ययसमुदायस्यासङ्केततत्वेनासाधुत्वापत्तेश्च । सङ्केततत्त्वे च शक्त्यापत्तेः । प्रत्येकशक्तिमादाय साधुत्वे च बाधत इत्यादिवद्बाधतीत्यस्यापि साधुतापत्तेः । तस्मान्न सङ्केततत्वघटितं साधुत्वम् । किं तु व्याकरणनिष्पाद्यत्वम् । यत्र यः शब्दो व्याकरणे व्युत्पादितः स तत्र साधुः डित्थादिनाम्नाम्प्युणादयोबहुलंमित्यनेन व्युत्पादनसम्भवान्नानुपपन्नम् । एवं नान्तरीयकादिशब्दानामपि । एवं साधुत्वज्ञानङ्कारणमित्यप्ययुक्तम् । अवयवादिव्युत्पन्नेन पूर्वप्रयोगमज्ञात्वापि नवकादिप्रयोगात् । किं त्वसाधुत्वनिश्चयः प्रतिबन्धकः । नातो ग्रामगामादावन्वयबोधः । अत एव साधोरप्यसाधुत्वनिश्चयेन बोधः । एवं च गाव्यादेरसाधुत्वज्ञानरूपप्रतिबन्धकसत्त्वान्न बोधकत्वमिति साधुस्मरणाच्छक्तिभ्रमाद्वा तद्वाच्यमिति तु नवीनाः ।

अत्रोच्यते । अपभ्रंशानामबोधकत्वे ततो बोध एव न स्यात् । न च साधुस्मरणाद्बोधः । तमविदुषां जायमानत्वात् । तस्माद-ज्ञायमानत्वाच्च । उक्तं हि वाक्यपदीये । " पारम्पर्यादपभ्रंशा विगुणेष्वभिधातृषु । प्रसिद्धिमागता येन तेषां साधुरवाचकः ॥ दैवी वाग्व्यवकीर्णेयमशक्तैरभिधातृभिः ॥ अनित्यदर्शिनां त्वस्मि-न्वादे बुद्धिविपर्यय" इति ॥ अवाचकः । अबोधकः । बोधक-त्वस्यैवोक्तरीत्या शक्तित्वादिति भावः । अनित्यदर्शिनां बुद्धि-विपर्ययः । एते एव वाचकाः नान्ये इति विपर्यय इत्यर्थः । नापि शक्तिभ्रमात्ततो बोधः । बोधकत्वस्याबाधेन तज्ज्ञानस्या-भ्रमत्वात् । ईश्वरेच्छावादेप्युक्तरीत्या पदपदार्थघटितं तद्वाच्यं तच्च विशेषदर्शनान्न भ्रमयोग्यम् । अत एव तत्तत्पदार्थघटित-व्याप्तेर्न भ्रम इति तत्रतत्रोक्तम् । न च गगरीशब्दाद्घटो बोध्य इत्ये-तादृशेच्छायाः कल्पनाया अपि न सम्बन्धत्वमिति तदंशे भ्रमो वा-च्य इति वाच्यम् । तादृशेच्छायाः सत्त्वे तेन सम्बन्धेन स-म्बन्धित्वादपरोपस्थितौ तस्याः सम्बन्धत्वस्य दुर्वारत्वात् । अ-न्यत्र कल्पितसम्बन्धत्वस्य तस्मिन्नपि सत्त्वात् । किं च । वि-निगमनाविरहाद्भाषायामपि शक्तिः । न चोक्तं गौरवं संस्कृतवन्म-हाराष्ट्रभाषायां शक्तेर्दुष्परिहरत्वात् । तस्याः सर्वदेशे एवैकत्वा-त् । एतेन भाषान्तरैर्विनिगमनाविरहान्नैकत्र शक्तिरिति परा-स्तम् । संस्कृतेपि प्रत्येकं विनिगमनाविरहात् । किं च न सं-स्कृतत्वं न वा भाषात्वं शक्त्यवच्छेदकं किं त्वानुपूर्वी सा च भिन्नभिन्नैव सर्वत्रेति घटकलशादिपर्यायेष्विव नैकेनापरान्यथा-सिद्धिरिति भाषायां शक्तिरेव । अत एव काव्यप्रकाशकारेण वाच्यस्य व्यञ्जकत्वे प्राकृतोदाहरणमलेखीत्यपि वदन्ति । ए-तदभिप्रायेणैव भाषाशब्दानां शक्तिरिति शब्दकौस्तुभे निर्णी-

तम् । अर्वम्लेच्छाधिकरणे भट्टैरप्युक्तम् । "प्रतिपादकतामात्रं म्लेच्छेष्वप्यवगम्यते" इति । एवं नासाधुत्वनिश्चयः प्रतिबन्धकः । तत्सत्त्वेपि संस्कृतमाविदुषां प्राकृतादेर्बोधात् । न चात्र मानसो बोधः । अन्यत्रापि तथात्वापत्तेः । शब्दप्रामाण्योच्छेदप्रसङ्गात् । तस्मात्परोक्तसमाधिर्न युक्त इत्याशयेनाह । वाचकत्वाविशेषे वेत्यादि । अथैवं भाषाशब्दानामर्थवत्त्वात्प्रातिपदिकसंज्ञा किं न स्यात् । स्यादेव, को दोषः इति चे, तथा सति प्रातिपदिकत्वात्सुबुत्पत्तौ व्याकरणव्युत्पाद्यत्वात्साधुत्वप्रसङ्ग इति चेत् । वार्त्तमेतत् । "सिद्धे शब्दार्थसम्बन्धे लोकतोर्थप्रयुक्ते शब्दप्रयोगे शास्त्रेण धर्मनियमो यथा लौकिकवैदिकेषु" इति वार्त्तिकेनैव निरस्तत्वात् । लोकतोर्थबोधार्थं प्रयुक्ते शब्दे इति व्याख्यानात् । नहि प्रकृतिप्रत्ययसमूहरूपेण वचन्तीत्यादिवद्भाषाशब्दानां प्रयोगः । एतन्मूलकमेवानभिधान्न भवतीत्यादिकम् । किं चैवं भाषाशब्दानां तत्तदर्थे व्युत्पादनविरहान्न साधुत्वमित्यादि सर्वमभिप्रेत्याह । नियम इति । अत्रेदं तत्त्वम् । यः शब्दो यत्रार्थे व्याकरणे व्युत्पन्नः स तत्र साधुः । अपभ्रंशास्तु न तत्तदर्थे व्युत्पन्नाः नातः साधवः, देवदत्तादिनाम्नामप्युणादयोबहुलमित्यनेन द्व्यक्षरं चतुरक्षरं स्पर्शमध्यमिति भाष्येण वा साधुत्वबोधनात् । अत एवार्थाच्छक्तिपरिच्छेदः पररीत्या, एतद्बोधार्थमेव कोशादिप्रणयनम् । न च लाक्षणिकानां तत्तदर्थे व्युत्पादनविरहात्तेषामसाधुतापत्तिः । गुणवाचकानां गुणे व्युत्पादनाद् गौणस्थले तत्पुरस्कारेण प्रवृत्तावनुपपत्यभावात् । एवं च विशिष्टवाचकानामेकदेशपुरस्कारेण प्रवृत्तौ लक्षणापरिभाषा, आधुनिकानां त्वसाधुत्वमिष्टमेव । अन्यथा न गृहीतमित्यर्थे लक्षणया गृहीतमित्युक्ते कूटसाक्ष्यत्वानापत्तेः । अत एव गाव्यादीनामनुकरणे व्युत्पाद-

नात्तत्र साधुत्वमेव। यदि च यत्र क्व चिद्धयत्पादितस्य सर्वत्रैव साधुता स्यात्तर्हि सर्वेषामनुकरणे तथात्वात्सर्वत्र साधुत्वे साध्वसाधुविभागोच्छेदः स्यात्। पररीत्या गाव्यादीनामशक्तत्वाल्लक्षणाद्यभावेनुकरणेपि तन्न स्यात्। तत्रैव शक्तौ लक्षणया गवादौ साधुः स्यादिति तत्तदर्थविशेष एव तद्वाच्यम्। उक्तं हि वाक्यपदीये। शब्दसंस्कारहीनो यो गौरिति प्रयुयुक्षते। तमपभ्रंशमिच्छन्ति विशिष्टार्थनिवेशिनः॥ यथा गोण्यादयः शब्दाः साधवो विषयान्तरे। निमित्तभेदात्सर्वत्र साधुत्वं च व्यवस्थित"-मिति॥ ननु व्याकरणव्युत्पाद्यत्वमस्तु साधुत्वं तथापि तज्ज्ञानस्य शाब्दबुद्धिहेतुत्वस्य तद्व्यतिरेकनिश्चयस्य शाब्दप्रतिबन्धकत्वस्य वा पूर्वं भवतैव निरस्तत्वाद्व्यर्थस्तद्विचार इत्यत आह। नियम इति। 'साधुभिर्भाषितव्यम्' 'नापभ्रंशितवै न म्लेच्छितवै' इत्यादौ पुण्यपापजननात्साध्वसाधुविधिप्रतिषेधविषयज्ञापनमेव तज्ज्ञापनफलमिति भावः। एतच्च याज्ञे कर्माणि। न म्लेच्छितवा इत्यस्य क्रतुप्रकरणे पाठादिति भाष्यकाराः। नन्वेवं सति दर्शपूर्णमासप्रकरणे नानृतं वदेदिति निषेधात्तत्र तद्विकृतिषु च न म्लेच्छितवै इत्यतः सोमादौ च तन्निषेधप्राप्तेरनारभ्याधीतानिषेधान्तरानर्थक्यं स्यादिति चेन्न। पुरुषार्थकत्वर्थभेदेनोभयोरुपपत्तेः। ननु किमत्र पुण्यजनकतावच्छेदकं जातिरिति चे,त्तर्हि गोशब्दोश्वेपि साधुः स्यात्। नहि गौः कं चित्प्रत्येव गौरिति चेन्न। राजसूयादेर्ब्राह्मणफलाजनकत्ववदेतस्यार्थविशेषे प्रयुक्तस्यैव पुण्यजनकत्वात्। एतन्निर्णायकं च व्याकरणकोशादिकमिति संक्षेप इति प्रतिभातीति दिक्॥ ३८॥

अतिरिक्तशक्तेर्ग्रहोपायमाह॥

सम्बन्धिशब्दे सम्बन्धो योग्यतां प्रति योग्यता।

समयाद्योग्यतासंविन्मातापित्रादियोग्यवत् ३९

सम्बन्धो विषयः। योग्यतां प्रति योग्यताशब्दं प्रति योग्यता विषयः, इति समयात् व्यवहारात्। योग्यतासंवित्, शक्तिग्रहः। अयं भावः। सा शक्तिरयं शब्द एतदर्थसम्बन्धी एतद्बोधनयोग्य इत्यादिव्यवहाराद्ग्राह्या। प्राथमिकशक्तिग्रहस्य व्यवहाराधीनत्वात्। प्राथमिकयोग्यतादिपदानां तद्ग्रहे सति स्थलान्तरे अनेन प्रकारेण सा ग्राह्येति। तत्र दृष्टान्तमाह। मातापित्रादीति। तद्यथा लोकव्यवहारात्तथेदमपि इति भावः॥ ३९॥

इति वैयाकरणभूषणे शक्तिनिर्णयः समाप्तः॥

नञर्थमाह॥

नञ्समासे चापरस्य प्राधान्यात्सर्वनामता।
आरोपितत्वं तञ्द्योत्यं नञ्यसोप्यतिसर्ववत्॥४०॥

नञ्समासे। अब्राह्मण इत्यादौ। अपरस्य उत्तरपदार्थस्य प्राधान्यात्सर्वनामता। असर्व इत्यादौ। अत आरोपितत्वं नञ्द्योत्यम्। द्योत्यत्वोक्तिर्निपातानां द्योतकत्वाभिप्रायेण। आरोपितत्वमारोपविषयत्वम्। आरोपमात्रमर्थो विषयत्वं च संसर्ग इति नव्याः। इदमुक्तं भवति। आरोपितत्वमेव नञर्थः। अभावस्य तदर्थत्वे च तस्य विशेष्यत्वेनैव भानस्य सर्वसिद्धत्वान्नञर्थस्य विशेष्यत्वं स्यात्। तथा चासर्वस्मै इत्यादौ सर्वनामकार्यानापत्तिः। गौणत्वे तन्निषेधात्। इतरपदार्थविशेषणत्वेनोपस्थापितार्थकत्वं हि गौणत्वम्। तच्च तत्रायातं, अभावे प्रतियोगिनो विशेषणत्वात्। आरोपितत्वं च विशेषणमेवेति न

दोषः । किं चाभावार्थकत्वे अविद्यमानेत्यादौ परत्वादव्ययीभावं बाधित्वा तत्पुरुषत्वमेव स्यात् । नन्वस्तु गौणत्वेपि सर्वनामकार्यमत आह । नहि इति । तथा चातिसर्वपदे सर्वनामकार्यापत्तिरिति भावः । सर्वादीनि सर्वनामानीति महासंज्ञाकरणमिह लिङ्गम् । इत्थं च वायौ रूपं नास्तीत्यत्र रूपाश्रिता आरोपिता सत्ता वायौ इति बोधः । पीतः शंखो नास्तीत्यत्र चारोपिता पीतशंखसत्तेत्यादि । ननु विशिष्टसत्ताया अप्रसिद्धेः कथमारोप इति चेन्न । घटादिस्थसत्तायास्तदधिकरणस्य रूपाणां च प्रसिद्धेः । विशिष्टमप्रसिद्धमिति चेन्न । विशिष्टं तावन्तः पदार्था एव ते च प्रसिद्धाः । मेलनाप्रसिद्धिश्चाप्रयोजिका । अत एव तत्र शक्तिग्रहासम्भवेन बोधाभावापत्तिः परास्ता । अस्तु वा विशिष्टमप्रसिद्धम् । तथाप्याहार्या प्रतियोगिप्रसिद्धिः सम्भवत्येव । प्रतियोगिज्ञानस्याभावधीहेतुत्वेनाहार्यत्वं न प्रवेश्यते । गौरवात् । ससम्बन्धिकपदार्थप्रत्यक्षेपि सम्बन्धितावच्छेदकप्रकारकाहार्यानाहार्यसाधारणज्ञानत्वेनैव हेतुता । आहार्यज्ञानादाहार्य एव स इत्यनेनैवातिप्रसङ्गभङ्गात् । विशेषणतावच्छेदकप्रकारकज्ञानकारणतैव प्रतियोगिज्ञानकारणतेति पक्षेप्याहार्यज्ञानादप्याहार्यविशिष्टवैशिष्ट्यबोधः । तथा चात्र प्रतियोगिज्ञानसम्भवान्नानुपपत्तिः । न चैवमपि तत्र शक्तिग्रहाभावे कथं शाब्दबोध इति शंक्यम् । आरोपितत्वं शक्यमिति मते तत्र शक्तिग्रहस्यान्यत्रैव सम्भवात् । अत एव शशविषाणजन्यं कार्मुकं नास्तीत्यादौ शशविषाणजन्यकार्मुकनिरूपिता आरोपिता सत्ता इत्यादिबोधः । एतन्मते चार्थिकं घटो नास्तीत्यभावज्ञानमादाय नञर्थविशेष्यको बोध इति व्यवहारः प्रतियोगिज्ञानप्रतिबन्धादिकं च सङ्गमनीयम् ॥ ४० ॥

अथाभावस्य नञ्वाच्यत्वे घटो नास्तीति शब्दादभावबुद्धिर्न स्यात्तथा च घटवत्ताज्ञानप्रतिबन्धादिकं न स्यात् । न चाग्रे तज्ज्ञानं जायतइति वाच्यम् । नियमतस्तज्ज्ञापकाभावात् । आरोपितत्वज्ञानमेव तथेति चेन्न । प्रत्यक्षे व्यभिचारेण तज्ज्ञानस्य तत्राजनकत्वात् । न चारोपितत्वज्ञानमप्यारोप एव प्रतियोग्यधिकरणसंसर्गज्ञानस्यैव तत्वात् । तथा च स एव हेतुः प्रत्यक्षान्तरेष्विवेति वाच्यम् । आरोपस्याभावबुद्धावहेतुत्वात् । न चेदमिदं न, नेदमिहेत्यनुभवसिद्धं तदिति वाच्यम् । द्वितीयेदमः सर्वत्राभावेनैव सहान्वयात् । अथ कदा चिदत्यन्ताभावस्य कदाचिदन्योन्याभावस्य बोधात्तत्र नियामकः संसर्गारोपस्तादात्म्यारोपश्च वाच्य इति चेन्न । संसर्गारोपनियामकस्यैवात्यन्ताभावबोधनियामकत्वसम्भवात् सर्वदाप्यभावद्वयं बुध्यतएव । व्यवजिहीर्षावशात् व्यवहारकादाचित्कत्वमित्युपपत्तेश्च । अत एवारोपितरजतत्वायामेवशुक्तौ नेदं रजतमिति रजतत्वाभावः प्रतीयतइति लीलावत्युपायोक्तमपास्तम् । यत्तु प्रतियोग्यारोपस्याभावप्रमायां गुणत्वेन हेतुत्वात्सर्वत्रैव स हेतुरिति । तन्न । प्रमाया गुणजन्यत्वे मानाभावात् । भावे वा, अभावसन्निकर्षादेरेव तथात्वात् । प्रमात्वस्य कार्यतानवच्छेदकत्वाच्च । अथ नेत्येव प्रत्यक्षापत्तिः। सन्निकर्षसत्वादिति तन्निवृत्तये तद्ज्ञानं हेतुः । न च प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिप्रकारकाभावविषयचाक्षुषे स्वप्रतियोगितावच्छेदकप्रकारको निश्चयः कारणमित्यस्य निर्विकल्पकात् घटाभावधीवारणार्थमावश्यकत्वे तत एवोक्तदोषापगम इति वाच्यम् । एतन्मते तत्कार्यकारणभावास्वीकारात् । आरोपे सति तद्व्यतिरेकेण कार्यव्यतिरेकादर्शनादिति चेन्न । भवतां निःप्रकारकघट इतिमत्य -

क्षस्येव तस्याप्यभ्युपगमे बाधकाभावात् । इदं त्वादिना तमआदेर्भानस्य सर्वसिद्धत्वाच्च । वस्तुतो निष्प्रकारकमभावप्रत्यक्षं यदि नानुभवसिद्धम्, अस्तु तर्हि तत्र सप्रकारकज्ञानत्वेनैव कारणता । इत्थं च सर्वत्र विशिष्टबुद्धिसामग्री सुलभैवेति न नेति प्रत्यक्षम् । संशयोत्तराभावप्रत्यक्षे च धर्मितावच्छेदकावच्छिन्नाभावविषयकत्वम् । यदि चोपस्थितविशेषणस्यासंसर्गग्रहस्तदापि धर्मितावच्छेदकानियन्त्रिततद्विशिष्टबोधे न बाधकम् । एवं च नोक्तो गुरुः कार्यकरणभाव इति त्वस्मद्गुरवः । तस्मान्नारोपः कारणम् । अस्तु वा तथापि न शब्दे । केवलं न नेत्यत्राभावबोधस्य भाष्यकारैरुक्तत्वात् । निषेधपदादिना तद्बोधाच्च । अस्तु वा शाब्दे स हेतुस्तथापि न तद्बोधोनुभविकानाम् । अभावबोधस्यैव सर्वसिद्धत्वात् । न चोक्ता युक्तिर्युक्ता । सर्वनामसंज्ञाया एतत्तदोरिति ज्ञापकादेव सिद्धेः । अन्यथा ऽसः शिव इत्यादौ प्राप्तेरेवाभावात् । अकोरित्यकच्सहितव्यावृत्त्या सर्वनाम्न एव प्राप्तेः । अविघ्नमित्यादावव्ययीभावस्तु तत्पुरुषाव्ययीभावयोर्वैकल्पिकत्वान्नानुपपन्नः । "रक्षोहागमलघ्वसन्देहाः प्रयोजनम्" "अद्रुतायामसंहित" मिति भाष्यवार्त्तिकाभ्यां विकल्पाभ्युपगमात् । तस्मादभाव एव नञर्थ इत्याशयवान्स्वमतमाह ॥

अभावो वा तदर्थोस्तु भाष्यस्य हि तदाशयात् ।
विशेषणं विशेष्यो वा न्यायतस्त्ववधार्यताम् ४१

भाष्यस्य हीति । तथा च नञ्सूत्रे भाष्यम् । निवृत्तपदार्थक इति । निवृत्तः पदार्थो मुख्यं ब्राह्मण्यं यस्मिन्स क्षत्रियादिरर्थः । सादृश्यादिनाध्यारोपितब्राह्मण्या नञ्द्योतिततदवस्थ-

इत्यर्थ इति कैयटो व्याचख्यौ । तन्न साधीयः । आरोपितब्राह्मण्यस्य क्षत्रियादेर्नञ्वाच्यत्वात् । अन्यथा सादृश्यादेरपि वाच्यतापत्तेः । तस्मान्निवृत्तं पदार्थो यस्य नपुंसकेभावेक्तइति भावे क्तः । अभावार्थक इत्यर्थः । विशेषणमिति । प्रतियोगिनीति शेषः । अन्यथा अत्वं भवसि अनहं भवामीत्यादौ पुरुषव्यवस्था न स्यात् । त्वदभावो मदभाव इतिवदभावांशे युष्मदस्मदोरन्वयेन तिङ्क्षु युष्मत्सामानाधिकरण्याभावात् । अस्मन्मते च भेदप्रतियोगित्वदभिन्नाश्रय इत्यर्थाद्युष्मत्सामानाधिकरण्यम् । अपि चैवं सेव्यतेनेकया सन्नतापाङ्गया अनेकमन्यपदार्थे इत्यादावेकवचननियमः । अब्राह्मण इत्यादावुत्तरपदार्थप्राधान्यात्तत्पुरुषत्वं चोपपद्यतइति भावः । विशेष्यो वेति । अयं भावः । घटो नास्तीत्यत्र घटाभिन्नाश्रयकास्तित्वाभाव इति बोधस्यानुभवसिद्धत्वात्तस्य विशेष्यतैव युक्ता । अत्वं भवसीत्यादौ च युष्मदस्तद्भिन्ने लक्षणा, नञ्द्योतकः । तथा च भिन्नेन युष्मदर्थेन तिङः सामानाधिकरण्यात्पुरुषव्यवस्था । त्वद्भिन्नाश्रयिका भवनाक्रियेति शाब्दबोधः । एवं न पचसीत्यत्र त्वद्भिन्नाश्रयकपाकानुकूलभावना भाव इति बोधः । असमस्तनञः क्रियान्वयात् । अनेकमन्यपदार्थे इत्यत्रैकवचनं विशेष्यानुरोधात् । सुबामन्त्रितइत्यतोनुवर्तमानं सुब्ग्रहणं विशेष्यमेकवचनान्तमेव । किं चानेकशब्दाद् द्विवचनोपादाने बहूनां बहुवचनोपादाने द्वयोर्बहुव्रीहिर्न सिद्ध्येदित्युभयसंग्रहायैकवचनं जात्यभिप्रायमौत्सर्गिकं वा । सेव्यते ऽनेकयेत्यत्रापि योषयेति विशेष्यानुरोधात्प्रत्येकं सेवनान्वयानुरोधाच्चैकवचनम् । अत एव पतन्त्यनेकेजलधेरिवोर्मय इत्यादि सूपपादमिति संक्षेपः ॥ ४१ ॥

इति वैयाकरणभूषणे नञर्थनिर्णयः ॥

प्रादयो द्योतकाश्चादयस्तु वाचका इति न्यायमते स्थितं वैषम्यमयुक्तं युक्तिसाम्यादिति ध्वनयन् निपातानां द्योतकत्वं समर्थयते ॥

द्योतकाः प्रादयो येन निपाताश्चादयस्तथा ।
उपास्येते हरिहरौ लकारो दृश्यते यथा ॥ ४२ ॥

परेण उपसर्गाणां द्योतकत्वस्वीकारात्तत्सम्मतं दृष्टान्तमाह। तथेति । अयं भावः। प्रजयतीत्यत्र प्रकृष्टो जयः प्रतीयते। स च नोपसर्गवाच्यः। एवं हि तस्याप्रकृत्यर्थत्वापत्तौ तत्राख्यातार्थकृत्यन्वयो न स्यात् । प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तेः। न च जयमात्रं धात्वर्थः प्रकर्षः प्रशब्दार्थ इति वाच्यम् । तथापि तस्य धात्वर्थेन्वयासम्भवात् । अभेदातिरिक्तसम्बन्धेन प्रकृत्यर्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुत्वात् । अन्यथौदनः पचतीत्यत्र कर्मतासम्बन्धेन पाके नामार्थान्वयापत्तेः । किं च प्रतिष्ठतइत्यत्र गमनत्वरूपेण बोधो न स्यात् । धातोर्गतिनिवृत्त्यर्थकत्वे ऽभावस्य प्रशब्दार्थत्वेपि गत्यभावो नास्तीत्येव प्रत्ययः स्यात् । न चात्र तथा बोधसम्भावनापि । गत्यभावसम्बन्धित्वेनानुपस्थितेः । अन्यथा घटः अभाव इत्यत्रापि तथा बोधापत्तेः । नञ्समभिव्याहारस्थले चानादिसिद्धतथाव्युत्पत्तिस्वीकारान्न दोषः । न वा विशिष्टो जयो धात्वर्थः । अर्थान्तरस्येवोपसर्गं विनाप्येतदर्थप्रत्ययापत्तेः । न वा विशिष्टार्थः । प्रत्येकातिरिक्तविशिष्टाभावात् । तथा चोभयोर्वाचकत्वं कल्प्यम् । तद्वरं धातोर्जये क्लृप्तशक्तेरुपसर्गस्य शक्त्यव-

च्छेदकत्वम् । शक्यन्तरकल्पनमपेक्ष्य कल्पशक्तोर्विशेषणविषयत्व-मात्रकल्पने लाघवात् । तथा च प्रोत्तराजित्वेनैव प्रकृष्टजये शक्तिः । न च जिपूर्वेमत्वेनैव शक्तिरस्त्विति वाच्यम् । शक्त्यन्त-रकल्पनापत्तेः । आख्यातार्थानन्वयप्रसङ्गाच्च । तस्मादुपसर्गाणां शक्तावच्छेदकत्वमेव । तदेव च द्योतकत्वमपीति । यद्वा । प्रति-ष्ठतइत्यादौ विरोधिलक्षणया धातोर्गमनार्थकता न शक्तिः । अ-नन्यलभ्यस्य शब्दार्थत्वात् । प्रशब्दस्तु तात्पर्यग्राहकः । एतदे-व च द्योतकत्वम् । कथं तर्हि व्यतिसइत्यादौ बोधः, लुप्तस्मर-णादित्येवेहि । दधि पश्येत्यादौ विभक्त्यर्थवत् । तमजानतस्तु बोधो ऽसिद्ध एवेति हि नैयायिकाः । तच्चादिष्वपि तुल्यम् । चैत्रमिव पश्यतीत्यादौ चैत्रसादृश्यविशिष्टं चैत्रपदलक्ष्यमिवश-ब्दस्तात्पर्यग्राहक इत्यस्य सुवचत्वादिति द्रष्टव्यम् । स्वयं यु-क्त्यन्तरमाह । उपास्येते इति । दृश्यतइत्यत्र कर्मणीति शेषः । अयं भावः । उपास्येते इत्यादावुपासना किमुपसर्गार्थो विशि-ष्टस्य धातुमात्रस्य वा । नाद्यः । उपसर्गस्यैव सकर्मकत्वादास-धातोरकर्मकत्वात्ततः कर्मणि लकारो न स्यात् । फलावच्छि-न्नव्यापारवाचित्वं सकर्मकत्वमत्र सिद्धमिति चेन्न । फलावच्छि-न्नत्वं यदि फलविशिष्टत्वं तर्ह्युपासनादिफलस्य धातुवाच्यत्वमा-यातम् । यदि च फलवैयधिकरण्यं, तदपि सर्वेषां व्यापाराणां यत्किञ्चित्फलवैयधिकरण्यात्स्वार्थफलवैयधि[illegible]ण्यपर्यन्तं वा-च्यम् । तथा च स्वार्थफलव्यधिकरणव्यापारवाचित्वं पर्यवसि-तं भवति फलस्य धात्वर्थत्वसाधकम् । न द्वितीयः । विशिष्टस्य गणपाठाभावेन धातुत्वालाभेन लकारानुपपत्तेः । गणपा-ठो दिङ्मात्रमिति चे, तथापि विशिष्टस्य धातुत्वे लिडादौ सति तन्निमित्तकं द्वित्वमजादेर्द्वितीयस्येति नियामकादुप-

सर्गनिपातावयवस्य स्यात् । अडादिकमुपसर्गात्प्राक् च स्यात् । उक्तं च वाक्यपदीये 'अडादीनां व्यवस्थार्थं पृथक्त्वेन प्रकल्पनम् । धातूपसर्गयोः शास्त्रे धातुरेव तु तादृशः ॥ तथा हि संग्रामयतेः सोपसर्गाद्विधिः स्मृत' इति ॥ अथ क्रियावाचकत्वं शुद्धधातोः फलवाचकत्वं तु विशिष्टस्य तथा च शुद्धस्य धातुत्वात्ततः प्रागेवाडादिकं भविष्यतीतिचे,त्तथापि निपातानां शक्तावच्छेदकत्वपर्यवसानादिष्टसिद्धिरेव । तृतीये त्वागतमेवोपसर्गस्य तत्त्वम् । धातोस्तदर्थकत्वात् । तस्मादुपसर्गाणां द्योतकत्वमेवेति ॥ ४२ ॥

एतच्च निपातेपि समभित्याह ॥

तथान्यत्र निपातेपि लकारः कर्मवाचकः ।
विशेषणाद्ययोगोपि प्रादिवच्चादिके समः ॥४३॥

अन्यत्र । साक्षात्क्रियते अलंक्रियते नमस्क्रियते ऊरीक्रियते, गुरुरित्यादौ । अत्रापि तत्तदर्थे धातोः कर्माणि लकारसिद्ध्यर्थं तत्तदर्थवाचकत्वं वाच्यमेवेत्युपसर्गवदेव द्योतकत्वममीषामपीति भावः । यद्यपि डुकृञ् करणे इत्यस्य सकर्मकत्वात्कर्मणि लकारो नानुपपन्नस्तथापि साक्षात्काराद्यर्थे स न स्यात् । अन्यथा वायुर्विकुरुतइत्यादावपि स्यादिति ध्येयम् । इदमुपलक्षणम् । साक्षात्कारादेरधात्वर्थत्वे तत्कर्मत्वेन गुर्वादेराभिधानं न स्यात् । धात्वर्थाश्रयरूपकर्मण एव तदुत्तराख्यातेनाभिधानात् । न वा तस्य कर्मत्वमपि, धात्वर्थफलाश्रयत्वस्य तत्त्वादिति । अथ साक्षात्क्रियते इत्यादौ तत्तत्फलवाचकमेव साक्षात्पदादिकमस्तु तदुत्पत्त्यनुकूलस्तु व्यापारो धात्वर्थः । तथा च साक्षात्क्रियते गुरुरित्यादौ गुर्वभिन्नाश्रयनिष्ठो यो विषयतासम्ब-

न्धेन साक्षात्कारस्तदुत्पत्त्यनुकूलो व्यापार इत्यादिर्बोधः। न च साक्षात्पदस्य साक्षात्काराद्यर्थवत्त्वे न मानमिति शङ्क्यम्। 'साक्षात्प्रत्यक्षतुल्ययोरिति' 'अलं भूषणपर्याप्तिशक्तिवारणवाचक' मिति, 'उर्य्यूरी चोररी च विस्तारेङ्गीकृतौ त्रय' मिति चामरात्। नमःपदस्य नमस्काराद्यर्थकत्वस्य लोके च प्रसिद्धत्वात्। नन्वर्थविशेषान्तर्भावेणाकर्मकत्वादिविभजनादत्रालङ्काराद्यर्थे कथं कर्मणि लकार इति चेन्न। फलव्यधिकरणव्यापारवाचकत्वस्यैव सकर्मकत्वात्। सर्वस्य व्यापारस्य यत्किञ्चित्फलसमानाधिकरणत्वात्स्वार्थफलव्यधिकरणव्यापारवाचित्वं तत्त्वम्। तथा चोपासनादेर्धात्वर्थत्वे ऽर्थादेषां द्योतकत्वमिति चेन्न। स्वस्वयुक्तनिपातान्यतरार्थफलव्यधिकरणव्यापारवाचित्वस्य सकर्मकत्वात्। कर्मत्वमप्येतादृशफलाश्रयत्वमेव। इत्थं च कर्मणि लकारसम्भवान्नानयोपपत्त्या द्योतकत्वसिद्धिः। एवं दृष्टान्तेप्युपपदस्योपासनार्थकत्वान्नानुपपत्तिरिति चे, न्मैवम्। साक्षात्पदाद्यर्थसाक्षात्कारस्य धात्वर्थे साक्षादन्वयायोगात्। अभेदातिरिक्तसम्बन्धेन नामार्थप्रकारकशाब्दबोधं प्रति प्रत्ययजन्योपस्थितेर्हेतुताया ओदनः पचतीत्यत्र कर्मत्वसंसर्गेणान्वयवारणाय वाच्यत्वात्। स्तोकं पचतीत्यत्रेवाभेदान्वयस्तु यदि साक्षात्कारादेर्धात्वर्थत्वं तदा स्यात्। तथा सति च साक्षात्पदस्यापि तद्वाचकत्वे मानाभावाद् द्योतकत्वमेव वाच्यम्। अनुशासनं च द्योत्यार्थवत्त्वमादाय नानुपपन्नमिति ध्येयम्। अपि च। प्रादीनां वाचकत्वे भूयान्प्रकर्षः कीदृशो निश्चय इतिवद्भूयान्प्र कीदृशो निरित्यपि स्यात्। अस्मन्मते च प्रादेरनर्थकत्वान्न तदन्वय इत्यत एव प्रादयो द्योतका भविष्यन्तीत्यपि चादिषु समामित्याह। विशेषणेत्यादि। शोभनः समुच्चयो द्रष्ट-

व्य इतिवच्छोभनश्च द्रष्टव्य इत्यस्याप्यापत्तेरिति भावः । अथ वृक्षावित्यत्र द्वित्वं ब्रुवन् प्रत्ययो यथा परविशेषणत्वेनैव ब्रूते तद्वच्चकारादिः समुच्चयं वदन्परविशेषणत्वेनैव ब्रूते इति न विशेषणान्वय इति चेन्न । प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकव्युत्पत्तेस्तत्र तथास्तु अत्र च स्वातन्त्र्येण पदादुपस्थितिसत्त्वाद्विशेषणान्वयो दुर्वार एवेति भावादिति । किं च । निपातानां वाचकत्वे विना षष्ठीमनन्वयप्रसङ्गः प्रातिपदिकार्थयोर्विना विभक्त्यर्थं भेदेनान्वयायोगात् । अन्यथा राजा पुरुष इत्यत्रापि राज्ञः पुरुष इतिवदन्वयापत्तेरित्याशेत्य तदेवाह । आदीति । धवखदिरयोः समुच्चय इतिवद्धवस्य च खदिरस्य चेत्येव स्यादन्यथान्वयायोगादिति भावः । यत्तु चादीनां समुच्चिताभिधायकत्वमेव नातो भेदानिबन्धना षष्ठी । तथा च यः समुचितः स घट इति अभेदेनैवान्वयः । न चैवं सत्त्वार्थत्वाद्विभक्तिश्रवणापत्तिः । स्वभावात्समुच्चितपदाभिधेयस्य सत्त्वरूपत्वं न चाद्युपस्थाप्यस्येति सम्भवात् । यथा धातूपस्थाप्याया असत्त्वार्थत्वं घञाद्युपस्थाप्यायाश्च सत्त्वार्थत्वमिति समाधिमाहुः । तन्न । समुच्चिते धर्म्यंशेन्यलभ्यत्वाच्चकारशक्तिकल्पनायोगात् । षष्ठीवारणाय तथा कल्प्यतइति चेन्न । द्योतकत्वेनापि तदुपपत्तेः । एतेन समुच्चयस्यैकदेशत्वात्पदार्थः पदार्थेन सम्बध्यते इति न्यायान्न भूयानित्यादिविशेषणान्वयापत्तिरिति पूर्वोक्तं दूषणमलग्नकमिति निरस्तम् ॥ ४१ ॥

ननु प्रातिपदिकार्थयोर्भेदेनान्वयबोधे विभक्तिजन्योपस्थितिर्हेतुरिति व्युत्पत्तिर्निपातातिरिक्तविषयैवेति नोक्तदोष इत्याशङ्क्याह ॥

पदार्थः सदृशान्वेति विभागेन कदापि न ।

निपातेतरसङ्कोचे प्रमाणं किं विभावय ॥ ४४॥

सदृशा सदृशेन समानाधिकरणेनेति यावत् । अन्वेति । अभेदेनेति शेषः । विभागेन, असदृशेन । असमानाधिकरणेनेति यावत् । अयमभिप्रायः । अभेदसम्बन्धेन प्रातिपदिकार्थप्रकारकशाब्दबोधं प्रति विरुद्धविभक्त्यनवरुद्धप्रातिपदिकधात्वन्यतरजन्योपस्थितिर्हेतुरिति कार्यकारणभावस्य राज्ञः पुरुष इत्यत्राभेदबोधापत्त्या ऽवश्यं वाच्यत्वादत्रापि चार्थसमुच्चयेन सह घटादीनामभेदान्वयः स्यात् । अत्र च निपातातिरिक्तेति विशेषणे गौरवापत्तिर्मानाभावश्च । अत एव घटो नास्तीत्यादौ घटपदं घटप्रतियोगिके लाक्षणिकमिति परे प्राहुः । नन्वत एवाभेदान्वये इष्टापत्तिरिति नायं दोष इति चेन्न । तथा सत्यभावत्वरूपेणापि लक्षणयोपपत्तौ नञः शक्तिकल्पनागौरवात् तात्पर्यग्राहकत्वेनैवैषामुपयोगात् । एवमन्यत्राप्यूह्यम् । अथाभावो घट ओदनः पचतीत्यत्राभावघटयोरोदनपाकयोरभेदान्वयः किं न स्यात् सामग्रीसत्त्वादिति चेन्न । योग्यताज्ञानरूपकारणविरहात् । न चात्राप्ययमेव निस्तारः । एवमपि भेदेनान्वयासिद्धये षष्ठ्यापत्तेर्दुष्परिहारात् । अन्यथा घट अभाव इतिवदनन्वयापत्तिः । तथा च घटश्चेति वाक्यं मूकमेव स्यात् । किं च निपातानां वाचकत्वासिद्धौ हि तथा कल्पना, न च तद्युक्तं, गौरवात् । प्रकर्षादिप्रतीतौ तदन्वयाद्यनुविधानं च द्योतकत्वेनान्यथासिद्धमेवेति द्योतकत्वमेवैषामिति दिक् ॥ ४४ ॥

अपि च काव्यादावन्वयानुपपत्तिमपि मानमाह ॥

शरैरुस्रैरिवादीच्यानुद्धरिष्यन् रसानिव ।
इत्यादावन्वयो न स्यात्सुपां च श्रवणं ततः॥४५॥

अत्रोस्रसदृशैः शरैरससदृशानुदीच्यानुद्धरिष्यन्नित्यर्थः । अयं चोस्रादिशब्दानां तत्सदृशपरत्वे इवशब्दस्य च द्योतकत्वे सङ्गच्छते । तथाहि । उस्रैरिति तृतीयया प्रकृत्यर्थगतं करणत्व मुच्यते, न चोस्रोत्र करणं तथा चेवशब्दस्य सदृशार्थकत्वेपि सदृशगतमेव करणत्वं तया तृतीयया प्रतिपादनीयम् । तथा च प्रत्ययानां प्रकृत्यर्थगतस्वार्थबोधकत्वव्युत्पत्तिभङ्गप्रसङ्गः इवस्य तदप्रकृतित्वात् । न चेवोत्तरतृतीययैव तद्बोधनम् । असत्त्वार्थकतया कारकविभक्त्ययोगात् तथात्वे वा श्रूयेतेत्याह । सुपां चेति । सुपां श्रवणं चेत्यर्थः । चकारेणेवशब्दात् तृतीयास्वीकारेपि उस्रपदोत्तरायास्तस्या अनन्वय एव बोध्यते । इत्यादाविन्यादिपदाद्वागर्थाविव पार्वतीपरमेश्वरौ वन्दे इत्यादौ वागर्थयोर्वन्दिकर्मलाभावात् द्वितीयानन्वयापत्तिः सदृशार्थत्वे च वागर्थपदयोस्तदर्थपार्वतीपरमेश्वररूपे कर्मत्वं सुसङ्गतमिति भावः । यदि च विशेषणविभक्तिर्न कर्मत्वाद्यर्थेत्युच्यते तदापीत्थं योजनीयम् । तथाहि । उस्रशब्दस्योस्रोर्थस्तृतीया विशेषणविभक्तिः साधुत्वार्था ऽभेदार्था वा, इवशब्दार्थः सादृश्यं शरशब्दार्थः शरः तृतीयार्थः करणमिति हि पदार्थाः । तत्रोस्रशरयोरयोग्यत्वादभेदेन निराकांक्षत्वाच्च भेदेनान्वयायोगादनन्वय एव स्यात् । न चोस्रानिष्ठं यत् सादृश्यं निरूपकतया तद्वान्यः शर इति इवार्थे एवोस्रान्वयो न तयोरपि परस्परमन्वय इति वाच्यम् । तत्राप्युक्तरीत्यैवान्वयायोगात् । एवं शरेणापि समं नेवार्थान्वयसम्भवः । द्योतकत्वपक्षे चोस्रसदृशार्थकमुस्रपदं तथा च तदभिन्नो यः शर इति युक्तो ऽन्वय इति न दोष इति भावः । इत्थमुत्तरदलेप्यवधेयम् । ननु इवार्थः सदृशमस्तु तस्य चाभेदेनान्वयो नानुपपन्न इत्याह । सुपां चेति । चकारो भिन्नक्रमः । सुपां श्रवणं चेत्यर्थः । अयमाश-

यः । सदृशधर्म्यर्थकत्वे सत्वार्थत्वं स्यात् तथा चानिपातत्वाद्विभक्तिलोपाप्रसक्तेः श्रवणं तस्या भवेदिति । अथ धर्म्यर्थकत्वेपि लिङ्गाद्यनन्वयाद्यसत्त्वरूपत्वं नानुपपन्नम् । किं च इवशब्दस्य स्वरादौ पाठात्सत्त्वार्थत्वेपि नानुपपत्तिः । अत एव पृथिव्यामेव गन्ध इत्यत्र पृथिव्यां गन्धस्तदन्यत्र नेति बोधार्थमेवकारस्य समभिव्याहृतप्रातिपदिकसमानविभक्तिकत्वं, तच्छ्रवणमपि लुका लुप्तत्वान्नेत्यपरे वदन्ति, इत्यत आह । चेति । तथा चोस्राभिन्नं यत् सदृशं तदभिन्ना ये शरा इत्यादिरन्वयो वाच्यः विरुद्धविभक्त्यनवरुद्धार्थयोरुस्रसदृशयोरिवसदृशयोरपि भेदेनान्वयायोगात् । तथा चानन्वय एव नहि शराभिन्नाभिन्न उस्र इति भावः ॥ ४० ॥

ननु त्वन्मते तावदुपसर्गादिभ्यो विभक्तिरेव न स्यात्, तेषामर्थवत्त्वाभावेन प्रातिपदिकसंज्ञाया एवाभावात् । किं च नञ्समासादावुत्तरपदार्थः प्रधानमिति व्यवस्था न स्यात् पूर्वपदस्य नञादेरनर्थकत्वादित्यत आह ॥

नञ्समासे चापरस्य द्योत्यं प्रत्येव मुख्यता ।
द्योत्यमेवार्थमादाय जायन्ते नामतः सुपः ४६

नञ्समासादौ योत्तरपदार्थप्रधानता सा द्योत्यमर्थमादायैव तमेवार्थमादायार्थवत्त्वात्प्रातिपदिकत्वं ततः सुबुत्पत्तिरित्यर्थः । अयं भावः । अर्थवत्त्वमर्थप्रतीतिजनकज्ञानविषयशब्दत्वं न तु शक्तिलक्षणान्यतरसम्बन्धेनार्थवत्त्वं तत्र विवक्षितं येनोक्तस्थले ऽनुपपत्तिः सम्भाव्येत । तथा च प्रतिष्ठते विजयते घटश्चेत्यादौ निपातानां तादृशार्थवत्त्वस्याभावाद्भवति नामत्वम् । न चैवं राम इत्यत्र राम इत्यतोपि विभक्त्यापत्तिः ।

स्वौजसमौट् द्व्येकयोरित्येतेषामेकवाक्यतया विधानस्य तत्रतत्रोपपादितत्वाद्धाइत्यादेश्च सङ्ख्यावाचकत्वाभावेन विभक्त्यनुत्पत्तेः। उक्तं हि हयवरट् सूत्रे भाष्यकारेण, "सङ्ख्यातस्यैकत्वमर्थस्तेन वर्णात् सुबुत्पत्तिर्न भविष्यती"ति। अथ वा प्रत्येकं वर्णेषु विभक्त्यनुत्पत्तिरेकाज्द्विर्वचनन्यायात्। तथाहि। एकाच्चोद्वे प्रथमस्येत्यत एकाच्समुदायस्यैव द्वित्वं न प्रत्येकमिति यथा तद्वत्समुदायादेव विभक्तिरिति कैयटादयः। यद्वा प्रत्येकं वर्णेषु विभक्त्युत्पत्तावपि न श्रवणं लुका लुप्तत्वात् अस्तु वा समस्तमेकं रामपदम्। तत्र च राजपुरुष इत्यत्र राजपदादिव विभक्त्यश्रवणं भविष्यतीति। अत्रेदं चिन्त्यम्। प्रथमपक्षे च निपातानामपि संख्यानभिधायकत्वाद्विभक्तिर्न स्यात्। एकवचनमुत्सर्गतः करिष्यतइति भाष्यसिद्धमेकवचनं भविष्यतीति चेत्। राम इत्यादौ प्रत्येकं वर्णेष्वप्येकवचनापत्तिरिति। एकाज्द्विर्वचनन्यायस्य च नात्रावकाश इति समासशक्तावुक्तम्। तृतीयपक्षे च प्रातिपदिकानवयवत्वात् सुपो लोपाप्रसक्तेर्विभक्तिश्रवणं स्यात्। धनं वनमित्यादौ नलोपः प्रातिपदिकान्तस्येत्यनेन नलोपापत्तिश्च झलाञ्जशोन्तइति जश्त्वापत्तिश्च। इतोपि न चतुर्थः। किं च। पन्थानौ इत्यत्रापि ऋक्पूरब्धूःपथामानक्षे इति समासान्तविधानात्पन्थाविति आपत्तिः पुराविति पुरे इत्याद्यापत्तिश्चेति दिक्। तस्मादव्ययादाप्सुप इति ज्ञापकादेव निपातेभ्यो विभक्तिरिति केचित्। निपातस्यानर्थकस्येत्येतस्मादेव सेत्यन्ये। अस्याधिपरीत्येतज्ज्ञापकमादाय प्रत्याख्यानपक्षे तस्यैव सामान्यापेक्षं ज्ञापकत्वमभ्युपेत्य चादीनामपि ज्ञापकादेव नामत्वसिद्धिरिति सिद्धे तस्मिन् सुबन्तत्वमपीत्यपरे। कृत्तद्धितसमासाश्चेत्यनुक्तसमुच्चयार्थकचकारेणैषां संग्रह इति मूलग्रन्थकृतः। अथानन्तषा-

तूनां नानार्थकत्वमपेक्ष्य निपातानामेव वाचकत्वं युक्तमिति चेन्न । धातोः प्रकर्षादौ लक्षणा तात्पर्यग्राहकः प्रादिः । अत एव नोपसर्गादिकं विना प्रकर्षादिप्रतीतिरिति स्वीकारात् । अनेकशक्तिकल्पना हि नानार्थे दूषकताबीजम् । न चात्र तदिति ध्येयम् । अत एव न केवलानां तेषां प्रयोगः । वाचकत्वे चातिरिक्तशक्तिकल्पनापत्तिरिति युक्तो निपातानां द्योतकत्वपक्षः । उक्तं चाकृत्याधिकरणे भट्टैः । 'चतुर्विधे पदे चात्र द्विविधस्यार्थनिर्णयः । क्रियते संशयोत्पत्तेर्नोपसर्गनिपातयोः ॥ तयोरर्थाभिधाने हि व्यापारो नैव विद्यते । यदर्थद्योतकौ तौ तु वाचकः स विचार्यते' इति 'उपसर्गेण धात्वर्थो बलादन्यत्र नीयते । प्रहाराहारसंहारविहारपरिहारवदिति' चान्यैः । तस्मान्नैयायिककल्पितप्रादिद्योतकत्वं वैषम्यमयुक्तम् । यत्तु निपातानां सर्वेषां वाचकत्वे निपातस्यानर्थकस्येति विधिवैयर्थ्यम् । अर्थवत्सूत्रेणैव प्रातिपदिकत्वलाभात् । सर्वेषां द्योतकत्वेपि निपातस्येत्यनेनैवोपपत्तेरनर्थकस्येति व्यर्थत्वमापद्यते । तस्मात्के चिदेवार्थवन्त इति वाच्यम् । तथा चोपसर्गा एव द्योतकाश्चादयस्तु वाचका इति । तत्तुच्छम् । सर्वथा ऽनर्थकानां 'तु हि च स्म ह वै पादपूरणे' इत्यमरात् । कर्मणीद्वितीति पादपूरणे इति निरुक्तात् अधिपरी अनर्थकाविति सूत्राच्चावगतानां संग्रहार्थत्वस्य कैयटादौ स्पष्टत्वात् । के वाचका इत्यत्र विनिगमकाभावाच्चादीनामेव द्योतकत्वं प्रादयो वाचका इत्यस्याप्यापत्तेश्च । वस्तुतो वार्त्तिकमेतत् प्रत्याख्यातमेव भाष्यकारैरिति तन्मूलमेतदश्रद्धेयमेवेति सर्वं चतुरत्वम् ॥ ४६ ॥

अथ सिद्धान्ते किमत्र द्योतकत्वम् । नैयायिकमतोक्तरीत्या शक्तावच्छेदकत्वं तत्त्वम् । उक्तं हि वाक्यपदीये । 'शक्त्याधा-

नाय धातोर्वा सहकारी प्रयुज्यते' इतीति चेन्न । निपातधात्वादीनामानुपूर्व्याः शक्तावच्छेदकत्वे गौरवात् । विशिष्टस्य शक्त्यन्तरकल्पनावश्यकत्वे विशिष्टस्य तत्स्वीकारमपेक्ष्य शुद्धनिपाते एव तत्स्वीकारौचित्याच्च । जयादिमात्रवाचकस्य प्रकर्षादिविशिष्टे लक्षणयोपपत्तौ गौरवग्रस्तोक्तकल्पनायोगाच्च । अस्तु तर्हि लक्षणायां तात्पर्यग्राहकत्वमेव द्योतकत्वमिति द्वितीयः पक्ष इति चेन्न । तथा सति सुप्तिङामपि द्योतकतापत्तेः । धात्वादेः कर्तृकर्मादिविशिष्टे लक्षणायां तिङ्द्वितीयादेस्तात्पर्यग्राहकत्वसम्भवात् । न चैवं घटादिपदानामेव कर्मत्वादिविशिष्टार्थकत्वे नामार्थधात्वर्थयोः साक्षादन्वयापत्तौ अभेदातिरिक्तसम्बन्धेन नामार्थप्रकारकशाब्दबोधे विभक्तिजन्योपस्थितेः कारणत्वविलोपापत्तौ घटः पश्यतीत्यत्र कर्मत्वसम्बन्धेनान्वयाच्छाब्दबोधापत्तिः । घटादिपदानां घटकर्मके लक्षणया स्तोकं पचतीत्यत्रेवाभेदबोधस्यैव सम्भवात् । भेदसम्बन्धेन बोधो ऽनुभूयतइति चेन्न । राजपुरुष इत्यत्रापि तथानुभवाच्छक्त्यापत्तेः । नामार्थनिर्णयकथितरीत्याप्युपपत्तेश्च । न चैवं गङ्गायां द्विरेफ इत्यत्र तीरगतभ्रमराननुभवापत्तिः । विभक्तेरनर्थकत्वात् प्रकृतेश्च लाक्षणिकत्वेनाननुभावकत्वादिति वाच्यम् । वृत्तिमत्त्वेनैवानुभावकत्वात् । यत्तु लाघवाच्छक्तत्वेनैवानुभावकत्वमिति । तन्न । लाक्षणिकस्यापि शक्तत्वात् । तत्र शक्तं तमनुभावयतीति नियम इति चे, तर्हि गङ्गायां घोष इत्यत्र तीरानुभवो न स्यादेव । स्वशक्त्यान्वयबोधकमेवानुभावकं गङ्गायां घोष इत्यत्र गङ्गापदस्य तथात्वेपि सप्तम्यादेस्तथात्वात्तदेव तीरानुभावकं भविष्यतीति चेन्न । अपभ्रंशादननुभवापत्तेः । गौरवाच्च । बोधकत्वेनैवानुभावकतायामतिलाघवाच्चेति । अपि च यत्र पदद्वयमपि लाक्ष-

णिकं रूपे इत्यादौ तत्राननुभवापत्तिः । किं चानुमितिशाब्दयोरनुभवामीति प्रतीत्यभावादनुभवत्वं प्रत्यक्षत्वमेव । तथा च शाब्दबोधाजनकत्वं पर्यवसितम् । तदपि साक्षात्पदानां तज्ज्ञानस्य वा शाब्दबोधाजनकत्वात्पदार्थस्मरणद्वारकमपि तथास्तीति वाच्यम् । तच्चायुक्तम् । लक्षणाज्ञानजन्यपदार्थोपस्थितेः शाब्दबोधजनकत्वेन तद्वारकस्य तस्य दुष्परिहारात् । अन्यथा लक्षणाकल्पनमेवोच्छिद्येतेति दिक् । अपि च धातोर्लक्षणयाप्युपपत्तोर्निपातानामवाचकत्वे घटादिपदस्थचरमवर्णस्यैकाक्षरानेकधात्वशात्तत्तदर्थकस्य घटत्वादिविशिष्टे लक्षणया बोधोपपत्तौ घटादिपदानामप्यवाचकत्वप्रसङ्गः । न चावयवशक्तिमविदुषोपि समुदायशक्तिज्ञानात्तथा बोधात्तेषां शक्तिकल्पनम् । धातोः शक्तिमविदुषोपि उपसर्गस्य तद्ग्रहवतो बोधात्तथात्वस्य तुल्यत्वात् । न च प्रकारतासम्बन्धेनाख्यातार्थविशेष्यकबोधं प्रति धातुजन्योपस्थितिर्हेतुरित्यादिकार्यकरणभावरूपाकांक्षाविरहादुपसर्गस्य शक्तिग्रहेपि न बोध इति वाच्यम् । तादृशकार्यकारणभावग्रहशालिपुरुषीयशाब्दे एव तस्य हेतुत्वादिह चान्यस्य तत्सम्भवात् । किं चाख्यातार्थविशेष्यकतादृशबोधं प्रति निपातजन्याप्युपस्थितिः कारणं कल्प्यतां व्यतिसे इत्यनुरोधात् । अन्वयव्यतिरेकाभ्यां तेषां घटादिपदवच्छक्तिसिद्धौ तथाकल्पनस्य युक्तत्वाच्च । एतेन प्रतिष्ठते इत्यत्र गमनत्वरूपेण प्रतीतेर्धातोरेव लक्षणा प्रशब्दस्य तदर्थत्वे च तत्राख्यातार्थान्वयो न स्यादित्यपास्तम् । तस्मादन्वयव्यतिरेकाभ्यां प्रकर्षादिस्तेषां वाच्य एव । एवं च प्रकारतासम्बन्धेन धात्वर्थविशेष्यकबोधं प्रति कारकविभक्तिवन्निपातजन्याप्युपस्थितिर्हेतुर्वाच्या तथा च न प्रथमः पूर्वोक्तोत्र दोषः। एवं नामार्थयोर्भेदेनान्वयबोधे षष्ठ्यादिजन्योपस्थि-

तिर्हेतुरित्यपि निपातातिरिक्तविषयं वाच्यमतो नाम्येपि दोषाः। वस्तुतो नेत्येवोक्ते अभावशाब्दस्य सर्वसिद्धत्वान्न तत्र पदान्तरसमभिव्याहाराभावात् द्योतकत्वसम्भवः। अत एव नञ्सूत्रे महाभाष्येपि ननेत्यत्र अभावो नास्तीत्यर्थदर्शनं कृतं सङ्गच्छते। न च क्रियायोगं विना ऽसमस्तनञो ऽसाधुत्वादिदमनुपपन्नमिति वाच्यम्। गम्यमानाया अपि क्रियायाः कस्मात्त्वं नद्या इत्यत्रेव निमित्तत्वमालम्ब्य नञ्सम्भवात्। अस्तु वा प्रकृष्टो धर्मो प्राद्यर्थः तथा च स्तोकं पचतीति वदभेदेनैवान्वयान्न व्युत्पत्तिविरोधः। ननु निपातानां वाचकत्वे केवलानामपि प्रयोगः स्यादिति चेन्न। केषां चित्तेप्राग्धातोरिति नियमितत्वात्। केषां चिन्नञ्प्रभृतीनां तथात्वस्येष्टत्वात्। अन्येषां वाचकत्वेपि केवलं प्रत्ययप्रकृत्योरप्रयोगवदुपपत्तेः। उक्तं हि वाक्यपदीये। 'प्रत्ययो वाचकत्वेपि केवलो न प्रयुज्यते। समुच्चयाभिधानेपि व्यतिरको न विद्यत, इति॥ यद्यपि प्रत्ययवदेषां परत्वं न स्मर्यते तथापि तैर्बोध्यप्रकर्षादेर्विना सम्बन्धिनमनन्वयात्केवलप्रयोगासम्भवः। समुच्चिताभिधायकत्वेपि विशेषतस्तयोरुपस्थितिं विना प्रतीतेरपर्यवसानान्नित्यपरतन्त्रतैवेति न प्रयोगः। उक्तं हि वाक्यपदीये। "समुच्चिताभिधानेपि विशिष्टार्थाभिधायिनाम्। गुणैः पदानां सम्बन्धः परतन्त्रास्तु चादय" इति॥ तस्मान्निपातानां वाचकत्वे न दोषः। अत एव समुच्चयाधिकरणे मीमांसकैरुक्तम्। केवलतृक्षशब्दात् समुच्चयाबोधाच्चकार एव तद्वाचको न द्योतकः। किं च द्योतकत्वे पदान्तराणां तत्र शक्तिः कल्प्या चकारस्य च द्योतकत्वशक्तिः कल्पनीयेति गौरवं स्यादिति। अत एव मीमांसाद्वयेपि नञः पर्युदासे लक्षणेत्यादयो व्यवहाराः सङ्गच्छन्ते, सङ्गच्छन्ते च तत्रतत्र प्राचीन-

व्यवहाराः । तस्मान्निपाता वाचका एवेत्यभिप्रेत्य पक्षान्तरमाह ॥

निपातानां वाचकत्वमन्वयव्यतिरेकयोः ।
युक्तं वा न तु तद्युक्तं परेषां मतमेव नः ॥ ४७ ॥

अस्मन्मते निपातानां शक्तिग्रहाद्धात्वादेर्लक्षणाग्रहादेव च बोधात्तच्छक्तिज्ञानकार्यकारणभाव आवश्यकः । बोधकत्वरूपा शक्तिश्च निर्बाधा । लक्षणापक्षेपि तत्कार्यकारणभाव आवश्यक एवेति किं गौरवम् । तस्माच्छक्तिज्ञानलक्षणाज्ञानयोः कार्यकारणभावद्वयस्यापि वाच्यतया शक्यत्वं द्योतकता वेत्युभयमप्युपपन्नम् । अत एव विभक्तेरपि समानन्यायतां मनसि निधाय 'वाचिका द्योतिका वा स्युर्द्वित्वादीनां विभक्तय' इत्युक्तं वाक्यपदीये । अत एव क्व चित्सम्भविनो भेदाः केवलैरनिदर्शिताः ॥ उपसर्गेण सम्बन्धे व्यज्यन्ते प्रपरादिना । सञ्चाचको विशेषाणां सम्भवद्द्योतकोपि वेति वाक्यपदीयेपि पक्षद्वयमुक्तमिति भावः । मीमांसकास्तु वाचका एवैते न द्योतका इत्याहुः । तदयुक्तम् । अन्यलभ्ये शक्तिकल्पनायोगात् । अस्मदुक्तरीत्या तथाकल्पने च गङ्गादिपदानामपि तीरादौ शक्तिकल्पनापत्तेः, न वा तेषामुपपत्तिर्युक्ता । अन्वयव्यतिरेकयोस्तात्पर्यग्राहकत्वेनान्यथासिद्धेः । न च शक्तिद्वयकल्पने द्वितीयपदस्य लक्षणाङ्गीकारान्निपातानां तात्पर्यग्राहकत्वादित्याभिप्रेत्याह । न त्वित्यादि । तत् समुच्चयाधिकरणे स्थितं, परेषां मीमांसकानां, मतं, वाचकत्वरूपं, तदेव नः । किं तु द्योतकत्वमपीति भावः ॥ ४७ ॥

उपसर्गा द्योतकाः निपाता वाचका इति नैयायिकमतं न युक्तं वैषम्ये बीजाभावादिति पर्यवसितमुपसंहरन्नाह ॥

निपातत्वं परेषां यत्तदस्माकमिति स्थितिः ।
व्यापकत्वाच्छक्तितायास्त्ववच्छेदकमिष्यते ॥४८॥

परेषां मते यदेव निपातत्वम् । असत्त्वार्थत्वे सति चादिगणपठितत्वं, शक्तिसम्बन्धेन निपातपदवत्त्वमित्याद्युपाधिरूपं वा जातिर्वास्तु उभयथापि सामान्ये प्रमाणानां पक्षपातात्तदेव द्योतकतायाःशक्तताया वावच्छेदकं युक्तमित्यर्थः । व्यापकत्वात् । सामान्यत्वात् । शक्तताया इत्युपलक्षणं द्योतकताया इत्यपि द्रष्टव्यम् । एतेन चादयः सन्तु द्योतकाः उक्तयुक्तेः । अथशब्दस्तु वाचक एव । अन्यथा प्रकरणतुल्यतया मङ्गलानन्तरारम्भप्रश्नकार्येष्वथो ऽथेति कोशासङ्गतिः स्यात् । अथशब्दानुशासनमित्यत्र वाचकपदासमभिव्याहाराच्च । द्योतकानां वाचकपदसमभिव्याहारनियमात् । तस्मादथशब्दः प्रस्तावद्योतक इति चिन्त्यमित्यपास्तम् । चकारादावपि समुच्चयादेः कोशाद्युक्तस्य चार्थद्वन्द्व इति सूत्राच्च वाच्यत्वापत्तेरर्द्धजरतीयतादवस्थ्यात् । अथशब्दानुशासनमित्यत्राप्यनुशासनशब्द एव तद्वाचकः । न च श्रवणादेरपि द्योतनापत्तिः । घटश्चेत्यत्राप्यापत्तेरित्यास्तामतिक्षुद्रधन्धनयेति दिक् ॥ ४८ ॥

इति वैयाकरणभूषणे निपातानां द्योतकत्ववाचकत्वनिर्णयः समाप्तः ॥

भावप्रत्ययार्थं निरूपयति ॥

कृत्तद्धितसमासेभ्यो मतभेदनिबन्धनम् ।
त्वतलोरर्थकथनं टीकायां हरिणा कृतम् ॥ ४९ ॥

कृत्तद्धितसमासेभ्यः सम्बन्धाभिधानं भावप्रत्ययेनान्यत्र रूढ्यभिन्नरूपान्यभिचरितसम्बन्धेभ्य इति वचनं वार्त्तिककारीयमिति भ्रमं मीमांसकानां निराकुर्वन्नाह । टीकायामित्यादि । त्वतलोरिति भावप्रत्ययमात्रोपलक्षणम्,मुक्तवचनानुरोधात् । अयमर्थः । राजपुरुष औपगवः पाचक इत्यादौ यद्यपि केवलः सम्बन्धो नाभिधेयः । तथापि समासादौ शक्तिः कल्प्यमाना विग्रहमाविष्टषष्ठ्याद्यर्थान्तर्भावेणैव कल्प्यते । अत एव तयोः समानार्थत्वम् । तथा च राजपुरुषत्वं पक्तृत्वं औपगवत्वमित्यादौ स्वस्वामिभावः क्रियाकारकसम्बन्धोपत्यापत्यवत्सम्बन्ध इति बोधादेतेभ्यो भावप्रत्ययाः सम्बन्धमभिदधति । औपगवादावव्यभिचरितसम्बन्धे त्वर्थान्तरवृत्तिस्तद्धित उदाहार्यः । दामोदरत्वं कृष्णसर्पत्वमित्यादौ जातिविशेषेणैव बोधादाह । अन्यत्रेत्यादि । रूढेः, अभिन्नरूपात्, अव्यभिचरितसम्बन्धेभ्य, श्चान्यत्र सम्बन्धे एवार्थ इत्यर्थः । रूढिरुक्ता । द्वितीयं यथा । शुक्ल इत्यादौ तदस्यास्त्यस्मिन्निति मतुपो गुणवचनेभ्यो मतुपो लुगिष्ट इत्यनेन लुप्तत्वात्तद्धितान्तत्वेपि घटः शुक्ल इति प्रतीत्या गुणगुणिनोर्भेदसम्बन्धस्य न्यग्भावाच्छुक्लत्वमित्यादि । अत्र गुणस्यैव प्रकारत्वं न सम्बन्धस्य । तृतीये सतो भावः सत्तेत्यादि । अत्र तु जातावेव प्रत्ययः । राजपुरुषयोस्त्वव्यभिचरितसम्बन्धाद्यभावाद्भवति सम्बन्धाभिधानमिति रीत्या द्रष्टव्यम् । एतच्च सम्बन्धो वृत्तावर्थ इति भेदः । संसर्ग उभयं चेति पूर्वोक्तमतमाश्रित्येत्यभिप्रेत्याह । मतभेदनिबन्धनमिति । तथा च राजपुरुषत्वमित्यस्यापि वृत्तित्वात्तदीय एव शक्त्या निर्वाह इति भावः ॥ ४९ ॥

मीमांसकास्तु दण्डीत्यादौ मतुपः प्रकृत्यर्थविशिष्टद्रव्यमा-

त्रवाचित्वमेव सम्बन्धस्य वाक्यार्थविधया विशेषणविशेष्यभाववोधोत्तरमर्थाद्वा प्रतीत्युपपत्तेः । अत एव पाचक इत्यादावपि न सोर्थः । उक्तं च । "पाकं तु पचिरेवाह कर्त्तारं प्रत्ययोप्यकः । पाकयुक्तः पुनः कर्त्ता वाच्यो नैकस्य कस्य चि" दिति । न चानन्तद्रव्येषु शक्तिग्रहासम्भवः । एकमुपलक्षणीकृत्य सम्भवात् । न चोपलक्षणीभूता दण्डादयोपि नाना । तद्वृत्तिजात्यानुगमात् । न च तदपि दण्डत्वकुण्डलत्वरूपमनेकम् । प्रकृत्यर्थत्वेन तदनुगमादित्यरुणाधिकरणोक्तरीत्या द्रष्टव्यमित्याहुः । तदर्द्धजरतीयत्वादुपेक्ष्यमित्याह ॥

तत्रार्द्धजरतीयं स्याद्दर्शनान्तरगामिनाम् ।
सिद्धान्ते तु स्थितं पक्षद्वयं त्वादिषु तद्शृणु ॥५०॥

अत्र कृदादौ । अयं भावः । दण्डीत्यादौ सम्बन्धावाच्यत्वे दण्डित्वमित्यत्रापि न स्यात् । प्रतीतेस्तथैवोपपत्तेः । न च त्वप्रत्ययवैयर्थ्यभीत्या तत्कल्प्यते । घटत्वमित्यादौ कल्पप्रकृत्यर्थतावच्छेदकशक्तयैवोपपत्तेः । कृत्तद्धितसमासेभ्य इति वचनात्तथा कल्प्यतइत्यप्ययुक्तम् । तस्य हरिवचनत्वात् । अस्तु तर्ह्यनुभवानुरोधाच्छक्तिकल्पनमिति चेन्न । शक्त्यन्तरकल्पनामपेक्ष्येन्यादीनां कल्पशक्तावेव धर्मिवत्सम्बन्धविषयत्वकल्पनयोपपत्तौ पृथक्शक्तिकल्पनासम्भवात् । तथा च सति कल्पप्रकृत्यर्थतावच्छेदकशक्त्यैव तद्भानसम्भवादेः प्राक् विवेचितत्वादिति दिक् ॥ ५० ॥

सिद्धान्तानिष्कर्षमाह ॥

प्रयोगोपाधिमाश्रित्य प्रकृत्यर्थप्रकारताम् ।

धर्ममात्रं वाच्यमिति यद्वा शब्दपरादमी ॥५१॥
जायन्ते तज्जन्यबोधप्रकारे भावसंज्ञिते ॥

प्रयोगे कर्त्तव्ये, प्रकृत्यर्थे त्वप्रत्ययप्रकृत्यर्थे, प्रकारतामापन्नमिति शेषः । तमुपाधिमाश्रित्य । शक्यतयेति शेषः । प्रकृतिजन्यबोधे प्रकारो भावप्रत्ययशक्य इत्यर्थः । ननु घटत्वमित्यादिपदजन्यबोधप्रकारो घटत्वत्वादिकमपि भावप्रत्ययोत्तरभावप्रत्ययस्य शक्यं स्यादित्यत्र इष्टापत्तिमाह । धर्ममात्रमिति । न च गौरवाल्लक्षणैव न तत्र शक्तिरिति वाच्यम् । शक्तावेव तदादरो न लक्षणायामित्यत्र विनिगमकाभावादिति भावः । तथा च तस्य भावस्त्वतलाविति सूत्रे भगवान् वार्त्तिककारः । यस्य गुणस्य भावाद् द्रव्ये शब्दनिवेशस्तदभिधाने त्वतलाविति व्याख्यातं च कैयटेन । गुणशब्देन यावान् कश्चित्पराश्रयो भेदको जात्यादिः स सर्व इह गृह्यते । यस्यभावादित्येतावत्युच्यमाने पुत्रस्य भावात्पितरि पितृशब्दप्रयोगात्पितृत्वमिति पुत्रे भावप्रत्ययः स्यात् । पुत्रत्वमिति च पितरीति गुणग्रहणम् । भावाद्विद्यमानत्वादित्यर्थः । द्रव्यशब्देन विशेष्यभूतः सत्त्वभावापन्नोर्थ उच्यते तस्मिन् द्रव्ये शब्दनिवेशः शब्दस्य प्रवृत्तिर्यस्य गुणस्य भावात्स त्वतलाद्यभिधेय इत्यर्थः । तत्र रूपादयः गुणमात्रप्रवृत्तयस्तेभ्यो गुणवृत्तिजात्यभिधायी प्रत्ययो रूपत्वमिति यथा । ये तु शुक्लादयो गुणिपरा अभेदोपचारादिना तेभ्यो गुणे प्रत्ययः । गुणपरेभ्यस्तु जातावेव । अणुमहद्दीर्घादयो ये नित्यं परिमाणिनि वर्तन्ते न तु परिमाणमात्रे तेभ्यो गुणे भावप्रत्ययः । पाचक इत्यत्र क्रियाविशेषणकबोधात्तदुत्तरभावप्रत्ययेन विशेष्यतया सैवाभिधीयते, घटत्वमित्यादौ जातिरिति यथानुभवं द्रष्टव्यम् । तत्र घटत्वत्वादिकं जाताववच्छेदकमुक्तं त-

च यद्यपि परेषां घटेतरावृत्तित्वे सति सकलघटसमवेतत्वरूपं तथाप्यस्मन्मते अविद्या आविद्यको धर्मविशेषो ब्रह्मसत्तैव वा जातिरिति स्वीकारादखण्डमेव वाच्यम् । स्ववृत्तित्वादिसम्बन्धेन व्यक्तिरेव वा प्रकारः । यद्यप्यत्रापि जातेरेकत्वे स्ववृत्तित्वसत्त्वात् । घटत्वमित्यत्र घटस्यापि प्रकारतापत्तिस्तथापि घटादिरेव च तत्रोपस्थित इति स एव प्रकारः । पटादेः शब्दादनुपस्थितौ शाब्दबोधे भानासम्भवात् । अस्तु वा तत्तत्प्रकृतिसमभिव्याहारस्य तादृशबोधत्वं कार्यतावच्छेदकमतो न दोषः । एवञ्च " सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ तां प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादय" इति वाक्यपदीयं सङ्गच्छतइति दिक् । कैयटस्तु गवादयो यदि जातिमात्रवाचिनस्तदा तेभ्यः शब्दस्वरूपे प्रत्ययः । तथाहि । अर्थे जातौ शब्दस्वरूपमध्यस्यते यो गोशब्दः स एवार्थ इति । ततः शब्दस्वरूपमेव प्रवृत्तिनिमित्तं नान्यदित्याह । के चित्तु धर्ममात्रं धर्मत्वेनैव शक्यं भावप्रत्ययस्य न तु तत्तद्रूपेण, नानार्थतापत्तेः । ननु गुरुत्वं घटत्वमित्यादौ गुरुत्वत्वादिना प्रतीतिः सर्वसिद्धा न स्यादित्यत आह । प्रयोगोपाधीति । प्रयोगे उपाधिः नियमेन भासते संस्कारमात्रात्र तु तत्रापि शक्तिः । तं प्रकारतया आश्रित्यानुपपत्त्यभाव इत्यर्थः । न चैवं धर्मत्वस्य शक्यत्वे न मानमिति वाच्यम् । शक्तेरवच्छेद्यत्वनियमात् । अन्यथा मास्तु तदवच्छेदकमत एव पङ्कजपदे पद्मत्वं प्रयोगोपाधिरिति परे मन्यन्तइति व्याचक्षते । तच्चिन्त्यम् । एवं हि घटत्वमित्यादौ धर्मत्वेनैव बोधे प्रतीतिवैचित्र्यं न स्यात् । संस्कारवशाद्विशेषरूपभानमिति चे,तथासति

तस्य वृत्त्यविषयत्वे शाब्दबोधविषयत्वं न स्यादिति ध्येयम् । नव्यास्तु जातिगुणक्रियासाधारण्येनैकशक्तौ सम्भवन्त्यामनेकतत्कल्पने गौरवादस्तु धर्मत्वेन तेषां वाच्यता परं तु तत्र प्रकृत्यर्थो व्यक्तिरेव प्रकार इत्युक्तम् । सा च स्वेतरावृत्तित्वावच्छिन्ननिखिलस्ववृत्तित्वसम्बन्धेन प्रकार इति स्वीकारेणानतिप्रसङ्गः । अत एव क्व चित्स्वसमवेतत्वमात्रमेव सम्बन्धो यथा सत्त्वमित्यत्र, नियामकं चात्राकांक्षामात्रमिति तत्त्वमिति वैयाकरणमतं समर्थयन्ते । तन्न । उक्तसम्बन्धस्य वैयाकरणमते घटत्वे बाधितत्वात् । महत्त्वं गुरुत्वमित्यादौ महत्त्वत्वगुरुत्वत्वादिप्रकारकबोधस्यानुभवसिद्धत्वाच्चेति दिक् । एवं च घटत्वादिजातिरभिधेया तत्र प्रकारः पुनर्व्यक्तिरिति प्रथमः पक्षः । अथ वा जातौ शब्द एवावच्छेदकः । शक्या तु प्रागुक्ता जात्यादिरेवेति पक्षान्तरमाह । यद्वेति । यद्वाशब्दो वार्त्तिकोक्त एवं तत्सूचनाय पठितः । तथा च तत्रैव वार्तिकं 'यद्वा सर्वे भावाः स्वेनार्थेन भवन्ति स तेषां भाव, इति । भवन्ति वाचकत्वेन प्रवर्तते इति भावाः शब्दाः ते स्वस्य वाच्यो योर्थस्तेन भवन्ति तत्र वाचकत्वेन प्रवर्त्तन्ते । अर्थप्रत्यायनार्थमेव शब्दप्रयोगाच्छब्दभवनेर्थस्य करणत्वविवक्षया तृतीयादिप्रयोगः । स चार्थो द्विविधः । वाच्यः प्रवृत्तिनिमित्तं च, वाच्यं च द्रव्यं शब्दो वा, प्रवृत्तिनिमित्तं च घटत्वादिजातिर्जातिशब्देषु, पाचकादिशब्देषु क्रिया, राजपुरुषादिशब्देषु सम्बन्धः, डित्थादिषु संज्ञेत्यादिसर्वमनुभवानुरोधादवधेयम् । स प्रवृत्तिनिमित्तरूपोर्थः तदनुरोधेनैव शब्दानां प्रवृत्तेस्तेषां शब्दानां भावोर्थ इति समुदायार्थः । ननु शक्यतावच्छेदकमेव भावप्रत्ययशक्यं चेत्तर्हि को विशेषः पूर्वपक्षादिति चेत् । पूर्वपक्षे व्यक्तिरेवावच्छेदिका । अत्र मते

शब्दएवावच्छेदक इत्येव । एवं चात्र पक्षे गोत्वं पाचकत्वं शुक्लत्वमित्यादौ गोशब्दप्रवृत्तिनिमित्तं पाचकशब्दप्रवृत्तिनिमित्तं शुक्लशब्दप्रवृत्तिनिमित्तमित्यादिर्बोधो द्रष्टव्य इति कैयटाद्यनुसारेण वार्त्तिकार्थं वर्णयन्तो व्याचक्षते । वस्तुतस्तु सर्वे भावाः शब्दाः स्वेन स्वस्वरूपेणार्थेन भवन्ति प्रवर्त्तन्ते अतः स तेषां भावः प्रवृत्तिनिमित्तमित्यर्थः । अयमभिप्रायः । अर्थवच्छब्दोपि द्रव्ये शक्यतावच्छेदकः । नलेक्ष्वाकुपृथुयुधिष्ठिररामकृष्णादिपदेभ्यस्तत्पदवाच्यो यः कश्चिदासीदित्येव बोधात् । एवमेवाप्रसिद्धार्थकपदेष्वनुभवः सर्वसिद्धः । न तु घटादिपदेष्विव तज्जात्यादिरूपेण । असम्भावितश्च तथा बोधः तत्तद्रूपेणानुपस्थितौ तथा शक्तिग्रहस्यैवासम्भवात् । शब्दादन्येन तदुपस्थितेश्चासम्भवात् । न च तत्तत्प्रकाराः संस्कारा अनादय एव सन्तीति सांप्रतम् । अजन्यसंस्कारानङ्गीकारात् । जन्यस्य कारणाभावेनायोगात् । न चानादिरेव भाविगोचरसंस्कारज्ञानयोर्धारा । अनेकजन्मसु तथाकल्पने मानाभावात् । फलान्यथानुपपत्तेरपि तत्तद्रूपेण बोधरूपफलस्यैवाननुभवादभावात् । विनैव तत्तद्वाचकपदश्रवणं तेषां स्मरणापत्तेश्च । उद्बोधकाधीनव्यवस्थाया ज्ञानसंस्कारयोः कारणत्वासिद्धयापत्तेश्च । एतेन प्रमेयत्वादिरूपेण सकलानुभवोत्तरप्रमेयत्वांशे मोष इति प्रथमस्तत्तज्जातिर्निर्विकल्पकं स्मरणं तत्तद्रूपेण तत्तत्पदार्थोपस्थितिमादाय शक्तिग्रहः । न चैवं सर्वेषामर्थानामेवं बोधापत्तौ सार्वज्ञत्वापत्तिः फलबलकल्प्योद्बोधकवशादेव स्मृतेः कादाचित्कत्वनियमादित्यादिकमपास्तम् । तादृशस्मरणस्यानुभवविरुद्धस्य कल्पने मानाभावात् फलस्याप्यभावादित्युक्तम् । सर्वेषामेव पदानामेवं शक्तिग्रहापत्तौ गृहीतशक्तिकानामिव संशयानापत्तेश्च । एतेनाभिमान्यधिकरणे

मृदब्रवीत् आपोब्रुवन्नित्यादौ देवतायां मृदादिशब्दानां शक्तिग्रहासम्भवात्तत्परत्वे ऽप्रामाण्यमाशङ्क्य पाशहस्तादिपदादुपस्थिते शक्तिग्रहः । न च तस्यापि शक्तिग्रहासम्भवादनुपपत्तिः। यौगिकेषु समुदायशक्तिग्रहानपेक्षणात् । अवयवानां च पाशादिपदानां लोके शक्तिग्रहात् । एवमदृष्टादिपदेष्वप्यूह्यमित्यादिमाध्वीया न्यायसुधा परास्ता । जातिविशेषरूपेण पाशहस्तादिपदादुपस्थित्यसम्भवात्तेन रूपेण शक्त्यग्रहात् । अन्यथा प्रत्यक्षेणोपस्थिते वरुणे वरुणादिपदानां शक्तिग्रहवतामिव त्वदुक्तरीत्या तद्ग्रहवतामपि पाशाद्यदर्शनेपि व्यक्तिमात्रदर्शनाद्वरुणोपमित्यादिप्रत्ययापत्तेः । अस्माकं पदरूपेणोपस्थितौ रामादिपदं क्वचिच्छक्तं साधुशब्दत्वात् घटपदादिवत्, हकारादयो वर्णाः क्वचिच्छक्ताः वर्णत्वात् अकारोकारादिवदिति शक्तिग्रहोस्त्येव । अत एव रामादिपदवाच्यः कश्चित्पदार्थ इत्येव बोधः । जबगडदाश्चित्युच्चारयेत्यादौ च घटो नित्य इत्यादिवद्योग्यतावशाद्विशेषणांशान्वय इत्युक्तम् । सम्बन्धितावच्छेदकरूपेणोपस्थितसम्बन्धिन एव सम्बन्ध्यन्तरस्मारकत्वान्न प्रत्यक्षेणोपस्थितवरुणेन पदस्मरणं, तत्र पदस्यैवावच्छेदकत्वात् । तस्मादनुभवानुरोधाच्छब्द एवावच्छेदकः । अत एव विष्णुर्नारायणः कृष्ण इत्यत्र सामानाधिकरण्यं सङ्गच्छते । अन्यथा घटो घट इत्यत्रेव तन्न स्यात् । तस्मात्पदप्रकारकबोधं एव सर्वसम्मत इति । तथा जातिविशेषोप्यवच्छेदकः । शक्तिग्रहवैलक्षण्याच्च बोधवैलक्षण्यम् । अत एवेक्ष्वाकादिपदेषु तत्तत्पिण्डदर्शनाच्छक्तिग्रहशालिनां तद्वृत्तिजातिप्रकारक एव बोधः । अस्मदादीनां च नेति सङ्गच्छते । स च शब्दः शक्तिसम्बन्धेनैवावच्छेदकः शक्तिश्च शब्दैक्येपि नानैवेति न नानार्थोच्छेदो न वा ब्राह्मणादिनाम्नः

शूद्रस्य हननादोषः । अस्तु वैका सा तथापि नानार्थोच्छेदः सर्वनामकक्षतया सर्वसमाधेयः । तथाहि । अनुभवानुरोधात्सर्वनाम्नां विशिष्योपस्थापकत्वमिति सर्वसिद्धम् । तच्च यदि बुद्धिविषयत्वरूपेणोपस्थापितघटत्वपटत्वादिशालिषु बुद्धिविषयवति शक्तं तत्पदमित्येव शक्तिग्रहो बुद्धिविषयत्वं तूपस्थितावनुगमकमात्रं न तु शक्यमिति न तच्छान्दबोधे भासते किं तु घटत्वादिकमेवेत्युच्यते तदात्रापि बुद्धिविषयत्वरूपेणोपस्थितपाशत्वविभीतकत्वादिशालिषु बुद्धिविषयवति शक्तमक्षपदमिति शक्तिग्रहस्य सुवचत्वात् । यदि वा बुद्धिविषये तदादिपदं शक्तमित्यतिदेशवाक्यार्थज्ञानसहकृतेन मनसा प्रकरणादिवशात्तदादिशब्दश्रवणानन्तरं विशेषरूपेणोपस्थिते शक्तिग्रह इत्युच्यते तदा ऽत्रापि बुद्धिविषये ऽक्षादिपदं शक्तमित्याद्यतिदेशवाक्यार्थज्ञानसहकृतेन मनसा प्रकरणादिवशादक्षपदश्रवणानन्तरं विशेषरूपेण उपस्थिते शक्तिग्रह इति तुल्यमेवेति । वस्तुतः शक्यतावच्छेदकनानात्वेन नानार्थतेति सर्वसिद्धत्वादत्र जातेरनेकस्या अवच्छेदकत्वान्नानार्थत्वं दुष्परिहरम् । ब्राह्मणं न हन्यादित्यत्रापि जातिविशेषावच्छिन्नहननं पापजनकमिति स्वीकारान्न दोष इति ध्येयम् । तस्माच्छन्दो ऽवच्छेदकः स एव त्वप्रत्ययवाच्यः । एतच्च वृद्धिरादैजित्यत्र शब्दकौस्तुभे स्पष्टम् । उक्तं च हरिणा । सामान्यान्यभिधीयन्ते सत्ता वा तैर्विशेषिता । संज्ञाशब्दस्वरूपं वा प्रत्ययैस्त्वतलादिभिरिति । एतदेवाभिप्रेत्य यद्वेति वार्त्तिकं भाष्यं च सङ्गच्छते । अन्यथा सूत्रोक्तभावशब्दार्थविचारे पक्षद्वयेपि तदैक्यादसङ्गत्यापत्तेः । अत एवाद्ये धर्मविशेषः प्रत्ययार्थो द्वितीये बोधप्रकार इति मनोरमायां पक्षद्वयोपन्यासः सङ्गच्छते । अन्यथा धर्मविशेषस्य पक्षद्वयेपि समानत्वादसङ्गत्यापत्तेः । एतेन

पूर्वत्र लक्षणे जातिगुणद्रव्यलक्षणार्थाभिधायिभ्यो गवादिभ्यः शब्दस्वरूपसामान्यादिषु प्रत्ययः । इह तु शब्दाभिधायिभ्यः पूर्वोक्तेष्वेवार्थेष्विति प्रकृत्यर्थभेदेपि प्रधानप्रत्ययार्थाभेदापेक्षो विकल्प इति कैयटोक्तिः परास्ता । तस्मात्संज्ञाशब्देष्विव शब्द एवावच्छेदकस्त्वप्रत्ययेन कुत्वमित्यत्रेवाभिधीयतइति प्रतिभातीति दिक् । पक्षद्वयेपि तैः प्रकृतिभूतैर्जन्यो यो बोधस्तत्र यः प्रकारस्तत्र त्वादयो जायन्ते । कीदृशे प्रकारे । भावसंज्ञिते । तस्य भाव इति सूत्रे शब्दस्य प्रवृत्तिनिमित्तं भाव इति प्रसिद्धौ च भावशब्दवाच्ये इत्यर्थः ॥

इति वैयाकरणभूषणे भावप्रत्ययार्थनिर्णयः समाप्तः॥

सास्य देवतेत्यत्र देवताविशिष्टं देयं प्रत्ययार्थः । ऐंद्रं वैश्वदेवीत्यादौ इन्द्रादेर्देवतात्वोपस्थापकाभावात्तेन रूपेणोपस्थितये पृथक् शक्तिकल्पनावश्यकत्वात् । अत एवा'मिक्षां देवतायुक्तां वदत्येवैष तद्धितः । आमिक्षापदसान्निध्यात्तस्यैव विषयार्पण'मिति । 'केवलादेवतावाची तद्धितोग्नेः समुच्चरन् । नान्ययुक्ताग्निदैवत्यं प्रतिपादयितुं क्षम' इति च मीमांसकैरप्युक्तमित्याशयेनाह ॥

प्रत्ययार्थस्यैकदेशे प्रकृत्यर्थो विशेषणम् ॥ ५२ ॥
अभेदश्चात्र संसर्ग आग्नेयादावियं स्थितिः ।
देवतायां प्रदेये च खण्डशः शक्तिरस्तु वा ॥५३॥

एकदेशे देवतारूपे तच्चाभेदेनेत्याह । अभेदश्चेति । वस्तुतस्तु चतुर्थ्यादौ प्रकृत्यर्थस्य तथैव लब्धस्य चतुर्थ्या देवतात्वमात्रमुच्यतइति तद्वत्प्रकृत्युपात्तेन्द्रादेर्देवतारूपत्वमेव इहार्थः ।

मूलं तु न्यायसुधायामामिक्षाधिकरणे तथाभिधानादुद्देश्यश्चतुर्थ्यर्थ इति मतेन । ननु 'तद्धितेन चतुर्थ्या वा मन्त्रवर्णेन वा पुनः । देवतासङ्गतिस्तत्र दुर्बलं तु परं पर'मिति मीमांसकोक्तं तद्धिताच्चतुर्थीदौर्बल्यं कथमिति चेत् । इत्थम् । चतुर्थ्या वाक्यादेवतात्वसम्बन्धलाभस्तद्धिते समानपदोपादानश्रुत्येति श्रुतिवाक्यबलाबलाधीनं तदिति ध्येयम् । नन्वग्न्यादेः प्रत्ययार्थदेवतायां नाभेदेनाप्यन्वय सम्भवः । पदार्थैकदेशत्वादन्वयस्यैवाभावादित्यत आह । देवतायामिति । तथा च पदार्थैकदेशतैव नास्तीति भावः ॥ ५३ ॥

नन्वाग्नेयादावग्नेर्देवस्य प्रकृत्या लाभान्न शक्तिः कल्प्या । न च देवतात्वरूपेणोपस्थितये सा कल्प्यते । तेन रूपेणोपस्थितेर्लक्षणयाप्युपपत्तेः । उपसर्गाणां द्योतकत्वमते प्रजयतीत्यत्र प्रकृष्टजयप्रतीतिवदित्याभिप्रेत्याह ॥

प्रदेयएव वा शक्तिः प्रकृतेत्वस्तु लक्षणा ।
देवतायां निरूढेति सर्वे पक्षा अमी स्थिताः ५४

ऐन्द्रमित्यत्रेन्द्रविशिष्टं प्रतीयते । तत्रेन्द्रो देवता प्रकृत्यर्थः देय द्रव्यं प्रत्ययार्थस्तयोः सम्बन्धः संसर्गः । न चानन्यलभ्यः शब्दार्थ इति न संसर्गदेवते तदर्थः । न च द्रव्यमपि दध्यादिपदलभ्यं न शक्यम् । तदश्रवणेप्यैन्द्रपदमात्रादेयमात्रप्रतीतेः । ऐन्द्रं दधीति सामानाधिकरण्याच्च, सास्यदेवतेत्यनुशासनाच्च । मीमांसकानां पुनः कर्तृकर्मणोराख्यातावाच्यत्वं स्वीकुर्वतां तुल्ययुक्त्या ऽत्रापि द्रव्यवाच्यत्वं न सिध्योदिति प्रपञ्चितं प्रागिति ध्येयम् । देवतायामिति । देवतात्वरूपेणेत्यर्थः । निरूढेति । अनादिप्रयोगावच्छिन्नलक्षणाया एव तत्त्वादिति भावः ।

यत्त्वग्निप्रभृतिभ्यो माणवकादिसङ्केतितेभ्यः प्रत्ययापत्त्या निरूढेत्युक्तामिति। तन्न। "अभिव्यक्तपदार्था ये स्वतन्त्रा लोकविश्रुताः। शास्त्रार्थस्तेषु कर्त्तव्यः शब्देषु न तदुक्तिषु" इति वाक्यपदीयेनैव निरस्तत्वात्। युक्तं चैतत्। पुराणादिप्रसिद्धैर्निरूढार्थकैः शास्त्रस्य निराकांक्षाकरणेनाधुनिकेष्वप्रवृत्तेः। अत एव क्षत्रियादिभिः स्वपुत्रस्य ब्राह्मण इति नाम्नि कृतेपि न तद्धननं "न ब्राह्मणं हन्या" दिति वाक्यविषय इति बोध्यम्॥ ५४॥

अनयैव रीत्या ऽन्यत्राप्यवधेयमित्याह॥

क्रीडायां णस्तदस्यास्तीत्यादावेषैव दिक् स्मृता।
वस्तुतो वृत्तिरेवेति नात्रातीव प्रयत्यते॥ ५५॥

तदस्यांप्रहरणमिति क्रिडायां ण इत्यत्र प्रहरणविशिष्टा क्रीडा प्रहरणक्रीडे क्रीडामात्रं वेति दिगर्थः। आदिना सोस्यनिवासः सास्मिन्पौर्णमासीति ग्राह्यम्। निरूढलक्षणायाः शक्त्यनतिरेकात्पूर्वानुशयाच्चाह। वस्तुत इति॥

इति वैयाकरणभूषणे देवताप्रत्ययार्थनिर्णयः॥

वृत्तौ विशेषणे अभेदैकत्वसङ्ख्या प्रतीयते इति सिद्धान्तं निरूपयन्नाह॥

अभेदैकत्वसङ्ख्याया वृत्तौ भानमिति स्थितिः।
कपिञ्जलालम्भवाक्ये त्रित्वं न्यायाद्यथोच्यते॥५६॥

सङ्ख्याविशेषाणामविभागेनावस्थानमभेदकत्वसङ्ख्या। उक्तं हि वाक्यपदीये। "यथौषधिरसाः सर्वे मधुन्याहितशक्तयः। अविभागेन वर्तन्ते तां सङ्ख्यां तादृशीं विदुः" रिति।

परित्यक्तविशेषं वा सङ्ख्यासामान्यमभेदैकत्वसङ्ख्या । उक्तं च । "भेदानां वा परित्यागात्सङ्ख्यात्मा स तथाविधः । व्यापाराज्जातिभागस्य भेदापोहेन वर्त्तते ॥ अगृहीतविशेषेण यथा रूपेण रूपवान् । प्रख्यायते न शुक्लादिभेदापोहस्तु गम्यते" इति । अस्या, वृत्तौ समासादौ भानं न्यायसिद्धामिति शेषः । अयमर्थः । राजपुरुष इत्यादौ राज्ञो राज्ञोः राज्ञां वेति जिज्ञासानुभवाद्विशेषजिज्ञासायाः सामान्यज्ञानपूर्वकत्वनियमात्तद्रूपेण बोधाय शक्तिरावश्यकी । बुध्यते च क चिद्विशेषतोपि । यथा द्विपुत्रः पञ्चपुत्र इत्यादौ । एवं तावकीन इत्यादावेकत्वं तवकव्यंग्यम् । विशेषतस्तद्बोधकाभावे चाभेदैकत्वं प्रतीयते । एकत्वत्वरूपेणैव प्रतीयत इत्यत्र न्याये एव बीजमित्याह । कपिञ्जलेति । कपिञ्जलानालभेतेत्यत्र बहुवचनेन त्रय एव गृह्यन्ते । गणनायां त्रित्वस्य प्रथमोपस्थितत्वात् । प्रथमोपस्थितत्यागे च मानाभावात् । एवं प्रकृतेपि विशेषतः सङ्ख्याबोधकाभावस्थले प्रथमोपस्थितैकत्वत्यागे मानाभाव इति भावः । अत्र वदन्ति । त्रित्वत्वेन प्रथमोपस्थितौ न नियमः । दशत्वत्वादीनामपि प्रथमोपस्थितत्वात् । गणनायाश्चानियमात् । विपरीतगणनायामपि कस्य चिद्रुचत्पन्नत्वाच्च । अन्यथा पञ्चैकत्वविवक्षापि न स्यात् । एकत्वस्य गणनायां प्रथमोपस्थितत्वेन न्यायेनैव तदुपस्थितिसम्भवात् । एकवचनं त्वौत्सर्गिकम् । सत्रादुदवसाय ज्योतिष्टोमेन पृष्ठशमनीयेन यजेरन्नित्यत्र बहुवचनबन्न्यायप्राप्तानुवादो वा । नन्वेवं सति सङ्ख्याया अङ्गत्वं न स्यात् । तथा च द्वयोरनुष्ठानापत्तिः । एकत्वस्य न्यायेनोपस्थितावपि द्वयोरालम्भने साङ्गयागानुष्ठानापत्तिरिति चेन्न । पशुना यजेतेत्यत्र पशुत्वस्य यागसाधनतोच्यते तच्चैकालम्भनेपि सम्पन्नामिति नाधिकाल-

म्भनं व्यर्थत्वात् । तावतैवार्थसिद्धेर्मध्ये पश्वन्तरालम्भने प्रयोगप्रांशुभावरूपं पदार्थानां सान्निधानं च बाध्येत । उक्तं हि वाक्यपदीये । "प्रत्याश्रयं समाप्तायां जातावेकेन चेत्क्रिया । पशुना न प्रकल्प्येत तत्स्यादेतत्प्रकल्पना ॥ एकेन तु प्रसिद्धायां क्रियायां यदि सम्भवात् । पश्वन्तरमुपादेयमुपादानमनर्थकम् ॥ यथैवाहितगर्भायां गर्भाधानमनर्थकम् । तथैकेन प्रसिद्धायां पश्वन्तरमनर्थकम् ॥ तावतार्थस्य सिद्धत्वादेकस्याप्यनतिक्रमम् । के चिदिच्छन्ति न त्वत्र सङ्ख्यां गत्वेन गृह्यते" इति । कपिञ्जलानालभेतेत्यादौ बहुत्वान्वयानुरोधान्नैकालम्भनेन निर्वाह इति विशेषः । अथोच्येत । न हिंस्यादिति निषेधस्य यावता विना विधेरनुपपत्तिस्तत्रैव सङ्कोच इति कपिञ्जलात्रयव्यतिरिक्ते तत्सङ्कोचं विनापि शास्त्रार्थोपपत्तेस्तत्र सङ्कोचाकल्पनात्तस्य निषेधविषयत्वात्तद्विरोधान्न तत्र विधिप्रवृत्तिरिति । तन्न । न हिंस्येत्यस्यैकवाक्यतया वैधहिंसाभिन्ना सा न कर्त्तव्येति शास्त्रार्थः न तु कपिञ्जलत्रयव्यतिरिक्ता सा न कर्त्तव्येति न निषेधानुसारेण विधिसङ्कोचः । किं तु विपरीतं, विशेषानाक्रान्ते सामान्यप्रवृत्तेर्न्याय्यत्वात् । यदि च विधिनिषेधाविध्योर्न विरोधस्तदा नैवं शङ्कापि । वस्तुतस्तान् पर्यग्निकृतानारण्यानुत्सृजतीति वाक्यात्तेषां हननमेव नास्तीति किं वृथा विचारेण । अस्तु वा तथा, तथापि प्रकृतासङ्गतिरेव । नह्येकत्वादिप्रतीतिरुक्तन्यायेन सम्भवति । अत एव कपिञ्जलानालभेतेत्यत्रापि व्यक्तित्रयालम्भनस्यैव कारणतोच्यते । अन्यथान्येषामपि तत्कल्पने गौरवापत्तिः । ब्राह्मणान्भोजयेदित्यत्रापि व्यक्तित्रयभोजने उक्तविधिर्निष्पन्न एव । अधिकभोजनं च फलविशेषार्थः । न चात्रापि चतुष्टयाद्यालम्भने फलविशेषापत्तिः । कल्पकाभावात् । ब्रह्मणभोजनादौ च

स श्रुत एव । न चैवमप्येषां त्रयाणामेषां वेति विनिगमनाविरहाद्बहूनामालम्भनापत्तिः । अयं पशुः स वेत्यनुरोधेन पशुनेत्यत्राप्यतिप्रसङ्गात् । न चैकवचनेन पर्याप्त्या द्वित्वानाश्रयस्य साधनतोच्यते इति नातिप्रसङ्ग इति वाच्यम् । एकवचनस्य तथा शक्त्यभावेन लक्षणाभ्युपगमे त्रित्वाविशिष्टे तस्याः सम्भवात्तुल्यमेवेति परास्तम् । विधिनिषेधयोर्विरोधवादिनां कपिञ्जलान्यायातिरिक्तालम्भनस्य पापजनकत्वकल्पनापत्तौ गौरवस्य तुल्यत्वाच्च । तस्मान्नैकत्वत्वेन तत्प्रतीतिः किं तु सङ्ख्यात्वसामान्यरूपेण । अन्यथा राजपुरुष इत्यादौ राज्ञो राज्ञोर्वेत्यादिजिज्ञासानापत्तेः । इष्टापत्तौ वृद्धिमिच्छतो मूलमपि नष्टमिति न्यायापातः । अनुभवश्च नास्त्येव तथा । तस्मादभेदैकत्वशब्देनैव व्यवहारः कुतः । अभेदद्वित्वादिशब्देनापि तदौचित्यादित्याशङ्कायां कपिञ्जलान्याय उदाहृतः । प्राथम्यात्तथा व्यवहार इति भाव इति दिक् । नव्यास्तु पदार्थैकदेशत्वाद्राजपुरुष इत्यत्र राज्ञस्तत्र सङ्ख्यात्वरूपेणापि न तदन्वय इत्याहुः । समासादौ शक्तिः कल्प्यमाना सङ्ख्याविशिष्टे एव सा कल्प्येत्यभ्युपगमे तु नायं दोषः । परंत्वनुभवविरहाज्जिज्ञासानुरोधेन शक्तौ तु ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावाद्विशिष्यैव वाच्यतापत्तेरिष्टापत्तौ जिज्ञासोच्छेदापत्तेर्मूलोच्छेदाच्छक्तिकल्पनमेवानर्थकमिति विभावयाम इति दिक् ॥ ५६ ॥

इति वैयाकरणभूषणे अभेदैकत्व-संख्यानिरूपणं समाप्तम् ॥

संख्याप्रसङ्गादुद्देश्यविधेययोः संख्याविवक्षाविवक्षे निरूपयति ॥

लक्ष्यानुरोधात्संख्या च तन्त्रातन्त्रे मते यतः।
पश्वेकत्वादिहेतूनामाश्रयणमनाकरम् ॥ ५७ ॥

ग्रहं समार्ष्टीत्यत्र वाक्ये उद्देश्यग्रहगतमेकत्वमविवक्षितमिति-वन्नास्माकमुद्देश्यविशेषणाविवक्षानियमः। आर्धधातुकस्येड्वलादे-रित्यादावनुवाद्यार्धधातुकविशेषणस्य वलादित्वस्य विवक्षित-त्वात्। एवं पशुना यजेतेतिवद् द्विधेयविशेषणं विवक्षितमित्यपि न। रदाभ्यां निष्ठा तो नः पूर्वस्य च द इत्यत्रैकत्वाविवक्षणा तु। तथात्वे वा भिन्न इत्यत्र नकारद्वयलाभो न स्यात्। न च वाक्यभेदात्तल्लाभः। तत्कल्पनएव गौरवात्। एवमेव चकाराक-रणे लाघवतरत्वात्। एवमेतयोरविवक्षैव विवक्षैव वेत्यपि न। उपेयिवाननाश्वाननूचानश्चेत्यत्र नञ्प्रभृतेर्विवक्षाया उपेत्य-स्याविवक्षायाश्च स्वीकारात्। इकोयणचीत्यत्रानेकयकारापत्तेः। एकत्वस्य विवक्षितत्वादित्यर्थः। पश्वेकत्वादीत्यादिना ग्रहैक-त्वसंग्रहः। अथ समानप्रत्ययोपात्तेन प्रातिपदिकादपि सन्निहि-तेन प्रधानभूतेन च कारकेणावरुद्धमेकत्वं प्रातिपदिकार्थमनाद-त्य क्रियाङ्गमवगम्यमानं वाक्यसमर्पितेन क्रियाविशेषेण सम्बध्य पश्चादरुणैकहायनीन्यायेन पशुनार्थात्सम्बध्यते तादर्थ्यं तु यज्ञं प्रत्येवेति पश्वेकत्वाधिकरणोक्तरीत्यात्रापि नकारादिविधायकेषु नकारस्यैकत्वादिविशिष्टस्यैवान्वयोस्तु। युक्तं चैतत्। अन्यथा-नन्तनकारापत्तेर्दुर्वारत्वात् ॥ ५७ ॥

न च प्रागुदाहृतवाक्यपदीयरीत्यैकेन चरितार्थत्वान्न बहू-नामापत्तिरिति शंक्यम्। भिन्न इत्यत्रापि नकारद्वयानापत्तेः। उभयोरेकेनोपपत्तेः। सवर्णदीर्घगुणादिवत्। एकःपूर्वपरयोरित्ये कग्रहणस्थाने चकारसत्त्वादिति सर्वमभिप्रेत्याह ॥

विधेये भेदकं तन्त्रमन्यतो नियमो नहि ।
ग्रहैकत्वादिहेतूनामाश्रयणमनाकरम् ॥ ५८ ॥

भेदकम् । विशेषणम् । तन्त्रम् । विवक्षितम् । अन्यतः । अनुवाद्यस्य । नियमो नहि । क्व चितन्त्रं क्वचिन्नेत्यर्थः । नन्वेवं ग्रहं समार्ष्टीत्यत्रोद्देश्यग्रहगतमेकत्वमविवक्षितम् । वाक्यभेदापत्तेः । तथाहि । प्राजापत्या नव ग्रहा इत्यत्र विहितग्रहोद्देशेन सम्मार्गो विधीयते । तथा च सम्मार्गविधायकेप्येकत्वविवक्षायां ग्रहं सम्मार्ष्टि तच्चैकमित्यर्थः स्यात् । उक्तं हि वाक्यपदीये । 'ग्रहास्त्वन्यत्र विहिता भिन्नसंख्याः पृथक्पृथक् । प्राजापत्या नवेत्येवमादिभेदसमन्विताः ॥ अङ्गत्वेन प्रतीतानां सम्मार्गे त्वङ्गिनां पुनः । निर्देशं प्रति या संख्या सा कथं स्याद्विवक्षिता' इति । किं च । ग्रहमिति द्वितीयया ग्रहस्य प्राधान्यं प्रतीयते एवमेकत्वस्यापि । तथा च ग्रहस्वरूपवदेकत्वविवक्षायामपि प्रतिप्रधानं गुणावृत्तिरिति न्यायात्सर्वत्र ग्रहे सम्मार्गसिद्धेर्व्यर्थैव तद्विवक्षा । एवमेव तकारदकारयोर्भिन्न इत्यत्र नकारद्वयलाभः । यदि च पशुवद्ग्रहाणां गुणत्वं भवेत्तदा येन केनापि सिद्धेर्यावद्गुणं प्रधानावृत्तेरभावाच्च परिच्छेदकत्वेन पशुवत्संख्याविवक्षा स्यात् । न चैवम् । अथ संख्याविशिष्टपश्वादिविधिवदेकत्वाविशिष्टग्रहानुवादेन सम्मार्गविधिः स्यादिति चेत्तथापि सर्वषां प्रत्येकमेकत्वात्स्यादेव प्रसङ्गः । न चैकत्वाविशिष्टसम्मार्गविधिः । तथापि द्वितीयोक्तप्राधान्यानुरोधेन प्रतिप्रधानं गुणावृत्तिरिति न्यायात्सर्वत्र सम्मार्गप्रसङ्गात् । न च सक्तुवल्लक्षणा । ग्रहाणामपि प्राधान्यानापत्तेरिति ग्रहाधिकरणन्यायविरोधादसङ्गतमेवान्यत इत्यादीत्यत आह । ग्रहैकत्वादीति । अयमा-

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली ।

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्ड ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्ड १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं स-भाष्यं खण्ड ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपाद-भाष्यसहिता	१	०
वाक्यपदीयं खण्ड ३	३	०
रसगङ्गाधरः खण्ड ८	८	०
परिभाषावृत्तिः खण्ड २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपा-दप्रणीतभाष्यसहितम् खण्ड २	२	०
शिक्षासङ्ग्रहः खण्ड ५	५	०
नैष्कर्म्यसिद्धिः खण्ड ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्र-म् सभाष्यं खण्ड ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम्	१	०
(बृहत्) वैयाकरणभूषणम् खण्ड ३	३	०
न्यायलीलावती (यन्त्रस्था)	०	०

इन से अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकैं हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजैं ॥

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्रचीना दुर्लभा उत्तमोत्तमाः केचिदङ्गलभाषानुवादसहिताश्च ग्रन्थाः मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्येऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य कृते ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां कृते १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

व्रजभूषणदास और कम्पनी,
चांदनीचौक के उत्तर नई सड़क
बनारस ।

BENARES SANSKRIT SERIES;

A

COLLECTION OF SANSKRIT WORKS

EDITED BY THE

PANDITS OF THE BENARES SANSKRIT COLLEGE,

UNDER THE SUPERINTENDENCE OF

R. T. H. GRIFFITH, M. A., C. I. E.

AND

G. THIBAUT, PH. D.

No. 54.

(बृहत्) वैयाकरणभूषणं

पदार्थदीपिका च सहितम्

सर्वतन्तस्वतन्तश्रीमत्कौण्डभट्टविरचितम् ॥

(BRIHAT) VAIYÂKARANA BHÛSHANA,

A Treatise on Sanskrit Grammar,

BY PANDIT KAUNDA BHATTA:

ALSO PADÂRTHA DÎPIKÂ BY THE SAME AUTHOR.

EDITED BY

PANDIT RÂMA KRISHNA ŚÂSTRÍ,

Alias TÂTYÂ ŚÂSTRÍ PATAVARDHANA;

PROFESSOR, GOVERNMENT SANSKRIT COLLEGE, BENARES.

FASCICULUS IV.

BENARES.

PUBLISHED BY THE PROPRIETORS Messrs. BRAJ B. DAS & Co.

AND SOLD BY H. D. GUPTA,

SECRETARY, CHOWKHAMBA SANSKRIT BOOK DEPÔT.

——:o:——

PRINTED AT THE RÂJ RAJESHWARI PRESS & THE TARA PRINTING WORKS,

BENARES.

1900.

REGISTERED ACCORDING TO ACT XXV. OF 1867.

श्यः । अस्तु तावद्ग्रहस्थले तथा । न त्वस्माकमयं दोषः । आर्धधातुकस्येड्वलादेरित्यत्र वलादित्वविशिष्टमार्धधातुकमनूद्येड्विधानसम्भवात् । न चैवं रीत्या ग्रहेष्वपि दोषः । तत्राकांक्षाविरहादिति दिक् ॥ ५८ ॥

नन्वेवं रदाभ्यामित्यतो नकारद्वयलाभो भिन्न इत्यत्र न स्यादित्यत आह ॥

रदाभ्यां वाक्यभेदेन नकारद्वयलाभतः ।
क्षतिर्नैवास्ति तन्त्रत्वे विधेये भेदकस्य तु ॥५९॥

चशब्दानुरोधाद्ध्रष्यादिसिद्धवाक्यभेदान्नकारद्वयलाभ इत्यर्थः । न च वाक्यभेदे गौरवम् । उक्तरीत्या एकत्वस्यातन्त्रत्वे तस्यावश्यकत्वादिति भावः । नन्वेवं वृद्धिरेचि आद्गुण इत्यादौ विधेयगतसङ्ख्याविवक्षयैवेष्टसिद्धावेकः पूर्वपरयोरित्यत्रैकग्रहणानर्थक्यमिति चेत् । को दोषः । मात्रालाघवेन हि वैयाकरणाः पुत्रोत्सवं मन्यन्ते । प्रत्याख्यातं चैतद्ध्रष्यकारादिभिरपीत्यलं पल्लवेन । एवं चास्यच्वावित्यादावनुवाद्यविशेषणत्वान्न व्यक्तिर्विवक्ष्यते, ग्रहैकत्ववदिति कैयटश्चिन्तनीय इति भावः ॥ ५९ ॥

इति वैयाकरणभूषणे सङ्ख्याविवक्षा-
निरूपणं समाप्तम् ॥

क्त्वाप्रत्ययादीनामर्थं निरूपयति ॥

अव्ययकृत इत्युक्तेः प्रकृत्यर्थे तुमादयः ।
समानकर्तृकत्वादि द्योत्यमेषामिति स्थितिः ६०

तुमादयः, तुमुनादयः । प्रकृत्यर्थे, भावे । आदिना क्त्वादेः संग्रहः । भाव इत्यत्र मानमाह । अव्ययकृत इति । अव्ययकृतो भाव इति वार्त्तिकादित्यर्थः । भाष्यकारास्तु तुमर्थसूत्रे तुमर्थो भाव इति व्यवस्थाप्याग्रे तदनुवृत्तिं स्वीकृत्य च तुमुनः समानाधिकरणे अव्ययकृतो भाव इत्यादि वार्त्तिकं प्रत्याचक्षाणाः क्त्वादीन्भावएवेच्छन्ति । अत एव समानकर्तृकयोरिति सूत्रे स्वशब्देनोपात्तत्वान्नेति भाष्यप्रतीकमादाय पौर्वापर्यकाले द्योत्ये क्त्वादिर्विधीयते न तु विषय इति भाव इति कैयटः । यन्तु समानकर्तृकयोः पूर्वकाले इति स्मरणात्कर्त्ता त्कार्थ्यर्थः । अन्यथेष्टकाः पक्त्वाहं भोक्ष्ये इत्यत्र मयेति तृतीयाप्रसङ्गात् । न चाख्यातेन कर्त्तुरभिधानान्न सेति वाच्यम् । भोजनक्रियाकर्तुरुक्तत्वेपि पाकक्रियाकर्त्तुस्तदभावात् । अनभिहिते भवतीति पर्युदासलक्षणाश्रयणात् । न त्वभिहितस्य नेति निषेधस्य । अत एव प्रासादआस्ते इत्यत्र प्रसादनक्रियाधिकरणस्याभिधाने व्याप्तिक्रियाधिकरणस्यानभिधानात्सप्तमीति भाष्यवार्त्तिकयोः स्पष्टम् । तस्मात् क्त्वाप्रत्ययेन कर्त्रभिधानमाश्रित्य तृतीयाभाव उपपादनीय इति परिमले अप्पय्यदीक्षितैरुक्तं, तन्निराचष्टे । समानकर्तृकत्वादीति । आदिना पूर्वकालिकत्वादिसंग्रहः । द्योतकत्वं च प्रकृत्यर्थयोः संसर्गे तात्पर्यग्राहकत्वम् । अयं भावः । भावो ऽत्र साध्यावस्थापन्न एव स च धातुनैव लब्धः । तत्र च क्त्वाप्रकृत्यर्थभूता क्रियान्तरविशेषणम् । तयोः सम्बन्धः सामानाधिकरण्यं तथोत्तरकालिकत्वं पूर्वकालिकत्वं जन्यत्वं व्याप्यत्वं वा । तत्र च तत्तत्सम्बन्धस्य तात्पर्यग्राहकाः क्त्वातुमुनादयः । तथा च भुक्त्वा व्रजति भुक्त्वैवाहं तृप्तो न तु पीत्वा अधीत्य तिष्ठति ईश्वरो ज्ञात्वा तिष्ठतीत्यादौ परेषामिवास्माकमपि बोधः।

एवञ्च सति भुक्त्वा व्रजतीत्यादौ समानकर्तृता पूर्वकालता च प्रतीयते इति देवताधिकरणे भामत्यामभिधानादनुभवाच्च समानकर्तृकत्वं पूर्वकालीनत्वं च क्त्वावाच्यम् । अत एव बाधलक्षणे एकैकाधिकरणे ऋत्विगभ्युच्चयाधिकरणे च समानकर्तृकत्वमर्थमादाय पूर्वपक्षसिद्धान्तौ कृतौ । न चैवं दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति वाक्यादर्शपूर्णमासोत्तरकालः सोमाङ्गत्वेन विधीयते इति राद्धान्तासङ्गतिः । तत्रोत्तरकाले लक्षणया तथा लाभात् । सा च प्रकरणबाधभयात् । यद्वा भाविनि प्रमाणाभावेन तत्प्रागभावघटितपूर्वकालत्वस्यानिश्चयात्प्रवृत्तिर्न स्यादतो लक्षणादरः । अत एव प्रकरणबाधमपेक्ष्य श्रुतिबाधः प्रबल इत्यपास्तम् । अत एव सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनानुप्रविश्य नामरूपे व्याकरणवाणीत्यत्र देवताया एव व्याकर्तृत्वे ऽनुप्रविश्येति क्त्वाश्रुतिर्जीवपरा भेदमादाय सिद्धान्तिता भाष्यभामत्यादौ । तस्मात्समानकर्तृकत्वं क्त्वावाच्यमिति मीमांसकाः । अत्र वदन्ति । कृतिवाचकाभ्यां कृत्तिङ्भ्यां सामानाधिकरण्येन संसर्गेण तयोर्बोधनेनैव समानकर्तृकत्वलाभान्न तच्छक्यम् । तत्प्रकारकबोधस्तु नास्त्येव । किं तु पूर्वकालिकत्वमेव । न चैवं मुखं व्यादाय स्वपितीति न स्यात् । व्यादानस्य स्वापपूर्वकालीनत्वाभावादिति वाच्यम् । व्यादानोत्तरमपि स्वापानुवृत्तेस्तमभिप्रेत्यैव तथा प्रयोगात् । भामत्यां च प्रतीतिमात्रमुक्तम् । तन्तु संसर्गतयापि तत्सत्त्वान्नानुपपन्नम् । अत एव ज्योतिर्दर्शनादित्यधिकरणे क्त्वाश्रुतेः पूर्वकालायाः पीडनप्रसङ्गादित्युक्तिस्तस्यैव वाच्यतां ध्वनयति । तथापि पूर्वकालिकत्वमात्रं न शक्यम् । वर्षान्तरीयं भोजनमादाय तथा प्रयोगापत्तेः । किं

त्वव्यवहितत्वमपि । तच्च योग्यता । सा च तात्पर्यादिभिर्दण्डमासमुहूर्तादिरवसीयते । तथा च । भुक्त्वा व्रजति, अद्य भुक्त्वा श्वो व्रजति इत्यादौ यथायथं व्यवधानेपि न दोषः । क्त्वोपस्थाप्यकालस्याद्येत्यनेनाभेदान्वयादिति नैयायिकाः । पूर्वकालिकत्वं न शक्यम् । भुक्त्वा व्रजतीत्यादौ भोजनोत्तरं व्रजतीत्यन्वयबोधात् । व्रजनपूर्वकाले भोजनमित्यबोधाच्च । एव नाव्यवधानमपि । वर्षान्तरीयं भोजनमादाय तथाप्रयोगः सति तात्पर्ये इष्ट एव । तदा योग्यतायां अपि दुर्वारत्वात् । असति च तात्पर्ये तदभावादेव न बोधः । औत्सर्गिकं पुनरव्यवधानमाद्रियतएव । तस्मादानन्तर्यमेव शक्यम् । अत एव दर्शपूर्णमासाभ्यामिष्ट्वा सोमेन यजेतेति सोमप्रकरणस्थमपि वाक्यं निराबाधं दर्शोत्तरकालं सोमाङ्गत्वेन विधत्ते । अन्यथा क्त्वाश्रुतेः पूर्वकालार्थायाः प्रकरणानुरोधाद्बाधापत्तेरिति तात्सिद्धान्तासङ्गतिः स्यात् । एवमेव च तिङन्तक्रियायाः प्राधान्यमपि सिद्ध्यति । एतदेव हि तस्याः प्राधान्यं यत्क्रियान्तराविशेषणत्वम् । भवति हि गच्छन्पश्यतीत्यादौ गमनकर्तृताविशिष्टे दर्शनकर्तृतायीं न तु विपरीता । तथा च भुक्त्वा व्रजतीत्यादौ भोजनविशेषणिका व्रजनविशेष्यिका धीः । भोजनस्यापि विशेष्यत्वे भुंक्ते व्रजतीतिवद्वाक्यभेदापत्तेः । तस्मादानन्तर्यं क्त्वाद्यर्थ इति नवीनाः । कृत्यानन्तर्यं विशिष्टं शक्यम् । कृतिरानन्तर्यमिति प्रत्येकं वा तथा । नाद्यः । कृतेः पदार्थैकदेशतया तस्यां क्रियाया अनन्वयापत्तेः । रथः स्थित्वा गच्छतीत्यादावभावाच्च । अत एव न द्वितीयः । क्रियानिरूपितमानन्तर्यं शक्यमिति चेन्न । स्थित्वा पश्यतीत्यादावभावात् । स्थितेर्दर्शनकालेपि सत्त्वेन तद्धर्मस्वरूपानन्तर्यस्य बाधात् । अत एव रथ इत्यादौ कृत्यानन्तर्यस्य शक्य-

स्वेष्यानन्तर्यमात्रे लक्षणेति परास्तम् । तस्मात्तत्कालीनप्रागभावप्रतियोगित्वरूपं तदधिकरणसमयध्वंसाधिकरणसमयोत्पत्तिमत्त्वरूपं वा आनन्तर्यं शक्यमिति ततोपि नवीनाः परिष्कुर्वन्ति । रामकृष्णभट्टाचार्यास्त्वाहुः । आनन्तर्यं वा पूर्वकालत्वं वा यात्किञ्चिच्छक्यमस्तु । सर्वथा मुखव्यादानोत्तरं तदभावकाले मुखं व्यादाय स्वपितीत्याद्यप्रयोगः । कथं वोभयानन्तर्यविशेषेपि भुक्त्वैवाहं तृप्तो न तु पीत्वेत्यपि । कथं वेश्वरो ज्ञात्वा तिष्ठतीत्यादिकम् । तस्माज्जन्यत्वव्याप्यत्वादिकमपि क्त्वाद्यर्थः । तथा च मुखं व्यादायेत्यादौ कालिकादिसम्बन्धेन व्याप्यत्वाभिप्रायेणैव प्रयोगादन्यदा तननिद्रायास्तथात्वाभावान्न प्रयोगः । अत एवाध्ययनकालीनस्थितिमादायैवाधीत्य तिष्ठतीति प्रयोगे नाध्ययनाभावकालीनस्थितिमादायेत्युपपद्यते । अत एवैष सम्प्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतीरुपसम्पद्य स्वेन रूपेणाभिनिष्पद्यत इति श्रुतौ ज्योतिर्दर्शनादिति न्यायेन ज्योतिःपदस्य ब्रह्मपरत्वे स्थिते उपसम्पद्येति त्वाश्रुतेरुपपत्तिः कालिकव्याप्तेर्निर्बाधत्वादिति । इत्यादि सर्वमनादेयम् । उक्तरीत्या सम्बन्धविधयैवैषां भानोपपत्तौ वाच्यत्वस्यायुक्तत्वात् । अत एव । वाक्यार्थीभूत एव । सम्बन्ध इह द्योत्यो न पदार्थभूत इति कर्मप्रवचनीयेभ्यो वैलक्षण्यम् । तस्मात्समानकर्तृकत्ववज्जन्यत्वव्याप्यत्वपूर्वकालिकत्वानन्तर्यादयः संसर्गतयान्यलभ्या वाक्यार्थीभूता न शक्याः । तथात्वे वा सर्वत्र वाक्यार्थस्य शक्यत्वापत्तिरिति तात्पर्यग्राहकाः क्त्वादयः । परिमलोक्तं तृतीयापादनमप्ययुक्तम् । स्वादुमिणमुल् इति सूत्रे अव्ययकृतो भावे इति भाष्यमादाय पक्त्वौदनं भुङ्क्ते देवदत्त इत्यत्र तृतीयामाशंक्या-

रूयातान्तार्थः क्रिया प्रधानम् । क्त्वान्तार्थो गुणीभूतः । तत्र प्रधानशक्त्यभिधाने गुणक्रियाशक्तिरभिहितैव । प्रधानानुरोधाद् गुणानां तद्विरुद्धस्वकार्यारम्भकत्वाभावात् इति कैयटेनैव निरस्तत्वात् । उक्तं च हरिणा । 'प्रधानेतरयोर्यत्र द्रव्यस्य क्रिययोः पृथक् । शक्तिर्गुणाश्रया तत्र प्रधानमनुरुध्यते ॥ प्रधानविषया शक्तिः प्रत्ययेनाभिधीयते । यदा गुणे तदा तद्वदनुक्तापि प्रतीयते, इति ॥ कथं वान्यथा तेषां पक्त्वौदनो भुज्यते देवदत्तेनेत्यत्र न द्वितीया । पाककियाकर्मणोनभिहितत्वात् । अपि च । वाचकत्वे कर्तुः समाने कर्तरीति ब्रूयात् । अत एव च क्त्वादीनां नानार्थत्वमप्ययास्तम् । किं च पूर्वकालजन्यत्वादेर्वाच्यत्वे कृत्प्रत्ययस्थले प्रत्ययार्थविशेष्यत्वनियमात्तस्यैव विशेष्यत्वापत्तेः । न चेष्टापत्तिः । क्रियाप्राधान्यविरहेणाभीक्ष्ण्यद्वित्वाभावापत्तेः । न च गुणीभूतक्रियामाश्रित्य तदिति वाच्यम् । पाचकादावतिप्रसङ्गात् । धातुसम्बन्धइत्यस्य बाधापत्तिश्च । न च परम्परासम्बन्धस्तदर्थः । गौरवात् । यथाविध्यनुप्रयोग इत्यादौ साक्षात्सम्बन्धपरतायाएव दर्शनात् । तथात्वे लाघवात् । भावे विधायकानुशासनविरोधाच्चेति दिक् ॥ ६० ॥

इति वैयाकरणभूषणे क्त्वादिप्रत्ययार्थनिरूपणं समाप्तम् ॥

प्रागुक्तस्य विचारस्यावास्तवत्वं ध्वनयितुं स्फोटस्यैव वाचकत्वसिद्धान्तमाह ॥

वाक्यस्फोटोतिनिष्कर्षे तिष्ठतीति मतास्थितिः ।
साधुशब्देन्तर्गता हि बोधका न तु तत्स्मृताः ॥६१॥

यद्यपि वर्णस्फोटः पदस्फोटो वाक्यस्फोटो ऽखण्डपदवाक्यस्फोटौ वर्णपदवाक्यभेदेन त्रयो जातिस्फोटा इत्यष्टौ पक्षाः सिद्धान्तसिद्धा इति वाक्यग्रहणमनर्थकं दुरर्थकं च । तथापि वाक्यस्फोटातिरिक्तानामन्येषामप्यवास्तवत्वबोधनाय तदुपादानम् । अत एवाह । अतिनिष्कर्षइति । मतस्थितिर्वैयाकरणानाम् । स्फुटति प्रकाशते ऽर्थो ऽस्मादिति स्फोटो वाचक इति यावत् । तथा च वर्णस्फोटादिपदानां वर्णादयो वाचका इत्यर्थः । तत्र क्रमेण सर्वान् तान्निरूपयन्वर्णस्फोटं प्रथमत आह । साधुशब्दइति । साधुशब्दे । निष्कुषूपदे रामः भवतीत्यादौ । अन्तर्गताः विसर्गेतिवादयः । बोधकाः वाचकाः । बोधकत्वमेव शक्तिरित्यधस्ताद्विवेचितत्वात् । न तु तैः स्मृताः स्वादयो लादयश्चेत्यर्थः । प्रयुज्यमानपदसमभिव्याहारानन्तर्गता वर्णा वाचका न वा इत्येवात्र विप्रतिपत्तिशरीरमिति भावः । अत्र विधिकोटिः परेषां निषेधकोटिरस्माकम् ॥ ६१ ॥

अत्र दर्शनान्ताराभिनिवेशिनः प्रयोगसमवायिनस्तिबादयो न वाचकास्तेषां बहुत्वादनन्तशक्तिकल्पनापत्तेः । शक्तावच्छेदकत्वकल्पनाप्यनेकेषु स्यादिति गौरवं च । किं तु तैः स्मृत आदेशिनो लकारा वाचका लत्वस्य जातिरूपतयाँ तस्या एव शक्तावच्छेदकत्वौचित्यात् । न चैवं भू ल इत्यतोपि बोधः स्यात् इति वाच्यम् । तादृशबोधे पचतीत्यादिसमभिव्याहारस्यापि कारणत्वात् । अन्यथा भतिवेत्यतोपि बोधापत्तेः । न चैवमपि तानजानतां बोधो न स्यादिति वाच्यम् । तेषां तिङ्ष्वेव शक्तिभ्रमाद्बोधात् । अपभ्रंशाद्बोधस्थले कल्पनात् । अथैवं शब्दादिस्थले कर्तृकर्मणोर्वाच्यत्वं न स्यात् । स्याच्च कृतिमात्रं तथा

वाचकस्य स्थानिनो लकारस्य तिङ्पदादिव तुल्यत्वादिति चेन्न। तत्र लकारस्य कृतिमात्रमर्थः कर्त्ता च ज्ञानजन्यर्थः कर्त्तरि-कृदित्यनुशासनात्। तथा च नोक्तदोषः। नामार्थयोरभेदानुरोधादस्तु वा तत्र कर्तैवार्थस्तस्मान्न श्रूयमाणानां वाचकतेति न वर्णस्फोटो युक्त इति वदन्ति। तान्स्वोक्तं व्यवस्थापयन् निराचष्टे ॥

व्यवस्थितेर्व्यवहृतेस्तद्धेतुन्यायतस्तथा।
किं चाख्यातेन शत्राद्यैर्लडेव स्मार्यते यदि ॥६२॥
कथं कर्तुरवाच्यत्ववाच्यत्वे तद्विभावय।

स्मृतानां वाचकत्वे ऽव्यवस्था। तथाहि। राम इत्यत्र विसर्गेण किं सिः स्मर्तव्यः किं सुः किं वा रुः। कालापिनां सिः। आस्माकीनैः सुः। अपरैश्च रुः। तथा च येनेदानीं सर्वमधीतं तस्य विनिगमनाविरहेण प्रतिबन्धः स्यादिति सम्प्रदायविदः। तच्चिन्त्यम्। तेषां लिपिवदननुगमेपि क्षत्यभावात्। अत एव घटपदात्कलशपदाद्वा बोधे न कश्चिद्विशेषः। अत एव णलादिस्थले तिबादिस्मरणद्वारा लकारस्मरणम्। लडादौ साक्षादित्यव्यवस्थेति परास्तम्। अप्रयोजकत्वादिति। तस्माल्लकारस्य वाचकत्वे लकारमविदुषो बोधो न स्यात्। वाचकाज्ञानात्। न च तिङ्ष्वेव शक्तिभ्रमात्ततो बोधः। तस्य भ्रमत्वे मानाभावात्। बहूनामानुपूर्व्याः शक्तावच्छेदकत्वादिकल्पनापत्तिर्मानमिति चेन्न। तवापि पूर्वोक्तक्रमेणादेशिनां नानात्वेन गौरवस्य तुल्यत्वात्। पदतदर्थघटितशक्तेर्भ्रमस्य, भ्रमेणाप्युपपादयितुमशक्यत्वाच्चेत्यव्यवस्था। यद्वा। राम इत्यादौ वादिभेदेनादेशिनां नानात्वात्कः शक्यः को वा नेति

नियामकाभाव एवाव्यवस्था। आदेशानां तु नियतत्वान्नायंदोष इति सुधियां पन्थाः। साधकान्तरमाह। व्यवहृतेरिति। व्यवहारस्तावच्छक्तिग्राहकशिरोमणित्वेन सर्वैर्मन्यते। स च श्रूयमाणतिङादिष्वेवेति तएव शक्तास्तथा च गौरवं प्रामाणिकमिति भावः। किं च तद्धेतुन्यायत इति। अयं भावः। लकारस्य बोधकत्वे भू ल इत्यतोपि बोधः स्यात्। तादृशबोधे पचतीति समभिव्याहारोपि कारणमिति चेत्। अस्तु तर्ह्यावश्यकत्वात्समभिव्याहारस्यैव वाचकत्वशक्तिः। तत्रापि तादृशवर्णसमभिव्याहारो वा समभिव्याहृता वर्णा वा वाचका इत्यत्र विनिगमनाभावात्प्रत्येकावृत्तिनः समुदायावृत्तित्वाच्च समभिव्याहृता वर्णा एव वाचकाः। न च द्वित्ववत्प्रत्येकावृत्तित्वेपि तत्सम्भवः। तत्रापि प्रत्येकं समवायेन वृत्तित्वस्वीकारात् इति। केचित्तु आदेशेनादेशी स्मार्यते तेनार्थो बोध्यतइति मते येस्मन्मते वाचकतावच्छेदकास्ते तन्मते स्मारकतावच्छेदका वाच्यास्तथा च तद्धेतुरिति न्यायेन तएव वाचकतावच्छेदका इति भावः। न च येन केन चिद्रूपेण स्मारकत्वमिति शङ्क्यम्। अतिप्रसङ्गादित्याहुः। अत एवोक्तलाघवाल्लकारो वाचक इति निरस्तम्। लकारस्योभयत्रापि साम्यात्कृत्तिङोः कर्तृभावनावाचकत्वनियमो भवत्सिद्ध एव न स्यादित्याह। किं चेति। आदेशानां वाचकत्वे तु तेषा नानात्वादुपपद्यते ऽयं विभाग इति भावः। यत्तु शानजादिभिर्भिन्नया शक्त्या कर्ता उपस्थाप्यतइति। तच्चिन्त्यम्। तेषां कर्त्तरि भिन्नशक्तेरसिद्धेः। कर्त्तरिकृदिति च नात्र प्रवर्तते इति विवेचितं द्वितीयकारिकायाम्॥

ननु नामार्थयोर्भेदेनान्वयायोगाच्चैत्रः पचमान इत्यादावन-

न्वयवारणाय कर्ता वाच्यः स्यादित्यत आह ॥

तरबाद्यन्तातिङ्क्वास्ति नामता कृत्स्विव स्फुटा ॥६३॥
नामार्थयोरभेदोपि तस्मान्तुल्योवधार्यताम् ।
अथादेशा वाचकाश्चेत्पदस्फोटस्ततः स्फुटः ॥६४॥

पचतितरां मैत्रः पचतिकल्पं मैत्र इत्यादिग्रहणाल्लभ्यते । अत्रातिशयपाकानुकूलभावनाया, ईषदसमाप्तपाकानुकूलभावनायाश्च समं मैत्रस्याभेदासम्भवात्तदर्थं कर्ता वाच्यस्तिङामपि स्यात् । नामार्थत्वस्याविशेषादित्यर्थः । अथ तरबन्तं नाम न तरबेवेति चेत्तर्हि पचमान इत्यत्र शानजन्तं नाम न शानज्मात्रमिति तुल्यम् । न च पचतिकल्पमित्यादौ कर्त्तरि लक्षणा । पचमान इत्यत्राप्यापत्तेः । न च शानच्प्रत्ययस्यान्यत्र शक्त्यनिर्णयः । भावनायामेवाख्यातवच्छुद्धपचमानइतिप्रयोगस्थले कल्पत्वात् तस्य तिबादिवाचकत्वेन लकारस्यैवोभयत्र लाक्षणिकत्वेति । तस्मात्समभिव्याहृतवर्णानामेवोक्तलाघवादन्यथाबाधकाच्च वाचकत्वमिति सिद्धम् । अथ लः कर्मणीत्यनेन लकारस्यैव वाचकत्वकथनात्तिङोऽवाचकत्वस्य केनाप्यबोधनाच्च लकार एव वाचको न तिङ् तिङां लादेशत्वेनैव कर्त्राद्यर्थकत्वस्य प्राक् व्युत्पादितत्वाच्चेति चेत्सत्यम् । बोधकत्वरूपायाः शक्तेर्वस्तुतस्तिङादिनिष्ठाया एवानुशासनलाघवाय कल्पिते लकारे कल्पितत्वात्तदादायैव प्राचीनव्युत्पादनमप्यविरुद्धमिति दिक् ॥

इति वर्णस्फोटनिरूपणम् ॥

एवं सिद्धे समभिव्याहृतवर्णस्य वाचकत्वे पदस्फोटोपि सि-

द्ध एवेत्याह । अथेति । आदेशाः तिब्विसर्गणलादयः । पद-स्फोटः, पदं वाचकमित्यर्थः । अयमभिप्रायः । अर्थबोधानुकूला शक्तिर्वर्णसमूहे एव न प्रत्येकं, तथा सति धनं वनमित्यादौ नलोपापत्तेः । प्रत्येकं वर्णानामर्थवत्त्वेन प्रातिपदिकत्वे सिद्धे नलोपः प्रातिपदिकान्तस्येति नस्य तदन्तपदत्वात् । तथा प्रत्येकं सुबुत्पत्तौ श्रवणापात्तिः । किं च प्रत्येकं शक्तिमत्त्वे प्रत्येकं वर्णादर्थबोधापत्तिः । सर्वेषां वाचकशक्तिमत्त्वात् । घटकलशपदाभ्यामिव । तथा द्वितीयादिवर्णोच्चारणानर्थक्यमपि स्यात् । अथ प्रत्येकं वर्णैरर्थस्मरणं जन्यते । चरमेण पुनः स्पष्टं जन्यतइति वाच्यम् । न च प्रत्यक्षे वैजात्यं सम्भवति न स्मरणइति वाच्यम् । बाधकाभावेन तत्राप्यभ्युपगमात् । अत एव निर्विकल्पकं स्मरणं मेनिरे इति चेन्न । प्रतिवर्णमर्थस्मरणस्यानुभवविरुद्धत्वात् मानाभावाद्गौरवाच्च । तस्मात्प्रकृतिप्रत्ययादौ तत्तत्समूहे शक्तिर्व्यासज्यवृत्तिर्न तु प्रत्येकवर्णपर्याप्तेति । एतच्चादेशानामवाचकत्वे न सिद्ध्यतीत्युक्तमथेतीति दिक् ॥ ६४ ॥

सुप्तिङन्तं पदमिति स्वशास्त्रपरिभाषितपदस्यापि वाचकत्वमिति स्वीकर्तॄणां मतमाह ॥

घटेनेत्यादिषु नहि प्रकृत्यादिभिदा स्फुटा ।
वस्नसादाविवेहापि सम्प्रमोहो हि दृश्यते ॥६५॥

प्रकृत्यादिभिदा प्रकृतिप्रत्ययभेदो नञतो न प्रत्येकं ताभ्यामर्थावगमोत्तरं विशिष्टबोधस्तथा चावश्यकैव समूहशक्तिरिति शेषः । अयमर्थः । घटेनेत्यत्र घट इति प्रकृतिः । एनेति प्रत्यय इति वा । घट इति प्रकृतिर्नेति च प्रत्यय इति वेत्यत्र नियामकाभाव इति । नन्वत्र टाङसिङसां नात्स्या इत्येव भाष्ये कथितत्वात्

घटेनेत्यादौ नेत्येव प्रत्यय इत्यस्य सुवचत्वात् नोक्तानुपपत्तिः, वैयाकरणैः सुखेन ज्ञातुं शक्यत्वाच्चेत्याशयेनाह। वस्नसादाविति। बहुवचनस्य वस्नसावित्यतः समुदायस्यैव तद्विधानान्न तद्विभागो ज्ञातुं शक्य इत्यर्थः। वस्तुतो ऽवैयाकरणानां प्रत्येकं तदज्ञानेपि समुदाये व्युत्पन्नानां बोधदर्शनात् घटेनेत्यादावप्यनुपपत्तितादवस्थ्यम्। न च तेषां शक्तिभ्रमसम्भव इत्यसकृदावेदितमित्याशयेनाह। इवेत्यादि॥ ६५॥

एवंरीत्या वाक्यस्फोटमप्याह॥

हरेवेत्यादि दृष्ट्वा च वाक्यस्फोटं विनिश्चिनु।
अर्थे विशिष्य सम्बन्धाग्रहणं चेत्समं पदे॥६६॥
लक्षणादधुना चेत्तत्पदेर्थेप्यस्तु तत्तथा।

अत्रादिना विष्णोवेत्यादि गृह्यते। अत्र पदयोः स्पष्टपज्ञानेपि समुदायव्युत्पत्त्या बोधादावश्यिकैव समुदायशक्तिरिति भावः। ननु वाक्यस्य प्राक्छक्तिग्रहासम्भवो वाक्यार्थस्यापूर्वत्वादित्याशंक्य समाधत्ते। अर्थइति। पदनिष्ठैव वाक्यार्थबोधानुकूला वृत्तिरिति पक्षेपि सममेतदित्यर्थः। अयमाशयः। येषां मते वाक्यार्थो लक्ष्यो येषां वान्विते शक्तिस्तेषामपि प्राक् तदनुपस्थितेर्वृत्तिग्रहासम्भवात्कथं निस्तारः। अथ पदैः पदार्थानामुपस्थितावाकांक्षाज्ञानसाचिव्यात्तत एव वाक्यार्थोपस्थितावपि वृत्त्यानुपस्थितत्वान्न स बोधः शाब्द इति मध्ये लक्षणाग्रहः। प्रागविज्ञातहरिद्रानामकनदीविशेषेण हरिद्रायां नद्यांघोष इति श्रुते वाक्ये नदीपदसमभिव्याहारेण तदानीमेव हरिद्राशब्दस्य नदीविशेषशक्तिग्रहणेन नदीलिङ्गात्तत्सम्बन्धित्वेनावगततीरम-

त्ययवादिति परिमलोक्तरीत्या वाच्यम् । समं तर्ह्यस्माकमपीति । यदि चान्विते शक्तिः परं त्वन्वयांशे सैवाज्ञाता पदार्थांशे च सैव ज्ञातोपयुज्यतइति कुञ्जशक्तिवाद इत्यभ्युपगमस्तर्ह्यस्माकमपि वाक्यशक्तिरज्ञाता पदशक्तिस्तु ज्ञातैव तथेति । नन्वाकांक्षादिसहकारेण जातबुद्धेरेव शाब्दत्वात्तदतिरिक्तशाब्दाभावादाद्यः पक्षो न युक्तः । आकांक्षादिजन्यातिरिक्तशाब्दबोधे प्रमाणाभावात् । किं चैवमनधिगतार्थगन्तृता वेदस्य मीमांसाद्वयसिद्धोच्छिद्येत । अथ प्राथमिकबोधस्य वृत्तिजन्यत्वाभावाच्छाब्दत्वं न सम्भवतीति तज्जातिप्रकारकानुभवादेव बोधान्तरं कल्प्यते । पदजन्यपदार्थोपस्थित्याकांक्षाद्यसहकृतप्रमाणबोध्यबोधकत्वं चाधिगतार्थगन्तृत्वमिति चेत्स्यादेवं यदि बोधद्वयमनुभवसिद्धं स्यात् । अन्यथानुपपत्तेरभावाच्च । किं च वृत्तिजन्यत्वानुरोधेन बोधान्तरकल्पनेन्वितशक्तिरेव सिध्येत् । लक्षणाज्ञानकार्यकारणभावान्तरस्य आकांक्षादिजन्योपस्थित्यन्तरस्य चाकल्पनेन लाघवात् । एवमज्ञाताया वृत्तेरनुपयोगान्न द्वितीयः प्रकारः साधुरित्याशयेन प्रकारान्तरमाह । लक्षणादिति । लक्ष्यते तर्क्यते अनेनेति लक्षणं मनस्तस्मात् । अयमाशयः । वृद्धव्यवहारात्प्राथमिकशक्तिनिर्णयो यथा मनसा । तथा ऽत्रापि पदैः पदार्थोपस्थितौ सत्यां मनसा तदुपस्थितिर्नानुपपन्ना परं तु मानसं ज्ञानं संशयरूपं प्रायो दुर्वारमिति शाब्दादरः । शक्तिग्रहे तु लिङ्गादेर्निर्णायकस्य सत्त्वान्न संशय इति । वस्तुतस्तात्पर्यज्ञानरूपमेवोपस्थितिमादायान्वयांशशक्तिग्रहस्तात्कालिक एव । अत एवाकांक्षादिसहकृतमनसः संशयाजनकत्वेपि न दोष इति ध्येयम् ॥ ६६ ॥

इयमेव मीमांसकानां तदनुयायिनां च गतिरित्याह ॥

सर्वत्रैवहि वाक्यार्थो लक्ष्य एवेति ये विदुः ॥६७॥
भाट्टास्तेपीत्थमेवाहुर्लक्षणाया ग्रहे गतिम् ॥

स्पष्टमेत्। अथ गामानयेत्यादौ पदैः पदार्थानामुपस्थितौ वाक्यार्थज्ञानसम्भवान्मास्तु शक्तिः। न चात्र पदशक्त्यज्ञानोपि समुदायशक्त्या बोधानुभविकानाम्। यन्तु वाक्यमखण्डमेव न पदसमुदाय इति नायं दोष इति। तन्न। अखण्डस्य पक्षान्तरत्वात्। तस्माद्धरेवेत्यत्रैव समुदायशक्तिरिति मतं व्याख्येयम्। वस्तुतस्तु सर्वत्रैव पदैः पदार्था उच्यन्ते वाक्येन वाक्यार्थ इति सिद्धान्तमर्यादा। अत एव समासग्रहणं वाक्येतिव्याप्तिवारणायेति ग्रन्थाः सङ्गच्छन्ते। तथा च पदैः पदार्थानामुपस्थितावपि वाक्यार्थे विना वृत्तिं न शाब्दबोधविषयत्वसम्भव इति समुदायशक्तिराद्रियते। नन्वाकांक्षादिसहकारेण पदान्येव वाक्यार्थबोधकानि भविष्यन्तीति चेन्न। गुरुभूताकांक्षायोग्यतादिज्ञानकारणत्वे मानाभावात्। नन्वेवं घटः कर्मत्वमित्यत्रापि बोधापत्तिः। अयमेति पुत्रो राज्ञः पुरुषोपसार्यतामित्यादौ राजपदस्य पुरुषेण समभिव्याहारानुभवे आकांक्षायां पुत्रेणान्वयापत्तिश्चेति चेन्न। घटः कर्मत्वमित्यादौ शक्तिग्रहसत्त्वे इष्ट एव बोधः। स एव विपरीतव्युत्पन्नः। अन्यस्य तदभावादेव नेति सम्भवात्। अयमेतीत्यादौ तात्पर्यज्ञानाभावान्न बोधः। तस्य तवाप्यावश्यकत्वात्। तदघटितायाः आकांक्षायाः दुर्वचत्वात्। अथ घटमानयेत्यादौ घटपदाम्पदयोः प्रत्येकं गृहीतशक्तिकस्य तादृशानुपूर्वीज्ञानतात्पर्यज्ञानादिमतश्च घटकर्मकानयनमिति बोधाभावात्तादृशबोधे घटपदोत्तरं द्वितीयायास्ततो धातोस्तत आख्यातस्येत्यादिसमभिव्याहारः कारणमित्यादिकार्यकारणभा-

वग्रहवतश्च बोधात्तादृशबोधे तादृशकार्यकारणभावग्रहस्य हेतुत्वावश्यकत्वात्स एवाकांक्षा । एवं चायमेतीत्यादिवारणाय तात्पर्यज्ञानमपि हेतुरिति चेत्तथापि सिद्धो वाक्येस्फोटः । पदज्ञानकार्यकारणभावरूपपदशक्तिज्ञानस्येव तत्समुदायरूपवाक्यज्ञानकार्यकारणभावरूपवाक्यशक्तिज्ञानस्यापि शाब्दे हेतुतायास्त्वयाप्यभ्युपगमात् । एवं च वाक्यशक्तिरेवाकांक्षेति परपरिभाषामात्रमवशिष्यते तदपि तस्यावृत्तित्वेन विरुद्धम् । एवं चैतदनुरोधेनान्वयांशस्य शक्यत्वानिरसनमयुक्तम् । न चैवं समासग्रहणं नियमार्थमित्यसङ्गतम् । गमानयेत्यादिसमुदाये त्वया शक्त्यनभ्युपगमात् । सुबन्ततिङन्तयोश्च प्रत्ययान्तत्वेनैव वारणादिति वाच्यम् । द्वितीयादेर्धातुविशिष्टस्य प्रादिपदिकत्वापत्तेः । तयोरुक्तरीत्या शक्तिसत्वात् । न च धातोः प्रत्ययान्तत्वादप्रत्यय इति पर्युदासापत्तिः । प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदन्तस्य ग्रहणमिति परिभाषया दोषविरहात् । अथ वा गामानयेति वाक्ये एका समुदायशक्तिरस्तु । तथा च नोक्तदोषसम्भावनापि । न च तदज्ञाने ऽपि प्रागुक्तशक्तिज्ञानादेव बोधात्तस्य व्यभिचारः । विशिष्टशक्तिग्रहमात्रेणापि त्वदुक्ततदग्रहे बोधात् । विशिष्टशक्तिग्राहकस्य तदादिवत्कारकविभक्तिविशिष्टपदयोर्विशिष्टयोस्तत्कारकविशिष्टक्रियाबोधकत्वमिति सामान्यतः शक्तिग्रहो ऽनन्तरं पदविशेषसमभिव्याहारे सति तात्पर्यवशात्पदार्थविशेषविशिष्टक्रियाविशेषबोध इत्यभ्युपगमात् । त्वयापि सामान्यतः कार्यकारणभावस्वीकारात्तत्कार्यकारणभावग्राहकस्यैव समुदायशक्तिग्राहकत्वमिति स्वीकारेणैव व्यभिचाराभावाच्च । न चैवमपि तत्तत्समभिव्याहारानन्त्याच्छक्त्यानन्त्यं तवापि तुल्यत्वात् । यदि घटप्रकारकशाब्दबोधमात्रे घटार्थकपदोत्तरविभ-

क्त्यादिजन्योपस्थितिर्हेतुः । एवं विशेष्यतासम्बन्धेन कर्मत्वप्रकारकशाब्दबोधे कर्मत्वार्थकपदप्राग्वर्तिपजन्योपस्थितिर्हेतुरित्यादिसामान्यत एव सर्वत्र कार्यकारणभाव इत्यभ्युपेयते तदात्र पक्षे तत्रतत्र वाक्येनन्तशक्तिकल्पने गौरवमतिरिच्यते चेत्। अस्माकमपि घटमानय पटमानयेत्यादिवाक्येषु सर्वत्रैकैका शक्तिर्वाक्यार्थविषयिण्यस्तु । निरूपितत्वादेः कर्मत्वादीनां सम्बन्धस्यैकत्वात् । घटमानयेत्यादौ पटकर्मकबोधाभावः पटस्य पदादनुपस्थितत्वादुपपद्यते । अस्तु तावदेवं तथापि वाक्यनिष्ठबोधकतायाः शक्तित्वे किं मानमिति चेत् । उच्यते । विषयतासम्बन्धेन शाब्दबुद्धित्वावच्छिन्नं प्रति तेनैव सम्बन्धेन वृत्तिजन्योपस्थितेर्हेतुतैव मानम् । अन्यथा घटमानयेत्यत्र घटपदशक्त्यज्ञानवतोपि तज्ज्ञानवत इव बोधापत्त्या घटशाब्दबोधे घटार्थकपदवृत्तिजन्यज्ञानत्वेन कारणतावाच्येत्यर्थभेदेनानेककोटिकार्यकारणभावकल्पनापत्तावतिगौरवं स्यात् अस्माद्रीत्या घटे विषयतया वृत्तिजन्योपस्थितिरूपकारणाभावान्न शाब्दबोध इति वरमेककार्यकारणभावकल्पनम्। ननु घटत्वविशिष्टघटप्रकारकशाब्दबोधे वृत्तिजन्यघटत्वविशिष्टज्ञानत्वेन हेतुताया घटत्वमानयेत्यत्र घटत्वयोर्विशेषणविशेष्यभावव्यत्यासेन बुद्धस्थले बोधवारणाय वाच्यतया तत एव नोक्तातिप्रसङ्गः । न च न्यायनये पटमानयेति वाक्यसमभिव्याहृता विभक्तिकघटपदस्थले बोधवारणायावश्यकेन घटत्वविशिष्टघटप्रकारकशाब्दबोधत्वावच्छिन्न घटार्थकपदोत्तरसार्थकविभक्तिनिपातादिजन्योपस्थितेर्हेतुता रूपाकांक्षाकार्यकारणभावेनैवानतिप्रसङ्ग इतिवाच्यम् । घटार्थकत्वं हि घटबोधफलोपहितत्वं, अन्यथा लाक्षणिकघटपदाद्घटबोधापत्तेः, तथाच वृत्त्या तद्बोधकपदजन्यज्ञानत्वेन कारणत्वेनैवान-

तिप्रसङ्गात्पृथक्वृत्तिज्ञानस्य हेतुत्वे मानाभावादिति चेन्न। अनन्तकार्यकारणभावे वृत्तिप्रवेशे गौरवमपेक्ष्याकांक्षायां पदजन्यज्ञानत्वेनैव प्रवेशस्योचितत्वात्। तथा च घटपदादाकाशस्य समवायेन देवदत्तयज्ञदत्तादेश्च जनकतयोपस्थितस्य शाब्दबोधविषयतापत्तेर्वारणाय विषयतया शाब्दबोधत्वावच्छिन्ने वृत्तिजन्योपस्थितेस्तथाहेतुत्वमावश्यकम्। अस्माकं पदैः पदार्थानां वाक्याद्वाक्यार्थस्य बोधाभ्युपगमाद्विशेषणविशेष्यभावव्यत्यासासम्भवाच्च। यथोपस्थितानामेव वाक्यशक्त्या संसर्गबोधात्। यत्तु घटशक्तं पदं घटान्वयबोधं जनयतीत्येव नियमस्वीकारान्नानुपपत्तिरिति। तन्न। एवमपि वृत्तिज्ञानकार्यकारणभावानुरोधेन शक्तिकल्पनावश्यकत्वात्। उक्तरीत्यैवोपपत्तौ घटान्वयबोधं प्रति घटशक्तपदज्ञानत्वेन हेतुतेत्यनेककार्यकारणभावान्तरकल्पने गौरवाच्च। न चैवमपि पदार्थशाब्दत्वमेव वृत्तिज्ञानकार्यतावच्छेदकं वाच्यमिति वाच्यम्। संसर्गस्यापि वाक्यार्थसंसर्गादिपदार्थत्वात्। तत्तत्समभिव्याहृतपदार्थबोधत्वमवच्छेदकमित्यपि न। अनन्तकार्यकारणभावप्रसङ्गात्। अथ विशेष्यत्वप्रकारत्वादिसम्बन्धेन शाब्दबोधत्वमेव वृत्तिज्ञानकार्यतावच्छेदकमस्तु। तेन च सम्बन्धेन न शाब्दत्ववाक्यार्थांशे अतो न तत्र वृत्तिः कल्प्या। तत्र लाघवाद्विषयतैव तत्कार्यतावच्छेदिका। तस्या एकस्यास्त्रितयसाधारणाया अभावात्। विशेष्यत्वादित्रय्येव सामान्यशब्देनाभिधीयते। विशेष्यादित्रितयव्यवहारानुरोधेन विषयतात्रयस्यावश्यकत्वात् इति चेत्, मैवम्। ज्ञानातिरिक्तविषयतायामानाभावात्तज्ज्ञानसम्बन्धेन शाब्दत्वस्यैव कार्यतावच्छेदकत्वात्। तत्तद्विषयविशिष्टज्ञानस्यैव विशेष्यत्वादिरूपत्वात्। अतिरिक्तविषयतापक्षेप्येवमेव व्यवहारवैलक्षण्योपपत्तौ त्रैविध्यानौचि-

त्यात्। एवं च तत्रैव विशेष्यप्रकारविशिष्टविषयतायाः सम्बन्धत्वे विपरीतं गौरवं स्यात्। दण्डीति बोधोत्तरं दण्डिमानिति बोधात्तज्जनकतावच्छेदिका नायं दण्डीत्यादिज्ञानप्रतिबन्धकतावच्छेदिका च दण्डीत्यत्र दण्डपुरुषसंयोगसाधारण्येका विषयता वाच्या। सैव शक्तिज्ञानकार्यतावच्छेदिकास्ताम्। अत्र दण्ड इतिशब्दादयं दण्डीत्यादिवारणं तु वाक्यशक्त्यैवेत्यपि वदन्ति। एवं सत्यपि यद्यशब्दार्थ एव वाक्यार्थस्तर्हि पदार्थोपि तथैव स्यात्। उक्तं हि वाक्यपदीये। "अशाब्दो यदि वाक्यार्थः पदार्थोपि तथा भवेत्। एवं सति च सम्बन्धः शब्दस्यार्थेन हीयत" इति॥ तस्माद्वाक्यार्थवाचकं वाक्यमिति सिद्धम्। अत एव तस्य वाक्यार्थत्वाकिंवदन्ती सङ्गच्छतइति विभावयामः। माध्वास्तु, न वाक्यार्थबोधकतया वाक्यस्फोटसिद्धिः पदानामेवान्विताभिधायकत्वात्। पदैरेवार्थप्रतीत्युपपत्तौ तत्र मानाभावात्। तदेतत्तृतीयाध्यायद्वितीयचरणसमाप्तावुक्तमनुव्याख्याने। "कर्तृकर्मक्रियाणां तु पूर्तौ कोन्योन्वयो भवेत्। अपूर्तिश्चेत्पदैरुक्तैः किं नृशृङ्गेण पूर्यत" इति। अत्र जयतीर्थः। कर्मेत्युपलक्षणं जिज्ञासितानां पदार्थानामित्यर्थः। भवेत्। प्रतिपादनीय इति शेषः। स्फोटमन्वयप्रतिपादकं वदता तत्र प्रमाणं वाच्यम्। तच्च न। अन्वयबोधस्य पदैरुपपत्तेरिति भावः। एवमनङ्गीकारे बाधकमाह। अपूर्तिरिति। अन्वयस्येत्यादि। नृशृङ्गेण। स्फोटेन। अप्रमाणकत्वात्तत्साद्दश्यम्। पदादन्वयबोधवादिनो लाघवं पदानामावश्यकत्वात्, स्फोटवादिना गौरवं निष्प्रमाणकस्फोटस्य तस्यान्वयबोधकत्वस्य च कल्पनीयत्वादितिं भाव इति व्याचख्यौ। तस्माद्वाक्यार्थप्रतीत्यर्थं न स्फोट इत्याहुः। तदेतत्तुच्छम्। पदानामेवान्विताभिधायकत्वं घटादिपदमितरान्वितघटे

शक्तामिति व्युत्पन्नस्यापि घटमित्यानुपूर्वीज्ञानतात्पर्यज्ञानादिमते-
पि च घटकर्मकानयनमिति बोधः प्रागुक्तकार्यकारणभावग्रहा-
भाववतोपि भवेत् । न चेष्टापत्तिः । विशेषणविशेष्यभावे विनि-
गमनाविरहात्सामान्यत एव शक्त्या चेतरान्वितो घटः, इतरान्वितं
कर्मत्वमित्येवापत्तेः । न घटीयं कर्मत्वमिति । तथा शक्त्यनङ्गी-
कारात् । घटः कर्मत्वमानयनं कृतिरित्यत्रेतरान्विते कर्मत्वे तादृशे
आनयने इत्यादिशक्तिग्रहवतो बोधापत्तेश्च । अत एव तत्रैवानु-
व्याख्याने " यदा शेषविशेषाणामुक्तिः सामान्यतो भवेत् । प-
दैकेनाप्युत्तरेण विशेषावगतिर्भवेत् ॥ अतः सामान्यतो ज्ञातः प-
दान्तरवशात्पुनः । भवेद्विशेषतो ज्ञातस्तेन स्यादन्वितोक्तिते"-
ति प्रथमाध्याये चोक्तं सुधायाम् । शक्तिश्चैवान्विते स्वार्थे इति
कारिकाव्याख्यायां विशेषान्वयप्रतिपत्त्यर्थं पदान्तरसमभिव्या-
हारोपयोग इति, पदान्तरसमभिव्याहाराद्विशेषप्रतिपत्त्युपपत्तेरि-
ति चेति । तस्मात्तादृशसमभिव्याहारकार्यकारणभावावश्यकत्वे
मास्तु पदानामन्विते शक्तिरिति सिद्धम् । किं च । सखण्डवाक्य-
स्फोटखण्डनमेतदखण्डस्य वा । नाद्यः । पदसमूहरूपस्य तस्य
नृशृङ्गतुल्यतोक्तिविरोधापत्तेः । नान्त्य इति तु वक्ष्यते । तस्मा-
त्स्फोटपदश्रवणमात्रात्खण्डनं तन्मताज्ञानविजृम्भितमेवेति ध्येयम् ।
एतेन कार्यान्विते शक्तिरपास्ता । के चित्तु पदानामन्विताभि-
धायकत्वे घटमानयेत्यत्र बोधचतुष्टयापत्तिः । इतरान्वितो घटः,
तथा कर्मत्वं, तथैवानयनं, तथैव कृतिरिति । न च तवापि चैत्रो
घटमानयतीत्यादौ घटीयं कर्मत्वं तदीयमानयनं तदीया कृतिस्तद्वां-
श्चैत्र इति विशेष्यभेदप्रयुक्तवाक्यभेदापत्तिः । अस्माकं सशक्यो भ-
वतां पुनरशक्योप्याकांक्षादिलभ्य इत्यत्रैव विशेषादिति वाच्यम् ।
नहि विशेष्यभेदादावृत्तिमापादयामः किं तु शक्तिभेदात् । मम तु

घटप्रकारककर्मत्वविशेष्यकशाब्दबोधे घटपदोत्तरं द्वितीया इत्यादिकार्यकारणभावनानात्वविरहान्न दोष इत्याहुः। एतेन यन्नृसिंहाश्रमैस्तत्त्वविवेकादावुक्तम्। वृत्तिं विना शाब्दबोधविषयत्वासम्भवाद्वृत्तिर्वाक्यार्थविषयिणी स्वीकार्या। सा चातिरिक्ता गौरवान्नेति क्लृप्तपदार्थशक्तिरेव तद्विषयिणी कल्प्यते। पदानामन्वयसामान्ये शक्तौ तु विशेषमविषयीकृत्य सामान्यबुद्धेरपर्यवसानात्तत्तत्पदसामान्यशक्तिभिरेव समभिव्याहृतपदोपस्थापितपदार्थविशेषनिरूपितान्वयविशेषः सेत्स्यतीत्येकशक्तिलाघवम्। किं चैकपदप्रयोगेप्यन्वयविशेषस्य नियमेन जिज्ञासादर्शनात्तस्याश्चान्वयसामान्यज्ञानपूर्वकत्वात्तज्ज्ञानस्य च शब्दादन्यतो ऽसम्भवाच्छब्द एवान्वितमभिधत्तइति वाच्यम्। दृष्टे जम्बीरफलादौ रसविशेषजिज्ञासावद्भविष्यतीति चेन्न। तत्र नियमेन तदभावात्। अन्यथा वैशेषिकमतइव व्याप्तिप्रतिसन्धानदशायामेव शब्दादर्थसंसर्गः प्रतीयतइति शब्दोप्यप्रमाणं स्यात् इति। यदप्यपरे, अन्वयांशे शक्त्यनभ्युपगमे घटः कर्मत्वमानयनं कृतिरिति पदजातादन्वयधीः स्याद्योग्यतादेः सत्त्वात्। न चैतादृशं पदजातं शिलाशकलमिवांकुरस्वरूपायोग्यम्। एवं सति विपरीतव्युत्पन्नस्यापि बोधानापत्तेः। न च शक्तिभ्रमात्तस्यान्वयधीः। स्वरूपायोग्यस्य सहकारिशतकेनापि कार्याजनकत्वात्। तस्मात्स्वरूपयोग्यमेवान्वयांशे शक्तिज्ञानरूपसहकारिसत्त्वाद्विपरीतव्युत्पन्नं प्रत्यन्वयबोधकम्। अन्यं प्रति तद्राहित्यान्नेत्यन्वयांशे शक्तिरवश्यमुपेयेति विवरणाचार्यानुयायिनो वदन्ति। तदप्यपास्तम्। बोधकतारूपायाः शक्तेरन्वयबोधस्यापि जायमानत्वात्तदंशे स्वीकार आवश्यक इति सत्यम्। परं तु सा वाक्ये एव स्वीकर्तव्या न तु पदे। तथा सति समभिव्याहारोपि कारणमि-

तितज्ज्ञानस्य हेतुत्वे गौरवापत्तिरित्युक्तम्। घटः कर्मत्वमित्यादावाकांक्षाज्ञानविरहाद्बोधविरहः । अन्वयांशे शक्तिज्ञानवतोऽप्यबोधाच्चेत्युक्तम्। एवं जिज्ञासानुरोधादन्वयसामान्ये शक्तिरित्यप्यसङ्गतम्। दृष्टे समीचीनफले रसादिजिज्ञासावदुपपत्तेः । तर्हि तद्वदेवात्रापि जिज्ञासानियमो न स्यादिति चे, दिष्टापत्तेः। किं चैवं ह्यन्वयो विशेषरूपेण शक्यः स्यात्। जिज्ञासायास्तथात्वात्। ज्ञानेच्छयोः समानप्रकारकत्वेन हेतुहेतुमद्भावात् । अन्यथा द्रव्यत्वादिना ज्ञाते सुवर्णत्वादिना ऽज्ञाते तेन रूपेणेच्छापत्तेः। नन्वेवं सति जिज्ञासोच्छेदः । येन रूपेण ज्ञानं वृत्तं तेन रूपेण सिद्धिसत्त्वादिच्छाया असंभवात्। येन च रूपेण न ज्ञातमेव तेन रूपेण कारणाभावेनासम्भवादिति चेन्न । सिद्धत्वज्ञानस्यैव सर्वत्र प्रतिबन्धकत्वात् तदभावादेव जिज्ञासोपपत्तेः। घटो मेस्त्वितीच्छायामसिद्धेपि तस्मिन् तत्सिद्धत्वाज्ञानादिनेच्छानिवृत्तेर्दर्शनात्। न च येन रूपेण यत्रेच्छा तेन रूपेण सिद्धत्वधीरेव प्रतिबन्धिकेत्यपरत्रास्तु। अत्र तु सा सिद्धिरेव प्रतिबन्धिका कल्प्यतां लाघवात् । घटज्ञानं मे जायतामितीच्छायां जाते तस्मिंस्तत्सिद्धत्वप्रतिसन्धानमन्तरेणैवेच्छानिवृत्तेरानुभविकत्वादन्यथा गौरवाच्चेति वाच्यम्। चैत्रस्य ज्ञानं भवत्वितीच्छायामजाते च तस्य ज्ञानं जातमिति सिद्धत्वज्ञानादिच्छानिवृत्तेः सर्वानुभवासिद्धाया अपलापापत्तेः। सिद्धेर्व्याधिकरणत्वेन प्रतिबन्धकत्वासम्भवाच्च। तदानीं मे ज्ञानं भवत्वितीच्छायां तदानीं मे जातमित्यादिकालान्तरीयज्ञानविषयकसिद्धत्वज्ञानेनापि प्रतिबन्धाच्च। तस्मान्न जिज्ञासानुपपत्तिः । अथ वा पूर्वं विशेषतः संसर्गावगमेपि स आपातरूप एव । कथमन्यथा ब्रह्मजिज्ञासा स्यात्। प्रपञ्चितं चैतद्विवरणतत्त्वविवेकादावेवेति ध्ये-

यम् । एतेन सामान्यतो ज्ञाते विशेषतो जिज्ञासेति वदन्तः सर्वेऽप्यपास्ताः । तथा च सामान्यतोन्वयः शक्य इत्यसङ्गतम् । अथ सामान्यतोन्वयः शक्यस्तेनानुमिते विशेषे जिज्ञासेति नोक्तदोष इति चेन्न । तथासत्यनुमानेन संसर्गोपस्थित्यैवोपपत्तेः शब्दप्रामाण्योच्छेदप्रसङ्गात् । अन्यथा वैशेषिकमतइवेति स्वोक्तिविरोधश्च । पदार्थैरेवानुमिते विशेषे जिज्ञासासम्भवाच्च सामान्यतोऽप्यन्वयस्याशक्यत्वं स्यात् । अपि च पदार्थवाक्यार्थयोर्नियमस्य पूर्वं ग्रहात्फलविशेषदर्शनाद्रसविशेषस्येव जिज्ञासानुपपन्ना । न चैवं शब्दस्यापि भवद्रीत्यैव प्रमाणत्वं न स्यादित्युक्तमिति वाच्यम् । न भवेदेव यदि नानुमितं न साक्षात्कृतं किं तु शाब्दादेवावगतमित्यनुभवो न स्यात् । तथा चैतादृशानुभवादाकांक्षाज्ञाननिर्वाह्यविशेषणविशेष्यभावाद्यनुरोधाच्च शब्दः प्रमाणान्तरम् । न त्वत्र भवद्रीतिः साध्वी । पठितविस्मृतशास्त्रस्य बोधादर्शनाच्छक्तिस्मरणमुद्बुद्धः शक्तिसंस्कारो वा हेतुरिति मतद्वयेपि भवन्मते स्वातन्त्र्येण तत्प्रामाण्यासिद्धेः । तथाहि बोधकत्वं हि शक्तिरिति विवरणाचार्यादिभिरुक्तम् । तच्च बोधकारणत्वन्तच्च शब्दस्य स्वज्ञानद्वारा लिङ्गस्यैवानुमितौ । तथा च कारणतायां व्याप्तित्वात्तज्ज्ञानं व्याप्तिज्ञानमेवेति कथं नानुमानविधया प्रामाण्यम् । उद्बुद्धो व्याप्तिसंस्कार एव हेतुरिति स्वीकर्तॄणां भवतां परं सुतरां दोषः । तस्मात्प्रमाणान्तरेण संसर्गोपस्थित्यसम्भवात्तत्र शक्तिरित्ययुक्तमेवेति दिक् । यत्तु पदार्थास्तत्स्मृतिर्वा शाब्दबोधे हेतुर्न तु पदज्ञानं वाक्यज्ञानं वा । व्यभिचारात् । उक्तं हि । " पश्यतः श्वेतमारूपं ह्रेषाशब्दं च शृण्वतः । खुरविक्षेपशब्दं च श्वेतोश्वो धावतीति धीरिति ॥ तन्न । तथा सति चक्षुरादिना पदार्थोपस्थितौ शाब्दबोधा-

पत्तेः । शब्देनायमर्थो बुद्ध इत्यनुभवाच्च । पश्यत इत्यादावशाब्दत्वानुभवादनुमानेनैव निर्वाहाच्चेति दिक् । तस्माद्वाक्यार्थबाचकं वाक्यमिति सिद्धो वाक्यस्फोटः । नन्वेवं पदार्थवद्वाक्यार्थोपि नानुभूयेतेति चेन्न । न तावद्वाक्यार्थप्रतीतिरनुभवः । स्वर्गनरकादिकं शृण्वतोपि स्वर्गं नरकं वानुभवामीत्यप्रतीतेः किंतु स्मृतित्वादिव्याप्यमन्यथा वा शाब्दत्वादिकं जातिरनुभवबलात् । तत्कारणं पुनरुक्तरीत्या वाक्यज्ञानमिति । नन्वेवमपि न पदज्ञानवाक्यज्ञानयोः सम्भवः । उत्पत्तिपक्षे एकदा तदभावात् । अभिव्यक्तिपक्षेप्येकदा तदभावात् । तथा च न वर्णसमूहरूपपदप्रत्यक्षं सुतरां तत्समूहरूपस्य वाक्यस्येति चेन्न । दर्शनान्तरेप्युक्तदोषतादवस्थ्यात् । अथ प्रत्येकवर्णानुभवजनितसंस्कारसहकृतेनान्त्यवर्णप्रत्यक्षसमये सदसदनेकविषया पदप्रतीतिरेवं वाक्यप्रतीतिश्चोपपद्यतइति मतम् । तच्चिन्त्यम् । एवं हि गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्रेव वाक्यज्ञाने समूहालम्बनरूपे विशेषाभावाद्बोधापत्तेः । सरो रसः नदी दीन जरा राजेत्यादावप्युपस्थितेस्तुल्यत्वाद्बोधाविशेषापत्तेश्चेति । यत्तु जयतीर्थेनोक्तम् । अनुभवक्रमोपहितानामेव तेषां स्मृत्यावगाहनान्न क्रमव्युत्क्रमयोरविशेष इति । तत्तुच्छम् । अनुभवस्मृत्योः क्रमे नियमाभावात् । दृश्यते च प्रपूर्वेद्युरनुभूतस्य स्मरणम् । किं च संस्कारस्मरणयोः समानविषयत्वात्क्रमस्य च संस्काराविषयत्वेन न स्मरणविषयत्वम् । एवं च समूहालम्बनरूपं स्मरणमपि घकाराकारटकारा इति भवेन्न तु घट इत्येतादृशमिति । अथोत्तरवर्णप्रत्यक्षकाले ऽव्यवहितोत्तरत्वसम्बन्धेन पूर्वपूर्ववर्णवत्त्वमुत्तरोत्तरवर्णे, एवं तदुत्तरवर्णप्रत्यक्षकाले उपस्थितविशिष्टतद्वर्णवत्त्वमुत्तरवर्णे सुग्रहमिति तादृशानुपूर्वीघटितं पदत्वं सुग्रहमेवं वा-

क्येपीति मतम्। समभेतदस्माकमपीति एतेनैतदनुपपत्त्या ऽख-
ण्डस्फोटाभ्युपगमः कैयटोक्तो न श्रद्धेयः ॥

इदानीमखण्डपक्षमाह ॥

पदे न वर्णा विद्यन्ते वर्णेष्ववयवा न च ॥६८॥
वाक्यात्पदानामत्यन्तं प्रविवेको न कश्चन ।

पदे पचतीत्यादौ न वर्णाः। तत्र दृष्टान्तव्याजेनाह। वर्णे-
ष्विति। यथा न वर्णेष्ववयवास्तथेत्यर्थः। इवेति पाठः सुगमः।
एवं वाक्येप्याह। वाक्यादिति। अत्यन्तं विवेको नास्ति।
अयं भावः। वाक्यं पदं चाखण्डमेव। अनन्तवर्णकल्पने माना-
भावात्। ककारादिकं शृणोमीतिप्रतीतिर्मानमिति चेन्न। तस्या-
खण्डपदार्थविषयत्वात्। तत्तद्वर्णोत्पादकत्वेनाभिमतवायुसंयो-
गविशेषाभिव्यक्ताखण्डपदार्थस्यैव कत्वादिना प्रतीत्युपपत्तेः।
अथाखण्डपदार्थस्यैव व्यञ्जकवैचित्र्यात्कत्वादिना प्रतीतौ क-
कार उत्पन्न इति न स्यात्। स्फोटस्योत्पत्त्यभावात्। व्यञ्ज-
कनिष्ठाया उत्पत्तेस्तत्रारोपाभ्युपगमे ज्ञानादीनामपि नित्यताप-
त्तिः। किं च घटादेरपि कपालसंयोगविशिष्टस्फोटरूपत्वापत्ति-
र्नित्यत्वापत्तिश्चेति चेन्न। सत्कार्यवादिना नित्यताया ज्ञाना-
दिगताया इष्टत्वस्य वक्ष्यमाणत्वात्। घटादिकं चाविद्याक-
ल्पितो मृद एवावस्थाविशेषः। आविद्यकजलाहरणादिकार्यानु-
रोधेन स्वीकरावश्यकत्वात्। उत्पन्त्यादिप्रतीतिरपि वक्ष्यमाण-
रीत्या नानुपपन्नेति। नन्वेवं विलक्षणो वायुसंयोग एव तद्धेतु-
रिति न्यायाद्वाचकोपि स्यादिति चेन्न। प्रत्यक्षोपलभ्यमानक-
कारादेरेव वाचकत्वस्यानुभवसिद्धत्वात्। स्फोटस्य च शृणोमी-
त्यनुभवादावश्यकत्वात्। तस्माद्वायुसंयोगनिष्ठं तत्तद्वर्णजनक-

तावच्छेदकं वैजात्यमादायैव ककार इत्यादिप्रत्ययस्तार इत्यादिवत्। स्पष्टं हि भामत्यां तारत्वादि वायुनिष्ठं वर्णेष्वारोप्यतइति देवताधिकरणेभिहितम्। अस्मिंश्च पक्षद्वये वर्णाप्यनावश्यका इति चोक्तं शब्दकौस्तुभे। तथा च प्रत्यक्षाद्वाचकत्वान्यथानुपपत्त्या तदेवेदं पदं तदेवेदं वाक्यमिति प्रतीत्या चाखण्डस्फोटः सिध्यतीति ध्येयम्। यत्तु प्रथमाध्यायप्रथमचरणे उक्तमनुव्याख्याने। 'शक्तिश्चैवान्विते स्वार्थे शब्दानामनुभूयते। अतोन्विताभिधायित्वं गौरवं कल्पनेन्यथे'ति। व्यवहारेणान्विते एव शक्तिरनुभूयते। पदानामिति त्यक्त्वा शब्दानामित्युक्तिः प्रकृतिप्रत्ययोरप्यन्विताभिधानामिति बोधयितुम्। परमतं दूषयति। गौरवमिति। अन्यथाकल्पने वाक्यं वाक्यार्थबोधकमिति कल्पने गौरवमिति वाक्यमेवाखण्डं कल्पनीयम्। तस्यार्थप्रत्यायनशक्तिश्च कल्पनीयेति गौरवमिति भाव इति जयतीर्थः। तत्तुच्छम्। अर्थप्रतीत्याद्यन्यथानुपपत्त्या तस्यावश्यकल्प्यत्वात्। अन्वितशक्तेश्च स्फुटतरं प्राङ्निषिद्धत्वात्। किं च गौरवं तवैव विपरीतम्। अनन्तवर्णादेः कल्पनात्। यत्त्वत्राह जयतीर्थो नार्थप्रतीत्यन्यथानुपपत्त्या तत्सिद्धिः। तथाहि। किमयं स्वरूपतोर्थप्रत्यायकः प्रतीतो वा। नाद्यः। सर्वदार्थबोधापत्तेः। अन्त्ये किमनयानुपपत्त्या तत्प्रतीतिरुत प्रमाणांतरेण नाद्यः। अन्योन्याश्रयात्। प्रतीते स्फोटे अर्थप्रतीतिस्तया च तत्कल्पनमिति। नान्त्यः। प्रमाणान्तराभावात्। एकं पदमेकं वाक्यं शृणोमीति प्रत्यक्षेण तद्ग्रह इति चेन्न। विचार्यतां तर्हि किमयं प्रत्ययो वर्णानदगाहते न वेति। आद्ये ऽस्तु तेषामेव वाचकता। आवश्यकत्वात्। अन्त्ये प्रतीतिबाध एवेति। तदशुद्धम्। एकं पदमित्यादेर्वर्णविषयस्यापि तत्रोक्तरीत्या मानत्वोप-

पत्तेरिति । अत एव ध्वनिरुभयसिद्ध एव । तथा च ध्वनिस्फोटयोर्मध्ये नित्यवर्णाङ्गीकारे गौरवात् । मानाभावाच्च । ध्वनीनामेव गत्वादिमत्त्वं तएव च वर्णाः । एवं च सा वर्णावली तत्तदर्थविशेषणागृहीतसम्बन्धा स्फोटतदेकत्वाद्यभिव्याञ्जिका । गृहीतसम्बन्धो वा । नाद्यः । काव्यादिश्रवणे तत्तदर्थैरगृहीतसम्बन्धस्यापि इदमेकं पदमिदमेकं वाक्यमित्यादिस्फोटस्य तत्संख्याधाश्च प्रतीत्यापत्तेः । न द्वितीयः । एवं हि स्फोटाभावेप्येकार्थाभिव्यञ्जकत्वरूपमेकं धर्ममादायैवैकं पदमित्युपपत्तेर्नानयोपपत्त्या तत्सिद्धिः । उक्तं च । 'यस्त्वेकप्रत्ययः सोपि बाधकेन बलीयसा। औपाधिकतया नीतस्तस्मात्स्फोटो न मानभागि,ति । एवं वाचकत्वमपि तादृशस्यैव स्यादिति न साप्यनुपपत्तिः । नापि तदेवेदं पदं तदेवेदं वाक्यमिति प्रतीत्या तत्सिद्धिः । तदेवेदं नखं तएते केशाः सोयं समुद्र इतिवदुपपत्तेः । अतिरिक्तकेशादिकमनुभवानारूढमिति चेन्न । गौरित्यत्रापि गकारौकारविसर्गातिरिक्तस्फोटानुभवस्य कस्याप्यभावात् । किं च । पर्यायशब्देष्वेक एव स्फोटो नाना वा । घटकलशादिपर्यायाभिव्यक्ते स्फोटे गृहीतशक्तिकस्य पुंसो ऽप्रसिद्धपर्यायश्रवणेपि प्रागगृहीतशक्तिकस्यैव स्फोटस्य तेनाभिव्यक्त्यार्थप्रतीत्यापत्तेः । न च तत्पर्यायाभिव्यक्ते स्फोटे शक्तिग्रहस्तत्पर्यायश्रवणेर्थधीहेतुरिति वाच्यम् । एवं हि प्रतिपर्यायं शक्तिग्रहावश्यम्भावे तत्तत्पर्यायगतशक्तिग्रहहेतुताया एवोचितत्वात् । तथा सति शक्तिग्रहत्वेनैव हेतुत्वे लाघवाच्च । अन्यथा तत्पर्यायाभिव्यक्तगतशक्तिग्रहत्वेन तत्त्वेवच्छेदकगौरवात् । न द्वितीयः । अनन्तपदार्थानां तेषां शक्तिं चापेक्ष्य कल्पितवर्णेष्वेव शक्तिकल्पनस्य लघुत्वात् । तस्मात्स्फोटवादो ऽयुक्त एवेति न्यायरक्षामणिपरिमलयोर्निष्कर्षो-

प्यपास्तः । वर्णप्रत्यक्षस्यापि तत्र मानताया स्वीकारात् । पर्यायस्थलेपि एकैव शक्तिः परं त्वानुपूर्व्येवावच्छेदिका । वर्णानामपि तदतिरिक्तानामभावेनोक्तबाधकाभावादित्युक्तम् । ये तु वर्णानां तदतिरिक्तध्वनीनां वा स्वीकारपक्षेपि स्फोटस्य वाचकत्वं समर्थयन्ते । वर्णातिरिक्तः स्फोट एव वाचकत्वान्यथानुपपत्त्या कल्प्यते । न च वर्णा वाचका इति युक्तम् । अनभिव्यक्तानां वाचकत्वेतिप्रसङ्गादभिव्यक्तेश्चासम्भवात् । प्रत्यक्षे विषयस्यापि हेतुत्वात् । न च स्मरणं सम्भवति । एवमपि वर्णानामतीतत्वेन करणत्वायोगात् । तज्ज्ञानं करणमिति पक्षेपि पदार्थस्मरणोपयोगिनस्तस्यासम्भवात् । न च पूर्ववर्णानुभवजन्यसंस्कारसहकारेण श्रोत्रेणैकदा स्मरणं युक्तम् । तदेकमनेकं वा । आद्ये क्रमाभानात् सरो रस इत्यादौ विशेषो न स्यात् । अन्त्ये ज्ञानयौगपद्यापत्तिः । एवमेकं पदमेकं वाक्यमिति प्रतीतिरपि तत्र मानम् । न चैकं वनमितिवत्सा । वनरुक्ष्यादेरप्यतिरिक्तत्वात् । किं च तत्रैकदेशावच्छिन्नत्वोपाधेरेकत्वेन सोपाधिरेव प्रतीतिः स्यात् । प्रकृते चोपाधेरसंभवेन तदसम्भवात् । न चैकार्थबोधहेतुत्वं तथा । व्याससमासयोरपि प्रसङ्गात् । नाप्यविशिष्टैकार्थप्रत्ययजनकत्वम् । समासेष्वव्याप्तेः । अघट इत्यत्र प्रकृत्यंशेतिव्याप्तेश्च । अस्मन्मते चाखण्डं वाचकमेकं स्फोटमादायैकत्वप्रत्ययः, तद्व्यञ्जकाश्च वर्णाः । तदस्वीकारे ध्वनयः । प्रतीतिवैलक्षण्यमपि ध्वनिकृतम् । तदुक्तं वाक्यपदीये । 'यथा मणिकृपाणादौ रूपमेकमनेकधा । तथैव ध्वनिषु स्फोट एक एव विभिद्यत' इति । सादृश्यादिप्रतीतिरपि व्यञ्जकध्वनिनिबन्धनैव । आहचैवं कैयटोपीत्याहुः । स्यादयं प्रागुक्तस्तेषां दोषः । किं च । तवैवार्थबोधानुपपत्तिः । वर्णानां प्रत्येकं व्यञ्जकत्वं

समुदितानां वा । नाद्यः । प्रत्येकास्फोटप्रतीतौ तावतैवार्थबोधापत्तेः । नान्त्यः । त्वदुक्तरीत्यैवासम्भवात् । सम्भवे वा तद्धेतोरिति न्यायेनार्थबोधस्यापि तत एवोपपत्तेर्न वाचकत्वान्यथानुपपत्तिरपि । अथ त्वन्मतेप्येष दोषः । तत्तद्वर्णोत्पादकत्वाभिमतवायुसंयोगानां प्रत्येकमभिव्यञ्जकत्वं समुदितानां वेति विकल्पगणग्रासादिति चेत् । अत्रोच्यते । प्रत्येकमेव संयोगा अभिव्यञ्जकाः परं तु के चन कत्वेन के चन हत्वेनेत्यनेकैः प्रकारैः । अत एव वर्णानां तदतिरेकास्वीकारोप्युपपद्यते । तच्च वायुसंयोगादिनिष्ठमेव तत्रारोप्यते । एवं चाव्यवहितोत्तरत्वसम्बन्धेन धवत्वं टकारे गृह्यते । एतादृशपदज्ञानकारणतायां अविवादात् । परं त्वव्यवहितोत्तरत्वं स्वज्ञानाधिकारणोत्पत्तिकज्ञानविषयत्वं वाच्यम् । अत एव घज्ञानानंतरज्ञानविषयत्वरूपानुपूर्वीज्ञानमित्यादिनैयायिकवृद्धानां व्यवहारः । एवं च न कश्चिद्दोषः । यत्तु श्रूयमाणशब्दे किमयं हालाहलशब्दः किं वा हलाहलः किमयं मरकतशब्दः मकरतशब्दो वा । किमयं कुशशब्दः कुशशब्दो वेति सन्देहे यथा तथास्तु विषरत्नदर्भवाचकोभवत्येवेत्यादि निश्चिन्वतो बोधो न स्यात् । स्फोटाभिव्यक्तौ स्पष्टाभिव्यक्त्यापत्तेः । अनभिव्यक्तौ बोधकाभावादिति न्यायरक्षामणावुक्तम् । तच्चिन्त्यम् । वर्णसमूहरूपपदज्ञानं कारणमिति स्वीकर्तृणां दर्शनान्तराणामपि तुल्यत्वात् । तदर्थज्ञापकत्वज्ञानं च ममापि समामिति । यद्वा । किञ्चित्किञ्चित्प्रत्येकमेव स्फोटाभिव्यक्तिर्जायते । अग्रे अग्रे विशदा जायते । पूर्वं जातापि नार्थबोधोपयोगिनी । यथा रत्नतत्त्वस्यैकदा दर्शनेपि नाभिव्यक्तिः, वारंवारं दर्शने तु भवति । उक्तं च । सामस्त्येन तु तद्व्यक्तिः सर्वान्ते मणितत्त्ववदिति । ननु भवतीत्यादावर्थ-

बोधापत्तिरिति चे,त्तवापि वाचकसत्त्वादर्थबोधापत्तिः । वर्णानुपूर्वीनियामकनियम्याभिव्यक्तेरर्थबोधोपयुक्तत्वात् । न च दृष्टान्तो विषमः । एतादृशजातिमानसुकशब्दवाच्य इत्यत्रैव दर्शनान्तराणामपेक्षणादिति वाच्यम् । प्रथमदर्शने जातेरवगमे एतादृशजातिमानसुकशब्दवाच्य इत्यस्यापि ग्रहणापत्तेः । अस्माकं पुनर्जात्यग्रहादेव विलंबः । तथा च विजातीयप्रत्यक्षाज्जातिग्रहवद्विजातीयाभिव्यक्त्यार्थबोध इति । अथ प्रथमदर्शने एव जातिर्गृह्यते पदं पुनस्तज्जात्यवच्छिन्नवाचकं न स्मर्यतइति चेन्न । ममापि स्फोटो व्यज्यते । अर्थस्मरणं पुन र्जायतइत्युपपत्तेः । पदतदर्थयोः शक्तिलक्षणसंम्बन्धस्य परस्परस्मारकत्वाविशेषात् । विजातीयाभिव्यक्तेः पदस्मारकत्ववद्विजातीयाभिव्यक्तेरर्थस्मारकत्वादिति दिक्। यत्तु वर्णानां व्यञ्जकत्वेप्येवमेवोपपत्तिरिति तन्तुच्छम् । एवं हि स्फोटासिद्धेरुक्तत्वात्। अत एव च घकारविशिष्टटकार एव व्यञ्जकः पूर्वपूर्ववर्णविशेषितोत्तरवर्णविषयकप्रत्यक्षाभ्युपगमात् । एतेन प्रथमादिवर्णैरविशदस्फोटाभिव्यक्तिर्नानुभवसिद्धेति निरस्तम् । समाध्यन्तरसत्त्वादिति न्यायरक्षामणिस्थः स्फोटवादमङ्गीकृत्य समाधिः प्रत्युक्तः । ग्रन्थकृतस्त्वाहुः । वर्णमालायां पदमिति प्रतीतेर्वर्णातिरिक्त एव स्फोटः । अन्यथा कपालातिरिक्तघटासिद्धिप्रसङ्गश्चेति दिक् इति सुधीभिर्विभावनीयम् ॥ ६८ ॥

नन्वेवं शास्त्राप्रामाण्यप्रसङ्गः पदवाक्ययोरखण्डत्वात् । शास्त्रस्य च प्रकृतिप्रत्ययाभ्यां पदव्युत्पादनमात्रार्थत्वादित्याशङ्कां समाधत्ते ॥

पञ्चकोशादिवत्तस्मात्कल्पनैषा समाश्रिता ॥६९॥

उपेयप्रातिपत्त्यर्था उपाया अन्यवास्थिताः ।

उपेयप्रातिपत्त्यर्थेत्यन्तेनान्वयः । तथाहि । भृगुर्वारुणिर्वरुणं पितरं ब्रह्म पृष्टवान् । स उवाच । अन्नमिति । पुनरस्योत्पत्त्यादिकं समीक्ष्य पृष्टवान् । पुनः प्राणो ब्रह्मेति । तस्यापि तथात्वं बुध्वा पृष्टवान् । ततो मन इति । तस्याप्यशितमन्नं त्रेधा भवति यत्स्थूलं तत्पुरीषं यन्मध्यमन्तन्मांसं यदणीयस्तन्मन इति श्रुतावुत्पत्तिश्रवणात्पृष्टवान् । ततो विज्ञानमय इति । तस्यापि वृत्त्युपहितत्वेन तथात्वं बुध्वा पृष्टवान् । तत आनन्दो ब्रह्मेति । पुनर्वस्तुतत्त्वं प्राप्य स्थितइति तु के चिद्वयाचक्षते । तन्न । पञ्चमस्य तत्रानुपायत्वात् । अकोशत्वाच्च । तस्य ब्रह्मत्वात् । तस्मान्न भृगुवल्लीहोदाहर्तव्या । किन्त्वानन्दवल्ली । तत्रत्या हि पञ्चापि कोशा उपाया एव । तत्र हि ब्रह्मपुच्छं प्रतिष्ठेत्यत्र श्रूयमाणमेव ब्रह्मपदं मुख्यब्रह्मसमर्पकम् । अत एवाधारत्वार्थकः पुच्छशब्दोप्युपपद्यते । लांगूलासम्भवेन मुख्यार्थस्य बाधितत्वात् । कथं तर्ह्यानन्दमयोभ्यासादिति वैयासिक सूत्रमिति चेत् । आनन्दमयशब्दस्य तद्वाक्यशेषे श्रूयमाणब्रह्मपदे तात्पर्यादित्यादि शङ्करभगवत्पादप्रभृतिभिः प्रपञ्चितम् । एवञ्च यथा पञ्चकोशा अपि सर्वाधारब्रह्मबोधनायैवोक्ताः न तु वास्तवमेषां ब्रह्मत्वं तथैव प्रकृतिप्रत्ययादिभिर्विचारोप्यखण्डस्फोटबोधनोपाय इति भावः । ननु प्रत्यक्षस्य स्फोटस्य श्रवणादितोपि बोधसम्भवान्न शास्त्रं तदुपाय इति चेत्तत्राह । उपाया इति । उपायस्योपायान्तरादूषकत्वादिति भावः । अत एव केचित्सुप्रत्ययं केचित्तिप्रत्ययं के चित् रुप्रत्ययं च विदधाति तदेतदभिप्रेत्याह वाक्यपदीये । "उपायाः शिक्ष्यमाणानां बालाव-

नामुपलालनाः । असत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहत" इति । अत्र वदन्ति । नैतच्छास्त्रं स्फोटज्ञानार्थं पञ्चकोशवदुपायः शास्त्रज्ञानं विनापि गामानयेति वाक्यमात्रव्युत्पन्नस्य पामरादेरपि शाब्दबोधात् । तस्य स्फोटज्ञानं विना बोधानुपपत्तेस्तज्ज्ञानं च शास्त्रमन्तरेणेति व्यभिचारात् । शास्त्रस्योपयान्तरत्वे च शास्त्रजन्यस्फोटज्ञाने तृणजन्यतावच्छेदकमिव वन्हौ वैजात्यं वाच्यं तच्च न, प्रमाणाभावात् । किं च प्रकृतिप्रत्ययादेः काल्पनिकत्वेन शशविषाणकल्पतया तेन न स्फोटात्मकवस्तुज्ञानसंभवः । पञ्चकोशादेश्च सदसद्विलक्षणताया अद्वैतशास्त्रे व्युत्पादितत्वादिति । अत्रोच्यते । भाषासंस्कृतसाधारणः स्फोट एव वाचकः तज्ज्ञानं च श्रौत्रप्रत्यक्षादिरूपमपीति सत्यम् । किं तु वर्णवत्प्रकृतिप्रत्ययापन्नोपि स एव । एवं च प्रकृतिप्रत्ययादिभिर्व्युत्पादनपूर्वकं तज्ज्ञानं तत्पूर्वप्रयोगद्वारा शारीरशुद्धिहेतुर्यज्ञादिरिवान्तः करणस्य । तथा च "तत् द्वारमपवर्गस्य वाङ्मलानां चिकित्सितम् । पवित्रं सर्वविद्यानामधिविद्यं प्रकाशते" इति । " इदमाद्यं पदस्थानं सिद्धिसोपानपर्वणाम् । इयं सा मोक्षमाणानामजिह्मा राजपद्धतिः ॥ अत्रातीतविपर्यासः केवलामनुपश्यति" इति च वाक्यपदीयं सङ्गच्छते । एवं च विजातीयज्ञानएव शास्त्रस्योपयोग इति न तृणादिवद्व्यभिचारः । यत्तु अलीका प्रकृतिप्रत्ययकल्पनेति । तन्न । पञ्चकोशादिवदस्यापि सदसद्विलक्षणाया एव दिक्प्रदर्शनमात्रेणोपपादयिष्यमाणत्वादिति दिक् । एवं रेखागवयन्यायेनापि शास्त्रमुपाय इत्यप्याहुः ॥ ६९ ॥

ननु वर्णानां स्फोटात्मकत्वे कत्वगत्वादिकं तानिष्ठं व्यञ्जकवायुनिष्ठं वा । नाद्यः । तस्य नित्यत्वेन ककार उत्पन्न इति न

स्यात् । अनित्यत्वे ऽनुगतः ककार इति प्रत्ययो न स्यात् कत्वस्य ककाररूपनाममात्रत्वापत्तेश्च । अन्त्ये भ्रमत्वं कादिप्रतीतीनां स्यादित्यत आह ॥

कल्पितानामुपाधित्वं स्वीकृतं हि परैरपि ।
स्वरदैर्घ्याद्यपि ह्यन्ये वर्णेभ्यो ऽन्यस्य मन्वते ७०

कुत स्वीकृतं तदाह । स्वरेत्यादि । उदात्तत्वादिकं ध्वनिनिष्ठमिति स्वीकाराादिति भावः । एवं दीर्घत्वादिकमपि । आदिना ह्रस्वत्वादिकमपि गृह्यते । अयं तेषामभिप्रायः । गकारादयो वर्णास्तावदेकैका एव, प्रहरात्पूर्वमनुभूयमानस्य सोयमिति प्रत्यभिज्ञानात् । न च गत्वावच्छिन्नप्रतियोगिताकभेदाभावस्तद्विषयः । व्यक्त्यतिरिक्तगत्वानङ्गीकारात् । अयं गकार इति चेदं रूपमितिवदुपपद्यते । न.च गत्ववानाकार इत्यनयोरविषापत्तिः । सह प्रयोगश्च न स्यादिति शङ्क्यम् । प्रतीतौ गत्वत्वस्यापि भानाद्विशेषसम्भवात् । सहप्रयोगस्यापि घटत्ववान्घट इतिवदुपपत्तेः । भिन्नेषु घटादिषु घटत्वावच्छिन्नप्रतियोगिताकभेदाभावसत्वात्सो यमिति प्रतीत्यापत्त्या व्यक्त्यभेदस्यैव तत्र विषयत्वावश्यकत्वाच्च । प्रत्यभिज्ञाया व्यक्तिविषयत्वे बाधकाभावाच्च । न च गकार उत्पन्न इति प्रतीतिरेव बाधिका । तस्याः व्यञ्जकध्वनिनिष्ठोत्पत्त्यादेः परम्परासम्बन्धेन वर्णनिष्ठत्वविषयत्वेनाप्युपपत्तेरातिरिक्तवर्णासाधकत्वात् । परम्परया वर्णनिष्ठत्वाभ्युपगमाच्च न भ्रमत्वम् । साक्षात्सम्बन्धांशे भ्रम इत्यवशिष्यते । तदपि सोयमित्यत्र व्यक्त्यभेदांशे तव भ्रमत्ववत्तुल्यं परं तु ममातिरिक्तवर्णतत्प्रागभावध्वंसकल्पनागौरवापत्तिर्नेति लाघवमतिरिच्यते । तव तु तत्स्यादिति महदनिष्टम् । किं च । प्राग-

सत्त्वे सति सत्त्वरूपाया उत्पत्तेर्न वर्णेषु ग्रहणमानुभविकम्। अत एव वर्णमुच्चारयतीति प्रत्ययो न तूत्पादयतीति प्रत्ययो व्यवहारश्च। उच्चारितत्वं च तालवोष्ठसंयोगादिजन्याभिव्यक्तिविशिष्टत्वम्। तस्य चेदानींतनता सूपपादा। तथा च प्राग्नुभूतेनेदानींतनानुभूतस्याभेदसिद्धौ तावत्कालं स्थिरं चैनं कः पश्चान्नाशयिष्यतीति न्यायेन नित्यतैव। नन्वेवं स्त्रीप्रभवोयं शुकप्रभवोयमिति प्रतीतिस्तच्छ्रवणात्स्त्रीशुकाद्यनुमानं च न स्यात्। न च वैजात्यं वायुनिष्ठम्। तदग्रहेपि वैजात्यबोधात्। नापि ध्वनिनिष्ठम्। तत्र तस्मिन्मानाभावात्। तदुत्पादकशङ्खाद्यभावाच्च। किं च। सेयं गुर्जरी सेयं दीपकलिका इत्यादावपि नाशो न स्यादिति चेन्न। स्त्रीशुकादिजन्यतावच्छेदकं तालवोष्ठसंयोगे तदभिघातजवायौ वा विद्यमानवैजात्यं वर्णेष्वारोप्यतइत्यभ्युपगमात्। अत एव तारत्वादिरूपविरुद्धधर्माध्यासाद्भेद इति निरस्तम्। न च वाच्यग्रहे तन्निष्ठजात्याद्यग्रहः। येन यस्य धर्मो गृह्यते तेन तदपीति नियमादिति वाच्यम्। बहिरिन्द्रियेषु व्यभिचारेण नियमाभावात्। चक्षुषः प्रभायाः स्पर्शनस्य वायोः रूपस्पर्शमात्रस्य रसनादेश्च रसादिमात्रस्य ग्राहकताया नैयायिकैः स्वीकारात्। अस्तु वा स्त्रीशुकादिव्यंग्यस्तारत्वादिश्च वर्णनिष्ठो जातिविशेषः। न च तेषां काश्चिद्विरोधः। योयं रामेणोक्तः स एवेदानीं कृष्णेनोच्यतइति। योयं तारो मया श्रुतः स एवेदानीं मन्द इति च प्रतीतेः। गुर्जरीदीपादिस्थलेपि मानान्तरेण नाशसिद्धौ सोयमित्यस्य भ्रमत्वं अन्यथा तत्रापीष्ट एव नाशाद्यभावः। न चैवं वायुतालवोष्ठसंयोगादेर्गत्वं कार्यतावच्छेदकमपेक्ष्य तत्प्रत्यक्षत्वं त्वया वाच्यम्। तथा च गौरवामिति वाच्यम्। प्रत्यक्षत्वावच्छिन्नविषयितया गत्वस्यैव कार्य-

तावच्छेदकत्वात् । नन्वेवं घटोपि नित्य एव कपालसंयोगादिकं व्यञ्जकं भविष्यतीति चेन्न । प्रागसत्त्वे सति सत्त्वरूपाया उत्पत्तेस्तत्र गृहीतायां विना बाधकं त्यागायोगात् । अत्र तदग्रह-विपरीतग्रहयोः सत्त्वेन तदयोगात् । सत्कार्यवादाभ्युपगमे त्विष्टापत्तेश्च । न च गकारादेर्विना व्यञ्जकमननुभवेन्धकारस्थ-घटवत्सन्देहापत्तिः । दोषाद्यभावादुपपत्तेः । अन्यथोत्पन्नत्वा-दिसन्देहोपि किं न स्यात् । एवं च वीचीतरङ्गादिन्यायेनानेक-वर्णकल्पनायां गौरवमपास्तम् । तस्मान्नित्या एव वर्णाः । त-स्माद्यथा गकारादिप्रतीतिस्तथा स्फोटप्रतीतिरपि गत्वादिरूपे-णोपपन्नेति नोक्तशङ्केति भाव इति सुधीभिर्ध्येयम् ॥ ७० ॥

इति व्यक्तिस्फोटनिरूपणम् ॥

बोपदेवोक्तयुक्तया जातिस्फोटमाह ॥

शक्यत्वइव शक्तत्वे जातेर्लाघवमीक्ष्यताम् ।
औपाधिको वा भेदोस्तु वर्णानां तारमंदवत् ७१

अयमभिप्रायः । गकारादिव्यक्तयस्तावदवश्याभ्युपेतव्याः । न चोक्ता रीतिः साध्वी । तथा सति सोयं गकार इतिवद्यो मया हकारः श्रुतः सोयं गकार इत्यापत्तिः । एकस्यैवाखण्डपदार्थस्य सकलवर्णरूपत्वात् । णकारोयं न गकार इत्यनापत्तेश्च । किं च स्फोटे गत्वाद्यतिरिक्तमभ्युपेयं न वा । आद्ये तदेव गकारो-स्तु वर्णातिरिक्तगत्वाभावस्य वर्णनित्यतावादे शङ्करभगवत्पाद-प्रभृतिभिः सिद्धान्ततत्वात् । तथा चातिरिक्तस्फोटकल्पनएव गौरवम् । वर्णानामेव वाचकत्वोपपत्तौ तत्र मानाभावश्च । अ-न्त्ये यकारादिप्रतीतिविरोधः । वायुसंयोगादिवृत्तिवैजात्यमेव तत्तद्रूपेण प्रतीयतइति चेन्न । प्रतीतेर्विना बाधकं भूमत्वायोगात् ।

अस्तु वा वायुसंयोग एव मकारोपि तस्यातीन्द्रियत्वं दोष इति चेन्न। तद्गतधर्मवदेवोपपत्तेरिति गतमतिरिक्तस्फोटकल्पनया । तस्मात्सन्त्येव वर्णाः । तथा च यया शक्या जातिरेव । तथा शक्तापि । अन्यथा बहूनां वर्णानां वाचकत्वे गौरवं स्यात् बलवद्बाधकवशात्प्रत्येकं वाचकत्वस्य चास्वीकारात् । इदं घटपदमिति प्रतीत्या घटपदज्ञानकारणतावच्छेदककोटिप्रविष्टतया च जातिविशेषस्यावश्यकत्वात् । न च वर्णानुपूर्व्यैव प्रतीतिकारणत्वयोर्निर्वाहः । घटत्वादेरपि संयोगविशेषविशिष्टमृदैवान्यथासिद्ध्यापत्तेः । तस्मात्सा जातिरेव शक्ता तादात्म्येन तदवच्छेदिका चेति । ननु सरो रस इत्यादौ जात्योः सत्त्वाविशेषादर्थबोधभेदो न स्यादित्यत आह । औपाधिको वेति । वा त्वर्थे। उपाधिरानुपूर्वी भेदः कारणीभूतज्ञानस्य । उपाधिप्रयुक्तज्ञानवैलक्षण्ये दृष्टांतमाह । वर्णानामित्यादिना । आनुपूर्वीविशेष एव जातिविशेषाभिव्यंजक आकारविशेष इव घटत्वादे, स्तथा च नोक्तदोष इति भावः ॥ ७१ ॥

ननु जातेः प्रत्येकवर्णेष्वपि सत्त्वात्प्रत्येकादर्थबोधापत्तिस्तुल्यैवेति प्रत्येकं वर्णा एव वाचकाः किं न स्युरित्यत आह ॥

अनेकव्यक्त्यभिव्यंग्या जातिः स्फोट इति स्मृता ।
कैश्चिद्व्यक्तय एवास्याः ध्वनित्वेन प्रकल्पिता ७२

अयं भावः । त्रिविधजातिस्फोटेषु वर्णपक्षे यद्यप्ययं दोषस्तथापि पदवाक्यपक्षे नायम् । वर्णेषु तस्या व्यासज्यवृत्तित्वात् । तत्रापि पूर्ववत्पदार्थवाक्यार्थयोर्वाक्यपदस्फोटौ वाचकत्वेन स्वीक्रियेते । तथा चानेकाभिर्व्यक्तिभिर्वर्णव्यक्तिभिरभिव्यंग्या जातिः स्फोट इति स्मृता, योगार्थतया । एतेन

स्फोटस्य सदातनत्वात्सर्वदार्थबोधापत्तिरित्यपास्तम् । कैश्चिद्व्यक्तय एव ध्वनय इत्यभ्युपेयतइति समुदायार्थः । उक्तं हि काव्यप्रकाशे । बुधैर्वैयाकरणैः प्रधानीभूतस्फोटव्यंग्यव्यञ्जकस्य शब्दस्य ध्वनिरिति व्यवहारः कृत इति ॥ ७२ ॥

ननु का सा जातिस्तत्राह ॥

सत्यासत्यौ तु यौ भागौ प्रतिभावं व्यवस्थितौ ॥
सत्यं यत्तत्र सा जातिरसत्या व्यक्तयो मताः ७३

प्रतिभावम् । प्रतिपदार्थम् । एतच्च 'सम्बन्धिभेदात्सत्तैव भिद्यमाना गवादिषु । जातिरित्युच्यते तस्यां सर्वे शब्दा व्यवस्थिताः ॥ ता प्रातिपदिकार्थं च धात्वर्थं च प्रचक्षते । सा नित्या सा महानात्मा तामाहुस्त्वतलादय' इति वाक्यपदीये । नित्यं द्रव्यमिति प्रतीकमादायासत्योपाध्यवच्छिन्नं ब्रह्मतत्त्वं द्रव्यशब्दवाच्यमित्यर्थः । ब्रह्मराशिरित्यादाय ब्रह्मतत्त्वमेव शब्दस्वरूपतया भातीतिं कैयटे च स्पष्टम् । एवं वाच्यं वाचकं च ब्रह्मैवेति भावः ॥ ७३ ॥

ननु प्रकृता जातिरेव नास्ति । पदंपदमित्यानुगतबुद्धेर्वर्णानुपूर्व्यैवोपपत्तेस्तस्या अपि नानात्वे तु परम्परया वर्णस्तज्जातिर्वा नियामिकास्तु । न च घटाद्यपि न सिध्येदिति शङ्क्यम् । इष्टापत्तेः । मृदएवावस्थाविशेषरूपत्वात्तस्य, अत एव वाचारम्भणं विकारोनामधेयं मृत्तिकेत्येव सत्यमिति श्रूयते । व्युत्पादितं चैतत्तदनन्त्यत्वमारम्भणशब्दादिभ्यः पटवच्चेत्यादिना ऋषिपुंगवेन भगवता व्यासेन, अतएवाकृतिरित्यादाय ब्रह्मदर्शने गोत्वादिजातेरप्यसत्त्वादनित्यत्वम् । आत्मैवेदं सर्वमिति श्रुतिवचनादिति कैयटः । शास्त्रेषु प्रक्रियाभेदैरविद्यैवोपवर्ण्यते, समारम्भस्तु

भावानामनादिब्रह्मशाश्वतमिति वाक्यपदीयेपि। तदेतन्मनसि निधायाह।

इत्थं निष्कृष्यमाणं यच्छब्दतत्त्वं निरञ्जनम्।
ब्रह्मैवेत्यक्षरं प्राहुस्तस्मै पूर्णात्मने नमः॥ ७४॥

नामरूपे व्याकरणवाणीति श्रुतिप्रसिद्धा द्वयी सृष्टिः तत्र रूपस्येव नाम्नोपि तदेवतत्त्वं, जन्ममरणादिकं तद्वत्प्रपंचश्च तत्राविद्या कल्पितइति वेदान्ततत्त्वमस्मा कमपीष्टमेव। उक्तंहि वाक्यपदीये। "अजन्मानि तथा नित्ये पौर्वापर्यविवर्जिते। तत्त्वे जन्मादिरूपत्वं विरुद्धमुपलभ्यते" इति। तस्मादविद्यादशायामुक्तरीत्या जातिरेव स्फोटः। निष्कर्षे तु ब्रह्मैव स्फोट इति भावः। परन्तु अविद्यादशायामपि वर्णानां वाचकत्वमभ्युपेत्य स्फोटखण्डनमयुक्तमिति ध्येयम्। ब्रह्मैवेत्यनेनात्रायं पुरुषः स्वयं ज्योतिः तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभातीति श्रुतिसिद्धं स्वपरप्रकाशत्वं सूचयन् स्फुटत्यर्थोस्मादिति स्फोट इति यौगिकं स्फोटशब्दाभिधेयत्वं सूचयतीति सिद्धम्॥७४॥

विद्याधीशवदेरुसंज्ञकमतिश्रीमाध्वभट्टारकं
जित्वा केवलवेङ्कटय्यसविधेप्यान्दोलिकां प्राप्तवान्॥
यश्चक्रे मुनिवर्यसूत्रावितृतिं सिद्धान्तभङ्गन्तथा
माध्वानां तमहं गुरूपमगुरुं रङ्गोजिभट्टं भजे॥ १॥
पाणिनीयवचसां खलु मूलं चन्द्रशेखरभवानिनिरूढम्॥
तेन भूषणमिदं हि तवैव प्रीतये भवतु साम्बशिवस्य॥ २॥

इति श्रीमदत्पदवाक्यप्रमाणपारावारीणधूरीणरङ्गोजी-
भट्टात्मजकोण्डभट्टकृते वैयाकरणभूषणे
चरमः स्फोटः समाप्तः॥



श्रीगणेशाय नमः ॥

पदार्थदीपिका प्रारभ्यते।

श्रीमत्सिद्धिकरं कान्तं रमोमारमणात्मकम् ।
दयासिन्धुं चिदानन्दं सितासितमुपास्महे ॥ १॥

इह खलु चतुर्थपुरुषार्थहेतुभूतमात्मतत्त्वज्ञानमामनन्ति । तच्च पदार्थतत्त्वनिर्णयाधीनमिति पदार्थतत्त्वमत्र विविच्यते ॥ तत्र—

प्रमितिविषयः पदार्थः ॥

स द्विधा भावो ऽभावश्च । भावाः षडेव द्रव्यगुणकर्मसामान्यविशेषसमवायभेदात् । तत्र—

द्रव्यत्वजातिमद्, गुणाश्रयो वा द्रव्यम् ॥

तच्च पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनोभेदान्नवधा । तत्र—

पृथिवीत्वजातिमती गन्धवती वा पृथिवी ॥

मणिमुक्तावज्रादावप्यनुद्भूतगन्धोस्त्येवेति न तत्राव्याप्तिः । तद्भस्मनि गन्धोपलम्भेन तत्रापि गन्धकल्पनात् । मण्यादयः गन्धवन्तः गन्धवद्द्रव्यारम्भकावयवारब्धत्वात् महापटवत् । अथ वा गन्धवत्त्वं गन्धसमानाधिकरणजलावृत्तिजातिमत्त्वम् । गन्धसमानाधिकरणद्रव्यत्वादिकमादाय जलादावतिव्याप्तिवारणाय जलाऽवृत्तीति । एतेन नानागन्धवदारब्धपदार्थस्य निर्गन्धत्वपक्षेपि न तत्राव्याप्तिस्तादृशपृथिवीत्वसत्वात् । सा च

पृथिवी द्विधा । नित्या ऽनित्या च । परमाणुरूपा नित्या । कार्यरूपा त्वनित्या । यदिदं जालसूर्यमरीचिस्थं सर्वतः सूक्ष्ममुपलभ्यते । तच्च त्र्यणुकं तस्य षष्ठांशः परमाणुः । तत्रिभिर्द्व्यणुकैरारभ्यते । द्वाभ्यां परमाणुभ्यां च द्व्यणुकामिति स्वीकारात् । कार्यरूपा च त्रिविधा शरीरेन्द्रियविषयभेदात् । शरीरं त्वन्त्यावयवि भोगायतनम् । भोगनियामकामिति यावत् । तत्पञ्चधा शुक्रशोणिताभ्यां विनैवादृष्टविशेषोपगृहीतपृथिवीजन्यं जरायुजमण्डजं स्वेदजमुद्भिदं च । आद्यं वशिष्ठादेः । गर्भावरकश्चर्मविशेषो जरायुस्तज्जं मनुष्यादि । अण्डजं पक्ष्यादि । स्वेदजं यूकालिक्षादि । पृथिवीं भित्वा जायमानमुद्भिदं वृक्षादि । इन्द्रियं घ्राणम् । तच्च गन्धतज्जातितदभावानामेव ग्राहकम् नासाग्रवर्त्ति तत्पार्थिवमेव, रूपादिषु पञ्चसु गन्धस्यैवाभिव्यञ्जकत्वात् । कुंकुमगन्धाभिव्यञ्जकतैलवत् । सक्तुरसनवशरावगन्धाभिव्यञ्जकजलेतिव्याप्तिवारणाय एवकारः । विषयाः पुष्पादयः ॥

अप्त्वजातिमत्यः शीतस्पर्शवत्यो वा आपः ॥

ता अपि द्विधा नित्या अनित्याश्च । परमाणुरूपा नित्या कार्यरूपा अनित्याः । ता अपि शरीरेन्द्रियविषयभेदात् त्रिधा । शरीरं वरुणलोके । तच्तु पार्थिवावयवमिलनात् करकावत् अदृष्टविशेषाद्वा घनीभूतं दृढं सद्भोगोपयोगि इन्द्रियं रसनम् तच्च रसतज्जातितदभावानामेव ग्राहकम् जिव्हाग्रवर्त्ति तदाप्यमेव । रूपादिषु पञ्चसु रसस्यैवाभिव्यञ्जकत्वात् लालावत् । जलमाधुर्यव्यञ्जकहरीतक्यामलकादौ व्यभिचारवारणायैवकारः । तयोः कषायाम्लरसवत्तया पटरञ्जकद्रव्यरूपविशेषाभिव्यञ्जकत्वात् । विषया नद्याद्याः ॥

तेजस्त्वजातिमदुष्णस्पर्शवद्वा परप्रकाशरूपवद्वा तेजः ॥

नित्यमनित्यं च । परमाणुरूपं नित्यं कार्यरूपमनित्यम् । तदपि त्रिधा शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं चक्षुः रूपतज्जातितद्वद्द्रव्यतद्गतजातिगुणकर्मणां ग्राहकं कृष्णतारानाग्रवर्त्ति । तत्तैजसमेव, रूपादिषु पञ्चसु रूपस्यैवाभिव्यञ्जकत्वात् आलोकवत् । पूर्ववद्धरीतक्यामलकादौ व्यभिचारवारणायैवकारः ॥

ननु रूपवान् परमाणुश्चक्षुषा कुतो न गृह्यते । चाक्षुषप्रत्यक्षे विषयद्रव्यगतं रूपं महत्त्वं हेतुः परमाणौ तन्नास्तीति चे,-त्तर्ह्याकाशात्मादयः कुतो न गृह्यन्ते । विषयगतं रूपं महत्त्वं चेति द्वयमपि हेतुरिति चे,त्तर्हि तप्तवारिस्थं तेज उष्मा वा कुतो न गृह्यते । उच्यते । द्रव्यचाक्षुषप्रत्यक्षे विषयगतमुद्भूतरूपं महत्त्वं च कारणं, परमाणुर्न महानाकाशो न रूपवान् तप्तवारिस्थं तेजश्च नोद्भूतरूपवत् । तद्रूपस्यानुद्भूतत्वात् । एवं चाक्षुषप्रत्यक्षे विषयगत उद्भूतस्पर्शोपि हेतुः । बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षमात्रएव महत्त्वरूपस्पर्शानां लाघवाद्धेतुत्वात् । तथा च प्रदीपादिप्रभाया रूपमात्रं गृह्यते तेन तदाश्रयद्रव्यमनुमीयतइति सिद्धान्तः । प्रभाशब्दोपि तद्रूपवाचक एवेत्याहुः ॥

नन्वेवमपि अन्धकारस्थो घटो ऽपि गृह्येत द्रव्यचाक्षुषे आलोकसंयोगोपि हेतुरिति चेत्, न, चक्षूरूपस्य सुवर्णरूपस्य वा अंधकारेपि संयोगसत्त्वादिति चेन्न । द्रव्यप्रत्यक्षे उद्भूतानभिभूतरूपालोकसंयोगस्य हेतुत्वात् । चक्षूरूपस्योद्भूतत्वाभावात् सुवर्णरूपस्याभिभूतत्वात्तत्संयोगेपि न प्रत्यक्षम् । विषयश्चतुर्द्धा भौमं दिव्यमौदर्यमाकरजंच । पार्थिवमात्रेन्धनं तेजो भौममग्न्यादि । अबिन्धनं तेजो दिव्यं विद्युदादि । उभयेन्धनमौदर्यं भाक्षितान्नस्य

पीतजलस्य च पाचनात् । स्वनिजमाकरजं सुवर्णादि ॥

ननु सवर्णं न तेजः परप्रकाशकरूपविरहात् उष्णस्पर्शाभावाच्चेति चेन्न । अभिभूतरूपस्पर्शयोस्तत्र स्वीकारात् । पीतरूपवन्तः पार्थिवभागास्तत्र मिलताः संतीति तदीयरूपस्पर्शभ्यां तयोरभिभवस्सम्भवत्येव । बलवत्सजातीयग्रहणकृतमग्रहणं ह्यभिभवस्तारशब्दान्मन्दस्येव ॥

मीमांसकास्तु पीतरूपवत् द्रव्यान्तरमेव सुवर्णमूचिरे । तन्न । द्रव्यान्तरकल्पने गौरवात् ॥

अन्ये तु हरिद्रादिवत्पीतरूपवत्वात्पृथिव्येव सुवर्णमित्याहुः । तन्न । अत्यन्तानलसंयोगाद्भस्मापत्तेः ॥

वायुत्ववान्नीरूपस्पर्शवान्वा वायुः ॥

सोपि द्विधा नित्यो ऽनित्यश्च । परमाणुरूपो नित्यः कार्यरूपो ऽनित्यः । सोपि शरीरेन्द्रियविषयप्राणभेदात् चतुर्धा । शरीरं वायुलोके पिशाचादीनां च । इन्द्रियं त्वक् सकलशरीरव्यापकम् । मिद्धानाञ्च तत्सत्वेपि तन्मनोयोगस्य स्वप्नजनकत्वात् तदा स्वाप्नज्ञानमेव न त्वाचादि पुरीतत्येवं परं नास्ति अतस्तस्यां मनःप्रवेशे ज्ञानशून्या सुषुप्तिर्भवति, ज्ञानमात्रे त्वङ्मनोयोगस्य हेतुत्वेन तदानीं तदभावाज्ज्ञानाभावोपपत्तेः । तच्च वायवीयमेव रूपादिषु पञ्चसु स्पर्शस्यैवाभिव्यञ्जकत्वात् अङ्गसङ्गिसलिलशैत्याभिव्यञ्जकव्यजनपवनवत् । एलादौ जलस्पर्शाभिव्यञ्जके व्यभिचारवारणायैवकारः । तच्चोद्भूतस्पर्शतज्जातितदभावोद्भूरूपस्पर्शवद्द्रव्यतद्गतगुणतज्जातितदभावानां ग्राहकम् । अत उद्भूतरूपाभावात्तप्तवारिस्थं तेजो, रूपाभावाद्वायुश्च त्वचा न गृह्यते, किं तु तत्स्पर्शमात्रं गृह्यते तदाश्रयत्वेन वायुरनुमीयते इति सिद्धान्तः । एवं प्रदीपवज्रचन्द्रा-

दिप्रभापि न त्वचा गृह्यते उद्भूतस्पर्शाभावात् ॥

मीमांसकस्तु उद्भूतस्पर्शवद् द्रव्यं त्वचो योग्यं लाघवात् न तु रूपमपि तत्र प्रवेश्यं गौरवात् । अतो वायुरपि स्पार्शनप्रत्यक्ष एव । अत एव वायुं स्पृशामीत्यनुभवः । अन्यथा घटादेः स्पर्शो गृह्यते तेन तद् द्रव्यमनुमीयते इति वक्तुं शक्यत्वात् किमपि द्रव्यं स्पार्शनप्रत्यक्षं न स्यात् । किं च चक्षुषा रूपं गृह्यते घटादि तदाश्रयत्वेनानुमीयतइत्यपि स्यात् । तथा च द्रव्यमतीन्द्रियमेव स्यात् । एवं महदुद्भूतरूपवद्द्रव्यं चक्षुर्योग्यम् । अतः प्रदीपचन्द्रादिप्रभापि चक्षुर्ग्राह्यैवेत्याहुः । विषयस्तु वृक्षादिकम्पजनकः । प्राणः पञ्चधा प्राणापानव्यानोदानसमानभेदात् ॥

शब्दाश्रय आकाशः ॥

स च तत्कार्यस्य शब्दस्य सर्वत्रोपलम्भात् विभुः, लाघवादेको नित्यश्च श्रोत्रं तदीयमिन्द्रियम् । अदृष्टविशेषोपगृहीतकर्णशष्कुल्यवच्छिन्नं नभः श्रोत्रम् । बधिरस्यादृष्टविशेषाभावान्न श्रोत्रमस्ति ॥

कालिकपरत्वापरत्वानुमेयः कालः ॥

स चैकोपि वर्त्तमानातीतभविष्यत्क्रियोपाधिवशाद्वर्तमानादिसंज्ञा लभते । पाकपठनादिक्रियावशात् पाचकपाठकादिव्यपदेशवत् ॥

दिगेका नित्या दैशिकपरत्वापरत्वासाधारणकारणम् ॥

सा चेन्द्रयमाग्निनिर्ऋतिवरुणवायुकुबेरेशानब्रह्मानन्तरूपोपाधिवशात् पूर्वादिभेदेन दश संज्ञा लभते । एतौ दिक्कालौ जगदाधारौ जगद्धेतू च । इहेदानीं करोमीति सर्वानुभवात् ॥

आत्मत्वसामान्यवान् ज्ञानाश्रयो वा आत्मा विभुर्नित्य-

श्चेति ॥

स द्विधा जीवेश्वरभेदात्। सुखाद्याश्रयोऽहम्प्रत्ययवेद्यो जीवः ॥

नन्वहं गौरोऽहं जानामीतिसामानाधिकरण्योपलम्भाद्गौरत्वादिरूपवति ज्ञानसुखाद्याश्रयता सिद्ध्यतीति देह एव आत्मा स्यात्। न च शरीरं नात्मा ज्ञानशून्यत्वात्। तदपि शरीरं ज्ञानशून्यं पार्थिवत्वात् घटवदित्यनुमानात् सिद्ध्यतीति वाच्यम्। घटस्य केवलपार्थिवत्वाज्ज्ञानशून्यत्वेऽपि भूतसमुदायात्मकत्वात् शरीरस्य ज्ञानवत्त्वसम्भवात्। केवलचूर्णादौ रागाभावेऽपि चूर्णपर्णादिसमुदाये ताम्बूले रागोत्पत्तिवत्। अहं ज्ञानवानिति प्रत्यक्षबाधेनानुमानस्य शरीरे ज्ञानाभावाऽसाधकत्वाच्च वन्हिरनुष्णः कृतकत्वात् घटवदित्यनुमानवत्। स्वीचक्रुश्च देह एवात्मेति चार्वाकाः। एवं काणोहं बधिरोहमिति इन्द्रियधर्मसामानाधिकरण्यादिन्द्रियाण्येवात्मेत्यपरे वदन्ति, तत्कथं नित्यो विभुरात्मेति सङ्गच्छेत इति चेन्न। शरीरेन्द्रियाणामनित्यत्वेनात्मत्वासम्भवात्। न चात्माप्यनित्य एवास्तु, कृतहानाकृताभ्यागमप्रसङ्गात्। धर्माधर्मशास्त्रवैयर्थ्यापत्तेः। किं च काश्चिदुत्पत्तिमारभ्यैव रूपभाग्यादिमान् नान्य इति नियमायाऽदृष्टविशेषो हेतुर्वाच्यः स चैतज्जन्मनि न सम्पादित इति तत्सम्पादकजन्मान्तरयोग्यात्मसिद्धिः। अनेकजन्मयोगिनश्च नित्यतैव नाशकाभावात्। न च स्वतन्त्र ईश्वर एव स्वेच्छावशात् स्वसृष्टप्राणिष्वेवं करोति कुलाल इव स्वनिर्मितघटेषु क्व चित् दुग्धयोगं क्व चित् मूत्रपुरीषयोगमिति वाच्यम्। अचेतनइव चेतने तथा व्यवहारे वैषम्यनैर्घृण्यप्रसङ्गात्। दृश्यते च कुलालादेरेव घटादिवत्पुत्रेषु निर्निमित्तकतया व्यवहारे वैषम्यादिप्रयुक्ता नि-

न्देति। न चायं नित्यः परमाणुरूप एवास्तु, सकलशरीरव्यापि-सुखदुःखाननुभवप्रसङ्गात्। परमाणुरूपवज् ज्ञानादेस्तद्धर्मस्याप्रत्यक्षत्वापत्तेश्च। स च प्रतिशरीरं भिन्नः सुखदुःखाद्ययौगपद्याद्वैचित्र्याच्च। अन्यथा परकीयसुखदुःखानुसन्धानप्रसङ्गाच्च हस्तपादादिभेदस्येव शरीरभेदस्याप्रयोजकतयाननुसन्धानाऽप्रयोजकत्वात् जातिस्मराणां जन्मान्तरीयार्थस्मरणानापत्तेश्चेति दिक्। दुःखासमानाधिकरणज्ञानवान्नित्यज्ञानाश्रयो वा ईश्वरः। स च सकलकार्यकर्तृत्वेन सिद्ध्यतीति वक्ष्यते॥

आत्मतद्गुणादिप्रत्यक्षकरणं मनः॥

तच्च परमाणुपरिमाणं प्रतिपुरुषं भिन्नं यत्रयत्रेन्द्रिये संयुज्यते ततस्ततो ज्ञानमुत्पद्यते। अतो युगपदनेकेन्द्रियैर्ज्ञानाभावोपपत्तिः। अन्यथा युगपद्रूपशब्दादिग्रहणापत्तौ व्यासङ्गान्न ज्ञातमित्यनुभवानापत्तेः। तथा च गौतमसूत्रं "युगपज्ज्ञानानुत्पत्तिर्मनसो लिङ्गं" मिति। अत एव मनो विभुः निःस्पर्शद्रव्यत्वात् आकाशवदिति मीमांसकोक्तमपास्तम्। अवधानिनां तु अभ्यासविशेषात्प्रेरणया झटिति मनसि क्रियया तत्तदिन्द्रियैर्योगाज्ज्ञानक्रमिकत्वेपि यौगपद्याभिमानमात्रम्॥

नन्वन्धकारोपि निःस्पर्शवत्त्वात् क्रियावत्त्वादिलक्षणरूपवत्त्वाच्च पृथिव्यादिभ्यो भिन्नं दशमं द्रव्यमस्तीति कथं नवैव द्रव्याणि इति चेत्। मैवम्। तस्य रूपवद्द्रव्यत्वे चक्षुषा ग्रहणं न स्यात्। द्रव्यचाक्षुषमात्रे उद्भूतानभिभूतरूपवदालोकसंयोगस्य हेतुत्वात्। न च चक्षुर्गोलकवृत्तितामसेन्द्रियान्तरादन्धकारग्रहः। इन्द्रियान्तरकल्पने गौरवात्। किं चान्धकारसमनियत आलोकाभावो ऽवश्यमभ्युपेयः। तथा च तेनैवारोपितनीलरूपेणान्धकार इति व्यवहारसम्भवान्न द्रव्यान्तरं तमः। अति-

गौरवात् । तस्मादुद्भूतानभिभूतरूपवदालोकाभावसमूहस्तमः ॥

गुणत्वजातिमन्तो गुणाः ॥

ते च रूपरसगन्धस्पर्शसङ्ख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मसंस्कारशब्दाश्चतुर्विंशतिरेव ॥

तत्र रूपत्वजातिमद्रूपम् ॥

पृथिव्यादित्रयवृत्ति । शुक्लपीतहरितरक्तकृष्णकपिलचित्रभेदात्सप्तधा । तदवान्तरजातयस्तु असङ्ख्याताः । तत्र शुक्लभास्वरं तेजसि । परप्रकाशकतावच्छेदकजातिविशेषो भास्वरत्वं तद्वद् भास्वरम् । शुक्लमेवाभास्वरमपाकजमप्सु षड्विधमचित्रम् । पाकजं पृथिवीपरमाणौ सप्तविधमपि अपाकजमेव पृथिवीद्व्यणुकादौ । तत्रावयविरूपं कारणम् । एवं रसादावपि । मीमांसकास्त्वेकैका एव नीलपीतारुणादिव्यक्तयो नित्याश्च । ताश्चोत्पद्यमानघटादौ घटत्वादिवत्संसृज्यन्ते इति रूपवान् घट इत्यादिप्रतीतिः । घटादिनाशे च व्यक्त्यन्तरे घटत्वादिवदेव वर्त्तन्त इत्याहुः । तन्न । एवंहि घटत्वादिवज्जातित्वापत्तेः । नित्यमेकमनेकसमवेतं सामान्यमिति तल्लक्षणयोगात् । इष्टापत्तौ नीलनीलतरादिव्यवहारानापत्तेः । नहि भवति गोत्वतरो गोत्वतम इति । किं नीलद्रव्यस्य पाकेन रक्तताया दर्शनस्थले पूर्वनाशस्याऽकामेनाप्यभ्युपेयत्वान्न किं चिदेतत् ॥

रसत्वजातिमान् रसः ॥

पृथिवीजलवृत्तिः । मधुराम्लकटुतिक्तकषायलवणभेदात् षोढा । मधुरोऽपाकजोऽप्सु षड्विधोपि । पाकजः पृथिवीपरमाणौ द्व्यणुकादावपाकजः ॥

गन्धत्वजातिमान् गन्धः ॥

पृथिवीमात्रवृत्तिः । जलादौ तूपष्टम्भकभागगत एव लोहितस्फटिक इतिवत् प्रतीयते । अत एव पुष्पाद्युपरिसमागतवायुना पुष्पाद्यवयवा एव नीयन्ते इति सिद्धान्तः ॥

नन्वेवं पुष्पादेः सच्छिद्रता, कस्तूर्यादेः परिमाणन्यूनता च स्यादिति चेन्न । भोजकाऽदृष्टवशात् पुनर्भागानां पूरणाभ्युपगमात् । क्व चित्कर्पूरादौ तथात्वस्येष्टत्वात् । सुरभिरसुरभिश्चेति द्विधा, सोपि पाकजः परमाणौ द्व्यणुकादावपाकजः ॥

स्पर्शत्वजातिमान् स्पर्शः ॥

पृथिव्यादिचतुष्टयवृत्तिः शीतोष्णानुष्णाशीतभेदात्त्रिधा । शीतोऽप्सु । उष्णस्तेजसि । अनुष्णाशीतः पृथिवीवाय्वोः । वायावपाकज एव पृथिवीपरमाणौ पाकजः पृथिवीद्व्यणुकादावपाकजः । कोमलकठिनचित्रभेदात् अनेकधा ॥

ननु कथं रूपस्पर्शावेव चित्रावुदाहृतौ रसगन्धयोरपि हरीतक्यादौ विचित्रयोर्दर्शनात् । न च तत्र नानारससमुदाय एव भासते षड्सा हरीतकीति व्यवहारादिति वाच्यम् । रूपस्पर्शयोरप्येवमापत्तेः । चित्ररूपवति अत्र श्याममत्र रक्तमित्यानुभवाद्व्यवहाराच्चेति चेत् । उच्यते । न तावन्नीलपितारब्धे नीलं सम्भवति, समवायेन नीलं प्रति स्वाश्रयसमवेतत्वसम्बन्धेन नीलेतरस्य प्रतिबन्धकत्वात् । अन्यथा पीतावच्छेदेनापि नीलापत्तेः । नापि परस्परप्रतिबन्धादुभयोरसम्भवेन नीरूपत्वमेवास्त्विति वाच्यम् । अतीन्द्रियतापत्तेः । विषयगतोद्भूतरूपस्य प्रत्यक्षहेतुतायाः प्रागभिहतत्वात् । तस्मान्नीलपीतादिविलक्षणमेव चित्रं तत्र जन्यतइति वक्तुं शक्यत्वात् । एवं स्पर्शेप्यवधेयम् । गन्धरसयोस्त्वस्वीकारेपि न क्षतिः । तयोः प्रत्यक्षाहेतुत्वात् । के चित्तु चित्ररसगन्धावपीच्छन्ति । तन्तु वर्द्धमानादिष्व-

नादृतम् ॥

ननु रूपादयः पृथिवीपरमाणावेव पाकजा इति कथं सङ्गच्छताम्। आमपाकनिक्षिप्तघटादावपि पूर्वरूपनाशपरोत्पत्त्योरनुभवसिद्धत्वादिति चे,त्सत्यम्। घटमध्येपि पाकजरूपाद्यनुभवसिद्धं तच्च तत्राग्निसंयोगं ज्ञापयति अग्निसंयोगस्यैव पाकजजनकत्वात्। तथा च वन्ह्याभिघातात् तत्र परमाणुपर्यन्तं घटावयवतदवयवानां विभागः। ततः परस्परसंयोगनाशः। ततो विशकलितेषु तन्तुषु पटनाशवदसमवायिकारणनाशात् द्रव्यनाशे स्वतन्त्राः परमाणवः पच्यन्ते तत्र कदाचित्समानाग्निसंयोगादेकजातीयं, विलक्षणाच्च परस्परविलक्षणं रूपमुत्पद्यते, पुनर्भोजकादृष्टसहकृत ईश्वर एव सृष्ट्यादाविव द्व्यणुकादिक्रमेण पूर्ववदेव तादृशरेखोपरेखासंस्थानवत् करोति। तथा च परमाणुरूपाद् द्व्यणुके ततः त्र्यणुके इति क्रमेण पूर्वकुलालनिर्मितघटइव तत्रापि रूपाद्युत्पतिरिति भवति परमाणावेव पाकजरूपरसगन्धस्पर्शाः न द्व्यणुकादाविति। घटादावेव पाकाभ्युपगमे कठिनघटादिमध्यभागे वन्ह्यप्रवेशान्मध्येपि पूर्वरूपादिनाशनवीनोत्पत्ती न स्यातामिति काणादाः ॥

नैयायिकास्तु घटादयः सच्छिद्राण्येव द्रव्याणि, कथमन्यथा भाण्डान्तर्गतौदनादिपाकः कथं वा तन्मध्यवर्त्तिजलस्यन्दनप्रस्रवणे। तथा च तद्द्वारा प्रविष्टवन्हिना मध्येपि पाकसम्भवाद्वौरवग्रस्तनिष्प्रमाणकपूर्वनाशनवीनोत्पत्तिकल्पनां तदुत्पादनायेश्वरे भारं च न सहन्ते। तथा च तन्मते घटादावपि पाकः सिध्यति ॥

ननु संयोगस्योभयनिष्ठत्वाद् घटादाविव वन्ह्यादावपि रूपादयः कुतो न भवन्तीति चेत, सत्यम्। समवायेन पाकजरूपं

प्रति पृथिवीत्वेन हेतुत्वात् वन्हेस्तेजस्त्वात् । इदमेव च पृथिवीत्वजातौ प्रमाणम् ॥

ननु मतद्वयेप्यग्निसंयोगादेकस्माद्विलक्षणा भिन्नाश्च रूपादयः कथं प्रागभावभेदादिति चेन्न । तस्य वैलक्षण्याप्रयोजकत्वात् । अन्यथा घटादीनामपि पटादिवत्परस्परवैलक्षण्यापत्तिरिति चेन्न । रूपवति घटे रूपान्तरानुत्पत्तेः रूपं प्रति रूपं प्रतिबन्धकमिति सर्वसिद्धम् । एवं रसादावपि । तथा च प्रतिबन्धकाभावरूपतत्तद्भावकारणभेदवैलक्षण्याभ्यां भेदवैलक्षण्ये द्वित्वत्रित्वादिजद्व्यणुकत्र्यणुकाणुत्वह्रस्वत्वदीर्घत्वमहत्वेष्वप्येव भेदादि । के चित्तु अग्निसंयोगभेदादेव भेदमाहुस्तेषामणुत्वादौ गतिश्चिन्त्या ॥

ननु स्पर्शस्य पाकजत्वे किं मानम्। नहि रूपरसादिवत्पाकोत्तरं स्पर्शान्तरमनुभूयते । न च चांडालस्पर्शनिषेधगोब्राह्मणस्पर्शविध्यनुपपत्त्या तत्सिद्धिरित्याचार्यैरुक्तं युक्तम्। तत्र स्पर्शपदस्य संयोगपरत्वात्। अन्यथा गङ्गास्पर्शविधिकर्मनाशाजलस्पर्शनिषेधानुरोधाज्जले ऽपि दीपाग्निस्पर्शनिषेधपरमेश्वरार्त्तिक्यदीपस्पर्शविधेरनुरोधात्तेजसि तत्सिद्ध्यापत्तेरिति चेन्न । पूर्वं काठिन्यस्य पाकेन कोमलतायाः पूर्वं कोमलस्य पाकेन काठिन्यस्य वानुभवासिद्धत्वेन रूपादिवत्पाकजत्वासिद्धेः । न च काठिन्यकोमलत्वे संयोगविशेषौ। चाक्षुषत्वापत्तेः । एते रूपरसगन्धस्पर्शा उद्भूतानुद्भता द्विधा । उद्भूतत्वं जातिस्तदभावो ऽनुद्भूतत्वामिति प्राञ्चः । अनुद्भूतत्वं जातिस्तदभाव उद्भूतत्वामिति माणिकाराः ॥

संख्यात्वजातिमती संख्या ॥

एकत्वाद्वित्वबहुत्वभेदात्त्रिधा । सकलद्रव्यवृत्तिः । तत्रावयव-

गतैकत्वेनावयविन्येकत्वं जन्यते द्वित्वादौ तु विशेषः। घटद्वये चक्षुरादिसंयोगे सति तत्रायमेको ऽयमेक इत्यपेक्षाबुध्या द्वित्वोत्पत्तिरनन्तरं द्वित्वद्वित्वत्वनिर्विकल्पकं ततः सविकल्पकमनन्तरमिमौ द्वाविति प्रतीतिर्भवति। तत्र घटद्वयवृत्त्येकत्वद्वयमसमवायिकारणम्। अपेक्षाबुद्धिर्निमित्तकारणम्। द्वौ घटौ समवायिकारणम्। एवं बहुत्वेपि। अपेक्षाबुद्धिनाशात् द्वित्वादिनाशः। अत एव अपेक्षाबुद्धिः क्षणचतुष्टयस्थायिनी। अन्यथा द्वित्वविशिष्टद्रव्यप्रत्यक्षायोगात्। तद्भिन्नज्ञानेच्छाप्रयत्नादयस्तु द्विक्षणस्थायिन एवेति सिद्धान्तः। द्व्यणुकत्र्यणुकादिगतद्वित्वत्रित्वादेर्भगवदपेक्षाबुध्योत्पन्नस्य च निमित्तकारणादृष्टनाशान्नाशः। नन्वयमेकोयमेक इत्यादिद्वयत्रयादिविषयापेक्षाबुध्या द्वयोर्द्वित्वं त्रिषु त्रित्वमित्यादिनियमः कुतः, वैपरीत्यस्य दुर्वारत्वात्। समवायिकारणादिसाम्ये कार्यवैलक्षण्यं वा कथम्। न चैकत्वद्वयं द्वित्वे त्रयं त्रित्वे हेतुरिति वाच्यम्। एकत्वे द्वित्वाद्यभावात् द्वित्वोत्पत्तेः प्राग् द्रव्येपि तदभावात् द्वित्वे द्रव्यद्वयं हेतुरित्यस्याप्यसम्भवात्। न च प्रागभावादेतदुत्पतिरित्याचार्योक्तं युक्तम्। तस्य वैलक्षण्याप्रयोजकत्वात्। अन्यथा कार्यवैलक्षण्यात्कारणवैजात्यकल्पनोच्छेदापत्तिरिति चेत्। उच्यते। केवलापेक्षाबुध्या द्वित्वं द्वित्वसहितया त्रित्वं तत्सहितया चतुष्ट्वमित्यभ्युपगमात्। द्वित्वं द्वयोरेव कुत इति चेत्। तत्रैव तत्प्रागभावसत्त्वादिति गृहाण॥

परिमाणत्ववत् परिमाणम्॥

सकलद्रव्यवृत्ति। तच्चतुर्विधम्। अणुमहद्दीर्घह्रस्वभेदात्। तत्रोत्कृष्टाणुत्वह्रस्वत्वे परमाणुमनसोर्नित्ये। अपकृष्टे द्व्यणुके। एवं महत्वदीर्घत्वे उत्कृष्टे नित्ये आकाशादौ विभुत्वशब्दवाच्ये। अपकृष्टे जन्ये तरतमभावेन त्र्यणुकादौ स्तः। बिल्वादामलकम-

णिति व्यवहारस्तु अपकृष्टमहत्त्वाद्गौणः । एवं मांशोर्वामनो ह्रस्व इत्यपि अपकृष्टदीर्घत्वाद्गौणः । तत्र द्व्यणुकपरिमाणं परमाणुद्वित्वसंख्यायोनिः । द्व्यणुकगतबहुत्वात् त्र्यणुके महत्त्वम् । घटादौ च कपालमहत्त्वम् । क्वचित् क्वाचिद्बहुत्वसंख्या विलक्षणमहत्त्वे हेतुः । तूलपिण्डपरिमाणविशेषे • अवयवप्रचयः कारणम् । स च प्राशिथिलः संयोगः ॥

घटः पटान्पृथगित्यनुभवसिद्धपृथक्त्वजातिमत्पृथक्त्वम् ॥

तदपि संख्यावदेव सर्वद्रव्यवृत्ति एकपृथक्त्वाद्द्विपृथक्त्वात्रिपृथक्त्वादिभेदेन अनेकधा । अवयवगतैकपृथक्त्वादवयविन्येकपृथक्त्वमुत्पद्यते । रूपं रसात्पृथक् इति तु भिन्नत्वाद्गौणः प्रयोगः । ननु भेदेनैव घटः पटात्पृथगिति व्यवहारोपपत्तौ पृथक्त्वाख्यगुणे किं मानमिति चेत् । अत्राचार्याः । अन्यारादितरर्तेदिक्शब्दांचूत्तरपदाजाहियुक्ते इति व्याकरणसूत्रेण पृथक्त्ववाचकपदयोगे विधीयमानपञ्चम्यनुरोधेन तत्स्वीकारः । महाभाष्ये ऽन्येत्यर्थग्रहणमभ्युपेत्य तदर्थवाचकेतरादिपदयोगेपि पञ्चमीसिद्धेस्तस्य सूत्रे प्रत्याख्यातत्वात् । भेदस्य अन्यपदार्थत्वेन विवक्षणे च तद्वाचकपदयोगाविशेषात् घटाद्भिन्नो विलक्षण इत्यादाविव घटो नेत्यत्रापि पञ्चम्यापत्तेः ॥

संयुक्तावित्यनुभवसिद्धसंयोगत्वजातिमान्संयोगः ॥

सर्वद्रव्यवृत्तिः । स त्रिविधः । अन्यतरकर्मज उभयकर्मजः संयोगजश्च । निष्क्रियस्य स्थाणोः क्रियावता पक्षिणा सहाद्यः । मल्लयोर्मेषयोर्वा द्वितीयः । अङ्गुलीतरुसंयोगात्कायतरुसंयोगोन्त्यः । सोयं संयोगो द्विनिष्ठः घटपटौ संयुक्तौ इतिप्रत्ययात् । घटे पटस्य पटे घटस्यान्य एव संयोगः । अन्यथा घटः पटसंयुक्तइतिवत् घटो घटसंयुक्त इत्यपि प्रतीत्यापत्तेः । तथा

चैकद्रव्यवर्त्येव संयोग इति मीमांसकाः ॥

घटपटौ विभक्ताविति प्रतीतिसिद्धविभागत्वजातिमान् विभागः ॥

सर्वद्रव्यवृत्तिः संयोगजः । हिमवद्विंध्यौ । विभक्ताविति प्रयोगस्तु संयोगाभावयोगात् गौणः । शेषं पूर्ववत् ॥

परत्वत्वजातिमत् परत्वम् ॥

तत् द्विविधं कालिकं दैशिकं चेति । आद्यं जन्यद्रव्ये एव । द्वितीयं मूर्ते एव । इयत्तावच्छिन्नपरिमाणं मूर्त्तत्वमुच्यते तदाश्रयो मूर्त्तम् । तथाहि । युवस्थविरपिण्डयोरयमस्माद्बहुतरतपनपरिस्पन्दाश्रयो ऽयमस्मादल्पतरतपनपरिस्यन्दाश्रय इति बुद्ध्या परत्वापरत्वे जन्येते । तदीयैव अयमस्मात्पर इति अयमस्मादपर इति धीरुत्पद्यते । एतदेव ज्येष्ठत्वं कनिष्ठत्वं च । तत्र तपनक्रियायाः पुरुषे सम्बन्धघटको महाकालोभ्युपेयते । एवं व्यवहितसन्निकृष्टयोः पिण्डयोरयमस्मात्स्वल्पतरसंयुक्तसंयोगवान् अयमस्माद्बहुतरसंयुक्तसंयोगवानिति ज्ञानात् दैशिकपरत्वापरत्वे जन्येते तयोरेवायमपरोयं पर इति धीरुत्पद्यते । तत्र तावत् देशसंयोगसङ्क्रामिका महादिगभ्युपेयते ॥

गुरुत्वत्वजातिमद्गुरुत्वम् । आद्यपतनासाधारणकारणम् ॥

पृथिवीजलवृत्ति । अतीन्द्रियं पतनानुमेयमित्युदयनाचार्याः । अधोदेशावच्छेदेन प्रत्यक्षमेव तादिति लीलावतीकारः ॥

द्रवत्वत्वजातिमत् द्रवत्वम् ॥

पृथिव्यादित्रयवृत्ति । द्विविधं सांसिद्धकं नैमित्तकं च । तत्र स्वाभाविकं जले करकादौ चादृष्टवशात् घनीभावात्प्रतिबन्धकमात्रं वस्तुतोस्त्येव क्षणोत्तरमुपलम्भात् । लाक्षासुवर्णादावग्निसंयोगनिमित्ताज्जायमानमन्त्यम् ॥

स्नेहः सङ्ग्रहरूपकार्यानुमेयो गुणः ॥

जलमात्रवृत्तिः । घृततैलादावुपष्टम्भकजलभागतः ॥

बुद्धित्वजातिमती बुद्धिः ॥

सा द्विधा स्मृतिरनुभवश्च ॥

स्मरामीत्यनुभवसिद्धस्मृतित्वजातिमती स्मृतिः ॥

सा च पूर्वानुभवजन्यसंस्कारजा इति वक्ष्यते ॥

अनुभवामीत्यनुभवसिद्धजातिविशेषोनुभवत्वमित्येके ॥ अनुमित्यादौ अनुभवामीत्यप्रतीतेः प्रत्यक्ष एव । तथानुभवाच्चानुभवसिद्धमनुभवत्वं प्रत्यक्षत्वमेवेत्यपरे । प्रकृते तु स्मृतिभिन्नज्ञानत्वमेवानुभवत्वमिति ॥ सेयं बुद्धिर्द्विधा मिथ्या प्रमा च ॥

असद्विषयणी मिथ्या ॥

शुक्ताविदं रजतमिति बुद्धौ शुक्तिरजतत्वयोः प्रसिद्धयोरलीकस्यैव समवायस्य विषयीकरणादिति वाचस्पतिमिश्राः । आचार्यादयस्तु । असतो भानासम्भवाच्छुक्तौ प्रसिद्धरजतत्वस्येव तत्समवायस्याप्यारोप एव । अलीकं न भासतइत्यादिवाक्येष्वपि सचेतसां मूकतैवोचितेत्याहुः । तन्मते विशेष्याऽसम्बद्धविशेषणविषयकत्वं मिथ्यात्वम् ॥ घटे रूपमित्यस्य वारणाय विशेष्यावृत्तीति नोक्तम् । असम्बद्धत्वं तु तत्र नास्तीति नातिव्याप्तिः । सा त्रिधा संशयविपर्ययतर्कभेदात् । एकस्मिन्धर्मिणि विरुद्धनानार्थावमर्शः संशयः । यथा स्थाणौ स्थाणुर्वा पुरुषो वायामिति । अत्र पुरुषत्वं तत्सम्बन्धश्च तत्र नास्तीति भवत्यसद्विषयत्वम् । स चायं त्रिधा साधारणधर्मदर्शनजो ऽसाधारणधर्मदर्शनजो विप्रतिपत्तिजश्च । स्थाणुपुरुषसाधारणोच्चत्वदर्शनज आद्य उक्तः । नित्या ऽनित्येभ्यो व्यावृत्तशब्द-

त्वादिदर्शनजः शब्दो नित्यो ऽनित्यो वेति द्वितीयः । वादिविरुद्धार्थकवाक्याज्जायमानस्तमो द्रव्यं न वेत्यादिस्तृतीयः ॥

प्रतियोगिव्यधिकरणतदभाववति तत्प्रकारकः निर्णयो विपर्ययः ॥

यथा शुक्तावि दं रजतमिति रजतत्वाभाववत्यां शुक्तौ तन्निर्णयोयं भवत्येव । अयं वृक्षः कपिसंयोगीति मूलावच्छेदेन कपिसंयोगाभाववति वृक्षे कपिसंयोगप्रकारकस्य निश्चयस्य सत्त्वादयमपि विपर्ययः स्यात्तद्वारणाय प्रतियोगिव्यधिकरणेति । संयोगाभावो हि प्रतियोगिसमानाधिकरणो न प्रतियोगिव्यधिकरणः, शाखावच्छेदेन कपिसंयोगसत्त्वेपि मूलावच्छेदेन कपिसंयोगाभावस्य विद्यमानत्वात् ॥

व्याप्यारोपप्रयुक्तो व्यापकारोपस्तर्कः ॥

यथा यदि निर्वन्हिः स्यान्निर्धूमः स्यादिति । वन्ह्यभावो व्याप्यस्तदारोपप्रयुक्तो व्यापकधूमाऽभावारोपोत्रास्ति । स्वप्नस्तु संशयविपर्ययात्मकं स्मरणमेव दोषवशात्तदिति स्थाने इदमिति नैयायिकाः । वैशेषिकास्तु तर्कस्याहार्यविपर्ययात्मकत्वान्न पृथक् गणयन्तः संशयाविपर्ययस्वप्नानध्यवसायभेदेनाविद्या चतुर्द्धेत्याहुः । मिद्धामनःसंयोगजं ज्ञानं स्वप्नः । अविदितचरपदार्थदर्शनात्किमेतदितिधीरनध्यवसायः । न चायं संशयः, नानाकोट्यनुल्लेखात् ॥

प्रमा च यथार्थानुभवः ॥ अबाधितार्थविषयं ज्ञानं यथार्थम् ॥ स्वविषयसम्बन्धेन विशेषणवद् विशेष्यविषयकमित्यर्थः । तथा च रक्तः पट इति परम्परया प्रमा, न समवायेन । सा च प्रमा प्रत्यक्षात्मिकैवेति चार्वाकाः । अनुमितिरपीति कणादसुगतौ । उपमितिरपीति न्यायैकदेशिनः । शब्दोपीति नैयायि-

काः । अर्थापत्तिरपीति प्रभाकरः । अनुपलब्धिरपीति भाट्टा वेदान्तिनश्च । सम्भवैतिह्यरूपापीति पौराणिकाः । चेष्टापीति तान्त्रिकाः ॥

एतादृशप्रमाकरणं च प्रमाणम् ॥

करणत्वं चासाधारणकारणत्वम् ॥ असाधारणत्वं च व्यापारवत्त्वम् । तथा च चक्षुरादिकमेव प्रत्यक्षे करणमित्येके । आचार्यास्तु अव्यवधानेन कार्योत्पादकत्वमसाधारणत्वम् । तथाच चक्षुःसंयोगादिकमेव प्रत्यक्षे करणं, लिङ्गपरामर्शरूपं तृतीयं ज्ञानमेवानुमितावित्याहुः ॥

कारणत्वं चानन्यथासिद्धनियतपूर्ववृत्तित्वम् ॥

यथा घटे ण्दडादेः । दैवादागतस्य रासभस्य तन्तुरूपस्य च वारणाय क्रमेण पदद्वयमिति प्राञ्चः । वस्तुतस्तु नियतपदं न देयमेव रूपवद्रासभस्याप्यन्यथासिद्धत्वेनैव वारणात् । अन्यथासिद्धत्वं चावश्यकल्प्यमानपूर्ववर्त्तिन एव कार्यसम्भवे तत्सहचरितत्वं, रासभसत्वेपि दण्डचक्रादेरावश्यकत्वात्तैरयमन्यथासिद्ध एवेति तत्त्वम् । तथा च प्रमाकरणं चार्वाकमते एकं, वैशेषिकाणां द्वयमित्यादि सिध्यति । तथाहि । साक्षात्करोमीति प्रतीतिसाक्षिकजातिविशेषवज् ज्ञानं प्रत्यक्षन्तत् द्विधा नित्यमनित्यं च । नित्यं भगवतः तत्सर्वविषयं प्रमा च । अनित्यं च जीवानाम् । तत् द्विधा सविकल्पकं निर्विकल्पकं च ॥

अयं घटो ऽयं दण्डीत्यादिशब्दाभिलापयोग्यं विशेषणविशेष्यवैशिष्ट्यावगाहि वा सविकल्पकम् ॥
तत्कारणत्वेन कल्प्यमतीन्द्रियं विशिष्टशब्दाभिलापयोग्यं विशेषणविशेष्यवैशिष्ट्यानवगाह्यन्त्यम् ॥

तद्यथा । दण्डी पुरुष इति ज्ञाने दण्डो विशेषणं पुरुषो

विशेष्यः संयोगः सम्बन्ध इति तदवगाहि तत् ज्ञानं सविकल्पकम्। तद्दण्डज्ञानमन्तरेण नोत्पद्यते ऽतो दण्डज्ञानजन्यम्। यथा सुप्तोत्थितस्य जायमाने घट इति ज्ञाने घटत्वं विशेषणं घटो विशेष्यः समवायः सम्बन्ध इति तदवगाहि तत्सविकल्पकं घटत्वज्ञानजन्यं वाच्यम्। तत्कारणीभूतं ज्ञानं चानुभवानास्पदत्वादतीन्द्रियं निर्विकल्पकमभिधीयतइति। नास्तिकास्तु निर्विकल्पकमेव प्रमा सुलक्षणवस्तुविषयत्वात्। तच्च सूर्यादिवत्स्वप्रकाशं न तु घटादिवत्परप्रकाश्यम्। सविकल्पकं तु न प्रमा, अलीकघटत्वाद्यऽवगाहित्वात्। वन्ध्यापुत्रज्ञानवदित्याहुः। तन्नेति वक्ष्यते। तच्च प्रत्यक्षं पश्यामि जिघ्रामि आस्वादे स्पृशामि शृणोमि मनसा सुखं साक्षात्करोमीति प्रतीतिसाक्षिकचाक्षुषत्वादिजातिषड्कभेदात्षोढा। तत्करणं चक्षुरादि, तैर्विषये गृह्यमाणे विषयेण सह सन्निकर्षा अवान्तरव्यापाराः। ते च संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायः विशेषणता ज्ञानलक्षणा योगजधर्मलक्षणा सामान्यलक्षणा चेति नव। षडाद्या लौकिका अन्ये त्रयो ऽलौकिकाः। तत्र मनसा जायमाने अहमित्यात्मप्रत्यक्षे मनः करणम्। आत्मप्रत्यक्षं फलम्। आत्ममनः संयोगो ऽवान्तरव्यापारः। सम्बन्ध इति यावत्। अन्ये तु तज्जन्यस्तज्जन्यजनकोवान्तरव्यापारः। भवति चात्ममनः संयोगो मनोजन्यस्तज्जन्यज्ञानजनकश्चेति व्यापारः। न चा ऽजन्ये शब्दसमवाये अव्याप्तिः। तस्य व्यापारत्वास्वीकारात् शब्दस्यैव स्वप्रत्यक्षे व्यापारत्वात्। यद्वा श्रोत्रमनः संयोग एव शब्दस्य तदत्यन्ताभावादेश्च प्रत्यक्षे व्यापारः। तस्य श्रोत्रजन्यत्वात्प्रत्यक्षजनकत्वाच्चेति वदन्ति। सुखादिग्रहे संयुक्तसमवायः। मनः संयुक्ते आत्मनि सुखस्य समवा-

यात् सुखसमवेतसुखत्वादिग्रहे संयुक्तसमवेतसमवायः । एवं घटादिग्रहे चक्षुषः स्पार्शनस्य वा संयोगः । रूपादौ संयुक्तसमवायः । रूपत्वादौ संयुक्तसमवेतसमवायः द्रष्टव्यः । द्रव्यप्रत्यक्षमात्रे इन्द्रियसंयोगस्य शब्देतरद्रव्यसमवेतग्रहे संयुक्तसमवायस्य तत्समवेतग्रहे तृतीयस्य हेतुत्वस्य सामान्यतः स्वीकारात् । ननु चक्षुषो गोलकाविशेषरूपस्य घटादिसंयोगः प्रत्यक्षबाधितः कथमासत्तिरिति चेन्न । तत्तद् गोलकाधिष्ठितानामिन्द्रियाणामतीन्द्रियाणामप्युपगमात् गोलकादिरूपवत्त्वे चा ऽसम्बद्धग्राहकत्वमभ्युपेयम् । तथा च पृष्ठभागीयाः पुरोवर्त्तिनो भित्त्यादिव्यवहिताश्च पदार्था गृह्येरन् । व्यवधानं प्रतिबन्धकामिति चेन्न । भित्त्यादिपरभागास्थितानां परावृत्य दर्शने पृष्ठदेशे स्वस्य च प्रत्यक्षं न स्यात् । तत्पुरुषीयतत्कालीनप्रत्यक्षं प्रत्येव तत्कालप्रतिबन्धकत्वकल्पने चातिगौरवात् । तस्मादावश्यकमतीन्द्रियमिन्द्रियम् । नन्वेवं शाखाचन्द्रमसोस्तुल्यकालग्रहणं न स्यात् । किं च नेत्रोन्मीलने प्रहराद्यवधिसूर्यचन्द्रग्रहणार्थे विलम्बापत्तिः । चक्षुषस्तावत् दूरगमनकल्पनात इति चेन्न । अतिलाघवादतिशीघ्रं तावत् दूरगमनाद्विशेषाऽग्रहणस्याशु तदुत्पादकप्रतीतेश्चोपपत्तेः । तदुक्तम् । अचिन्त्यो हि तेजसो लाघवातिशयेन वेगातिशयो यत्प्राचीनाचलचूडावलम्बिन्येव भगवति मयूखमालिनि भुवनोदरेष्वालोकइत्यभिमानो लौकिकानामिति दिक् ॥ समवायेन शब्दग्रहः श्रोत्रे शब्दसमवायस्य सत्वात् । शब्दत्वादिग्रहे समवेतसमवायः । विशेषणतया आभावग्रहः । शब्दो नास्तीति श्रोत्रे शब्दाभावस्य विशेषणतास्त्येव । भूतले रूपादौ च घटाभावग्रहे चक्षुःसंयुक्तविशेषणता चक्षुःसंयुक्तसमवेतविशेषणता चेत्यादि द्रष्टव्यम् ॥ कवेः काव्यरचनामूलभूते विशिष्टज्ञाने

मनसा जायमाने विशकलितपदार्थस्मरणरूपं ज्ञाने सन्निकर्षः । अन्यथा तत्र सन्निकर्षाभावेनातीन्द्रियातीतानागतपदार्थवैशिष्ट्याज्ञानासम्भवात् । घटत्वसामान्यलक्षणप्रत्यासत्त्या ऽनागतव्यवहितसकलज्ञानोत्पत्तौ सामान्यं प्रत्यासत्तिः । अन्यथा एतादृशो घटपदवाच्य इत्येकत्र बोधिते सर्वत्र घटे तद्ग्रहो न स्यात् । क्षणमात्रमृषिस्तस्थौ सुप्तमीन इव ह्रदइत्याद्यभियुक्तोक्त्या योगिभिः सर्वसाक्षात्कारे तत्रात्यन्तयोगाभ्यासेन जातो ऽदृष्टविशेष एव योगजधर्म इत्युच्यते ॥

अथानुमानन्निरूप्यते ॥

अनुमिनोमीत्यनुभवसाक्षिकजातिविशेषवत्यनुमितिः ॥

तत्करणमनुमानम् ॥ तच्च ज्ञायमानं लिङ्गमिति प्राञ्चः । तथाहि । यद्धर्मावच्छिन्नसमानाधिकरणा यावन्तो यत्साध्यतावच्छेदकविशिष्टसमानाधिकरणास्तत्साध्यसामानाधिकरण्यव्याप्तिः । तदाश्रयो धूमादि लिङ्गं तस्मिन् लिङ्गे यत्र धूमस्तत्र सर्वत्र वन्हिरिति भूयो दर्शनात् धूमत्वावच्छिन्नधूमसमानाधिकरणाः सर्वे महानसत्वादयो वन्हित्वावच्छिन्नवन्हिसमानाधिकरणास्तादृशवन्हिसमानाधिकरणे धूम इति व्याप्तिज्ञानं प्रथमं जायते ततो ऽपूर्वपर्वतादौ धूमदर्शनात् द्वितीयं ज्ञानं जायते ततो वन्हिव्याप्यधूमवानयमिति तृतीयं ज्ञानमुत्पद्यते तदेव लिङ्गपरामर्शः । तत्र लिङ्गपरामर्शत्वेन परामृष्यमाणलिङ्गत्वेन वा करणतेत्यत्र विनिगमकाभावादुभयमपि द्वारद्वारिभावेन हेतुः । लिङ्गं करणं परामर्शो द्वारं व्याप्तिज्ञानं तु परामर्शे विशेषणज्ञानत्वेनोपयुज्यते । ततोयं पर्वतो वन्हिमानिति साध्यवन्हिविशिष्टज्ञानरूपानुमितिर्भवतीति । मणिकारास्तु अतीतानागतालिङ्गेनाप्यनुमितिदर्शनात् न लिङ्गस्य करणत्वं किं तु व्याप्तिज्ञानं करणं

परामर्शो व्यापार इत्याहुः । स्मरणात्मकपरामर्शादसन्निकृष्टहेतुकेऽप्यनुमितौ तत्र व्याप्तिज्ञानस्य पूर्वपरामर्शतज्जन्यसंस्कारैर्व्यवधानान्न करणत्वं सम्भवतीति व्याप्तिज्ञानस्य संस्कारसाधारणपरामर्शजनकत्वेनैवानुमितिकरणतेति नव्याः । जनकत्वं हि कारणत्वं तच्चानन्यथासिद्धनियतपूर्ववृत्तित्वं च प्रागभावावच्छिन्नसमवायिवृत्तित्वमतिगौरवग्रस्तमितिन तेन रूपेण करणता किं तु मन एवानुमितिकरणं परामर्शो व्यापारः । उक्तं च प्रमेयभाष्ये स्मृत्यनुमित्यादिकरणत्वेन मनः साधितमिति नव्यतराः । ज्ञानत्वेनैवानुमितिकरणता परामर्शो विशेषकारणमिति नातिप्रसङ्ग इत्यपि के चित् । न च व्याप्तिग्रहे सति महानसएवानुमीयताम् वन्हिव्याप्यधूमवानयमिति परामर्शस्य तत्रापि सम्भवादिति वाच्यम् । पक्षताया अप्यनुमितिहेतुत्वात् ॥

अनुमितीच्छाभावविशिष्टसाध्यनिर्णयाभावो हि पक्षता ॥

महानसादौ चानुमितीच्छाविरहसहित एव साध्यनिर्णयोस्तीति न पक्षता । तत्रैवानुमितिर्भवत्वितीच्छायां पक्षतासम्पत्तये अनुमतीच्छाभावविशिष्टेति विशेषणम् । तथा च पुरुषे सत्यपि दण्डाभावाद्दण्डिपुरुषाभाववत्साध्यनिर्णये सत्यपि इच्छाविरहरूपविशेषणाभावात्तादृशनिर्णयाभावरूपा पक्षता भवति । साध्यसन्देहः पक्षता । तदुक्तं भाष्ये । नानुपलब्धेऽर्थे न निर्णीतेऽर्थे न्यायः प्रवर्तते अपि तु सन्दिग्धे इति मते च तत्रानुमितिर्न स्यादिति । तन्न युक्तम् । अकस्माद् घनगर्जितेन मेघानुमानात्सन्देहाभावेपि अनुमितिदर्शनात् । न च धूमो वन्हिव्याप्यो धूमवान् पर्वत इति ज्ञानद्वयमेव हेतुरस्तु कुतः परामर्शोपीति मीमांसककन्दलीकारयोर्मतं युक्तम् । धूमो वन्हिव्याप्य आलोकवान्पर्वते इति ज्ञानादप्यनुमित्यापत्तेः ।

धूमे व्याप्तेरालोके पक्षधर्मतायाश्च ज्ञानस्य सत्त्वात् । न चैकत्र हेतौ तदुभयावगाहि ज्ञानं कारणमिति वाच्यम् । धूमो वन्हिव्याप्यो द्रव्यवान् पर्वत इति ज्ञानादप्यनुमित्यापत्तेः । द्रव्यत्वेन धूमस्यैव पक्षवृत्तित्वभानात् । न चैकेन धूमत्वरूपेण व्याप्तिपक्षधर्मताज्ञाने हेतू । वन्हिव्याप्यधूमवान् पर्वत इत्याप्तवाक्यजपरामर्शात् अनुमित्यनापत्तेः । तस्मात्परामर्श एवावश्यकः । सोयं परामर्शो व्याप्तिज्ञानक्रमेण यत्र स्वस्यैवोत्पन्नस्तत्रानुमितिरपि स्वस्यैव भवति, तदेव स्वार्थानुमानम् । यत्र तु स्वयं बुध्वा शब्देन परं बोधयति, तत्परार्थानुमानम् । तत्र प्रतिज्ञाहेतूदाहरणोपनयनिगमनाख्याः पञ्चावयवाः । तत्र पर्वतो वन्हिमानिति साध्यविशिष्टपक्षबोधकं वचनं प्रतिज्ञा कुत इत्याकांक्षाशमकं धूमादिति पञ्चम्यन्तं लिङ्गवचनं हेतुः धुमो ऽस्तु वन्हिर्मास्त्वित्याशङ्काशमकं यत्र धूमस्तत्राग्निर्यथा महानस इत्यादि सव्याप्तिकं दृष्टान्तवचनमुदाहरणं, हेतूदाहरणाभ्यां पर्यवसितव्याप्तिविशिष्टपरामर्शजनकं तथा चायं, वन्हिव्याप्यधूमवानयमिति वा उपनयः । पक्षे साध्योपसंहाररूपं तस्मात्तथेति वाक्यं निगमनम् । एतएव प्रतिज्ञापदेशनिदर्शनानुसन्धानप्रत्याम्नायशब्देन वैशेषिकैरुच्यन्ते । अपदेशो हेतुः । शेषं क्रमेण ज्ञेयम् । मीमांसकास्तु त्रय एवावयवाः प्रयोज्या उदाहरणान्तास्तदाद्या वा इत्याहुः । न च परार्थानुमाने शाब्दबोधात्मक एव साध्यनिर्णयो नानुमितिरिति वाच्यम् । वादिवाक्यस्याप्रामाण्याशङ्कास्कन्दितत्वेन निर्णयाजनकत्वात् पञ्चावयवपूर्त्यनन्तरं मनसा बाधकाऽभावप्रतिसन्धाने सति वादिकारितव्याप्तिज्ञानादिवशान्मानसपरामर्शोत्तरमनुमित्यभ्युपगमात् इति दिक् । तदिदं लिङ्गं त्रिधा केवलान्वयिकेवलव्यतिरेक्यन्वय-

व्यतिरेकिभेदात् । तत्र वृत्तिमदन्यत्वान्ताभावाप्रतियोगिसाध्यसाधको हेतुः केवलान्वयी । यथेदं वाच्यं ज्ञेयत्वात् द्रव्यवदित्यादि । अनवगतसाध्यसाधनसहचारो हेतुः केवलव्यतिरेकी । यथा आकाशः पृथिव्यादिसर्वेभ्यो भिद्यते शब्दवत्त्वादिति । अत्र शब्दस्य पृथिव्यादिसाहचर्यं न क्वापि दृष्टं किं तु यत्रेतरत्वं तत्र शब्दो नास्तीतीतरभेदाभावशब्दाभावयोरेव सामानाधिकरण्यमवगतमतो व्यतिरेकयोः साध्याभावहेत्वभावयोरेव व्याप्तिग्रहात् केवलव्यतिरेकी । न च शब्दे हेतौ व्याप्त्यग्रहादितरभेदव्याप्यशब्दवानयमिति परामर्शासम्भवेन कथमत्रानुमितिरिति शंक्यम् । ययोरभावयोर्व्याप्तिर्विना बाधकं तयोरपीति तर्कसहकृतमनसा हेतावपि साध्यव्याप्तिग्रहेण परामर्शसम्भवात् । यद्वा साध्याभावव्यापकीभूताभावप्रतियोगिहेतुमानयमित्येव व्यतिरेकिणि परामर्शस्ततोनुमितिरिति । यत्र साध्यहेत्वोस्तदभावयोश्च व्याप्तिर्गृह्यते सोन्वयव्यतिरेकी । यथा यत्र धूमस्तत्राग्निः यत्र वन्ह्यभावस्तत्र धूमाभाव इति उभयत्र सहचारग्रहाद्धूमसहचरिताः सर्वे वन्हिसहचरिता वन्ह्यभावसहचरिताः सर्वे धूमाभावसहचरिता इति ग्रहाद्धूमादेः तत् । व्याप्तिबोधनप्रकारस्तु प्राचीनैरुक्तः । 'अन्वयेन साधनं व्याप्यं साध्यं व्यापकमिष्यते । साध्याभावो ऽन्यथाव्याप्यो व्यापकः साधनात्ययः ॥ व्याप्यस्य वचनं पूर्वं व्यापकस्य ततः परम् । एवं परीक्षिता व्याप्तिः स्फुटीभवति तत्त्वत' इति । तत्रान्वयव्यतिरेकिणि पक्षधर्मत्वं सपक्षे सत्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेति पञ्च रूपाणि अपेक्षितानि । केवलव्यतिरेकिणि सपक्षाभावात्तद्भिन्नानि चत्वारि । केवलान्वयिनि विपक्षाभावाद्विपक्षव्यावृत्तिभिन्नानि चत्वारि । तत्र पक्षतावान् पक्षः पर्वतादिः । निर्णीतसाध्यहेतुसह-

चारिकः सपक्षः । यथा महानसः । निर्णीतसाध्याभावको विपक्षः । यथा जलह्रदः । विषयः साध्यं तस्याबाधितत्वं बाधाभावः यस्य हेतोस्तत्त्वम् । सत्प्रतिपक्षः साध्याभावसाधको हेतुस्तदभावो ऽसत्प्रतिपक्षत्वम् ॥

एतादृशरूपशून्या हेतुवदाभासमानत्वाद्धेत्वाभासाः ॥

ते चासिद्धविरुद्धानैकान्तिकप्रकरणसमबाधिताः पञ्च । तत्रासिद्धस्त्रिधा । आश्रयासिद्धः स्वरूपासिद्धो व्याप्यत्वासिद्धश्च । यत्र पक्षतावच्छेकं पक्षे नास्ति स आद्यः । यथा गगनारविन्दं सुरभि अरविन्दत्वात् सरोजारविन्दवत् । अत्र पक्षतावच्छेदकं गगनीयत्वं प्रसिद्धे अरविन्दे पक्षे नास्तीत्याश्रयासिद्धत्वम् । पक्षे हेतुस्वरूपाभावः स्वरूपासिद्धः । यथा जलं रसवत् गन्धवत्त्वादिति । व्याप्त्यभाववान् व्याप्त्यत्वासिद्धः । यथा पर्वतो वन्हिमान् नीलधूमात् । अत्र नीलत्वस्य व्यर्थत्वेन व्यर्थविशेषणत्वात्तदवच्छेदेन व्याप्त्यभावाद्व्याप्यत्वासिद्धः ॥

साध्यव्यापकाभावप्रतियोगी हेतुर्विरुद्धः । वन्हिमान् ह्रदत्वात् गगनत्वाद्वेति ॥

व्यभिचार्यनैकान्तिकः । प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वं साध्यसमानाधिकरणधर्मसमानाधिकरणत्वं वा व्यभिचारः । तद्वान् व्यभिचारी । स त्रिधा साधारणो ऽसाधारणो ऽनुपसंहारी च ॥

विपक्षवृत्तिः साधारणः । यथा पर्वतो धूमवान् वन्हेरिति, विपक्षे ऽयःपिण्डे वन्हिरस्त्येव ॥

सपक्षविपक्षव्यावृत्तो ऽसाधारणः । यथा शब्दो नित्यः शब्दत्वादिति, सपक्षे गगने विपक्षे घटादौ हेतुर्नास्त्येव । अतो व्यतिरेकव्याप्त्या साध्यतदभावसाधकत्वाविशेषात्सन्देहा-

पादकत्वाद् दूषणमयम् ॥

अवृत्तिसाध्यकोनुपसंहारी । आकाशवान् धूमादिति यथा ॥

तुल्यबलसाध्याभावसाधकहेत्वन्तरसहितः सत्प्रतिपक्षः । यथा शब्दो ऽनित्यः कृतकत्वात् घटवत् । शब्दो नित्यः व्योमैकगुणत्वात् तत्परिमाणवदिति ॥

पक्षे साध्याभावनिर्णयो बाध, स्तथाविधो बाधितः । यथा उत्पत्तिकालीनो घटो गन्धवान् पृथिवीत्वादिति । तत्र प्रमाणान्तरेण गन्धाभावनिर्णयाद्बाधितः । एतेषां सत्प्रतिपक्षासाधारणौ विशेषाग्रहणदशायामेव हेतोराभासत्वापादकत्वादानित्यदोषौ साक्षादनुमितिप्रतिबन्धकौ च । यदा तु तर्कादिना मानान्तरेण व्याप्त्याद्येकत्र निर्णीतं बाधाभावश्चास्तितदा दोषाज्ञापनाच्च । शेषास्तु नित्यदोषाः, बाधादन्ये व्याप्त्यादिविघटकाश्चेति जनकज्ञानविघटकत्वेन दोषा इति नैयायिकाः । वैशेषिकास्तु विरुद्धासिद्धसन्दिग्धास्त्रयो हेत्वाभासाः । 'विरुद्धासिद्धसन्दिग्धमलिङ्गङ्गाश्यपोब्रवीत्' इति भाष्यात् । अनेनासिद्धविरुद्धसन्दिग्धानध्यवसितानामनपदेशत्वमुक्तं भवति इत्यपि भाष्याच्चत्वारो वा । तत्रासिद्धश्चतुर्द्धा उभयासिद्धो ऽन्यतरासिद्धः स्वरूपासिद्धो ऽनुमेयासिद्धश्च । शब्दो नित्यः सावयवत्वादित्याद्यः । कार्यत्वादिति द्वितीयः । पक्षे हेत्वभावस्तृतीयः स्वरूपासिद्धः । बाधितस्तुरीयः । विरुद्धः प्रागुक्त एव । साधारणो ऽनैकान्तिकः । साध्यतदभावसहचारेणोभयसन्देहजनकत्वात्सन्दिग्धः । शब्दो नित्यः शब्दत्वादित्यनध्यवसितः । साधारणधर्मदर्शनविप्रतिपत्त्योरेव संशयजनकत्वेनास्य प्राचीने ऽनन्तर्भाव इत्याहुः । हेत्वाभासानामेकज्ञाने ऽन्यस्याज्ञाननुमानदूषणस-

म्भवात् सर्वेपि स्वातन्त्र्येण दूषणानि। तेन क्व चित् क्व चित्सम्मिलनेपि नैकेनापराऽन्यथासिद्धिः शङ्क्या। व्यभिचारोज्ञायकत्वेन परम्परोपयोगान्न हेत्वाभासान्तरम् उपाधिः। यद्धर्मविशिष्टसाध्यव्यापकत्वं तद्धर्मविशिष्टसाधनाव्यापकत्वं च तल्लक्षणम्। अस्तीदं धूमवान् वन्हेरित्यत्रार्द्रेन्धने। भवति हि द्रव्यत्वविशिष्टो यत्र यत्र धूमस्तत्र तत्रार्द्रेन्धनम्, द्रव्यत्वाविशिष्टो यत्र यत्र वन्हिस्तत्र तत्र तन्नास्तीति द्रव्यत्वाविशिष्टसाध्यव्यापकं तद्विशिष्टसाधनाव्यापकं च। एवं गर्भस्थो मित्रातनयः श्यामः मित्रातनयत्वात् पूर्वोत्पन्नवदित्यत्र शाकपाकजत्वमुपाधिः। अत्रापि मनुष्यत्वावच्छिन्नं यत्र यत्र श्यामत्वं तत्र तत्र शाकपाकजत्वम्। मनुष्यत्वावच्छिन्नं यत्र यत्र मित्रातनयत्वं तत्र तत्र शाकपाकजत्वं नास्तीति भवति लक्षणसमन्वयः। एवं वायुः प्रत्यक्षः प्रमेयत्वादित्यत्रापि बहिर्द्रव्यत्वावच्छिन्नसाध्यव्यापकं तदवच्छिन्नसाधनाव्यापकमुद्भूतरूपवत्त्वमुपाधिरित्यत्रालं पल्लवेन। नन्वनुमानं न प्रमाणं नाप्यनुमितिः प्रमान्तरम्। यत्र धूमस्तत्राग्निरिति बहुशो दर्शनात् धूमवतानेन पर्वतेन परायेण वन्हिमता भाव्यामिति सम्भावनात् एवानुमितिकार्यनिर्वाहादिति चेन्न। वन्हिमनुमिनोमीत्यनुभूयमानजातिविशेषस्य तदाश्रयानुमितेस्तत्कारणत्वेनानुभूयमानपरामर्शस्य चापलपितुमशक्यत्वादिति तत्रैव प्रवृत्त्या विषयलाभे सति जातं ज्ञाने प्रमेति प्रमात्वग्रहाच्च विना बाधकं तदन्यथात्वस्य कल्पयितुमशक्यत्वादिति दिक्॥ इत्यनुमानम्॥

उपमिनोमीत्यनुभवसिद्धजातिविशेषवत्युपमिति, स्तत्करणमुपमानम्॥

तत्त्रिधा। सादृश्यविशिष्टपिण्डज्ञानं वैधर्म्यविशिष्टपिण्डज्ञा-

नमसाधारणधर्मविशिष्टपिण्डज्ञानं च । तद्यथा । गवयादिशब्दाः क्वचिच्छक्ता इति जानता कीदृग्गवय इत्यारण्यके पृष्टे, गोसदृशो गवय इति तेन निवेदिते कालान्तरे ऽरण्यं गतस्य तत्पिण्ड-दर्शनाद्गोसदृशोयं पिण्ड एतादृशश्च गवयशब्दार्थ इत्याप्ते-नोक्तं स्मरतस्तस्मादयं गवयशब्दवाच्य इति उपामितिर्जाय-ते । तत्र गोसदृशोयं पिण्ड इति सादृश्यविशिष्टपिण्डज्ञानं कर-णम् । वाक्यार्थस्मरणमवान्तरव्यापारः । उपामितिः फलम् । एवं कीदृशो ऽश्व इति पृष्टे गवादिवद् द्विशफः स्वल्पपुच्छश्च ने-त्याप्तोक्तयनन्तरं तत्पिण्डदर्शनादयं द्विशफः स्वल्पपुच्छश्च ने-ति ज्ञानादाप्तव्याक्यार्थस्मरणोत्तरमयमश्वशब्दवाच्य इत्युपामि-तिज्ञानमुत्पद्यते । तत्र वैधर्म्यविशिष्टपिण्डज्ञानं करणं, वाक्यार्थ-स्मरणं व्यापारः, शक्तिज्ञानं फलम् । एवं कीदृश उष्ट्र इति प्रश्ने कण्टकाशी अतिदीर्घग्रीव इत्याप्तवाक्यश्रवणानन्तरं कालान्तरे तद्धर्मविशिष्टपिण्डदर्शनाद्वाक्यार्थस्मरणे सति उष्ट्रशब्दवाच्योय-मिति वाच्यवाचकभावग्रहो भवति सोपमितिः फलम्। असाधा-रणधर्मविशिष्टधर्मिप्रत्यक्षं करणं वाक्यार्थस्मरणं व्यापार इति वाच्यम् । एवं कीदृश्यौषधी सर्पविषहन्त्रीति प्रश्ने नकुलदंष्ट्राधृ-तेत्याप्तोक्तिरिते कालान्तरे नकुलदंष्ट्रायामौषधिविशेषदर्शने सति एतादृशी सर्पविषहन्त्रीति ज्ञानमुत्पद्यते । तत्रैतादृशी विषहन्त्री-ति ज्ञानं फलम् । वाक्यार्थस्मरणमवान्तरव्यापारः । नकुलदं-ष्ट्राधरणरूपाऽसाधारणधर्मविशिष्टपिण्डज्ञानं करणमित्यूह्यम् । एवं चोपमानत्वावच्छेदेन न शक्तिग्राहकत्वमिति प्रतारणं परा-स्तम् । न चाप्तवाक्यस्मरणाच्छाब्दबोध एवास्तु कुतः पृथगु-पमानाभ्युपगम इति वाच्यम् । शरीरवृत्त्यश्वत्वोष्ट्रत्वादिजाति-विशेषरूपेण शब्दाच्छाब्दबोधाऽसम्भवात् सादृश्यमवच्छेदकी-

कृत्यैव बोधकत्वात् उपमिनोमीत्यनुव्यवसायाच्चेति नैयायिकाः । वैशेषिकास्तु । अयं गवयशब्दवाच्यः गोसदृशत्वात् इत्यनुमानात्तद्ग्रहः । आप्तवचनाच्च तथाव्याप्तिग्रहात् । उपमिनोमीत्यनुव्यवसायश्च सन्दिग्धः, सत्वे वा ऽनुमितित्वव्याप्तमेव तदस्तु । तथा च न पृथक् प्रमाणमित्याहुः ॥

शब्दात्प्रत्येमीत्यनुभवसिद्धा शाब्दत्वजातिमती शाब्दी, तत्करणं शब्दः प्रमाणम् । तथाहि । घटं नय पटमानयेत्यादिप्रयोज्यप्रयोजकवाक्यं शृण्वतो बालस्यावापोद्वापाभ्यां घटपटादिव्यवहारं पश्यतस्तद्व्यवहारेण तदीयं ज्ञानमनुमिनुतस्तज्जनकत्वेनान्वयव्यतिरेकाभ्यां शब्दमवगच्छतो ऽसम्बद्धस्याबोधकत्वात्सम्बन्धोस्तीति अनुमितिर्भवति । स च सम्बन्धः शक्तिरुच्यते । एवमुपमानात्कोशादिभ्यस्तदनन्तरमन्यत्रापि तद्ग्रहः । एवं घटादिपदशक्तिग्रहे सति गृहीतशक्तिकपदात् पदार्थोपस्थितावाकांक्षायोग्यतादिसहकारिवशाच्छाब्दप्रमा जायते । सा फलम् । यदान्येव ज्ञायमानानि करणानि पदज्ञानं वा करणं पूर्ववत् पदजन्यपदार्थोपस्थितिरवान्तरव्यापार इत्यूह्यम् । ननु गवादिपदानां वृद्धव्यवहारेण सन्निहिते गवि शक्तिग्रहेपि देशान्तरीया ऽपूर्वगोबोधः कथं, तत्र शक्त्यग्रहात् । अन्यथा गोशब्दादश्वबोधापत्तिरिति चेन्न । सामान्यलक्षणप्रत्यासत्त्या सकलगोव्यक्तेः शक्तिग्रहसमये चोपस्थितौ सर्वत्रैकजात्यादिविशिष्टे तद्ग्रहेणा दोषात् । तथा च न्यायसूत्रम् । व्यक्त्याकृतिजातयस्तु पदार्थ इति । एकवचनेन जात्यादिविशिष्टे शक्त्यैक्यं सूचयति । मीमांसकास्तु गोत्वे एव शक्तिः तदाश्रयत्वेन लक्षणया व्यक्तिबोध इत्याहुः । गव्येव शक्तिर्न तु गोत्वेपि गौरवात् नापि गोत्वे एव शक्तिर्गवि लक्षणेति युक्तम् । गामानयेत्यत्रैव वृत्तिद्वयकल्पने गौ-

रवात् । न चैवं गोपदाद् गोत्वबोधो न स्यादिति वाच्यम् । अकार्यत्वेपि घटत्वस्य कार्यतावच्छेदकत्वात् कार्यत्वसम्बन्धेन दण्डात् घटोपस्थितौ घटत्वभानवदशक्तत्वेपि शक्यतावच्छेदकत्वात् शब्दादुपस्थितिसम्भवादिति वैयाकरणाः । नन्वेवमपि गौ शुक्लेत्यादौ पदार्थयोरभेदरूपान्वयो न बुद्ध्येत तत्र शक्त्यभावात् अशक्यस्याप्युपस्थितौ घटादिरपि तत्र बुध्येतेति चेत्सत्यम् । अशक्यस्यान्वयस्याकांक्षायोग्यतावशात् भानसम्भवात् । तथाहि । यत्पदं यत्पदार्थेन सह यादृशान्वयबोधजनकम् तत्पदस्य तेन समभिव्याहारस्तादृशबोधे आकांक्षा । घटादिपदं विरुद्धविभक्तिरहितं प्रातिपदिकार्थेन सहाभेदान्वयमेव बोधयति द्वितीयाद्यर्थकर्मत्वादिभिः सह निरूप्यनिरूपकत्वमाश्रयाश्रयिभावं वा अतस्तादृशपदसमभिव्याहारो भवत्याकांक्षा । एतज्ज्ञानञ्च कारणं घटपदं द्वितीयाद्यर्थेन सह स्वार्थाभेदान्वयबोधकमिति ज्ञानवतो वैयाकरणस्य तथा च बोधात् अन्यस्याभावाच्च । एवम् ॥

योग्यता एकपदार्थे अपरपदार्थस्य प्रकृतसंसर्गवत्त्वम् । तेन पयसा सिञ्चतीति योग्यम् । पयसि सेककरणतासत्त्वात् वन्हिना सिञ्चतीति न योग्यं तत्र सेककरणत्वाभावात् । देवदत्तो गौरित्यत्र देवदत्ते स्वस्वामित्वरूपसम्बन्धसत्वाद्योग्यतापत्तेः प्रकृतेत्युक्तम् । तथा च प्रकृतवाक्ये यः प्रतिपाद्यः सम्बन्धः स्तद्वत्त्वमित्यर्थः । स चात्राभेदः स च नास्तीति न तद्योग्यम् । एवमासत्तिः पदजन्यपदार्थोपस्थितिरेव । अतः प्रत्यक्षेण तन्दुलदर्शनात् पचतीत्येवोक्ते तण्डुलं पचतीति न बोधः । पदान्यव्यवधानमासत्तिरिति प्राचीनमतं न युक्तम् । गिरिर्भुक्तमग्निमान् देवदत्तेनेत्यत्र योजनयान्वयबोधानापत्तेः । योजनावाक्यादेवा-

न्वयबोध इति चेन्न । प्रथमवाक्यस्याबोधकत्वप्रसङ्गात् । योजनावाक्यं च तात्पर्यग्राहकत्वेन प्रकरणादिवदुपयुज्यते । एवं चाकांक्षायोग्यतासत्तिवशात् पदार्थानां परस्परविशेषणविशेष्यावगाहिविशिष्टशब्दबोधसम्भवान्नानुपपत्तिरिति दिक् ॥

मीमांसकास्तु कार्यान्विते पदानां शक्तिः । तथाहि । प्रयोज्यप्रयोजकयोरानयनानयनादिव्यवहारौ पश्यतो बालस्यानयननयनादि कार्यत्वेन ज्ञात्वा ऽहं प्रवर्ते एवमयमपि तथात्वेन ज्ञात्वा प्रवृत्तस्तज्ज्ञानं च शब्दादिति शब्दस्तद्विशिष्टे शक्त इति प्रथमशक्तिग्रहात् । तथा च कार्यतासामान्यस्य सर्वशब्दादवगमेपि विशेषतस्तदुपस्थितिं विना बोधपर्यवसानाभावादबोधकत्वमेव तच्छून्यानामर्थवादवाक्येवदान्तवाक्यानामित्याहुः ॥

वेदान्तिनस्तु । अन्विते पदानां शक्तिरित्यन्वयांशबोधोपपत्तिर्न तु कार्यत्वांशे सर्वपदानां शक्तिस्तस्य विशेषतस्तद्बोधकपदादेवोपस्थितिसम्भवेन व्यर्थगौरवग्रासात् । अतः कार्यत्वांशं विनापि मोक्षरूपमहाप्रयोजनवदात्मस्वरूपबोधकत्वाद्वेदान्ताः प्रमाणमित्याहुः ॥

पदानां पदार्थेष्विव वाक्यस्य संसर्गरूपे ऽन्वये शक्तिः । अत एव तस्य वाक्यार्थ इति किंवदन्ती सङ्गच्छतइति वैयाकरणाः ॥ व्युत्पादितं चास्माभिर्मतान्तरनिराकरणपूर्वकमेतन्मतं वैयाकरणभूषणे । नन्वेवमपि गङ्गायां घोष इत्यत्र गङ्गापदात्तीरप्रत्ययः कथं, तत्र गङ्गापदशक्तेरभावादिति चेत् । सत्यम् । लक्षणारूपवृत्त्यन्तरात्तदुपस्थितेः ॥

अथ केयं लक्षणा । उच्यते । शक्यसम्बन्धो लक्षणा । गङ्गापदशक्यो गङ्गाप्रवाहस्वत्सम्बन्धस्तीरेत्येव । तथा च स्वशक्यप्रवाहसंयोगरूपसम्बन्धेन गङ्गापदात्तीरोपस्थितिः । स्वशक्येन

सह नियमरूपाव्याप्तिरेव लक्षणा ॥ तदुक्तम् । 'अभिधयाविनाभूते प्रवृत्तिर्लक्षणोच्यते' इति मीमांसकाः । तन्न । मञ्चा क्रोशन्तीत्यत्र मञ्चपदस्य मञ्चस्थपुरुषे लक्षणा न स्यात् । मञ्चपुरुषयोर्व्याप्त्यभावात् । एवं यष्टी प्रवेशयेत्यत्रापि द्रष्टव्यम् ॥

वैयाकरणास्तु गङ्गादिपदानां तीरादौ शक्तिरेव । सर्वेषां पदानां प्रायः सर्वत्रैव शक्तिः लक्षणा च स्वतन्त्रवृत्तिर्नाभ्युपेयेत्याहुः । प्रपञ्चितञ्चैतद्वैयाकरणभूषणे । ननु केयं शक्तिः ॥ अभिधानामकं पदार्थान्तरं सङ्केतग्राह्यमिति मीमांसकाः ॥ सिद्धान्तस्तु घटपटात् घटो बोद्धव्य इतीश्वरेच्छारूपसङ्केतः शक्तिः । सा च पूर्वोक्तरीत्या वृद्धव्यवहाराद् ग्राह्या, वृद्धानां तद्बुद्धेभ्य इति सृष्ट्यादौ ईश्वरात्तद् ग्रह इति । आधुनिकपुत्रादिषु सङ्केतितदेवदत्तादिपदे च पित्रादिसङ्केताद् ग्राह्या । द्वादशोन्हि पिता नाम कुर्यात् इति शास्त्रसिद्धत्वात् तत्रापि सास्त्येवेति दिक् ॥ एवं शब्दाच्छाब्दबोधे तात्पर्यज्ञानमपि हेतुः । अन्यथा सैन्धवमानयेत्यत्र भोजनप्रकरणे लवणतात्पर्यग्रहे सति अश्वबोधप्रसङ्गात् । न च शुकबालादीनां तात्पर्याभावेन तत्तदुच्चरितशब्दाद्बोधो न स्यादिति वाच्यम् । तत्रापि ईश्वरतात्पर्यसत्त्वात् । तच्च तात्पर्यं वेदे मीमांसान्यायगम्यं नियतम् । लोके तु वक्तुरिच्छाधीनमनियतमत एकस्मादेव शब्दात् श्लेषादिवाक्येष्वनेकार्थबोधः । यथा श्वेतो धावतीत्यादौ । नन्वेवमपि 'गच्छ गच्छसि चेत्कान्त पन्थानः सन्तु ते शिवा । ममापि जन्म तत्रैव भूयाद्यत्र गतो भवानि' त्यत्र त्वद्गमने सति वियोगान्मे प्राणहानिरिति प्रतीतिः कथमिति चेत् । सत्यम् । व्यञ्जनाख्यवृत्त्यन्तरात्तद्बोध इत्यालङ्कारिकाः । एवं गतोस्तमर्क इत्युदासीनवाक्येपि नानाविधास्तु तत्पुरुषीयबोधा एव सङ्गच्छन्तइति । दा-

शनिकास्तु अनुमितिरूपाः लक्षणया शब्दाद्वा ते बोधाः सम्भवन्ति व्यञ्जनाख्यवृत्त्यन्तरकल्पनां न सहन्ते । नन्वेवमपि भाषाशब्देभ्यः कथं बोधः तत्र शक्तिलक्षणयोरभावादिति चेन्न । तैः संस्कृतस्मरणं ततो बोध इत्यभ्युपगमात्, इति केचित् । संस्कृतकथामप्यविदुषां बोधान्नैवं, किं तु तेष्वेव शक्तिभ्रमाद्बोध इति नव्याः । संस्कृतवद्भाषाशब्दा वाचका एवेति वैयाकरणमतं तु भूषणे ऽस्माभिः प्रपञ्चितम् । एवं च भाषाव्याहृत्तं वृत्तिमत्त्वमेव साधुत्वमिति मीमांसकादिमतम् । अर्थविशेषे व्याकरणव्युत्पाद्यत्वं तदिति तु नैयायिकाः । साधूनेव प्रयुञ्जीतेति वचनसिद्धं पुण्यजनकत्वं तदिति वैयाकरणा इत्यलं पल्लवेन । नन्वेवमपि पदज्ञानमेव न सम्भवति वर्णसमूहः पदम् । वर्णाश्च क्रमिकाद्विलक्षणाश्च । तथा च द्वितीयवर्णोच्चारणसमये पूर्वो नष्ट इति कथं समुदायज्ञानम् । यत्तु प्रत्येकं तत्तद्वर्णानुभवोत्तरमन्ते समूहालम्बनरूपं सकलवर्णस्मरणमेव पदज्ञानमिति । तन्न । एवं सति तत्र क्रमाभावात्सरो रसः जरा राज नदी दीनेत्यादावविशेषप्रसङ्गादिति चेत् । उच्यते । प्रथमं घकारज्ञाने सति तदुत्तरमकारज्ञाने जायमाने स्वाव्यवहितोत्तरत्वसम्बन्धेन पूर्वो वर्णो विशेषणतया भासते ततष्टकारे घकारविशिष्टो ऽकारो विशेषणं सोपि पूर्वद्वयविशिष्टः स्वोत्तरस्मिन्निति भवति पदज्ञानं तस्मात्पदार्थोपस्थितिस्तत उक्तप्रकारेण पुनः पदान्तरज्ञानं ततस्तदर्थोपस्थितौ तयोः परस्परमन्वयबोधः । पुनः पदान्तरज्ञानं ततः पदार्थोपस्थितौ तस्याप्यन्वयबोध इत्येवं क्रमेण अवान्तरवाक्यार्थज्ञानपूर्वको महावाक्यार्थबोध इति राजपुरप्रवेशन्यायेन के चिदाहुः । तदुक्तम् । 'यद्यदाकांक्षितं योग्यं सन्निधानं प्रपद्यते । तेन तेनान्वितः स्वार्थः

पदैरेवावधार्यते' इति । अन्ये तु सर्वेषां पदानां प्रथमं प्रत्यक्षज्ञानात् सर्वपदानां समूहालम्बनं स्मरणं ततस्तदर्थानामपि समूहालम्बनरूपोपस्थितौ सत्याम्पुनः प्रथममेव महावाक्यार्थबोधः खले कपोतन्यायेनेत्याहुः ॥ सोयं शाब्दबोधश्चतुर्विधः । विशेष्ये विशेषणं तत्र विशेषणान्तरमित्येकः । रक्तदण्डवानिति यथा । पुरुषे दण्डः तत्र रूपं विशेषणम् । विशिष्टवैशिष्ट्यावगाह्यन्यः । यथा रक्तदण्डवानित्यत्रैव रक्तत्वविशिष्टदण्डस्य वैशिष्ट्यबोधः । एकत्र द्वयमिति न्यायेनाऽन्यः । दण्डी कुण्डली देवदत्त इति यथा। एकविशेषणविशिष्टे विशेषणान्तरवैशिष्ट्यावगाह्यपरः । खड्गी शूर इति यथेति । विस्तरस्तु ग्रन्थान्तरादवधेयः ॥

अर्थापयामीत्यनुभवसिद्धजातिविशेषवत्त्यर्थापत्ति, स्तत्करणमर्थापत्तिप्रमाणम् । तच्चानुपपत्तिज्ञानम् । तथाहि । देवदत्ते पीनत्वं दिवा भोजनाभावं च जानतो रात्रिभोजनज्ञानं जायते । तन्न प्रत्यक्षात्, सन्निकर्षाद्यभावेनानुपलम्भात् । नानुमानात्, तस्यासम्भवात् । अयं रात्रिभोजी पीनत्वादित्यस्य दिवामात्रभुञ्जानेपि व्यभिचारित्वात । दिवा अभुञ्जानत्वे सति पीनत्वादित्यत्र दृष्टान्ताभावेन व्याप्त्यऽग्रहादनुमित्ययोगात् । तस्मादिवा ऽभुञ्जानस्य पीनत्वान्यथानुपपत्त्या रात्रिभोजनज्ञानं जायते । सेयमर्थापत्तिरिति प्राभाकराः ॥

देवदत्तो रात्रिभोजी दिवा अभुञ्जानत्वे सति पीनत्वात् । यत्र रात्रिभोजनाभावस्तत्र दिवा अभुञ्जानत्वे सति पीनत्वाभाव इति व्यतिरेकिणैव निर्वाहात्, न पृथगर्थापत्तिः प्रमाणमिति वैशेषिकनैयायिकादयः ॥

अनुपलब्धं जानामीत्यनुभवसिद्धजातिविशेषवत्त्वनुपल-

ब्धिः। तत्करणमनुपलब्धिः। स चोपलब्धेर्निर्णयात्मकज्ञानस्याभावः। तथाहि। वस्तुतो घटाभाववति घटो ऽस्तीति भ्रमसमये घटाभावेन सह सन्निकर्षे सत्यपि तज्ज्ञानं चोत्पद्येत अतस्तत्र घटानुपलब्धिः करणं तदभावान्न तत्र ज्ञानम्। चक्षुरादिकं चाधिकरणादिग्रहणार्थमनुपलब्धेर्योग्यतासम्पादनार्थं चोपयुज्यते। योग्यता च यद्यत्र घटः स्यात् उपलभ्येतेति तर्कसम्पत्तिरेवेति भाट्टाः। एतादृश्यनुपलब्धिः प्रत्यक्षसहकारिण्येवातो नानुपलब्धिः प्रमाणम्। प्रमाणान्तरकल्पने गौरवादिति नैयायिकादयः। वस्तुतो घटवति घटाभावनिर्णये सति चक्षुःसंयोगे सत्यपि घटज्ञानानुत्पत्तेरभावानुपलब्धेरपि भावग्रहे हेतुतापत्तिः। न चेष्टापत्तिः। अपसिद्धान्तात् प्रमाणाभावाच्च। विवेचितं चैतदन्यत्र। तस्मान्नानुपलब्धिः सहकारिणी न च प्रमाणान्तरमिति तत्त्वम्॥

सम्भावनया जानामीति प्रतीतिसिद्धजातिमती साम्भवी॥ तत्करणं सम्भवः। यथा ब्राह्मण इति श्रुते विद्यायाः शतमित्युक्ते दशादिसङ्ख्यायाः प्रतीतौ॥

अज्ञातकर्तृकं प्रसिद्धवाक्यमैतिह्यम्॥ गङ्गेयं मथुरेयं वेदोयमिति ज्ञानमैतिह्यादेव। अन्यस्याप्रसरादिति पौराणिकाः। ब्राह्मणे विद्या भविष्यतीति चोक्तकोटिकः संशय एव। शते दशेति त्वनुमानम्। तथा व्याप्तिज्ञानवतामेव ज्ञायमानत्वात्। ऐतिह्यं चेत्प्रमाणं चेच्छब्द एव। अन्यथा प्रमाणमेव नेति दार्शनिकाः॥ एतादृशचेष्टयेत्थमर्थो बोद्धव्य इति सङ्केततच्चेष्टातो बोधस्थले च तया शब्दोपस्थितिस्ततो बोधः शाब्द एव। अन्यथा त्वेतादृश्या चेष्टया ऽनुमानमेवेति न हस्तनेत्रादिचेष्टातो बोधानुरोधाच्चेष्टायाः पृथक् प्रमाणत्वमपीति तान्त्रिकाः॥ त-

देतैः प्रमाणैर्जायमाना बुद्धिरनित्यैव मानसप्रत्यक्षं च, जानामीति मनसानुभवात् ॥

प्राभाकरास्तु सर्वा बुद्धिः स्वप्रकाशा त्रितयविषयिणी च । आत्मस्वात्मविषयश्चेति त्रयम् । घटमहं जानामीति सर्वज्ञानानुभवात्, ज्ञानस्य परप्रकाश्यत्वे तदपि परप्रकाश्यमित्यज्ञायमानस्वीकारात् अन्धपरम्परया निद्राद्यभावो वा स्यादित्याहुः ॥

भाट्टास्तु ज्ञानेन विषये ज्ञातता जन्यते ज्ञातो घट इत्यनुभवात् धात्वर्थक्रियाजन्यफलशालित्वेन घटं जानामीत्यादौ कर्मत्वमप्येवं सङ्गच्छते । तथा च तया ज्ञाततया ज्ञानमनुमीयते । घटो ज्ञानविषयो ज्ञाततावत्त्वादिति । एवं चातीन्द्रियं ज्ञानमित्याहुः । एवं स्वप्रकाशविधया ज्ञाततया वा ज्ञाने गृह्यमाणे तद्गतं याथार्थ्यरूपं प्रामाण्यमपि गृह्यते ज्ञानग्राहकसामग्रीग्राह्यत्वरूपस्वतस्त्वस्य तत्राभ्युपगमादिति मीमांसकाः ॥

नैयायिकास्तु एवं सति जातं ज्ञानं प्रमा नवेति संशयानुपपत्तेर्नेदं युक्तम् । किं तु मनसा ज्ञानं गृह्यते । पुनर्विषयलाभोत्तरं जातं ज्ञानं प्रमा, फलवत्प्रवृत्तिजनकत्वादित्यनुमानात्तद्ग्रहः । मीमांसकानामर्थाविसंवादिप्रयुक्ताऽप्रामाण्यग्रहवत् । अन्यथा तस्यापि स्वतो ग्राह्यत्वापत्तिश्च इति ज्ञानग्राहकविशेषाग्राह्यत्वरूपं परतो ग्राह्यं प्रामाण्यमाहुः ॥

भक्तिश्रद्धादयोपि बुद्धिभेदाः । तत्राराध्यत्वेन ज्ञानं भक्तिः, वेदबोधितफलावश्यम्भावनिर्णयः श्रद्धेत्यन्यत्र विस्तरः ॥

सुखत्वजातिमद्धर्ममात्रजन्यतावच्छेदकजातिमद्वा निरुपाधिप्रमास्पदं वा सुखम् ॥

तच्चतुर्विधं वैषयिकं मानोरथिकमाभ्यासकमाभिमानिकं च । विषयसाक्षात्कारजमाद्यम् । विषयध्यानजं मानोरथिकम् ।

सूर्यनमस्काराद्यभ्यासाज्जायमानं शरीरलाघवादि तृतीयम् । द्रव्यपाण्डित्यगर्वजमन्त्यम् । एवं दुःखेपि द्रष्टव्यम् ॥

दुःखत्वजातिमन्निरुपाधि द्वेषास्पदं वा दुःखम् ॥

इच्छामीत्यनुभवसिद्धेच्छात्वजातिमतीच्छा ॥

सा च सुखमोक्षयोः सुखदुःखाभाववत्त्वप्रकारकज्ञानादुत्पद्यते । तत्साधने सुखदुःखाभावसाधनताज्ञानादेव स्त्रीपुत्रादौ संन्यासादौ च तथा ॥

द्वेष्मीत्यनुभवसिद्धजातिमान् क्रोधापरपर्य्यायको द्वेषः ॥

यते इत्यनुभवसिद्धयत्नत्वजातिमान् यत्नः ॥

स द्विधा जीवनयोनिरन्यश्च । जीवनादृष्टं योनिः कारणं यस्य स आद्यः सर्वदा प्राणसञ्चारकारी । गुरुभारोत्तोलनधावनादौ प्रयत्नाविशेषाच्छ्वासक्रियाविशेषदर्शना' द्यद्विशेषयोः कार्यकारणभावो बाधकं विना तत्सामान्ययोरपी' ति न्यायेन प्राणक्रियासामान्ये यत्नसामान्यजन्यत्वदर्शनान्निद्रादिसकलकालिकस्य तस्यावश्यकत्वात् स चातीन्द्रियः । द्वितीयो द्विधा । एको द्वेषजः सर्पादिभ्यो निवृत्तिलक्षणः । शत्रुवधादौ प्रवृत्तिरूपस्तु न द्वेषजः किं तु तन्मरणेच्छाजः । इच्छाजन्यो ऽन्यः । एतौ प्रत्यक्षौ । एते बुद्धीच्छाप्रयत्ना ईश्वरीया नित्याः जीवानामनित्याः ॥

विहितयज्ञादिजन्यतावच्छेदकजातिमान् धर्मः ॥

ताश्च ज्योतिष्टोमयज्ञादिजन्यतावच्छेदिका विलक्षणाः, स्वर्गादिजनकतावच्छेदिकाश्च । तत्तददृष्टे विलक्षणा न तु धर्मत्वमेका जातिर्मानाभावात्, धर्मत्वेन सुखत्वेन कार्यकारणभावाभावादिति । अत एव बाधकाभावात् विज्ञानमानन्दं ब्रह्मेति श्रुतेश्चेश्वरे नित्यसुखमस्तीति वेदान्तिनः ॥

निषिद्धपरदारगमनादिजन्यतावच्छेदकजातिमानधर्मः ॥

धर्मत्ववदेव ता अपि नाना तत्तद्दुःखजनकतावच्छेदिकाश्च । ननु यज्ञादिजन्यातीन्द्रियधर्माधर्मयोः किं मानम् । उच्यते । इष्टसाधनत्ववाचिना विधिना अनिष्टसाधनत्वबोधकानिषेधेन यागपरदारगमनादेस्तथात्वं बोध्यते । न च चिरविनष्टस्य कालान्तरभाविस्वर्गादिसाधनत्वं साक्षाद्युक्तमतो व्यापारत्वेन तावभ्युपेयौ । न च यागादिध्वंस एव व्यापारोस्त्विति वाच्यम् । एवं हि कारणीभूताभावप्रतियोगित्वेन यागादेः प्रतिबन्धकत्वापत्तेः । किं च कीर्त्तितधर्मादपि फलापत्तिः व्यापारसत्त्वात् । अकीर्तितयागत्वेन कारणतेति न कीर्त्तितात्फलमिति चेन्न । फलोत्तरकीर्त्तितादपि फलानापत्तेरिति दिक् ॥ एतौ धर्माधर्मौ त्रिविधौ सञ्चितौ क्रियमाणौ प्रारब्धसञ्ज्ञौ च । तत्र तच्छरीरारम्भकं प्रारब्धं कर्म तद्भोगैकनाश्यं जीवन्मुक्तिशास्त्रानुरोधात् । आद्यं ज्ञाननाश्यं 'ज्ञानाग्निः सर्वकर्माणि भस्मसात्कुरुते तथे'ति शास्त्रादिति वेदान्तिनः । सिद्धान्तिनस्तु 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि । अवश्यमेव भोक्तव्यं कृतं कर्म शुभाशुभ' मिति वचनस्य प्रायश्चित्तनाशाव्यतिरेकेण सङ्कोचे प्रमाणाभावात्, सञ्चितस्यापि कायव्यूहेन भोगादेव नाशः । भस्मसात्पदं तु लाक्षणिकं शीघ्रमेव भोगान्नाशं लक्षयतीति दिक् ॥ क्रियमाणं ज्ञानिनि नोत्पद्यते । 'लिप्यते न स पापेन पद्मपत्रमिवाम्भसेति' वचनात् । नन्वेवं योगिभिः क्रियमाणकर्मणो वैयर्थ्यापत्तिरिति चेत् न । तस्य लोकसङ्ग्रहमात्रार्थत्वात् । वस्तुतस्तु 'तस्य पुत्रा दायमुपयन्ति सुहृदः साधु कृत्यां द्विषन्तः पापकृत्या' मिति श्रुतौ तस्य परार्थत्वं स्फुटमित्यवधेयम् ॥

संस्कारत्वजातिमान्संस्कारः ॥

स त्रिधा, वेगो भावना स्थितिस्थापकश्च ॥ वेगेन गच्छतीति प्रत्यक्षसिद्धवेगत्वजातिमान्वेगः ॥ मूर्त्तमात्रवृत्तिः ॥ भावना च स्मृतिजनकः स्वजन्यस्मृतिनाश्यश्च संस्कार आत्मवृत्तिरतीन्द्रियः पूर्वज्ञानजन्यः । तत्र ज्ञानस्यानुभवत्वेनैव कारणतेति प्राञ्चः । नव्यास्तु सकृदनुभूतस्य स्मरणोत्तरं संस्कारनाशेन पुनर्विनानुभवमस्मरणप्रसङ्गात् पुनः पुनः स्मरणात् दृढतरसंस्कारोत्पत्तेरनुभवसिद्धत्वात । अनुमितौ शाब्दबोधे च सत्यपि स्वर्गं नरकं चानुभवामीत्यऽप्रतीतेः । अनुभवत्वे जातौ प्रमाणाभावेन स्मृत्यन्यज्ञानत्वरूपस्यानुभवत्वस्य कारणतावच्छेदकत्वे गौरवापत्तेस्ततोपि लाघवाच्च ज्ञानत्वेनैव तत्कारणतेत्याहुः । तथा च पुनः पुनः स्मरणस्थले स्मरणादेव दृढतरसंस्कारोत्पात्तिरिति । एतेषां पूर्वानुभवतज्जन्यसंस्कारतज्जन्यस्मृतीनां समानविषयत्वमतो न घटज्ञानात्पटस्मृतिः ॥

स्थितिस्थापकश्च यथास्थितवस्तुस्थित्यानुमेयः । पृथिवीवृत्तिरतीन्द्रियश्च ॥

शब्दं शृणोमीत्यनुभवसिद्धशब्दत्वजातिमान् शब्दः ॥

स द्विधा ध्वनिर्वर्णश्च । तत्र ध्वनिः सङ्गीतशास्त्रसिद्धानेकभेदवान् तत्करणं मुखवीणादिवर्णः ककारादिः । उभयत्रापि आकाशः समवायिकारणम् । भेर्याकाशसंयोगवंशदलाकाशविभागादि रसमवायिकारणम् । जिव्हातालवादिसंयोगवंशदलविभागादिनिमित्तकारणम् । क चिच्छब्दोपि शब्दासमवायिकारणम्, दूरभेरीताडनस्थले । तत्र भेर्याकाशसंयोगादुत्पन्नस्तारतरो न दूरस्थपुरुषीयश्रवणगोचरः । तस्य मन्दत्वेनानुभवात् । किं तु भेरीशब्दा वीचितरङ्गन्यायेन कदम्बमुकुलन्यायेन वा श-

ब्दाच्छब्दस्तस्मादन्य इत्येवं मन्दादिभावेन जायमानेषु स्वश्रोत्रावच्छिन्नोत्पन्नः स्वयं गृह्यते । तेषु पूर्वशब्दो ऽसमवायिकारणम् । स च स्ववृत्तिभेर्यादिप्रयोज्यजातिमन्तं जनयतीति भेरीशब्दो मया श्रुत इति धीर्न विरुध्यते । तथा चासमवायिकारणत्रैविध्याद् द्विविधोपि त्रिधेति फलितामिति । उक्तं च । ' संयोगाद्विभागाच्छब्दाच्च शब्दनिष्पत्ति ' रिति । सोयं शब्दो द्विक्षणस्थायी क्षणोत्तरमनुपलम्भात् नाशकानुरोधाच्च । स्वजन्यः शब्द एव नाशकः । स चोत्पत्तिद्वितीयक्षणे पूर्वं नाशयतीति सर्वे द्विक्षणस्थायिनः । अन्त्यस्य च जनकशब्दोनाशकः सुन्दोपसुन्दन्यायेनेत्यतः क्षणिक एवान्तशब्द इत्येके । अन्त्यशब्द उपान्त्यनाशकनाश्य इति सोपि द्विक्षणस्थाय्येवेत्यन्ये । सर्वसाधारण्यान्निमित्तवायुसंयोगनाश एव शब्दनाशकः । तथा च वायुसंयोगस्ततः पूर्वक्रियानाशशब्दोत्पत्ती ततः क्रियापूर्वदेशविभागसंयोगनाशशब्दनाशा इति क्रमेण नाशाच्छब्दश्चतुक्षणस्थायीति नव्याः । सोयं शब्दो नित्य एव, योयं गकारः शिवेनोक्तः स एव विष्णुनोच्यते, प्रहरात्पूर्वमुक्त इदानीमुच्यते इति प्रत्यभिज्ञानात् । विभुश्च, योयं काश्यां हकारः श्रुतः स एव सतां वने चोच्यते इति प्रतीतेः सर्वदेशव्यापिनस्तस्यानुभवात् । विभुत्वाच्च द्रव्यमेव सः । योयं तारो मया श्रुतः स एव मन्दः श्रूयते इति प्रतीतेस्तारत्वादिकमपि तत्र न विरुध्यते इति मीमांसकाः । उत्पन्नो गकारो नष्टो गकार इति प्रतीतेरुत्पत्तिनाशवानेव शब्दः । सोयमिति तु तज्जातीयोयमिति भासते इति नैयायिकाः । तत्त्वं वैयाकरणभूषणे ऽस्माभिः प्रपञ्चितम् ॥

संयोगविभागयोरनपेक्षकारणं कर्म्म ॥

स्वोत्तरभाविभावाऽजन्यसंयोगविभागजनकमित्यर्थः । तेन

कर्मणा संयोगे जनन्ये स्वोत्तरमुत्पद्यमानस्य विभागस्य विभागप्रतिबन्धकीभूतपूर्वसंयोगध्वंसस्य चापेक्षायामपि न क्षतिः। विभागस्य प्रतिबन्धकाभावसम्पादकत्वेनान्यथासिद्धत्वेनाजनकत्वात् संयोगध्वंसस्य भावत्वाभावात् । न चासमवायिकारणादेश्च पूर्वोत्पन्नास्यापेक्षितत्वेन दोषः । संयोगजसंयोगे पूर्वसंयोगस्य विभागजविभागे पूर्वविभागस्य तथा प्रत्येकं जनकत्वसत्त्वात्संयोगविभागेत्युभयमुपात्तम् । उभयजनकत्वं कर्मण एव न संयोगादेरिति नातिव्याप्तिः । तच्चोत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनभेदात् पञ्चधा। भ्रमणादयस्तु गमनभेदा एव। तच्च मूर्त्तमात्रवृत्ति मूर्त्तत्वेनैव तत्कारणत्वात् । अत एव कर्मसमवायिकारणावच्छेदकतया मूर्त्तत्वं जातिरेवेति नव्याः । इयत्तावच्छिन्नप्रमाणवत्त्वमुपाधिरेवेति प्राञ्चः । तच्च संयोगवेगप्रयत्नगुरुत्वद्रवत्वस्थितिस्थापकाऽसमवायिकारणकम् । धनुःसंयोगादिषौ प्रथमं कर्म । ततो वेगजं कर्म द्वितीयम् । प्राणिगमनं तृतीयम् । पतनं चतुर्थम् । स्पन्दनं पञ्चमम् । पर्णादौ विगुण्ठिते यथावस्थानहेतुः षष्ठम् । तत् स्वजन्यसंयोगनाश्यम् । अत एव क्षणचतुष्टयस्थायि व्याप्यवृत्त्येवेति प्रपञ्चितमन्यत्र ॥

नित्यमेकमनेकसमवेतं सामान्यम् ॥

यथा घटत्वादि । घटत्वं नित्यमेकमनेकघटेषु समवेतं चेति लक्षणसमन्वयः । समानानां भावः सामान्यम् । अनेकानुगतो धर्म इति यावत् । शब्दत्वत्वादिकं च समवायेन शब्दाद्येवेति न सामान्यान्तरम् । तद् द्विविधं जातिरुपाधिश्च । तत्र जातिः समवायेनैव वर्त्तते उपाधिरनेकपदार्थघटितो धर्मः । यथा कारणत्वान्यथासिद्धत्वादिः । अन्यथासिद्धत्वं चावश्यकल्यमानपूर्ववर्त्तिना कार्यसम्भवे तत्सहभूतत्वम्। निष्कृष्टं प्रागुक्तम् । प्राञ्च-

स्त्वन्यथाप्याहुः । यथान्यत्रकल्पितनियतपूर्ववर्तिन एव कार्यसम्भवे तत्सहभूतत्वं, यथा रासभादेः । अन्यं प्रति पूर्ववर्त्तित्वे गृहीते एवान्यं प्रति पूर्ववर्त्तितया गृह्यमाणत्वं च । यथाकाशकुलालपित्रादेः । एवं भावत्वाभावत्वेन्द्रियत्वविषयत्वादिकमपि । तत्र समवायैकार्थसमवायान्यतरसम्बन्धेन सत्तावत्त्वं भावत्वम् । उक्तसम्बन्धेन सत्ताऽभाव एवाभावत्वम् । ज्ञानजनकमनःसंयोगाश्रयातीन्द्रियत्वमिन्द्रियत्वम् । इन्द्रियमनोयोगस्य ज्ञानजनकत्वाल्लक्षणसमन्वयः । आत्ममनोयोगस्य ज्ञानहेतुत्वादात्मन्यतिव्याप्तिवारणायान्तीन्द्रियमिति । विषयतारूपसम्बन्धेन साक्षात्कारवत्त्वं विषयत्वम् । शरीरादौ तत्सत्त्वेपि न दोषः । उपधेयसङ्करेपि उपाधेरसङ्करत्वात् । एवं कारणत्वावान्तरं, समवायिकारणत्वमसमवायिकारणत्वं निमित्तकारणत्वं च । समवायेन कार्याधारत्वमाद्यम् । तच्च द्रव्यमात्रवृत्ति, द्रव्यत्वस्यैव कार्यसमवायिकारणतावच्छेदकत्वात् । समवायैकार्थसमवायप्रत्यासत्त्या कारणत्वमसमवायिकारणत्वम् । एवं रूपरसगन्धस्पर्शस्नेहसांसिद्धिकद्रवत्वबुद्धिसुखदुःखेच्छाद्वेषप्रयत्नधर्माधर्मशब्देषु विशेषगुणत्वम् । तच्च स्वाश्रयव्यावृत्त्यौपाधिकावान्तरसामान्यवत्त्वम् । पृथिवी जलादिभ्यो भिद्यते पाकजरूपात् । तेज इतरेभ्यो भिद्यते शुक्लभास्वररूपात्, उष्णस्पर्शाद्वा इत्यादि, स्वाश्रयस्य व्यावर्त्तकतावच्छेदकत्वेनोपयुक्तमवान्तरजातिमत्त्वमस्तीति लक्षणसमन्वयः । एवं निरुच्यमानं व्याप्त्याद्यपीहोदाहरणम् । नन्वेवं पृथुबुध्नोदराकारवत्त्वगन्धवत्त्वगुणाश्रयत्वसास्नादिमत्त्वाद्युपाधिभेरव घटः पृथिवी द्रव्यं गौरित्यादिप्रतीत्युपपत्तेर्घटत्वादिजातौ किं मानमिति चेत् । उच्यते । कारणत्वकार्यत्वादयस्तावत्सावच्छिन्नास्तथा च चक्रकार्यतावच्छेदकतया गं-

न्धस्य कार्यमात्रस्य च कारणतावच्छेदकतया दानहननादिभिः पुण्यपापोत्पत्तेस्तत्कारणतावच्छेदककोटिप्रविष्टतया च घटत्वपृथिवीत्वद्रव्यत्वगोत्वादिकमावश्यकम्। उपाधेः कल्पतत्वेपि गौरवेणावच्छेदकत्वासम्भवाद्बाधकाभावे ऽवच्छेदकत्वं लघुधर्मएव प्रवर्त्तते इति सिद्धान्तात्। एवं बाधकाभावे ऽनुगते प्रतीत्यापि तत्सिद्धिः। स च बाधकसंग्रहः प्राचीनैरुक्तः। 'व्यक्तेरभेदस्तुल्यत्वं सङ्करो ऽथानवस्थितिः। रूपहानिरसम्बन्धो जातिबाधकसङ्ग्रह' इति। घटत्वात्कलशत्वं न पृथक् जातिः तद्व्यक्त्यभेदात्। द्रव्यत्वाद् गुणाश्रयत्वं न पृथक् जातिः, तुल्यव्यक्तिकत्वात्। शरीरत्वं न जातिः, पृथिवीत्वादिना सङ्करप्रसङ्गात्। परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयोरेकत्र समावेशः सङ्करः। पृथिवीत्वं विना तैजसादिशरीरे शरीरत्वं वर्तते, शरीरत्वं विना च घटादौ पृथिवीत्वं, तदुभयमस्मदादिशरीरे। सामान्यत्वं न जातिस्तत्रापि सामान्यस्वीकारे ऽनवस्थाऽऽत्माश्रयान्यतरापत्तेः। आकाशत्वं घटो वा न जाति, नित्यमेकमनेकसमवेतं सामान्यमिति रूपहानात्। अत एवाभावसास्नादिमत्त्वं च न जातिः। समवाय उक्तलक्षणाक्रान्तोपि न जातिः सम्बन्धविरहात्। सम्बन्धिभिन्नत्वे सति संबन्ध्याश्रयत्वस्यैव सम्बन्धत्वेन स्वरूपे सम्बन्धत्वव्यवहारस्य गौणत्वात्स्वरूपसमवाययोर्वृत्तित्वाभ्युपगमेपि न क्षतिः। तच्च सामान्यं त्रिविधं परमपरं परापरं च। सकलसामान्यव्यापकं परम्। सत्ता यथा। सामान्यान्तराऽव्यापकमपरम्। परिमाणभेदेन भिन्नेषु बाल्यकौमारादियुक्तशरीरेषु देवदत्तत्वादि। यस्य कस्य चित्सामान्यस्य व्यापकं कस्य चित् व्याप्यं चान्त्यम्। द्रव्यत्वादि यथा। पृथिवीत्वादेर्घटत्वादेर्व्यापकं सत्ताव्याप्यं च तदित्यन्यत्र विस्तरः॥

नित्यद्रव्यवृत्तयो ऽन्त्या विशेषाः ॥

समानजातीयरूपरसादिमत्परमाण्वादीनां परस्परभेदकं विना भेदनिर्णयासम्भवाद्भेदकत्वेन विशेषा अनुमीयन्ते । अनित्यद्रव्येषु स्वाश्रयेणैव भेदसम्भवात् । ते ऽत्र नेष्टा प्रमाणाभावात् । नित्यद्रव्यवृत्तित्वं तेषां व्यावर्त्तकान्तराभावे सत्यन्ते व्यावर्त्तकत्वेन स्वीक्रियमाणत्वादन्त्यत्वं चेति लक्षणसमन्वयः । यथा प्रजारक्षकत्वेन महाराज आवश्यकः स च स्वत एव स्वरक्षणसमर्थः । एवं विशेषाः स्वत एव व्यावृत्ता इति नानवस्था । शब्दसमवायिकारणतावच्छेदकतया चाकाशे तत्सिद्धिः । अष्टद्रव्यातिरिक्तद्रव्यत्वादेराकाशमात्रवृत्तित्वेपि गौरवेण कारणतावच्छेदकत्वासम्भवेन द्रव्यत्वादिजातिवत्तस्यावश्यकत्वादिति दिक् ॥

अयुतसिद्धानां सम्बन्धः समवायः ॥

विशेषणतान्यसम्बन्धेन यावदुभयसत्त्वं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ । यथा गुणगुणिनौ । पटोत्पत्तेः पूर्वं तन्तुसत्त्वादव्याप्तेर्वारणायोभयेति । वायुरूपाभावकालघटादेरयुतसिद्धत्ववारणाय विशेषणतान्येति । अभावस्य च विशेषणतैव सम्बन्ध इत्युक्तम् । कालो ऽपि विशेषणतयैव जगदाधार इति स्पष्टमन्यत्र । प्राञ्चस्तु विनाशक्षणपर्यन्तं ययोराश्रयाश्रयिभावस्तावयुतसिद्धौ । तावेवायुतसिद्धौ द्वौ विज्ञातव्यौ, ययोर्द्वयोरनश्यदेकमपराश्रितमेवावतिष्ठते । ते चावयवावयविनौ गुणगुणिनौ क्रियाक्रियावन्तौ जातिव्यक्ती विशेषनित्यद्रव्ये चेति । तन्तुपटादयो ऽवयवावयविनः । आश्रयनाशजन्यघटादिनाशस्थले नाशसमये घटादेरनाश्रितत्वाभ्युपगमो विनाशक्षणपर्यन्तमिति । तन्न । नित्यगुणतदाश्रययोरा-

त्मात्मत्वजात्योर्विशेषनित्यद्रव्ययोरव्याप्तेः । अयं समवायः तन्तुषु पटः समवेत इत्यादिप्रत्यक्षसिद्ध इति नैयायिकाः । वैशिषिकास्तु समवायो न प्रत्यक्षः यावदाश्रयप्रत्यक्षं विना सम्बन्धप्रत्यक्षासम्भवात् सम्बन्धप्रत्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् । अन्यथा घटौ संयुक्तौ इतिवत् सम्बन्धत्वं संयोगसमवायान्यतरत्वं तच्च संयोगसमवायभिन्नभिन्नत्वं, घटे रूपसमवाय इतिवत् आकाशे शब्दसमवाय इत्यपि प्रत्यक्षापत्तेः । एतेन संयोगप्रत्यक्षे एव यावदाश्रयप्रत्यक्षं हेतुर्लाघवात्, न तु सम्बन्धप्रत्यक्षमात्रे संयोगसमवायान्यतरत्वरूपसम्बन्धत्वस्य कार्यतावच्छेदककोटिप्रवेश गौरवादिति निरस्तम् । उक्तप्रत्यक्षापत्तेर्वारणाय तस्यावश्यकत्वात् । किं तु रूपादि घटादिसम्बन्धवद् तदाश्रितत्वादित्याद्यनुमानात्तत्सिद्धिः । न चाधाराधेयभावादिरेव रूपघटयोः सम्बन्धोस्त्विति शङ्क्यम् । घटनाशात् घटवृत्तिरूपरसादिनाशवत्तद्वृत्तिपटादेरभावस्य च नाशप्रसङ्गात् । घटध्वंसकालिकघटवृत्तिनाशत्वस्य घटनाशकार्यतावच्छेदकत्वपर्यवसानात् । समवायाभ्युपगमे च घटसमवेतनाशत्वमेवावच्छेदकमतो न दोषः । न च तवापि घटनाशाद् घटत्वनाशापत्तिः । भावनाशं प्रति जन्यत्वेन कारणत्वात् । एतेन सम्बन्धतया समवायकल्पने भूतलघटाभावादेरपि वैशिष्ट्याख्यसम्बन्धस्वीकारापत्तिरित्यपास्तम् । तत्र भावकार्यादिति रूपवान् घट इत्यादिविशिष्टप्रत्यक्षं तु सम्बन्धविषयत्वेपि तारतम्यमात्रेण सङ्गच्छते । अहं शरीरीत्यापादनाच्च दृष्टसंसर्गकप्रत्ययवदित्याहुः । मीमांसकास्तु गुणगुण्यादीनां तादात्म्यमेव नीलो घटश्चञ्चलः पृथक् मृदुर्घट इत्यभेदानुभवादतः समवायो निष्प्रमाणक इत्याहुः ॥ ननु शक्तिसाह-

श्यादयोपि पदार्थान्तरमपि सन्तीति कथं षडेव भावा इति । मैवम् । अविद्यारूपा वाचकत्वशक्तिस्तावदीश्वरेच्छारूपेत्युक्तम् । वन्हौ दाहानुकूला शक्तिस्तु कारणतारूपसामान्यमेव । न च मण्यादिप्रतिबन्धकसत्त्वे दाहापत्तिवारणाय प्रतिबन्धकाप्रनोद्यशक्तिस्वीकार आवश्यक इति वाच्यम् । मण्यभावादेरपि कारणत्वकल्पनया तन्निरासात् । नानृतं वदेदिति विधेयस्यानृतवचननिषेधरूपस्याभावस्य ऋत्वङ्गस्य पूर्वमीमांसायां ऋत्वधिकरणे व्युत्पादितत्वात् । सादृश्यं च तद्भिन्नत्वे सति तद्गतभूयोधर्मवत्त्वरूपं सामान्यमेवेति दिक् ॥

अभावो द्विधा संसर्गाभावो भेदश्च । संसर्गारोपजन्यप्रतीतिविषयाभाव आद्यः । भूतले घटो नेत्यारोप्यैव निषेधप्रतीतेः । स त्रिधा प्रागभावो ध्वंसो ऽत्यन्ताभावश्च । भविष्यतीति प्रतीतिविषयो विनाश्यभावः प्रागभावः । तस्य ध्वंसः प्रतियोगी । तद्ध्वंसश्च उभयकाले घटप्रागभावो नष्ट इति प्रतीतेः ॥ उत्पत्तिमानभावो ध्वंसः । घटध्वंसो जात इति प्रतीतेः । तत्प्रागभावश्च । घटस्तत्प्रागभावश्च उभयत्रापि ध्वंसो भविष्यतीति प्रतीतेः । स च न विनाशी, ध्वंसो नष्ट इति प्रतीत्यभावात् । व्यर्थध्वंसधाराकल्पनायां प्रमाणाभावाच्च । उत्पत्तिविनाशशून्यः संसर्गाभावो ऽत्यन्ताभावः । ह्रदे वन्हिर्नास्ति इति भूतलादौ घटापसरणोत्तरं तदानयनात्पूर्वं च प्रतीतस्य तस्य घटकाले सत्त्वेपि न प्रतीतिः । घटज्ञानेन प्रतिबन्धात् । प्रतियोगिदेशान्यदेशत्वस्यानतिप्रसञ्जकसम्बन्धत्वादित्याचार्याः । उत्पत्तिविनाशशीलः प्रतियोगिसमानाधिकरणस्तदीय एव तत्र संसर्गाभाव इत्यन्ये । स द्विधा एकधर्मिमात्रपर्याप्तधर्मावच्छिन्नप्रतियोगिताको ऽन्यश्च । घटत्वादि प्रत्येकपर्याप्तमेकस्मिन्नपि घट इति

प्रतीतेः । तदवच्छिन्न आद्यः । द्वित्वादि अनेकपर्याप्तम् । घटौ द्वाविति वदेको द्वावित्यप्रतीतेः । तदवच्छिन्न एकघटवति घटौ न स्त इति प्रतीतिविषयो ऽन्त्यः । न च प्रतियोगिमति कथमभाव इति वाच्यम् । पुरुषमात्रवति दण्डी पुरुषो नास्तीति प्रतीतेर्दण्डविशिष्टपुरुषाभावस्वीकारेण प्रतियोगितावच्छेदकावशिष्टस्यैवाभावविरोधित्वात् । न चेयं प्रतीतिर्दण्डाभावं पुरुषाभावं वा ऽवगाहते । केवलदण्डपुरुषवति तत्संयोगवति पुरुषे दण्डे च दण्डी पुरुषो नास्तीति अनुगतप्रतीतेरिति दिक् ॥ तादात्म्यारोपजन्यप्रतीतिविषयाभावो भेदः । घटः पटो नेत्यारोप्यैव तन्निरोधात् । सोपि घटः पटो न, पटो न घटपटाविति प्रतीतेः पूर्ववद् द्विधा । न च घटवति घटाभावो नास्ति घटो न घटभिन्न इति प्रतीतेरभावाभावोपि सिद्धयेत् । एवं सोपि नास्तीति प्रतीत्या तदभावोपीत्यनवस्थेति शङ्क्यम् । अत्यन्ताभावाभावः प्रतियोग्येव घटादिः । अन्योन्याभावाभावः प्रतियोगितावच्छेदकघटत्वादिरूप इति स्वीकारात् । ततोतिरेके प्रमाणाभावादिति प्राञ्चः । नव्यास्त्वभावत्वेन प्रतीतेर्घटादिप्रतियोगितदवच्छेदकयोः समानवृत्तिको ऽतिरिक्त एवात्यन्ताभावभेदयोरभावः । तदभावस्तु घटाभाव एवेति नानवस्था । एवं ध्वंसस्य प्रागभावः प्रागभावस्य ध्वंसश्चातिरिक्त एवेत्याहुः । नन्वधिकरणमेवास्तु कुतस्तदतिरिक्ततत्स्वीकारः कुतो वा तद्ग्रहणाय विशेषणतास्वीकारः । भूतले घटो नास्तीत्याधाराधेयभावस्याभेदेपि घटाभावे घटो नास्ति इतिवदुपपत्तेः । अत्यन्ताभावस्य नित्यत्ववादिना घटभून्यभूतले घटानयनोत्तरं तत्सम्बन्धाभावमात्रस्वीकारवदस्माभिस्तदा तदधिकरणे घटाभावत्वसम्बन्धो नास्तीत्यभ्युपेयम् । एतेन तदधिकरणे घटाभावो न वा । आद्ये घट-

कालेपि घटो नास्ति इत्यापत्तिः । अन्त्ये घटानयनात्प्राङ् नास्तीत्यनापत्तिरिति परास्तम् । तन्नातिरिक्ताभावे प्रमाणमिति चेत् । उच्यते । तत्त्वज्ञानिनां क्रियमाणकर्मभिर्धर्माधर्मौ नोत्पद्येते इति सर्वसिद्धम् । तत्कस्य हेतोः । मिथ्याज्ञानवासनारूप, कारणाभावादिति चेन्न । अनन्तामिथ्याज्ञानवासनानां हेतुतामपेक्ष्य प्राथमिकतत्त्वज्ञानव्यक्तिप्रागभावस्यैव हेतुत्वकल्पने लाघवात् । तथा च लाघवात् कारणत्वेन प्रागभावसिद्धिः । किं चान्यतरकर्मजसंयोगे कर्मणः संयोगं प्रति न समवायेन हेतुता, कर्मशून्ये तदुत्पत्तेर्व्यभिचारात् । नापि कालिकसम्बन्धेन, घटकर्मणा स्तम्भाकाशसंयोगापत्तेः।तस्मात्स्वजन्यसंयोगप्रागभाववता संसर्गेण कर्मणः कारणता वाच्येति प्रागभावसिद्धिः । एवमनेकतन्तुकपटादिस्थले तत्तत्तन्तुसंयोगानामपि न समवायेन हेतुता संयोगेभ्यो द्विमात्रानिष्टेभ्यः पटस्याधिकेषूत्पत्तेर्व्यभिचारात् । कालिकेन हेतुत्वे तूक्तातिप्रसङ्ग इत्युक्तरीत्या स्वजन्यपटप्रागभाववता संसर्गेण हेतुता वाच्येति तत्सिद्धिः । एवं दाहे मण्यभावः प्रतिबन्धकाभावतया कारणम् । तस्याधिकरणस्वरूपत्वे तावदधिकरणानां कारणत्वे गौरवात् । अभावव्यतिरेकेण कारणतावच्छेदकतयाधिकरणे दुर्वचत्वेन तदयोगाच्चात्यन्ताभावोपि लाघवाद् भिन्न आवश्यकः । एवमतिरिक्तध्वंसमन्तरेण मोक्षस्यैव दुर्वचत्वात्ध्वंसोप्यावश्यकः । तथाहि । न तावन्नित्यसुखाभिव्यक्तिर्मुक्तिः । सुखवदभिव्यक्तेर्नित्यत्वे इदानीमपि सत्त्वेन मुक्तिसंसारयोरविशेषप्रसङ्गात् । न च नित्यसुखाभिव्यक्तिर्मुक्तिसमये जायते मनसेति मतं साधु । जन्यभावस्य विनाशित्वनियमेनैकज्ञानव्यक्तिनाशे मुक्तिहानापत्तेः । अभिव्यक्तिपरम्परा च जन्यज्ञानत्वावच्छिन्ने शरीरस्य हेतुत्वेन तदभावान्न युक्ता । तस्मादात्यन्तिको दुःख-

ध्वंसो मुक्तिः। आत्यन्तिकत्वं च समानाधिकरणदुःखतत्प्रागभावाऽसमानकालिकत्वम्। इदानीं सुखदुःखध्वंसस्यास्मदीयदुःखप्रागभावसमानकालिकत्वात्स्वेत्यादि। इदानीमस्मदीयदुःखध्वंसस्य सुषुप्तिकाले दुःखसमानकालिकत्वसत्त्वात्प्रागभावेति। उपान्त्यदुःखध्वंसस्य तत्प्रागभावासमानकालिकत्वाद् दुःखेति। तादृशश्च मोक्षस्तत्त्वज्ञानेनात्मनि जन्यते। तद्यथा। तत्त्वज्ञानेन मिथ्याज्ञानवासनानिवृत्तौ रागद्वेषमोहानां निवृत्त्या कर्मान्तरेषु प्रवृत्तिरेव न, पूर्वसंस्कारात् प्रवृत्त्या कर्मोत्पत्तावपि नादृष्टोत्पत्तिः। अदृष्टहेतुमिथ्याज्ञानस्य तत्त्वज्ञानप्रागभावस्य वा अभावात्। तथा चोक्तं वाचस्पतिमिश्रैः। मिथ्याज्ञानसलिलावसिक्तायामात्मभूमौ धर्माधर्मावङ्कुरं जनयत इत्यादिना। प्राचीनादृष्टं च ज्ञानाग्निसहकृतयोगवशात्कायव्यूहेन युगपत् सर्वभोगान्नश्यति। तथा च पूर्वकर्मसमाप्तौ भोक्तव्यकर्मान्तराभावाज्जन्माभावे सिद्धे वर्तमानशरीरभोग्यसुखदुःखनाशसिद्धौ चात्यन्तिकदुःखनिवृत्तिरिति। तथा चाक्षपादीयं सूत्रम्। 'दुःखजन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनन्तरापायादपवर्गः' इति। ननु किं तत्त्वज्ञानं किंवा मिथ्याज्ञानं कथं वा तयोर्निवर्त्यनिवर्त्तकभावः। उच्यते। देहेन्द्रियादावनात्मन्यात्मत्वबुद्धिरेव मिथ्याज्ञानम्। तन्तु संसारिणामनादिप्रवाहागतं दुर्बुद्धिकल्पितकुतर्कात् दृढतरं जायते। तथा लौकायतिकोक्तयुक्त्या देहात्मवादे, नित्यात्मवादसाधकयुक्तिभिर्नित्याणुमनएवात्मेति पक्षे, सकलशरीरव्यापिदुःखाद्युपलब्धिहेतुभिः सकलदेहव्यापकत्वगादीन्द्रियसमुदायात्मपक्षे, इन्द्रियोपघातेपि बुद्धिसत्त्वमात्रेण सुखाद्युपलब्धेर्बुद्ध्यात्मवादे, तदभावेपि सुषुप्तौ सात्मकत्वव्यवहारात् प्राणात्मवादे। ततश्च तन्निरासार्थं पञ्चानां तेषामात्मतन्त्वे युगपदेव कस्य

चिदिष्टार्थे परस्य तद्विरोधात्तन्नाशाय च प्रवृत्त्यापत्त्या प्रवृत्तिनिवृत्त्योः सङ्करापत्तिरित्यादिको देहाद्व्यतिरिक्तव्यापकात्मनिर्णायक इतरेषां पक्षाणामाभासत्वनिर्णायकः श्रुतिस्मृतीतिहासानां तादृगात्मप्रतिपादकानां तादृगात्मप्रतिपादने तात्पर्यनिर्णायकश्च न्यायसमूहो ऽनुसंधेयः । तदनुसन्धानमेव च विचारः । स द्विधा श्रवणमननभेदात् । तत्र न्यायैर्निर्णीततात्पर्यकश्रुत्यादिभिरात्मनिर्णयः श्रवणम् । ततोप्युक्तवादिदुस्तर्कजालैरसम्भावनाविपरीतभावनोत्पत्तेस्तन्निवारकन्यायानुसन्धानं मननम् । ततश्च व्यासङ्गत्यागेन देहाद्व्यतिरिक्तात्माकारमनोनुसन्धानं निदिध्यासनम् । ततो यथा भूतदेहाद्व्यतिरिक्तात्मसाक्षात्कारस्तत्त्वज्ञानात्मको जायते ऽयं समूलं मिथ्याज्ञानमुन्मूलयति । विशेषदर्शनजन्यलौकिकसाक्षात्कारत्वेन भ्रमनिवर्तकत्वदर्शनात् । श्रुतिरप्येवमाह । 'तरति शोकमात्मवित्' 'आत्मा वा अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति मिथ्याज्ञाननाशः शोकतरणं तद्धेतुरात्मदर्शनं तद्धेतूनि श्रवणादीनि त्रीणि इति विवेकः । नन्वात्मतत्त्वसाक्षात्कारस्यैव मिथ्याज्ञाननाशकत्वे द्रव्यादिसर्वपदार्थप्रतिपादनं व्यर्थमिति चेन्न । तत्त्वज्ञानमन्तरेण तद्भिन्नत्वेनात्मज्ञानासम्भवात्परम्परोपयोगेन सार्थक्यात् । न्यायव्युत्पादकत्वेनाप्युपयोगाच्च । तच्चात्मज्ञानं भगवत्प्रसादमन्तरेण न भवतीति सोपि तत्त्वतो ज्ञेय उपास्यश्च । तथा च श्रुतिः । ' यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः । तथा शिवमविज्ञाय दुःखस्यान्तो भविष्यती 'ति । आचार्यैरप्युक्तम् । 'स हि तत्त्वतो ज्ञात आत्मसाक्षात्कारस्योपकरोती' ति । नन्वीश्वरे किम्मानम् । न प्रत्यक्षम् । तस्य परोक्षत्वात् । नापि क्षितिः सकर्तृका कार्यत्वात् घटवदिति अनुमानम्मानम् । परमाणावंशतो बाधा-

त् घटादावंशतः सिद्धसाधनाच्च अदृष्टद्वारा जीवकर्तृकत्वेन सिद्धसाधनाच्च उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वरूपकर्तृत्वेन कुलालादेर्हेतुतायाः सिद्धेश्च अनेकज्ञानादौ कारणतावच्छेदककल्पने गौरवापत्तेश्च कृतिमत्त्वस्यैव कर्तृपदार्थत्वाच्च कृधातूत्तरतृचस्तदर्थाश्रयवाचकत्वात् । अस्तु तर्हि कृतिमत्त्वेनैव हेतुतेति चेन्न । अनेककृतिषु कारणतावच्छेदकत्वेन गौरवात् तेन रूपेणापि हेतुत्वाऽसिद्धेः । किं चैवमीश्वरे ज्ञानेच्छयोरसंसिद्ध्यापत्तिः । श्रुतेस्तत्सिद्धिरिति चेत् । सुखस्यापि स्वीकारापत्तेः । आनन्दं ब्रह्मणो विद्वानिति श्रुतेः । न च वेदकर्तृत्वेनेश्वरसिद्धिः । तस्यानादित्वात् । ' शिवाद्या ऋषिपर्यन्ताः स्मर्तारो ऽस्य न कारका ' इति स्मृतेरिति चेत् । अत्रोच्यते । कुलालादिना ऽसंवलितमृदादिभिर्घटाद्यजननात्तत्र कुलालादेर्हेतुतेति सर्वसिद्धम् । तत्र कारणतावच्छेदकं न कुलालत्वादि जातिः । कुशलब्राह्मणादिभिरपि तज्जननात् । तत्र तत्सत्त्वेपि सङ्करापत्तेः । नोपाधिरपि, दुर्वचनात् । घटजनकस्य च दण्डादिसाधारणत्वात् । घटजनकत्वेन घटहेतुतायां असम्भवाच्च । कृतिमत्त्वेन हेतुतायाश्च प्रागेव निरासात् । तस्मादात्मत्वमेव कारणतावच्छेदकं परं तु अनेनेदमेतदर्थमहं करिष्यामीत्याद्यालोचनरूपज्ञानतादृशेच्छाप्रयत्नास्तद्व्यापारा अन्वयव्यतिरेकासिद्धाः । तान्विना कुलालादेर्घटाद्यनुत्पत्तेः । अतो द्व्यणुकाद्युपादानगोचरपरमाणुभिर्द्व्यणुकं करिष्यामि इत्यादिकज्ञानादिमानात्मा तत्कर्त्ता वाच्यः । स च सृष्ट्यादौ शरीराद्यभावात्तादृशजन्यज्ञानाऽसम्भवान्नित्यज्ञानवान् सिद्ध्यतीश्वर इत्युच्यते । एवं च कार्यमात्रकारणतावच्छेदकत्वेनैव जीवेश्वरसाधारणात्मत्वजातिसिद्धिरिति वयं विभावयामः । तथा च जन्य-

कृत्यजन्यकार्यमात्मजन्यं कार्यत्वात् घटवदित्यनुमानमेव तत्र प्रमाणम् । घटादावंशतः सिद्धसाधनवारणायाजन्यान्तं पक्षे विशेषणम् । पक्षतावच्छेदकावच्छेदेन साध्यसिद्धावुद्देश्यायामस्यादूषणत्वे च तन्नोपादेयम् । एवं चेश्वरस्य सर्वज्ञतापि सिध्यति । केषां चित्पदार्थानां फलत्वेन केषां चित्सृज्यत्वेन केषां चिद्धेतुत्वेन केषां चिदवच्छेदकत्वेन विषयीकरणादिति निरूपितमस्माभिस्तर्करत्ने । एवं वेदकर्तृत्वेनापि तत्सिद्धिः । 'तस्माद्यज्ञात्सर्वहुत ऋचः सामानि जज्ञिरे 'इति श्रुतेः । वेदः सकर्तृकः वाक्यत्वात् भारतादिवदित्यनुमानाच्च वेदस्य सकर्तृकत्वावगमात् । स्मर्त्तार इतिस्मृतिरप्युक्तार्थपरा, स्मृतिर्यथा स्वसमानविषयवाक्यापेक्षा तथा वेदः कल्पान्तरीयानुपूर्वीसदृशानुपूर्वीमानित्यन्यत्र निर्णीतत्वादित्यलं विस्तरः । तस्य चेश्वरस्योपासना श्रुतिस्मृत्याद्यनुसारेणानेकधा महद्भ्योवगन्तव्येति पल्लवेनालम् ॥

बालबुद्धिप्रकाशार्थं पदार्थानां प्रदीपिका ॥
रङ्गोजिभट्टपुत्रेण कोण्डभट्टेन निर्मिता ॥ १ ॥

इति श्रीमत्पदवाक्यप्रमाणपारावारपारीणरङ्गोजिभट्टात्मज-
कोण्डभट्टकृता पदार्थदीपिका समाप्ता ॥

बनारस संस्कृतसीरीज़

अर्थात्

वाराणसीसंस्कृतपुस्तकावली ।

तत्र मुद्रिता ग्रन्थाः ।

	रु०	आ०
सिद्धान्ततत्त्वविवेकः खण्डानि ५	५	०
अर्थसङ्ग्रहः अंग्रेजीभाषानुवादसहितः	१	०
तन्त्रवार्त्तिकम् खण्डानि १०	१०	०
कात्यायनमहर्षिप्रणीतं शुक्लयजुःप्रातिशाख्यं सभाष्यं खण्डानि ६	६	०
सांख्यकारिका चन्द्रिकाटीकागौडपादभाष्यसहिता	१	०
वाक्यपदीयं खण्डानि ३	३	०
रसगङ्गाधरः खण्डानि ८	८	०
परिभाषावृत्तिः खण्डे २	२	०
वैशेषिकदर्शनं किरणावलीटीकासंवलितप्रशस्तपादप्रणीतभाष्यसहितम् खण्डे २	२	०
शिक्षासङ्ग्रहः खण्डानि ५	५	०
नैष्कर्म्यसिद्धिः खण्डानि ३	३	०
महर्षिकात्यायनप्रणीतं शुक्लयजुस्सर्वानुक्रमसूत्रम् सभाष्यं खण्डानि ३	३	०
ऋग्वेदीयशौनकप्रातिशाख्यं सभाष्यम्	१	०
(बृहत्) वैयाकरणभूषणम् पदार्थदीपिका च सहितम् खण्डानि ४	४	०
विवरणोपन्यासः (यन्त्रस्थः)	०	०
न्यायलीलावती (यन्त्रस्था)	०	०

इन से अधिक अनेक प्रकारकी संस्कृत हिन्दी और अंग्रेजी आदि पुस्तकैं हमारे यहां मिलती हैं जिनको अपेक्षित हो नीचे लिखेहुए पतेपर पत्र भेजैं ॥

व्रजभूषण दास और कम्पनी

चांदनीचौक के उत्तर नई सड़क बनारस ।

विज्ञापनम् ।

बनारससंस्कृतसीरीज़नाम्नी
वाराणसेयसंस्कृतपुस्तकावली ।

—:o:—

इयं पुस्तकावली खण्डशो मुद्रिता भवति । अस्यां संस्कृतभाषानिबद्धा बहवः प्रचीना दुर्लभा उत्तमोत्तमाः कैचिदङ्गलभाषानुवादसहिताश्च ग्रन्था मुद्रिता भवन्ति । तांश्च ग्रन्थान् काशिकराजकीयसंस्कृतपाठशालीयपण्डिता अन्ये ऽपि विद्वांसः शोधयन्ति । यैर्ग्राहकमहाशयैरियं पुस्तकावली नियमेनाविच्छेदेन संग्राह्या तैस्तदेकैकस्य खण्डस्य ॥।) मूल्यं प्रापणव्ययश्च =) देयः । अन्यैर्महाशयैर्यैः कानिचित् खण्डानि संग्राह्याणि तैश्च प्रत्येकं खण्डानां १) मूल्यं प्रापणव्ययश्च =) देय इति ॥

व्रजभूषणदास और कम्पनी
चांदनीचौक के उत्तर नई सड़क
बनारस ।